THE

KASHI SANSKRIT SERIES

(*HARIDÂS SANSKRIT GRANTHAMÂLÂ*)

NO. 93.

(Karmakānda Section No 7.)

ĀPASTAMBA DHARMASŪTRA

WITH THE COMMENTARY UJJWALA

By

S'RI HARADATTA MIS'RA

Edited with–

Notes, Introduction Word Index, Etc,

by

VĒDAVISĀRADA, MĪMĀMSĀKĒSARĪ,

PANDIT. A. CHINNASWĀMĪ S'ĀSTRĪ

Professor, Benares Hindu University

and

MĪMĀMSĀSĪROMANĪ

Pandit. A. Ramanatha S'astri

Mīmāmsādhyāpaka Sanskrit College, Tirupati.

PRINTED–PUBLISHED & SOLD BY

JAI KRISHNA DÂS HARIDÂS GUPTA

The Chowkhamba Sanskrit Series Office,

Benares City.

1932

[*Registered According to Act XXV.*

All Rights Reserved by the Publisher]

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिज़पुस्तकमालायाः
९३
कर्मकाण्डविभागे (७) सप्तमं पुष्पम् ।

आपस्तम्बधर्मसूत्रम् ॥

श्रीमद्धरदत्तमिश्रविरचितया
उज्ज्वलाख्यया वृत्त्या संवलितम् ।

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन
"वेदविशारदेन, मीमांसाकेसरिणा"
पण्डितप्रवरेण श्रीचिन्नस्वामिशास्त्रिणा

श्रीपरपुरीविराजमानश्रीवेङ्कटेश संस्कृतमहाविद्यालये पूर्वमीमांसाध्यापकेन,
मीमांसाशिरोमणिना पं० श्र. रामनाथशास्त्रिणा च
टिप्पण्यादिभिस्संयोज्य संशोधितम् ।

प्रकाशकः—
जयकृष्णदास-हरिदास गुप्तः—
चौखम्बा-संस्कृत-सीरिज़ आफिस,
बनारस सिटी ।

सं० १९८९

राजकीयनियमानुसारेणास्य सर्वेऽधिकारा प्रकाशकेन स्वायत्तीकृताः ।

इस कार्यालय द्वारा "काशीसंस्कृतसीरिज" के अलावा और भी ३ सीरिज यथा "चौखम्बासंस्कृतसीरिज" "बनारससंस्कृतसीरिज" "हरिदाससंस्कृतसीरिज" ग्रन्थ-मालायें निकलती हैं तथा इन ४ सीरिजों के पश्चात् और भी विविध शास्त्र की पुस्तकें प्रकाशित की गई हैं तथा अन्य सब स्थानों के छपे हुए संस्कृत तथा भाषा-भाष्य के ग्रन्थ विक्रयार्थ प्रस्तुत रहते हैं, सूचीपत्र पृथक् मंगवाकर देखें। इसके अलावा हमारे यहां सर्व प्रकार की संस्कृत, हिन्दी, अङ्गेजी की सुन्दर छपाई होती है, परीक्षा प्रार्थनीय है॥

पत्रादि प्रेषणस्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

"चौखम्बा संस्कृतसीरिज़" आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी।

श्रीगणेशाय नमः ॥

भूमिका ॥

इदमिदानीं श्रीमदापस्तम्बमहर्षिप्रणीतं धर्मसूत्रं श्रीमिश्रहरदत्तप्रणीतया उज्वलाख्यया वृत्त्या समुज्वलितं मुद्रयित्वा प्रकाशं प्रापय्य प्रेक्षावतां चक्षुर्गोचरतामापाद्यते । ग्रन्थोऽयं बहुत्र बहुधा मुद्रितोऽपि एतर्हि दौर्लभ्यमेवाऽऽसाद्य एतदधीतिबोधाचरणप्रचारकाणा छात्राणामध्यापयितॄणां च कामपि कष्टामेव दशामापादयन्नवर्तत । तदिदं दुःखं दूरीकर्तुकामेन चौखम्बासंस्कृतपुस्तकालयाधिपतिना सुरभारतीसेवैनकफलमात्मजीवितमापादयता श्रेष्ठिवर्येण श्रीजयकृष्णदासगुप्तमहोदयेन ग्रन्थस्याऽस्य पुनस्संस्करणे कृतमतीभूय एतत्संशोधनार्थमावामभ्यर्थितौ । आवाभ्यामपि तच्चिन्तितं साधु मन्वानाभ्यां कार्यमेतत्स्वीकृत्य, अध्ययनाध्यापनाद्यवशिष्टेऽल्पीयसि काले यथामति परिशोध्य प्रकाशं नीतोऽयं ग्रन्थः ।

एतद्ग्रन्थसंशोधनार्थं अधोङ्कितान्यादर्शपुस्तकानि समुपयोजितानि—

(१) कुम्भघोणे नागराक्षरेषु मुद्रितं मदीयं पुस्तकमेकम् ।

(२) मुम्बय्यां Dr बूलर् महाशयेन मुद्रितं विश्वविद्यालयीयं पुस्तकं द्वितीयम् ।

(३) अस्मन्मातुलगृहादानीतं ग्रन्थाक्षरैस्तालपत्रेषु लिखितं तृतीयम् ।

(४) पण्डितप्रवरश्रीविद्याधरशर्ममहोदयानां हस्तलिखितं पुस्तकं चतुर्थम् ।

(५) मैसूरपुरे देवनागराक्षरेषु मुद्रितं सरस्वतीभवनाल्लब्धं पुस्तकं पञ्चमम् ।

(६) महीशूरपुर एव तैलङ्गाक्षरेषु मुद्रितं षष्ठम् ।

(७) दक्षिणदेशस्थसुन्दरगिरि समाख्यग्राम (नल्लूर्) वास्तव्यानां श्रीमतां पं० कल्याणसुन्दरशास्त्रिणां ग्रन्थाक्षरैस्तालपत्रेषु लिखितं सप्तमम् ।

(८) श्रीमतामाचार्यध्रुवमहोदयाना पुस्तकमांग्लभाषानुवादरूपमष्टमम् ।

एतत्पुस्तकाष्टकमवलम्ब्य संशोध्य मुद्रितमपीदं पुस्तकमन्ततः पुरुषस्वभावसुलभया कयाचिदशुद्धिसन्तत्याऽपरित्यक्तमेव वर्वर्तीति तदपनुत्तयेऽशुद्धसंशोधनं ग्रन्थान्ते सन्नियोजितम् । प्रथमप्रश्नीयस्याऽष्टमपटलात्मकस्याऽध्यात्मपटलस्याऽपरा काचिद्व्याख्या श्रीमच्छङ्करभगवत्पादाचार्यप्राणीता अनन्तशयनग्रन्थमालायां पूर्वं मुद्रिताऽपि अध्येतृसौकर्यार्थमत्रैवोज्वलया साकं पुनर्मुद्रिता । यद्यपि व्याख्याया अस्याः शङ्करभगवत्पादीयत्वेऽत्रैव तथोल्लेखनमृते नाऽन्यत्किञ्चन प्रमाणमुपलभ्यते, नाऽपि तदीयव्याख्याशैल्याऽन्यत्र स्थितया सहेयं संवदति, तथाऽपि यावत्तदनुरोधि विरोधि वा प्रमाणमुपलभामहे तावदस्मिन्विषये जोषंभावमेव शरणं समुचितं मन्वानौ तूष्णीमास्वहे ।

सूत्रप्रणेतुः श्रीमदापस्तम्बमहर्षेः श्रीमिश्रहरदत्ताचार्यस्य चेतिवृत्तविषये यदुक्तमस्माभिरापस्तम्बगृह्यसूत्रभूमिकायां, न ततोऽधिकं विशेषं वक्तुं पार्यतेऽस्मद्धस्तगतामैतिह्यासिकसामग्रीमवलम्ब्य, परन्तु—हरदत्ताचार्याः मद्रदेशान्तर्गतचोलदेशनिवासिनः द्राविडभाषाभाषिणश्चेत्यवगम्यते तदीयैरेव वचनैः । ते हि—'यथावर्षं प्रजा दानं दूरेदर्शनं मनोजवता' (आप. धर्म. २-२३-७) इति सूत्रव्याख्यानावसरे दूरदर्शनोदाहरणार्थं यस्य कस्यचिद्देशस्योपादाने प्रसक्ते, 'चोलेष्वस्थितास्तदैव हिमवन्तं दिदृक्षेरन्' इति चोलदेशमेवोपाददते । एवं 'स्त्रीभ्यस्सर्ववर्णेभ्यः' (आप. धर्म. २-२९-१६) इति सूत्रे 'द्राविडाः कन्याः मेषस्थे सवितर्यादित्यपूजामाचरन्ती'ति द्राविडाचारमेव प्रमाणयन्ति । एवमेव गौतमधर्मसूत्रव्याख्यायां मिताक्षरायामपि(१) 'बालदेशान्तरितप्रव्रजितानामसपिण्डानां सद्यश्शौचम्' (गौ. ध. १४-४४) इत्याशौचप्रकरणस्थं सूत्रं व्याचक्षाणाः 'अनुष्ठानमपि चोलदेशे प्रायेणैवम्'(२) इति चोलदेशाचारमेव प्रमाणयन्ति । एवं तत्रैव 'मौञ्जी ज्या मौर्वी मेखला क्रमेण'

(१) इमे एव हरदत्ताचार्याः गौतमधर्मसूत्रव्याख्यातार इति निरूपितमापस्तम्बगृह्यसूत्रभूमिकायाम् । तत् ततोऽवगन्तव्यम् ।

(२) गौतमधर्मसूत्रव्याख्यायां मिताक्षरायां मद्रपुरे तैलङ्गाक्षरमुद्रितायां ११९ पृष्ठे २३ पङ्क्तौ द्रष्टव्यम् ।

(गौ. ध. १–१५)ति सूत्रे(१) 'मूर्वा आरण्य ओषधिविशेषः, यस्याऽरत्निप्रमाणानि पत्राणि द्व्यङ्गुलविस्ताराणि, मरल् इति द्राविडभाषायां प्रसिद्धि'रिति,(२) 'कुण्डाशी' (गौ. ध. (१५–१८) इति सूत्रे, 'किलासः त्वग्दोषः तेमल् इति द्राविडभाषाया प्रसिद्धः' इति च द्राविडीमेव प्रसिद्धिमुपाददाना इमे आत्मनो द्राविडदेशनिवासित्व द्राविडभाषाभाषित्वञ्च स्पष्टमेवाऽवगमयन्ति ।

उज्वलानाकुलयोः पौर्वापर्यालोचनायां प्रथममनाकुला तत उज्वलेत्यवगम्यते, यत उज्वलायां बहुत्र "तस्यापि प्रयोगो गृह्य एवोक्तः । 'प्रपञ्चितमेतत् गृह्ये' "वयं तु न तथेति गृह्य एवाऽवोचाम" 'एतत् गृह्ये व्याख्यातम् , (आप. ध. पृ. ५१, ७२, २०८) इति व्यपदिष्टं तैः । अतो यथा मूलभूतयोर्गृह्यधर्मसूत्रग्रन्थयोः पौर्वापर्य, एवमेव तद्वृत्त्योरनाकुलोज्वलयोरपीति प्रतीयते–इत्येतावदाधिकमत्र विवक्षितम् ।

एतन्मुद्रणविषये पुस्तकप्रदानेन, पुस्तकालयीयं नियममप्यविगणय्य यावन्मुद्रणमस्मद्धस्त एव पुस्तकस्याऽवस्थापनेन चाऽस्मान् सुदूरमनुगृहीतवतां श्रीमतामाचार्यध्रुवमहोदयानां, श्रीमतां पण्डितप्रकाण्डगोपीनाथकविराजमहोदयानां, अन्येषाञ्च विबुधवरेण्यानां विषयेऽत्यन्तमधमर्णावावा तान् प्रति कार्तज्ञमतितरामाविष्कुर्वहे ।

एवं सुरभारतीसमुज्जीवनबद्धपरिकरं श्रीजयकृष्णदासहरिदासगुप्तमहोदयं श्रेष्ठिवर्यं प्रति बह्वीराशिषः प्रयुञ्ज्वहे ।

इतः पूर्वतनान्यदसीयानि संस्करणान्यपेक्ष्य संस्करणेऽस्मिन् केनाऽपि चन वैजात्येन तादृश्या च छात्रोपकृत्या भाव्यमिति संकल्पेनाऽऽवाभ्यामत्र यतितम् । तत्राऽऽवां प्राप्तसाफल्यौ न वेति निर्णये मनीषिमनीषैव निकषोपलः

इति सर्वं शिवम् ॥

वाराणसी
चैत्रकृष्णनवमी सं० १९८८
३०–३–१९३२

सधोजनवशंवदौ
अ. चिन्नस्वामिशास्त्री
अ. रामनाथशास्त्री च

---

१. २. तैलङ्गाक्षरमुद्रितमिताक्षरापुस्तके यथाक्रमं ४,१६, १२९ २३, पृष्ठे द्रष्टव्यम् ।

॥ श्रीः ॥

आपस्तम्बधर्मसूत्रीयविषयानुक्रमणिका ॥

विषयाः—	पृष्ठम्—
प्रथमप्रश्ने-	
प्रथमकण्डिकायाम्—	
धर्मप्रमाणानि ।	३
चातुर्वर्ण्यम् ।	,,
तेषां जन्मतो ज्यैष्ठ्यम् ।	४
वर्णधर्माः ।	५
उपनयनविधिः ।	७
विद्वानेवोपनेता ।	,,
उपनयनकालः ।	,,
व्रात्यसंस्कारः	९
प्रथमप्रश्ने-	
द्वितीयकण्डिकायाम्—	
व्रात्यसंस्कारः ।	११
ब्रह्मचारिनियमाः ।	१३
दण्डाजिनमेखलादिकम् ।	,,
ब्रह्मचारिधर्माः ।	१७
प्रथमप्रश्ने-	
तृतीयचतुर्थयोः कण्डिकयोः—	
ब्रह्मचारिनियमाः ।	१९
प्रथमप्रश्ने-	
पञ्चमकण्डिकायाम्—	
अभिवादनम् ।	२१
पादोपसंग्रहणम् ।	२३
ब्रह्मचारिनियमाः ।	२५

विषयाः—	पृष्ठम्—
प्रथमप्रश्ने-	
षष्ठकण्डिकायाम्—	
ब्रह्मचारिनियमाः ।	२७
प्रथमप्रश्ने-	
सप्तमकण्डिकायाम्—	
ब्रह्मचारिधर्माः ।	४१
स्नातकधर्माः ।	४५
प्रथमप्रश्ने-	
अष्टमकण्डिकायाम्—	
ब्राह्मचारिधर्माः ।	४७
अनध्यायाः	५१
प्रथमप्रश्ने-	
नवमकण्डिकायाम्—	
नैमित्तिकानध्यायः ।	५३
प्रथमप्रश्ने-	
दशमकण्डिकायाम्—	
अनध्यायाः ।	५७
प्रथमप्रश्ने-	
एकादशकण्डिकायाम् —	
अनध्यायाः ।	६१
प्रथमप्रश्ने-	
द्वादशकण्डिकायाम् —	
नित्यस्वाध्यायाः ।	६९
पञ्च महायज्ञाः ।	७१
प्रथमप्रश्ने-	
त्रयोदशकण्डिकायाम्—	
पञ्चयज्ञादि ।	७३
ओङ्कारप्रशंसा ।	७५

विषयाः—	पृष्ठम् ।
प्रथमप्रश्ने-	
चतुर्दशकण्डिकायाम्—	
नित्यकर्माणि ।	७७
गुरूपसंग्रहणम् ।	७८
अभिवाद्याः ।	७९
अभिवादनविधिः ।	८०
कुशलप्रश्नः ।	८१
प्रथमप्रश्ने-	
पञ्चदशकण्डिकायाम्—	
आचमनविधिः ।	८५
प्रथमप्रश्ने-	
षोडशकण्डिकायाम्—	
आचमनविधिः ।	९१
अभोज्यानि ।	९३
क्वचित् भोजननिषेधः ।	९५
प्रथमप्रश्ने-	
सप्तदशकण्डिकायाम्—	
अभोज्यान्नानि ।	९७
अभक्ष्याणि ।	९९
प्रथमप्रश्ने-	
अष्टादशकण्डिकायाम्—	
अनापद्वृत्तिः ।	१०३
अभोज्यान्नाः ।	१०५
भोज्यान्नाः ।	१०७
प्रथमप्रश्ने-	
एकोनविंशकण्डिकायाम्—	
भोज्यान्नाः ।	१०९
प्रथमप्रश्ने-	
विंशतितमकण्डिकायाम्—	
लौकिकप्रयोजनानपेक्षणैव धर्मानुष्ठानम् ।	११२
धर्मलक्षणम् ।	११३

विषयाः—	पृष्ठम् ।
अपण्यानि ।	११५
प्रथमप्रश्ने-	
एकविंशकण्डिकायाम्—	
पतनीयानि ।	११७
अशुचिकराणि ।	११९
प्रथमप्रश्ने-	
द्वाविंशकण्डिकायाम्—	
अध्यात्मपटलम् ।	१२१
आत्मज्ञानोपायाः ।	१२३
आत्मलाभश्रैष्ठ्यम् ।	१२४
आत्मज्ञानप्रशंसा ।	१२५
आत्मज्ञानसंपादनम् ।	१२९
आत्मस्वरूपम् ।	१३१
प्रथमप्रश्ने-	
त्रयोविंशकण्डिकायाम्—	
आत्मज्ञानफलम् ।	१३३
भूतदाक्षीया दोषाः ।	१३६
आत्मलाभयोगाः ।	१३७
प्रथमप्रश्ने-	
चतुर्विंशकण्डिकायाम्—	
क्षत्रियवधप्रायश्चित्तम् ।	१४०
ब्रह्महत्याप्रायश्चित्तम् ।	१४१
ब्रह्मघ्नो वृत्तिः ।	१४३
सुरापानप्रायश्चित्तम् ।	१४५
गुरुदारगमनप्रायश्चित्तम् ।	,,
प्रथमप्रश्ने-	
पञ्चविंशकण्डिकायाम्—	
स्तेयादिप्रायश्चित्तम् ।	१४७
प्रथमप्रश्ने-	
षड्विंशकण्डिकायाम्—	
धेनुहननप्रायश्चित्तम् ।	१४८
अपतनीयप्रायश्चित्तम् ।	१४९

विषयाः—	पृष्ठम् ।
प्रथमप्रश्ने--	
सप्तविंशकण्डिकायाम्—	
अपतनीयप्रायश्चित्तम् ।	१९३
प्रथमप्रश्ने-	
अष्टाविंशकण्डिकायाम्—	
अपतनीयप्रायश्चित्तम् ।	१९७
भ्रूणहत्याप्रायश्चित्तम् ।	१९९
प्रथमप्रश्ने-	
एकोनत्रिंशकण्डिकायाम्—	
पतितधर्माः ।	१६१
प्रथमप्रश्ने-	
त्रिंशदादिषु तिसृषु कण्डिकासु —	
स्नातकधर्माः ।	१७५

इति प्रथमप्रश्नविषयाः ॥

अथ द्वितीयप्रश्नविषयाः ॥

द्वितीयप्रश्ने-	
थमद्वितीययोः कण्डिकयोः —	
गृहस्थधर्माः ।	१७९
द्वितीयप्रश्ने-	
तृतीयकण्डिकायाम्—	
वैश्वदेवम् ।	१८७
वैश्वदेवबलिः ।	१८९
द्वितीयप्रश्ने-	
चतुर्थकण्डिकायाम्—	
वैश्वदेवबलिः ।	१९१
गृहस्थधर्माः ।	१९३
द्वितीयप्रश्ने-	
पञ्चमकण्डिकायाम्—	
गृहस्थधर्माः ।	१९७
द्वितीयप्रश्ने-	
षष्ठादिषु चतसृषु कण्डिकासु —	
अतिथिपूजा ।	२०१
द्वितीयप्रश्ने-	
दशमकण्डिकायाम्—	
ब्राह्मणादिवृत्तिः ।	२१५
अवध्याः ।	२१६
दण्डप्रणयनम् ।	२१७
द्वितीयप्रश्ने-	
एकादशकण्डिकायाम्—	
मार्गप्रदानम् ।	२१८
द्वितीयविवाहः ।	२१९
असगोत्राविवाहनिषेधः ।	२२१
विवाहभेदाः ।	२२३
द्वितीयप्रश्ने-	
द्वादशकण्डिकायाम्—	
अभिनिष्क्रान्तादिप्रायश्चित्तम् ।	२२५
द्वितीयप्रश्ने-	
त्रयोदशकण्डिकायाम्—	
क्षीरक्षणम् ।	२२९
पुत्रस्य दानादिनिषेधः ।	२३१
दायभागः ।	२३३
द्वितीयप्रश्ने-	
चतुर्दशकण्डिकायाम्—	
दायविभागः ।	२३५
द्वादश पुत्राः ।	२३७

विषयाः—	पृष्ठम् ।
द्वितीयप्रश्ने-	
पञ्चदशकण्डिकायाम्—	
प्रेतोदकदानम् ।	२४६
अहविष्यहोमः ।	२४७
द्वितीयप्रश्ने-	
षोडशकण्डिकायाम्—	
श्राद्धकल्पः ।	२६१
द्वितीयप्रश्ने-	
सप्तदशकण्डिकायाम्—	
श्राद्धकल्पः ।	२६६
तस्य कालः ।	,,
श्राद्धीयब्राह्मण- ।	२६७
द्वितीयप्रश्ने-	
अष्टादशकण्डिकायाम्—	
नित्यश्राद्धम् ।	२६१
द्वितीयप्रश्ने-	
एकोनविंशकण्डिकायाम्—	
पुष्ट्यर्थप्रयोगः ।	२६३
पुष्टिकामप्रयोग- ।	२६५
द्वितीयप्रश्ने-	
विंशकण्डिकायाम्—	
पुष्ट्यर्थप्रयोगः ।	२६७
द्वितीयप्रश्ने-	
एकविंशकण्डिकायाम्—	
आश्रमाः ।	२६९
सन्यासिधर्माः ।	२७१
वानप्रस्थाश्रमः ।	२७३

विषयाः—	पृष्ठम् ।
द्वितीयप्रश्ने-	
द्वाविंशकण्डिकायाम्—	
वानप्रस्थधर्माः ।	२७५
ब्रह्मचर्यादिप्रशंसा ।	२७७
द्वितीयप्रश्ने-	
त्रयोविंशकण्डिकायाम्—	
गार्हस्थ्यश्रैष्ठ्यम् ।	२७९
द्वितीयप्रश्ने-	
चतुर्विंशकण्डिकायाम्—	
गार्हस्थ्यश्रैष्ठ्यम् ।	२८१
द्वितीयप्रश्ने-	
पञ्चविंशकण्डिकाम्—	
राजधर्माः ।	२८६
द्वितीयप्रश्ने-	
षड्विंशकण्डिकायाम्—	
राजधर्माः ।	२८७
नियोगविधिः ।	२८९
द्वितीयप्रश्ने-	
सप्तविंशकण्डिकायाम्—	
परस्त्रीगमनप्रायश्चित्तम् ।	२९१
द्वितीयप्रश्ने-	
अष्टाविंशकण्डिकायाम्—	
दण्डानर्हा- ।	२९६
द्वितीयप्रश्ने-	
एकोनत्रिंशकण्डिकायाम्—	
साक्ष्यविधिः ।	२९७
धर्मलक्षणम् ।	२९९

इति द्वितीयप्रश्नविषयाः ।

॥ श्रीः ॥

शिवाभ्यां नमः ॥

आपस्तम्बमहर्षिप्रणीतं

धर्मसूत्रम् ॥

श्रीहरदत्तविरचितया उज्ज्वलाख्यया वृत्त्या सहितम् ॥

प्रथमः प्रश्नः ॥

(१)प्रणिपत्य महादेव हरदत्तेन धीमता ।
धर्माख्यप्रश्नयोरेषा क्रियते वृत्तिरुज्ज्वला ॥ १ ॥

अथातस्सामयाचारिकान् धर्मान् व्याख्यास्यामः ॥ १ ॥

अथशब्द आनन्तर्ये । अतश्शब्दो हेतौ । उक्तानि श्रौतानि गार्ह्याणि च कर्माणि । तानि च वक्ष्यमाणान्धर्मानपेक्षन्ते । कथम् ? आचान्तेन कर्म कर्तव्यं, शुचिना कर्तव्य'मिति वचनादाचमनशौचादीनपेक्षन्ते ।

(२)'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' ।

इति वचनात् सन्ध्यावन्दनम् । एव 'अशुचिकरानिर्वेषः,'(३) 'द्विजातिकर्मभ्यो हानिः पतनम्' इति वचनात् ब्रह्महत्यादिप्रायश्चित्तानि च । एवमन्येष्वपि यथासम्भवमपेक्षा द्रष्टव्या । अतस्तदनन्तरं सामयाचारिकान् धर्मान् व्याख्यास्याम. । पौरुषेयी व्यवस्था समय' । स च त्रिविधः—विधिर्नियमः प्रतिषेधश्चेति । तत्र प्रवृत्तिप्रयोजनो विधिः—(४)'सन्ध्योश्च

---

१. मातामहमहाशल महस्तदपितामहम् ।
कारण जगता वन्दे कण्ठादुपरि वारणम् ॥ १ ॥
इत्यधिक पाठ· क० पु० ।

२. दक्षस्मृ० अ० २ श्लो २९ ' यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् ' इति तस्योत्तरार्धम् ।

३ गौ० ध० २१. ४. "अशुचेर्द्विजाती"ति. घ. पु ४. आप० ध० १. ३०. ८.

बहिर्ग्रामादासनं वाऽऽनञ्चे'त्यादिः। निवृत्तिप्रयोजनावितरौ। (१)'प्राङ्मुखोऽश्नानि भुञ्जीते'ति नियमविधिः। क्षुदुपघातार्थो भोजने प्रवृत्तिः। शक्यं च (२)यत्किञ्चिद्दिङ्मुखेनापि भुञ्जानेन क्षुदुपहन्तुम्। तत्र नियमः क्रियते-प्राङ्मुख एव भुञ्जीत, न दक्षिणादिमुख इति। (३)परिसङ्ख्या तु नियमस्यैव कियानपि भेदः। एवं द्रव्यार्जने रागाप्रवृत्तं प्रति नियम क्रियते-'याजनाध्यापनप्रतिग्रहैरेव ब्राह्मणो द्रव्यमार्जयेत्, न कृषिवाणिज्यादिने'ति। (४)'ब्राह्मणस्य गोरिति पदोपस्पर्शन वर्जये'दित्यादिः प्रतिषेधः। समयबला आचारास्समयाचारा तेषु भवा. सामयाचारिकी। एवम्भूतान् धर्मानिति। (५)कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः। तद्धेतुभूतकर्मव्याख्यानमेव तद्व्याख्यानम्। तत्र विधिषु तावद्विषयानुष्ठानाद्धर्म इति नास्ति विप्रतिपत्तिः। नियमेष्वपि (६)नियमानुष्ठानाद्धर्म, प्रतिषेधेष्वपि(७)न अर्थानुष्ठानाद्धर्म इति केचित्। अत एव धर्मानित्यविशेषेणाह।

अन्ये तु-विधिष्वेव धर्मः, इतरयोस्तु विपरीतानुष्ठानादधर्मः केवलम्, न तु विषयानुष्ठानात् कश्चिद्धर्मः। न ह्यप्रतिगृह्णन्नपिबन्वा सुरां धार्मिक इति लोके प्रसिद्धः। सूत्रे तु धर्मग्रहणमधर्मस्याप्युपलक्षणमिति स्थितिः-इति ॥ १ ॥

किं भोः समयोऽपि प्रमाणम्, ? (८)यदि स्यादिदमपि प्रमाणं भवितुमर्हति-'चैत्यं वन्देत स्वर्गकामः। प्रगे भुञ्जीत। केशानुल्लुञ्छेत्।

---

१. आप० ध० १. ३१. १. २. यत्किञ्चनदिङ्मुखेन इति क० पु०।

३. प्रतिषेध परिसङ्ख्येत्यनर्थान्तरम्। परिसङ्ख्या वर्जनबुद्धिः। तद्विषयको विधि परिसङ्ख्याविधि। स परिसङ्ख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम्। अत एव विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥ इत्येव वार्तिककारैरुक्तम्। अन्यकारस्त्वय परिसङ्ख्या नियमविधावेवान्तर्भावयति ॥

४ आप० ध० १ ३१. ६.

५. इदं च तार्किकादिमतमनुसृत्य प्रभाकरमतञ्च। भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणा चोदनालक्षणाना धर्मत्वाङ्गीकारात्। उक्तं हि भट्टपादै -

श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः।
चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति। श्लो. वा. १२ १९१

६. पक्षेऽप्राप्तस्य पूरणकरणादित्यर्थः।

७. तत्तन्निषेध्यक्रियाप्रागभावपरिपालनादिति यावत्।

८ यदि प्रमाणमिदमपि प्रमाण इति क० पु०।

तिष्ठन् भुञ्जीत । न स्नायादिति । तत्राह—

धर्मज्ञसमयः प्रमाणम् ॥ २ ॥

न हि वयं समयमात्रं प्रमाणमिति । किं तर्हि ? धर्मज्ञा ये मन्वादयस्तेषां समयः प्रमाणं धर्माधर्मयोः ॥ २ ॥

कथ पुनरिद(१)मवगत मन्वादयो धर्मज्ञा न बुद्धादय इति ? यद्युच्यते—बुद्धादीनामतीन्द्रियेऽर्थे ज्ञानं न सम्भवतीति, तन्मन्वादिष्वपि समानम् । अथ तेषा धर्मज्ञानातिशयादतीन्द्रियेऽपि ज्ञान सम्भवतीति, तत् बुद्धादिष्वपि समानम् । यथाऽऽहुः—

(२)'सुगतो यदि धर्मज्ञः कपिलो नेति का प्रमा ।
तावुभौ यदि धर्मज्ञौ मतभेदः कथ तयोः ॥ इति ।

वक्तव्यो वा विशेष, तमाह—

वेदाश्च ॥ ३ ॥

चोऽवधारणे । वेदा एव मूलप्रमाण धर्माधर्मयोः । (३)न च नित्यनिर्दोषेषु वेदेषूत्कोपालम्भसम्भवः । (४)स्वतःप्रमाणस्य हि शब्दस्य न वक्तृदोषनिबन्धनमप्रामाण्यम् । तदिहास्मदादीनां धर्मज्ञसमयः प्रमाणम्, धर्मज्ञानां तु वेदाः प्रमाणम् । मनुरप्याह—

(५)वेदोऽखिलो धर्ममूल स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

गौतमोऽपि—(६)'वेदो धर्ममूलं, तद्विदा च स्मृतिशीले ।' इति । यद्यप्यप्रत्यक्षो वेदो मूलभूतोऽस्मदादिभिर्नोपलभ्यते । तथापि (७)मन्वादय उपलब्धवक्तृकः इत्यनुमीयते । वक्ष्यति—(८)'तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते' इति ॥ ३ ॥

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ ४ ॥

---

१. अवगम्यते इति ख० पु० ।

२. अष्टसहस्री० पृ० ५ श्लोकोऽय कौमारिल इति अष्टसहस्रीटिप्पणम् ।

३. नित्येषु निर्दोषेषु, इति ख० पु० । अपौरुषेयेषु निर्दोषेषु इति ब. पु.

४. मीमासकमते तावत् वैदिकाना वाक्यानां नित्यत्वाभ्युपगमात् तत्र कर्तृतया पुरुषसम्बन्धाभावात् स्वत एव प्रामाण्यमङ्गीकृतम् । तदभिप्रेत्याह—स्वत प्रमाणस्येति ।

५. मनु० स्मृ० २. ६ ६. गौ० ध० १. १, २

७. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख० पु० । ८. आ० ध० १ १२. १०.

ब्राह्मणाद्याश्चत्वारो वर्णसंज्ञिकाः । ते च सामयाचारिकैर्धर्मैरधिक्रियन्ते । (१)चतुर्णामेवोपदेशेऽपि पुनश्चतुर्ग्रहणं (२)यथाक्रथञ्चित् चतुर्ष्वन्तर्भूतानामपि ग्रहणार्थम् । ततश्च(३) 'ब्राह्मणः क्षत्रियो वैश्य' इति बौधायनादिभिरुक्तानामनुलोमादीनामप्यत्र ग्रहण मतम । तथा च गौतमः प्रतिलोमानामेव धर्मेऽनधिकारमाह—(४)'प्रतिलोमास्तु धर्महीना' इति ॥ ४ ॥

तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् ॥ ५ ॥

जन्मत इति वचनात् सदुक्तादपि शूद्राद्वैश्यब्रुवोऽपि श्रेयान् । एव वैश्यात् क्षत्रियः, क्षत्रियात् ब्राह्मणः ॥ ५ ॥

अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि ॥ ६ ॥

शूद्रवर्जितानां त्रयाणां वर्णानामदुष्टकर्मणामुपायनादयो धर्माः । उपायनमुपनयनम् । तत्र त्रैवर्णिकानामुपनयनादे विधीयते, प्राप्तत्वात् । नापि शूद्राणां प्रतिषिध्यते, प्राप्त्यभावात् । तथा हि—उपनयन तावद्गृह्ये (५)'गर्भाष्टमेषु ब्राह्मणमुपनयीते'त्यादिना त्रैवर्णिकानामेव विहितम् । इहापि तथैव विधास्यते । अध्ययनमपि (६)'उपेतस्याचार्यकुले ब्रह्मचारिवास' इत्यारभ्य विधानात् अनुपनीतस्य शूद्रस्याप्राप्तमेव । किं च (७)'इमशानवच्छूद्रपतिता'वितिं (८)अध्ययनतिषेधो वक्ष्यते । (९)यस्य समीपे नाध्येयं स कथ स्वयमध्येतुमर्हति ।

अग्न्याधेयमपि (१०)'वसन्तो ब्राह्मण' इत्यादि त्रैवर्णिकानामेव विहितम् । फलवन्ति चाग्निहोत्रादीनि कर्माणि (११)'स त्रयाणां वर्णाना'मित्युक्तत्वात् त्रैवर्णिकानामेव नियतानि । विद्याग्न्यभावाच्च शूद्राणामप्रसक्तानि । उक्तो विद्याग्न्यभावः । तस्मादुदुष्टकर्मप्रतिषेधार्थं सूत्रम । यथा शास्त्रान्तरे-(१२) 'द्विजातिकर्मभ्यो हानिः पतन'मिति । अप्रतिषेधे तु दुष्टकर्मणामप्यधि

---

१. 'वर्णानामुपदेशेऽपि पुनश्चतुर्ग्रहण यथाकथञ्चिच्चतुर्ष्वन्तर्भूतानामपी'ति ख पु.
२. यथाक्रम इति क० पु ३. बौ० ध० १. ७. १. ४. गौ० ध० ४ २५.
५. आप० गृ० ८. २. ६. आप० ध० १. २. ११. ७. आप० ध० १ ९.९.
८. अध्ययनप्रतिषेधप्रकरणे वक्ष्यत इति ख० पु ।
९. यस्य यस्य, स सः इति द्विरुक्ति. क० पु० । १०. तै. ब्रा. १. १ २.
११. आप० परि० १. २ १२. गौ० ध० २१. ४.

कारो भवत्येव । 'फलवन्ति च कर्माणी'त्यभिधानात्, क्रियते इति कर्मेति निर्वचनात् । (१)'प्रागुपनयनात् कामचारवादभक्ष' इति गौतमस्मरणं ब्रह्महत्यादिमहापातकव्यतिरिक्तविषयमित्यनुपेतस्यापि दुष्टकर्मत्वसम्भवात् अदुष्टकर्मणा(२)मित्युक्तम् । शूद्रप्रतिषेधस्तु प्रातानुवादः ॥ ६ ॥

यथा ब्राह्मणादीनामुपनयनादयो धर्माः प्रधानभूताः तादृशं शूद्रस्य कर्माऽऽह—

शुश्रूषा शूद्रस्येतरेषां वर्णानाम् ॥ ७ ॥

इतरेषां ब्राह्मणादीनां वर्णानां या शुश्रूषा सा शूद्रस्य परमो धर्मः ॥ ७ ॥

(३)तत्र विशेषमाह—

पूर्वस्मिन्पूर्वस्मिन्वर्णे निःश्रेयसं भूयः ॥ ८ ॥

सर्वप्रकारं कृतायां अपि वैश्यशुश्रूषायां मात्रयापि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति । एवं क्षत्रियशुश्रूषायां ब्राह्मणशुश्रूषा ॥८॥

उपायनं वेदाध्ययनमित्यादि यदुक्तं अस्मिन्क्रमे उपनयने विशेषमाह—

उपनयनं विद्यार्थस्य श्रुतितस्संस्कारः ॥ ९ ॥

विद्या अर्थः प्रयोजनं यस्य स विद्यार्थः । तस्यायं श्रुतिविहितस्संस्कारः उपनयन नाम । 'विद्यार्थस्ये'ति वचनात् मूकादेर्न भवति । तथा च शङ्खलिखितौ (४)'नोन्मत्तमूकान् संस्कुर्यात्' इति । (५)लिङ्गस्य विवक्षितत्वात् स्त्रियां अपि न भवति यद्यपि तस्याः (६)'अग्ने गृहपते' इत्यादिकया विद्यया अर्थः । 'श्रुतित' इति वचनं तदतिक्रमे औतातिक्रमप्रायश्चित्तप्राप्त्यर्थम् ॥ ९ ॥

अनेकवेदाध्यायिनां वेदव्रतवदुपनयनमपि प्रतिवेदं भेदेन कर्तव्यमिति प्राप्ते उच्यते—

सर्वेभ्यो वै वेदेभ्यस्सावित्र्यनूच्यत इति हि ब्राह्मणम् ॥१०॥

(७)'त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्यास्सावित्र्याः परमेष्ठी प्रजापतिः ॥' इति (८)मनुः ।
ततश्चोपनयने यत्सावित्र्या अनुवचनं तन्मुखेन सर्वे वेदा अनूक्ता

---

१ गौ०ध० २. १. २. उपनयनमुक्तं इति क० पु० ३. तत्र विशेष, इति क. पु.
४ इदानीमुपलभ्यमानमुद्रितशङ्खलिखितस्मृतिपुस्तकेषु श्लोकोऽयं नोपलभ्यते ।
५ विद्यार्थस्येत्यत्र पुंलिङ्गस्य विवक्षितत्वात् इत्यर्थः ।
६. तै स. १ ५ ६ ७ मनु स्मृ २ ७७. ८. मनुवचनम् इति. ख. पु

भवन्तीत्यगृह्यमाणविशेषत्वादेकमेवोपनयनं सर्वार्थमिति । अस्मिन्नर्थे ब्राह्मणमपि भवति (१)ब्राह्मणमेव वा पठितम् । आथर्वणस्य वेदस्य पृथगुपनयनं कर्तव्यम् । तथा च तत्रैव श्रुतम्—(२)नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीते'ति ॥ १० ॥

विद्वानेवोपनेताऽभिगम्यत इति विद्यानुत्वादोषो निन्दामाह—

' तमसो वा एष तमः प्रविशति यमविद्वानुपनयते
यश्चाऽविद्वानिति हि ब्राह्मणम् ॥ ११ ॥

यथा कश्चित् तमसस्तमःप्रकाशात्तम एव प्रविष्टो न किञ्चिज्जानाति एवमेवैषः यं माणवकमविद्वानुपनयते, तथा यश्चाविद्वान् । उपनीयते इत्यपेक्ष्यते । यश्च स्वयमविद्वान् सन्नुपनीयते सोऽपि तमस एव तमः प्रविशति । अस्मिन्नर्थे ब्राह्मणमपि भवतीति ॥ ११ ॥

कीदृशस्तर्ह्युपनेताऽभिगम्यः ? तमाह—

' तस्मिन्नभिजनविद्यासमुदेतं समाहितं
संस्कर्तारमीप्सेत् ॥ १२ ॥

अविच्छिन्न(३)वेदवेदिसम्बन्धे कुले जन्म अभिजनः । षड्भिरङ्गैस्सहैव यथावदर्थज्ञानपर्यन्तमधीतो वेदो विद्या । सर्वासामेव वेद एव वा । तस्मिन्नुपनयने कर्तव्ये ताभ्यां अभिजनविद्याभ्यां समुदेतं सम्पन्नम्, समाहितं विहितप्रतिषिद्धेष्ववहितमनसम्, संस्कर्तारमाचार्यमीप्सेत् । इच्छया करणं लक्ष्यते । आप्नुयादभिगच्छेदिति ॥ १२ ॥

' तस्मिंश्चैव विद्याकर्माऽऽन्तमविप्रतिपन्ने धर्मे ॥ १३ ॥

तस्मिन्नेव चोपनेतरि विद्याकर्म विद्याग्रहणं कर्तव्यम् । आन्तमासमाप्तेः, अविप्रतिपन्ने धर्मे यद्यसावाचार्यो धर्मेभ्यो न प्रच्युतो भवति । प्रच्युते तु तस्मिन्नसम्पर्कार्हे अन्यतोऽपि विद्याकर्म भवत्येव ।

*येषां चाचार्यकरणविधिप्रयुक्तमध्ययनं तेषामेतदुपपद्यते । क-

---

१. प्रमाण भवति, ब्राह्मणमिति हि वाचा पठितम्, इत्यशुद्ध. पाठ· ख पु

२. गोप० ब्र० १ २९. ३ वेदवित्सम्बन्धे इति. क. पु

*. एतच्चिह्नान्तर्गतो भागः प्रक्षिप्त इति Mysore पुस्तके । परन्तु क ग पुस्तकयोरुपलभ्यते पाठ । एतच्च गुरुमतानुसारेण । गुरवो हि "अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत" इति विधिनाऽऽचार्यैन्वासिध्यर्थमध्यापन विदधताऽध्ययनमपि प्रयुज्यते, अतोऽध्यापनान्यथानुपपत्त्यैव सिध्यदध्ययन न स्वविधिना "स्वाध्यायोऽध्येतव्य" इत्यनेन विधीयते इति ब्रुवते । अतस्तन्मतखण्डनमिदम् ।

थम्? उपनीयाध्यापनेनाचार्यक भावयेदिति। सकृदुपनीतस्य माणवकस्य न पुनरुपनयनसंस्कारः सम्भवति। तं कथमन्योऽध्यापयेत्? एतेन मध्ये आचार्यमरणे माणवकस्य तदध्ययन नाचार्यान्तरात् सम्भवतीति द्रष्टव्यम्* ॥ १३ ॥

(१)आचार्यशब्द निराह—

यस्माद्धर्मानाचिनोति स आचार्यः ॥ १४ ॥

यस्मात्पुरुषादयं माणवकः धर्मानाचिनोति आत्मनः प्रचिनोति शिक्षते स आचार्य। (२)'अक्षरसाम्याच्चिर्धूयादि'ति चकारमात्रेणेदं निर्वचनम्। अनेन प्रकारेण माणवकमाचार्यः शौचाचारांश्च शिक्षयेदित्युक्तं भवति ॥ १४ ॥

तस्मै न द्रुह्येत्कदाचन ॥ १५ ॥

तस्मै एवंभूताचार्याय कदाचन कदाचिदपि न द्रुह्येत् तद्विषयमपकारं न कुर्यात् ॥ १५ ॥

कस्मादित्यत आह—

स हि विद्यातस्तं जनयति ॥ १६ ॥

स ह्याचार्यः तं माणवकं विद्यातो जनयति, यथा पिता मातृतः।

(३)अत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥

इति शास्त्रान्तरम् ॥ १६ ॥

तच्छ्रेष्ठं जन्म ॥ १७॥

तद्विद्यातो जन्म श्रेष्ठं प्रशस्ततमम्, अभ्युदयनिःश्रेयसहेतुत्वात् ॥१७॥

मातापितृभ्यामाचार्यः श्रेष्ठ इत्याह—

शरीरमेव मातापितरौ जनयतः ॥ १८ ॥

मातापितरौ शरीरमात्रमेव काष्ठकुड्यादिसमं जनयत। आचार्यस्तु सर्वपुरुषार्थक्षमरूपं जनयति। (४)"आचार्यः श्रेष्ठो गुरूणा"मिति गौतमः ॥ १८ ॥

वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यं, गर्भाष्टमेषु ब्राह्मणं, गर्भैकादशेषु राजन्यं,

---

१ आचार्यशब्दनिर्वचनमाह इति क ग पु २ निरु. २ १. १.

३. मनु स्मृ २. १७० ४ गौ ध. २. ५०

गर्भैकादशेषु वैद्यम् ॥ १९ ॥

(१)वसन्ते ब्राह्मणमित्यादि गृह्ये गतम् ॥ १९ ॥

•अथ काम्यानि ॥ २० ॥

कामनिमित्तान्युपनयनानि वक्ष्यन्ते ॥ २० ॥

(२)सप्तमे ब्रह्मवर्चसकामम् ॥ २१ ॥

अष्टम आयुष्कामम् ॥ २२ ॥

नवमे तेजस्कामम् ॥ २३ ॥

दशमेऽन्नाद्यकामम् ॥ २४ ॥

एकादश इन्द्रियकामम् ॥ २५ ॥

द्वादशे पशुकामम् ॥ २६ ॥

'ब्रह्मवर्चसकाम'मित्यादीनि षट् सूत्राणि स्पष्टार्थानि । सर्वत्रोपनयीतेत्यपेक्ष्यते ॥ २१-२६ ॥

(३)'आचार्याधीनस्स्था' दित्यादीनि यानि ब्रह्मचारिणो व्रतानि वक्ष्यन्ते तेष्वसमर्थानां कुमाराणां वर्णक्रमेणानुकल्पमाह—

आषोडशाद्ब्राह्मणस्यानात्यय आद्द्वाविंशात्क्षत्रियस्याऽऽचतुर्विंशाद्वैश्यस्य यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः ॥ २७ ॥

आकारोऽभिविधौ । अत्ययोऽतिक्रमः । स एवाऽऽत्ययः तदभावोऽनात्यय । यावच्छिको दीर्घः, आङो वा प्रश्लेषः । प्रकरणादुपनयनकालस्येति गम्यते । यथा व्रतेषु समर्थ स्यात् तथैतावान् कालः प्रतीक्ष्यः । पूर्वमेव तु सामर्थ्ये सत्यष्टवर्षाद्यतिक्रमे वक्ष्यमाण प्रायश्चित्तमेव भवति । एव षोडशादिभ्य ऊर्ध्वं कियन्तञ्चित्कालमसमर्थानां पश्चात्सामर्थ्ये सति प्रायश्चित्त भवत्येव ॥ २७ ॥

तदानीं प्रायश्चित्तमाह—

•√अतिक्रान्ते सावित्र्याः ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् ॥ २८ ॥

---

१ आप. गृ ११. २ २ इतः प्रभृति सूत्रषट्कमेकसूत्रतया लिखित क. पुस्तके ।

३ आप. ध १ २ १९.

यस्य यः सावित्र्याः काल उक्तः तदतिक्रमे त्रैविद्यकं व्यवयवा विद्या तामधीयते ये ते त्रैविद्याः, तेषामिदं त्रैविद्यकम्। (१)'गोत्रचरणाद्वुञ्। 'चरणाद्धर्माम्नाययोरि'ति वुञ्। एवभूतं ब्रह्मचर्यं, अग्निपरिचर्यामध्ययनं गुरुशुश्रूषामिति परिहाप्य, सकल ब्रह्मचारिधर्मं चरेत् । कियन्तं कालम् ? ऋतुं, 'कालाध्वनो'रिति द्वितीया। ऋतुमिति वचनादृत्वारभ्भे प्रायश्चित्तारम्भमिच्छन्ति ॥ २८ ॥

अथोपनयनम् ॥ २९ ॥

एवं चरितव्रत उपनेतव्यः ॥ २९ ॥

ततस्संवत्सरमुदकोपस्पर्शनम् ॥ ३० ॥

ततः उपनयनादारभ्य सम्वत्सरमुदकोपस्पर्शनं स्नानं कर्तव्यम् । शक्तस्य त्रिषवण स्नानम्(२) अशक्तस्य यथाशक्ति ॥ ३० ॥

अथाऽध्याप्यः॥ ३१ ॥

एवं चरितव्रतः पश्चादध्याप्य ॥ ३१ ॥

अथ यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः ॥ ३२ ॥

यस्य माणवकस्य पिता पितामहश्चानुपेतौ स्यातां स्वयं च, ते तथाविधास्स माणवका ब्रह्महसस्तुताः ब्रह्महण इत्येव कीर्तिताः ब्रह्मवादिभिः । अतस्मिन् तच्छब्दयोगस्तद्धर्मप्राप्त्यर्थः । एवं च (३)'श्मशानवच्छूद्रपतिता'वित्यध्ययननिषेधप्रकरणे वक्ष्यते । ततश्च ब्रह्म यथा ब्रह्महसमीपे नाध्येयमेवमेषामपीति ॥ ३२ ॥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् ॥ ३३ ॥

तेषामेतेषामभ्यागमनमाभिमुख्येन गमनम्, मातापितृपुत्रदारशरीररक्षणार्थमपि वर्जयेत् । यद्यपि भिक्षा सर्वतः प्रतिग्राह्येति वक्ष्यते भोजनमुद्यतमपि वर्जयेत् (४)'अपि दुष्कृतकारिण' इति सत्यपि वचने । विवाहं च वर्जयेत् यद्यपि (५)'स्त्रीरत्नं दुष्कुलादपी'ति मानवस्मरणम् ॥ ३३ ॥

तेषामिच्छतां प्रायश्चित्तम् ॥ ३४ ॥

---

१ पा० सू० ४ ३. १२६ २. अन्यस्य' क. ख. पु ३. आप० ध० १ ९. ९. ४. आप० ध० १ १९.१३. ५ मनु० स्मृ० २. २३८.

इच्छतामिति वचनान्न बलात्कारेण प्रायश्चित्तं कारयितव्यम् ॥ ३४ ॥

यथा प्रथमेऽतिक्रम ऋतुरेवं सम्वत्सरः ॥ ३५ ॥

यथा प्रथमेऽतिक्रमे ब्रह्मचर्यस्य ऋतु काल. एवमन्यस्मिन्नतिक्रमे संवत्सर· कालः ॥ ३५ ॥

अथोपनयनम् ॥३६॥ तत उदकोपस्पर्शनम् ॥ ३७ ॥

गते ॥ ३६ ॥ ३७ ॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने प्रथमा (१)कण्डिका ।

प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽनुपेताः स्युः ॥१॥

यदि पितैवानुपेतः ततस्सवत्सरमेकम् । अथ पितामहोऽपि, ततो द्वौ । अथ स्वयमपि यथाकालमनुपेत', ततः संवत्सरानिति ॥ १ ॥

अथोदकोपस्पर्शने मन्त्राः—

सप्तभिः पावमानीभि"र्यदन्ति यच्च दूरके" इत्येताभि र्यजुष्पवित्रेण सामपवित्रेणाऽऽङ्गिरसेनेति ॥ २ ॥

पवमानः सोमो अद्यना यासां ताः (२)पावमान्य· । यजुष्पवित्रेण(३)'आपो अस्मान्मातरः शुन्धन्तित्व' त्यनेन, सामपवित्रेण 'कया नश्चित्र आभु

---

१. खण्डिका इति क. पुस्तके । खण्डः इति ख. पुस्तके । एवमेव प्रतिखण्डसमाप्ति ॥

२. यदन्ति यच्च दूरके भय विन्दति मामिह । पवमान वितज्जहि ॥ १ ॥
पवमानस्सोऽअद्य न· पवित्रेण विचर्षणि. । यः पोता स पुनातु नः ॥ २ ॥
यस्ते पवित्रमर्चिष्यग्ने वितततमन्तरा । ब्रह्म तेन पुनीहि नः ॥ ३ ॥
यस्ते पवित्रमर्चिवदग्ने तेन पुनीहि न· । ब्रह्म सवै. पुनीहि न· ॥ ४ ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ ५ ॥
त्रिभिष्ट्व देव सवितर्वसिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः ॥ ६ ॥
पुनन्तु मां देवजना· पुनन्तु वसवो धिया । विश्वे देवाः पुनीतन मा जातवेदः पुनीहि मा ॥७॥ (ऋ० स० ७.२, १७, १८) इति सप्त पावमान्यः ॥

३. आपो अस्मान् मातरश्शुन्धन्तु घृतेन नो घृतप्व. पुनन्तु विश्वमस्मत्प्रवहन्तु रिप्रम्" (तै.स १ २.१.) इति यजु पवित्रम् । 'कया नश्चित्र आ भुवदूती सदावृधस्सखा । कया शचिष्ठया वृता' इत्यस्यामृचि गीयमान वामदेव्याख्यं साम सामपवित्रम् ॥

वदि' त्यादिगीतेन वामदेव्येन साम्ना, आङ्गिरसेन(१) 'हंसःशुचिषदि'त्यनेन एतैरञ्जलिना शिरस्यपोऽवसिञ्चेत् ॥ २ ॥

अपि वा व्याहृतिभिरेव ॥ ३ ॥

पूर्वैः सह व्याहृतीनां विकल्पः ॥ ३ ॥

अथाऽध्याप्यः ॥ ४ ॥

गतम् ॥

तत्र 'यस्य पिता पितामह' इत्युपक्रमे 'यस्ये'त्येकवचनमन्तेऽ'ध्याप्य' इति। मध्ये तु 'ब्रह्महसस्तुताः' 'तेषामभ्यागमनं' 'तेषामिच्छता'मिति बहुवचनम्। तत्रोपक्रमोपसंहारानुसारेण माणवकस्यैव प्रायश्चित्तमुपनयनमध्यापनं च। बहुवचनं तु तथाविधमाणवकबहुत्वापेक्षमित्यवोचाम ॥ ४ ॥

अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं ते इमशानसंस्तुताः ॥ ५ ॥

प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमिति। ते तथाविधा माणवकाः इमशानसंस्तुताः। एतेन (२)'इमशाने सर्वतः शम्याप्रासा' इत्यध्ययननिषेध एषामपि सन्निधौ भवति ॥ ५ ॥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं(३)तत उदकोपस्पर्शनं पावमान्यादिभिः ॥ ६ ॥

गतम्। पावमान्यादिभिरित्यनेनैव प्रतिपुरुषं सङ्ख्याय सम्वत्सरानित्येतदपि द्रष्टव्यम् ॥ ६ ॥

अथ गृह्यमेधोपदेशनम् ॥ ७ ॥

गृह्यमेधो गृह्यशास्त्रं गृहस्थधर्मो वा ॥ ७ ॥

---

१. हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋत बृहत्" (तै सं. ४ २ १ ४.) इत्याङ्गिरस ॥

२ आप. ध १ ९. ६. ३. ततस्संवत्सरमुदकोपस्पर्शनम्. इति ग. पु.।

नाध्यापनम् ॥ ८ ॥

नाध्यापनं कृत्स्नस्य वेदस्य । किं तु गृह्यमन्त्राणामेवेति ॥ ८ ॥

ततो यो निवर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ॥९॥

ततः एवं कृतप्रायश्चित्तात् गृहस्थीभूताद्यो निवर्तते उत्पद्यते तस्योपनयनसंस्कारः कर्तव्यः । कथम् ? यथा प्रथमेऽतिक्रमे ऋतुं त्रैविद्यकं ब्रह्मचर्यं चारयित्वेत्यर्थः ॥ ९ ॥

तत ऊर्ध्वं प्रकृतिवत् ॥ १० ॥

ततः यो निवर्तते तस्य प्रकृतिवत् यथा प्राक्तमुपनयनं कर्तव्यमिति । यस्य तु प्रपितामहस्य पितुरारभ्य नानुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तम्, धर्मज्ञैरूहितव्यम् ॥ १० ॥

एवं ततः पूर्वेष्वपि निरूपितमुपनयनम्, अथाऽध्ययनविधिः—

उपेतस्याऽऽचार्यकुले ब्रह्मचारिवासः ॥ ११ ॥

एवं यथाविध्युपेतस्य ब्रह्मचारिणस्ततः आचार्यकुले वासो भवति । ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी । अध्ययनाङ्गानि व्रतानि चरता आचार्यकुले वस्तव्यमित्युक्तं भवति ॥ ११ ॥

तत्र कालः—

(१)अष्टाचत्वारिंशद्वर्षाणि ॥ १२ ॥

चतुर्णां वेदानामध्ययनकालः एषः । प्रतिवेदं द्वादश ॥ १२ ॥

पादूनम् ॥ १३ ॥

स एव कालः पादून वा प्रत्येतव्यः । पादेनोनं पादूनम् । परूपं (२)कतन्तवत् । षट्त्रिंशद्वर्षाणि । प्रतिवेदं नव ॥ १३ ॥

अर्धेन ॥ १४ ॥

ऊनमिति(३) समस्तमप्यपेक्षते । चतुर्विंशतिर्वर्षाणि । प्रतिवेदं षट् ॥१४॥

---

१. गोपथब्राह्मणेऽथर्ववेदीये द्वितीयप्रपाठके पञ्चमब्राह्मणेऽस्य विधिर्दृश्यते—तस्मा एतत् प्रोवाचाष्टाचत्वारिंशद्वर्षं तच्चतुर्धा वेदेषु व्यूह्य द्वादशवर्षं ब्रह्मचर्यं, द्वादशवर्षोण्यवरार्धमपि स्तार्यश्चरेयुर्यथा शक्त्यपरम्' (गोप. ब्रा. पू. २. ५.) इति ॥

२. 'शकन्ध्वादित्वात्' इति ध. पु. ।

३. उपसमस्तमिति ख० पु० प्राप्तसमासमपीत्यर्थः । सर्वत्राप्यपेक्षते इति. घ. पु.

त्रिभिर्वा ॥ १५ ॥

पादेरूनमिति प्रकरणादुगम्यते । द्वादशवर्षाणि। प्रतिवेदं त्रीणि ॥१५॥

द्वादशावरार्ध्यम् ॥ १६ ॥

अवरार्ध्यशब्दोऽवरमात्रेत्येतस्मिन्नर्थे वर्तते । द्वादशवर्षाणि अवरमात्रा यथा भवति तथा ब्रह्मचारिणा गुरुकुले वस्तव्यम् । पूर्वेणैव सिद्धे यो ब्रह्मचार्यतिमेधावितया चतुरोऽपि वेदानितोऽल्पीयसा कालेन गृह्णाति तेनाप्येतावन्तं कालं गुरुकुले वस्तव्यम् । (१)'विद्यया स्नाती'त्यतस्मिन्नपि पक्षे नातित्वरितेन स्नातव्यमित्येवमर्थमिदमारभ्यते । एतेन एकस्य वेदस्य त्रीणि वर्षाणि ब्रह्मचर्यमवश्य(२) भावीत्यर्थात्सिद्धम् ।

मनुरप्याह—

(३)षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥ इति ॥

त्रयाणां वेदानां षट् त्रिंशत्; एकैकस्य द्वादश । तदर्धिकं त्रयाणामष्टादश; एकैकस्य षट् । पादिकं वा त्रयाणां नव, एकैकस्य त्रीणि । ग्रहणान्तिकमेव वेति एकैकस्य त्रिभ्य ऊर्ध्वमनियमः, न प्रागित्यर्थो द्रष्टव्यः॥१६॥

न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति ॥ १७ ॥

ब्रह्मचारिविद्यार्थशब्दयोरर्थ उक्तः । यो ब्रह्मचारी विद्यार्थो भवति न तेन दिवसमात्रमपि परस्य समीपे वस्तव्यम् । आचार्यस्य समीप एव वस्तव्यमित्युक्तं भवति । विद्यार्थस्येति वचनात् नैष्ठिकस्य कदाचिदन्यत्र (४)वासेऽपि न दोषः । यद्वा भाजननिवृत्तिरेवोपवासः । परलोकार्थं उपवासः परोपवासः स विद्यार्थस्य न भवति । नैष्ठिकस्य तु(५) दोषः । अत्र पक्षे(६)'आहिताग्निरनड्वानि'ति विद्यार्थब्रह्मचारिविषयम् ॥१७॥

अथ ब्रह्मचर्यविधिः ॥ १८ ॥

ब्रह्म वेदस्तदर्थं यद्व्रतं चरितव्यं तद्ब्रह्मचर्यं तदधिक्रियते ॥ १८ ॥

आचार्याधीनस्स्यादन्यत्र पतनीयेभ्यः ॥ १९ ॥

"आचार्याधीनो भवे"त्युपनयनान्ते यत् संशासनं तत्सिद्धवाचार्यो-

---

१. आप० ध १.३०.१. २. भावीत्ययमर्थस्सिद्धः । इति ख० पु०
३. मनु० स्मृ० ३. १ ४. वासो न दोषः इति क० पु०
५. न दोषः इति ख० पु० ६ आप० ध. २. ९ १३

धीनताऽनृघते 'अन्यत्र पतनीयेभ्य' इति विशेषं वक्ष्यामीति।(१)पतनीय इति करणे कृत्प्रत्ययः। (२)अमुमरातिं ब्राह्मणमित्थं व्यापादयेत्याचार्येण चोदितोऽप्येवमादि न कुर्यादिति ॥ १९ ॥

हितकारी गुरोरप्रतिलोमयन्वाचा ॥ २० ॥

आचार्येण प्रयुक्तोऽप्यप्रयुक्तोऽपि तस्मै हितमेव कुर्यात्, वाचा (३)प्रातिलोम्यमकुर्वन् ॥ २० ॥

अधासनशायी ॥ २१ ॥

शयनं शयः। (४)'कृत्यल्युटो बहुल'मिति बहुलवचनात् घञ्। अधः आसनशायो यस्य सः अधासनशायी। गुरुसन्निधावध आसीत अधश्शयीतेत्युक्तं भवति। अधश्शब्दस्य सवर्णदीर्घश्छान्दसः, अपपाठो वा। तृणेषु प्रस्तरेषु चासनशयने शिष्टाचारसिद्धे ॥ २१ ॥

नानुदेश्यं भुञ्जीत ॥ २२ ॥

अनुदेश्यं श्राद्धार्थं देवतार्थं वा उद्दिष्टं न भुञ्जीत ॥ २२ ॥

तथा क्षारलवणमधुमांसानि ॥ २३ ॥

न भुञ्जीतेत्येव। (५)क्षारादीनि गृह्ये गतानि ॥ २३ ॥

अदिवास्वापी ॥ २४ ॥

न दिवा स्वप्यात् ॥ २४ ॥

अगन्धसेवी ॥ २५ ॥

चन्दनादीनि गन्धद्रव्याणि न सेवेत ॥ २५ ॥

मैथुनं न चरेत् ॥ २६ ॥

उपचारक्रिया केली स्पर्शो (६)भूषणवाससाम्।
एकशय्यासनं क्रीडा चुम्बनालिङ्गने तथा ॥
इत्यादेस्तत्त्वस्योपलक्षणं मैथुनग्रहणम् ॥ २६ ॥

---

१. करणे प्रत्ययः इति क० पु० २. अस्मदरातिं इति ख० पु०
३. प्रातिकूल्य इति ख० पु० ४ पा० सू० ३. ३. ११३
५. क्षारपदार्थः आप. ध. २ १५. ११ सूत्रे व्याख्यास्यते।
६ भूषणवाससी. इति. क. पु.

उत्सन्नश्लाघः ॥ २७ ॥

श्लाघा शोभा सा उत्सन्ना यस्य स उत्सन्नश्लाघः ॥ एवंभूतो भवेत् । (१)अक्षणादिना मुखादिकं उज्वलं न कुर्यात् इति ॥ २७ ॥

अङ्गानि न प्रक्षालयीत ॥ २८ ॥

(२)विना शिरसा सुखार्थमुष्णोदकादिना शरीरं न प्रक्षालयेत् ॥२८॥

प्रक्षालयीत त्वशुचिलिप्तानि(३) गुरोरसन्दर्शे ॥२९॥

यानि तु मूत्रपुरीषाद्यशुचिलिप्तान्यङ्गानि तानि कामं(४) मृदाद्भिः प्रक्षालयेत् यावद्गन्धो लेपश्चापैति । तदपि गुरोरसन्दर्शे(५) यत्र स्थितं गुरुं न पश्यति तत्र । आचार्यप्रकरणे गुरुग्रहणात् पित्रादीनामपि ग्रहणम् ॥ २९ ॥

(६) नाप्सु श्लाघमानः स्नायाद्यदि
स्नायाद्दण्डवत्प्लवेत् ॥ ३० ॥

स्नाने प्राप्ते न श्लाघमानः स्नायात् । किं तु दण्डवत्प्लवेदित्युक्तम् । स्नानीयैर्मलापकर्षणं श्लाघा; क्रीडा वा जले । अपर आह—'अङ्गानि न प्रक्षालयीते'(सू.२८)त्यासमावर्तनाच्चित्यस्नानस्य प्रतिषेधः । 'प्रक्षालयीत त्वशुचिलिप्तानी'(सू.२९)ति नैमित्तिकस्य विधिः । 'नाप्सु श्लाघमानः स्नाया'(सू ३०)दिति तत्रैव श्लाघाप्रतिषेध इति ॥ ३० ॥

जटिलः ॥ ३१ ॥

सर्वानेव केशान् जटां कृत्वा बिभृयात् ॥ ३१ ॥

शिखाजटो वा वापयेदितरान् ॥ ३२ ॥

अथवा शिखामेव जटां कृत्वा इतरान्केशान् वापयेत् नापितेन ॥ ३२ ॥

---

१. मृत्कल्कादिना इति क०पु०

२. स्नानसमये आमलकादिभिर्न क्षालयेत् । इति क० पु०

३ गुरोरसन्दर्शने इति क० पु० ४. मृद्वारिभि. इति ख० पु०

५ यत्र गुरुर्न पश्यति तत्र । इति ख० पु० 'यत्र लिप्तं गुरुः' इति ग. पु०

६ नाप्सु श्लाघमानस्स्नायादित्येतावदेव ख० पु० सूत्रम् । "अथाप्सुश्लाघमानो न स्नायात् तेन तां श्लाघामवरुन्धे" (गो. ब्रा. पू. १ २.) इति गोपथब्राह्मणम् ॥

मौञ्जी मेखला त्रिवृद्ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानाम् ॥ ३३ ॥

मुञ्जानां विकारो मौञ्जी । त्रिवृत् त्रिगुणा । एवम्भूता ब्राह्मणस्य मेखला भ- । सा च शक्तिविषये शक्तौ सत्यां दक्षिणावृत्ताना प्रदक्षिणावृत्तानां कर्त- । तद्धितार्थे गुणभूतानामपि मुञ्जानामेवैतद्विशेषणम् ॥ ३३ ॥

ज्या राजन्यस्य ॥ ३४ ॥

स्पष्टम् ॥ ३४ ॥

मौञ्जी वाऽयोमिश्रा ॥ ३५ ॥

अथवा अयोमिश्रा क्वचित्तु कालायसेन बद्धा मौञ्जी मेखला भवति राज- स्य ॥ ३५ ॥

आवीसूत्रं वैश्यस्य ॥ ३६ ॥

अविरूर्णायुः कम्बलप्रकृतिः तत्सम्बन्धिनी ऊर्णा आवी तत्कृतं सूत्रं वीसूत्रम् । सा मेखला वैश्यस्य भवति ॥ ३६ ॥

सैरी तामली वेत्येके ॥ ३७ ॥

सैरी सीरा बाह्योक्षरज्जुः । (१)तामलो मूलोर्ध्वसंज्ञो वृक्षः तस्य चा ग्रथिता तामली ॥ ३७ ॥

पालाशो दण्डो ब्राह्मणस्य नैयग्रोधस्कन्धजोऽवा(२) ज्यो राजन्यस्य बादर औदुम्बरो वा वैश्यस्य वाक्षो दण्ड इत्यवर्णसंयोगेनैक उप- दिशन्ति ॥ ३८ ॥

पालाशो दण्ड इत्यादि गृह्य(३)गतम् ॥ ३८ ॥

वासः ॥ ३९ ॥

वस्यते कौपीनमाच्छाद्यते येन तद्वासः । तद्वक्ष्यते ॥ ३९ ॥

शाणीक्षौमाजिनानि ॥ ४० ॥

---

१. तमालादण् तमालसंज्ञो वृक्षः तस्य० इति घ पु.

२. अवाद्भ्रः' इति क. पु ३. आप० गृ. ११ १५

क्षणस्य विकारः शाणी पटी। क्षुमा अतसी तस्या विकारः क्षौमम्। श्वेतपट्टाख्यवासोविशेष इत्यन्ये। अजिन यस्य कस्यचिन्मेध्यस्य पशोः। त्रीण्येतानि वर्णानुपूर्व्येण वासांसि ॥ ४० ॥

काषायं चैके वस्त्रमुपदिशन्ति ॥ ४१ ॥

एके आचार्या वस्त्र स्वधोधार्यमुपदिशन्ति। वस्त्रं कार्पासम्। तच्च काषायं कषायेण रक्तम्। ब्राह्मणस्येत्यर्थाद्गम्यते। इतरयोर्वक्ष्यमाणत्वात् ॥४१॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने द्वितीया कण्डिका ॥ २ ॥

माञ्जिष्ठं राजन्यस्य ॥ १ ॥

मञ्जिष्ठया रक्तं माञ्जिष्ठम् ॥ १ ॥

हारिद्रं वैश्यस्य ॥ २ ॥

हरिद्रया रक्तं हारिद्रम् ॥ २ ॥

हारिणमैणेयं वा कृष्णं ब्राह्मणस्य ॥ ३ ॥

एतान्युत्तरीयाणि। 'वस्ताजिन' मिति वक्ष्यमाणत्वात् इहाप्यजिनमिति गम्यते। (१)अजिनमुत्तरमुत्तरये' त्युपनयने यदजिनमुक्तं धार्यं तद्धारिण ब्राह्मणस्य; हरिणो मृगस्तस्य विकारः हारिणम्। ऐणेयं वा कृष्णम्। एणी मृगी तस्या विकार ऐणेयम्। (२)एण्या ढञ्। द्विविधा एण्यः कृष्णाश्च गौराश्च। अतो विशेष्यते-कृष्णमैणेयमिति ॥ ३ ॥

अस्मिन् पक्षे विशेषमाह—

कृष्णं चेदनुपस्तीर्णासनशायी स्यात् ॥ ४ ॥

कृष्णं चेद्विभृयात् न हारिणं ततस्तस्मिन्नुपस्तीर्णे नासीत, न च शयीत। अयं तावदर्थ। शब्दनिर्वाह (३)'स्वधासनशायी'त्यत्र कृतः ॥४॥

रौरवं राजन्यस्य ॥ ५ ॥

रुरुर्विन्दुमान्मृगः ॥ ५ ॥

वस्ताजिनं वैश्यस्य ॥ ६ ॥

वस्तश्छागः ॥ ६ ॥

---

१. आपगृ० ११ ११. २. पा सू. ४. ३. ५९ ३ आप० ध० १. २. २१. आप० ध० २

आविकं सार्ववर्णिकम् ॥ ७ ॥

आविरूर्णायुः । स एवाऽऽविकः । तस्य चर्माऽऽविक, तत्सर्वेषामेव वर्णानाम् । अस्य हारिणादिभिर्विकल्पः ॥ ७ ॥

कम्बलश्च ॥ ८ ॥

अयमप्याविक एव । प्रावरणमेव सर्वेषाम् ॥ ८ ॥

'काषायं चैके वस्त्रमुपदिशन्ति' त्यारभ्य वासांस्यजिनानि च विहितानि । तत्र कामवशेन विशेषमाह—

ब्रह्मवृद्धिमिच्छन्नजिनान्येव वसीत, क्षत्रवृद्धिमिच्छन् वस्त्राण्येव, उभयवृद्धिमिच्छन्नुभयमिति हि(१) ब्राह्मणम् ॥ ९ ॥

ब्रह्मवृद्धिः ब्राह्मणवृद्धिः क्षत्रवृद्धिः क्षत्रियवृद्धिः ॥ ९ ॥

अथ स्वपक्षमाह—

अजिनं त्वेवोत्तरं धारयेत् ॥ १० ॥

उत्तरमुत्तरीयम् । तदजिनमेव धारयेत् ॥ १० ॥

(२)अनृत्तदर्शी ॥ ११ ॥

नृत्तं न पश्येत् ॥ ११ ॥

सभाः समाजांश्चाऽगन्ता ॥ १२ ॥

द्यूतादिस्थानं सभा । उत्सवादिषु समवायः समाजः । तान्सभासमाजाश्च अगन्ता तान्कौतूहलेन न गच्छेत् । यदृच्छया गमने न दोषः । ५ ॥

अजनवादशीलः ॥ १३ ॥

जनवादः परिवादः लोकवार्ता वा, तच्छीलो न स्यात् ॥ १३ ॥

रहश्शीलः ॥ १४ ॥

---

१ अत्र गोपथब्राह्मणस्य प्रथमप्रपाठकस्य द्वितीया कण्डिका द्रष्टव्या ।

२. इमे नियमा गोपथब्राह्मणे विहिताः "नोपरिशायी स्यान्न गायनो न नर्तनो न सरणो न निष्ठीवेत् यदुपरिशायी भवत्यभीक्ष्ण निवासा जायन्ते, यद्गायनो भवत्यभीक्ष्णश आक्रन्दान् धावन्ते, यन्नर्तनो भवत्यभीक्ष्णश प्रेतान्निर्हरन्ते, यत्सरणो भवत्यभीक्ष्णशः प्रजास्याविशन्ते, यन्निष्ठीवति मध्य एव तदात्मनो निष्ठीवति" इति । गो ब्रा. १. २. ७.

सनि सरभवे रहःशीलः स्यात् ॥ १४ ॥

गुरोरुदाचारेष्वकर्ता स्वैरिकर्माणि ॥ १५ ॥

येषु प्रदेशेषु गुरुरुदाचरति पौनःपुन्येन चरति तेषु स्वैरिकर्माणि मैत्रप्रसाधनादीनि न कुर्यात् ॥ १५ ॥

स्त्रीभिर्यावदर्थसम्भाषी ॥ १६ ॥

स्त्रीभिस्सह(१)यावत्प्रयोजनं तावदेव सम्भाषेत । न प्रसक्तानुप्रसक्तमतिचिरम् । (२) 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षती'ति । अतिबालाभिरतिवृद्धाभिश्च न दोषः ॥ १६ ॥

मृदुः ॥ १७ ॥

क्षमावान् । १७ ॥

शान्तः ॥ १८ ॥

इन्द्रियाणामसद्विषये प्रवृत्त्यभावः शमः तद्वान् शान्तः ॥ १८ ॥

दान्तः ॥ १९ ॥

विहितेषु कर्मस्वग्लानिर्दमः । तद्वान् दान्तः ॥ १९ ॥

ह्रीमान् ॥ २० ॥

ह्रीर्लज्जा तद्वान् ॥ २० ॥

दृढधृतिः ॥ २१ ॥

लब्धे नष्टे मृते वा धृतावेवावस्थितः स्यात् न हृष्येत् न वाविषीदेत्॥

अग्लाँस्नुः ॥ २२ ॥

उत्साहसम्पन्नः । (३)ग्लाजिस्थश्च स्नुः" । अत्रानुस्वारः छान्दसोऽपपाठो वा ॥ २२ ॥

अक्रोधनः ॥ २३ ॥

न कस्मैचिदपि कुप्येत् ॥ २३ ॥

अनसूयुः ॥ २४ ॥

पराभ्युदयानुसन्तापः असूया । तच्छीलो न स्यात् ॥ २४ ॥

---

१. यावत्प्रयोजनमेव २ मनु. स्मृ.२. २१५. ३. पा. सू. ३. २. १३९.

सर्वं लाभमाहरन् गुरवे सायं प्रातरन्नेन भिक्षाचर्यं चरेद्भिक्षमाणोऽन्यत्राऽपपात्रेभ्योऽभिशस्ताच्च ॥२५॥

अपपात्रा प्रतिलोमजा रजकादयः। अपगतानि हि तेषां पात्राणि पाकाद्यर्थानि चतुर्भिर्वर्णैस्सह। अभिशस्तान् वक्ष्यति 'अथ पतनीयानी' त्यादिना। तानुभयान् वर्जयित्वा अन्यत्र भिक्षेत । तत्र भिक्षमाणस्सर्वं लाभ यच्च यावच्च लब्धं गोहिरण्यादि तत्सर्वं(१)ममत्यया गुरवे आहरेत्। एवमहरहः कुर्वन् सायं प्रातरन्नेन न हस्तादिना भिक्षाचर्यं भिक्षाचरणं चरेत् कुर्यात्। 'सायं प्रात' रिति वचनान्न सायं गृहीतेन प्रातराशः, नापि प्रातर्गृहीतेन सायमाश. ॥ २५ ॥

अथ भिक्षाप्रत्याख्यानं निन्दितुं ब्राह्मणमाकृष्यते—

स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून् ब्रह्मवर्चसमन्नाद्यं वृङ्क्ते। तस्मादु ह वै ब्रह्मचारिसङ्घं चरन्तं न प्रत्याचक्षीतापि हैष्वेवंविध एवंव्रतः स्यादिति हि(२) ब्राह्मणम् ॥ २६ ॥

व्याख्यातः समाहितः। समाहितो ब्रह्मचारी याभिः स्त्रीभिः भिक्षमाणः प्रत्याख्यायते तासां प्रत्याचक्षाणानां स्त्रीणामिष्टं यागैरार्जितं धर्मं, दत्तं दानेनार्जितं हुतं दर्विहोमैश्च गार्ह्यैरार्जितं सर्वमेव धर्मं वृङ्क्ते आच्छिनत्ति; यस्मादेवं तस्मात् ब्रह्मचारिसङ्घं चरन्तं न प्रत्याचक्षीत। उ ह वा इति निपाता वाक्यालङ्कारार्थाः । अपिहशब्दौ कदाचिदित्येतमर्थं द्योतयतः । एषु सङ्घीभूतेषु ब्रह्मचारिषु कदाचिदेवंविध समाहित एवव्रत· 'अथ ब्रह्मचर्याविधि' रित्यारभ्य यान्युक्तानि तद्वान् ब्रह्मचारी स्यात्। (३)सम्भावने लिङ्। सम्भवेत्। तस्मान्न प्रत्याचक्षीतेत्येवं ब्राह्मण भवतीति ॥२६॥

नानुमानेन भैक्षमुच्छिष्टं दृष्टश्रुताभ्यां तु ॥ २७ ॥

---

१. अमायेयेति. नास्ति क. पु. सर्वमादाय इति ग. पु.

२. "ते देवा अब्रुवन् ब्राह्मणो वा अयं ब्रह्मचर्यं चारिष्यति ब्रूतास्मै भिक्षा इति गृहपतिर्ब्रूत बहुचारी गृहपत्न्या इति किमस्या वृङ्क्तादददया इति, इष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति, तस्मात् ब्रह्मचारिणेऽहरहर्भिक्षां गृहिणीमामेयुरिष्टापूर्तसुकृतद्रविणमवरुन्ध्या दिति" इति गोपथब्राह्मणम्। (गो. ब्रा. १. २, ६)

३. सम्भावनाया लिङ्. इति. ख. पु.

भिक्षाणां समूहो भैक्षम् । न तल्लिङ्गाभासेनोच्छिष्टं मन्तव्यम् । किं तु दृष्टश्रुताभ्यामेव । दृष्टमात्मनः प्रत्यक्षम् । श्रुतमाप्तोपदेशः । ताभ्यामेव तदुच्छिष्टमवगन्तव्यम् । अयमंशः प्राप्तानुवादोऽपूर्वमंशं विधातुम् । यथा(१)'नानुवषट्करोति, अपि वोपांश्वनुवषट्कुर्यात्' इति ॥ २७ ॥

(२)भवत्पूर्वया ब्राह्मणो भिक्षेत ॥ २८ ॥

ब्राह्मणो ब्रह्मचारी भवत्पूर्वया वाचा भिक्षेत भिक्षां याचेत—'भवति भिक्षां देही' ति ॥ २८ ॥

भवन्मध्यया राजन्यः ॥ २९ ॥

'भिक्षां भवति देही'ति राजन्यो भिक्षेत ॥ २९ ॥

भवदन्त्यया वैश्यः ॥ ३० ॥

'भिक्षां देहि भवती'ति ॥ ३० ॥

'सर्वे लाभमाहरन् गुरव' इत्युक्तम् । अथाऽऽहृतं किं कर्तव्यमित्यत आह-

तत्समाहृत्योपनिधायाऽऽचार्याय प्रब्रूयात् ॥३१॥

तत् भैक्षं समाहृत्य समीपे निधायाचार्याय प्रब्रूयात्–इदमित्थमाहृतमिति॥३१॥

तेन प्रदिष्टं भुञ्जीत ॥ ३२ ॥

तेन ह्याचार्येण प्रदिष्टं सौम्य त्वमेव भुङ्क्ष्वेत्युक्तं भुञ्जीत ॥ ३२ ॥

विप्रवासे गुरोराचार्यकुलाय ॥ ३३ ॥

यदि गुरुर्विप्रोषितोऽसन्निहितः स्यात् तत् आचार्यकुलायाऽऽचार्यस्य यत्कुलं भार्यापुत्रादि तस्मै ब्रूयात् । तेन प्रदिष्टं भुञ्जीत ॥ ३३ ॥

तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः ॥ ३४ ॥

तैस्स्वकुलैस्सह गुरोः विप्रवासे अन्येभ्योऽपि "(३)श्रोत्रियेभ्य. प्रब्रूयात् । तैः प्रदिष्टं भुञ्जीतेति विपरिणामेनान्वयः । गौतमोऽप्याह(४) "असन्निधौ तद्भार्यापुत्रसब्रह्मचारिभ्यः' इति ॥ ३४ ॥

नाऽऽत्मप्रयोजनश्चरेत् ॥ ३५ ॥

---

१. आप. श्रौ. १३. १४. ९, १० सोमयागे पात्नीवतग्रहे प्राप्तस्याप्यनुवषट्कार-निषेधस्य उपांश्वनुवषट्कारविधानार्थं नानुवषट्करोतीत्यनुवादः ।

२. इतः सूत्रत्रयमेकीकृत ग. पुस्तके ।

३ श्रोत्रियपदार्थः आप, ध. २. ४. ६ सूत्रे द्रष्टव्य. । ४. गौ. ध. २. ४०.

आत्मा प्रयोजनं प्रयोजकः यस्य स आत्मप्रयोजन । एवंभूतो भिक्षां न चरेत् आत्मार्थं न चरेदित्यर्थः । अस्य प्रयोजनं यदा श्रोत्रिया अपि न लभ्यन्ते तदा(१)'प्रोषितो भैक्षादग्नौ कृत्वा भुञ्जीते'ति वक्ष्यमाणमप्रोषितेऽपि यथा स्यादिति ॥ ३५ ॥

भुक्त्वा स्वयममत्रं प्रक्षालयीत ॥ ३६ ॥

अमत्रं भोजनपात्रम्, भुक्त्वेति सन्निधानात् । तत्स्वयमेव प्रक्षालयीत प्रक्षालयेत् । भिक्षापात्रस्य त्वन्येन प्रक्षालने न दोषः । उभयोरपि पात्रयोर्ग्रहणमित्यन्ये ॥ ३६ ॥

न चोच्छिष्टं कुर्यात् ॥ ३७ ॥

यावच्छक्नोति भोक्तु तावदेव भोजनपात्रे कृत्वा भुञ्जीत ॥ ३७ ॥

अशक्तौ भूमौ निखनेत् ॥३८॥

भोजने प्रवृत्तो यदि तावद्भोक्तुं न शक्नुयात् तदा तदन्नं भूमौ निखनेत् ॥ ३८ ॥

अप्सु वा प्रवेशयेत् ॥ ३९ ॥

अप्सु प्रक्षिपेत् ॥ ३९ ॥

आर्याय वा पर्यवदध्यात् ॥ ४० ॥

आर्यश्चैवार्णिकः तस्मै अनुपनीताय पर्यवदध्यात् सर्वमेकस्मिन्पात्रेऽवधाय तत्समीपे भूमौ स्थापयेत् ॥ ४० ॥

अन्तर्धिने वा शूद्राय ॥ ४१ ॥

अन्तर्धानमन्तर्धिः सोऽस्यास्तीति । व्रीह्यादित्वादिनिः । अन्तर्धी दासः । अन्तर्हितं हि तस्य शूद्रत्वम्, आशौचेषु स्वामितुल्यत्वात् । प्रकरणादाचार्यस्येति गम्यते । आचार्यदासाय वा शूद्राय पर्यवदध्यात्४१॥

प्रोषितो भैक्षादग्नौ कृत्वा भुञ्जीत ॥ ४२ ॥

यदि शिष्य आचार्यार्थमात्मार्थं वा प्रोषितः स्यात् तदा भैक्षात् किञ्चिदादायाग्नौ कृत्वा प्रक्षिप्य शेष भुञ्जीत श्रोत्रियाणां सद्भावे असद्भावे च । 'अन्येभ्योऽपि श्रोत्रियेभ्य'(२) इत्येतत्र भवति । यदि स्यात्तत्रैवायं ब्रूया 'तदभावेऽग्नौ कृत्वा भुञ्जीते'ति । यद्यपि तत्राचार्यस्य प्रवासः

---

१. आप. ध. १. ३. ४२ २ इत्येतत्त्वत्र न भवति. इति ख. पु.

प्रकृतः, तथापि न्यायसाम्याच्छिष्यस्यापि विप्रवासे भविष्यति ॥ ४२ ॥
अथ ब्रह्मचारिणो यज्ञं विधातु हविरादीनि सम्पादयति—

भैक्षं हविषा संस्तुतं तत्राऽऽचार्यो देवतार्थे ॥ ४३ ॥

भैक्षं हविष्येन संस्तुतं कीर्तितम् । तत्र तस्मिन् हविषि आचार्यो देवतार्थे देवताकार्ये तत्प्रीत्यर्थत्वात्तस्य ॥ ४३ ॥

आहवनीयार्थे च ॥ ४४ ॥

तस्य जाठराग्नौ हूयमानत्वात् ॥ ४४ ॥

तं भोजयित्वा ॥ ४५ ॥

इति प्रथमप्रश्ने तृतीया कण्डिका ।

यदुच्छिष्टं प्राश्नाति ॥ १ ॥

अनुवादेषु सर्वत्र विधिः कल्प्यते । तं भोजयेत् । भोजयित्वा तस्येोच्छिष्टं प्राश्नीयात् प्राश्नाति । अकारोऽपाठश्छन्दसो वा, 'शादि'ति चुत्वप्रतिषेधात् ॥ ४५ ॥ १ ॥

हविरुच्छिष्टमेव तत् ॥ २ ॥

इडाभक्षणादिस्थानीयमित्यर्थः ॥ २ ॥

यदन्यानि द्रव्याणि यथालाभमुपहराति दक्षिणा एव ताः ॥ ३ ॥

यदन्यानि द्रव्याणि गवादीनि भिक्षाचरणे लब्धानि समिदादीनि च स्वयमाहृतानि यथालाभमुपहराति दक्षिणा एव ताः । दक्षिणासामानाधिकरण्यात्ता इत्युक्तम् ॥ ३ ॥

स एष ब्रह्मचारिणो यज्ञो नित्यप्ततः ॥ ४ ॥

स एष एवंभूतो यज्ञः ब्रह्मचारिणो नित्यं प्रतायते । एवं कुर्वता ब्रह्मचारिणा यज्ञ एव नित्यं क्रियत इत्यर्थः ॥ ४ ॥

न चास्मै श्रुतिविप्रतिषिद्धमुच्छिष्टं दद्यात् ॥ ५ ॥

अस्मै शिष्याय आचार्यः श्रुतिविप्रतिषिद्ध शास्त्रविप्रतिषिद्धमुच्छिष्टं न दद्यात् ॥ ५ ॥

किं पुनस्तत्—

यथा क्षारलवणमधुमांसानीति ॥ ६ ॥

यथेतिवचना'च्छ्रुतिविप्रतिषिद्ध'मिति लक्षणतः प्रतिषेधाच्च क्षारादिग्रहणमेवंविधस्योपलक्षणम् ॥ ६ ॥

एतेनान्ये नियमा व्याख्याताः ॥ ७ ॥

अभ्यङ्गशेषो गन्धशेषो माल्यशेष इत्यादयो ब्रह्मचारिणः प्रतिषिद्धा आचार्येण न देया इत्युक्तं भवति ॥ ७ ॥

केचित्तु श्रुतिविप्रतिषिद्धमाचार्यशेषमुपयुञ्जाना दृश्यन्ते पूर्वः पूर्व आचारः प्रमाणमिति वदन्तः । तान्निराकरोति—

श्रुतिर्हि बलीयस्यानुमानिकादाचारात् ॥ ८ ॥

अनुमानाय प्रभवतीत्यानुमानिकः । आचाराद्धि श्रुतिः स्मृतिर्वाऽनुमीयते । तस्मादानुमानिकादाचारात्प्रत्यक्षश्रुतिर्बलीयसी । तद्विरोधे तु नानुमातुं शक्यते,(१) 'अनुमानमबाधितम्' इति न्यायात् । एव च ब्रुवता ब्रह्मचारिणः क्षारलवणादिप्रतिषेधः प्रत्यक्षब्राह्मणमूल इति दर्शितं भवति । यद्यपि क्षारादिप्रतिषेधश्रुतेरुच्छिष्टव्यतिरिक्तो विषयः सम्भवति तथापि सङ्कोचोऽपि तस्या अविशेषप्रवृत्ताया आनुमानिकादाचारादयुक्तः ॥ ८ ॥

ननु परस्परविरुद्धा अपि श्रुतय उपलभ्यन्ते(२) 'गृह्णाति, न गृह्णाती'ति । तत्किमाचारात् सङ्कोचिका श्रुतिर्नानुमीयते ? अत आह—

दृश्यते चापि प्रवृत्तिकारणम् ॥ ९ ॥

स्यादेव यद्ययमाचारोऽगृह्यमाणकारणः स्यात् । गृह्यते तु तत्र कारणम् ॥ ९ ॥

किं तत् ?

प्रीतिर्ह्युपलभ्यते ॥ १० ॥

क्षारादिभोजने भुञ्जानस्य प्रीतिर्भवति । ततश्च यत्र प्रीत्युपलब्धेत

---

१. अनुमानबाधित इति न्यायात्, इति. क. पु

२. अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति. इति श्रुतिभ्यामेकस्मिन्नेवातिरात्रसंस्थाके ज्योतिष्टोमे षोडशिसम्बन्धस्य ग्रहस्य ग्रहणाग्रहणयोः परस्परविरुद्धयोर्विधानात् तयोरपि श्रुत्यो परस्परं विरोधादिति भावः । उलूखलाकार उपर्यासेचनवान् पात्रविशेषो ग्रहः । खदिरवृक्षनिर्मितो ग्रहविशेषषोडशी । तस्य सोमरसेन पूरणं ग्रहणम् ।

प्रवृत्तिर्न तत्र शास्त्रमस्ति। तदनुवर्तमाना नरकाय राध्यतीति न्यायान्न सङ्कोचिका श्रुतिरनुमीयते इति ॥ १० ॥

पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम् ॥ ११ ॥

(१)स्पष्टम् ॥ ११ ॥

धर्मविप्रतिपत्तावभोज्यम् ॥ १२ ॥

यदि तयोर्धर्माद्विप्रतिपत्तिरपायो भवति ततो न भोज्यम् । यद्वा भुञ्जानस्य ब्रह्मचारिणो धर्मविप्रतिषेधो भवति मधुमांसादिमिश्रत्वेन ततो न भोज्यमिति ॥ १२ ॥

सायं प्रातरुदकुम्भमाहरेत् ॥ १३ ॥

आचार्यस्य स्नानपानार्थम् ॥ १३ ॥

(२)सदाऽरण्यादेधानाहृत्याऽधो निदध्यात् ॥ १४ ॥

सदा प्रत्यहमरण्यात् न पित्रादिगृहात् एधान् काष्ठानि आचार्यगृहे पाकाद्यर्थमाहरेत् आहृत्य चाऽधो निदध्यात् अधोनिधानमाचार्यपुत्रादिषु बालेषु पतनशङ्कया। अपर आह—आत्मनस्समिदाधानार्थं(३)मेधाहरणमिति । उक्तं गृह्ये—(४)'एवमन्यस्मिन्नपि सदाऽरण्यादेधानाहृत्य । इति। तदनुवादेनाधोनिधानं विधीयते दृष्टार्थमदृष्टार्थं वेति ॥ १४ ॥

नास्तमिते समिद्धारो गच्छेत् ॥ १५ ॥

अस्तमित आदित्ये समिध आहर्तुं न गच्छेत्; चोरव्याघ्रादिसम्भवात्। समिद्धार' इति(५)'अण् कर्मणि चे' ति तुमर्थेऽण्प्रत्ययः ॥ १५ ॥

अग्निमिध्वा परिसमूह्य समिध आदध्यात्सायं-प्रातर्यथोपदेशम् ॥ १६ ॥

परिसमूहनं परितो मार्जनम्। विप्रकीर्णस्याग्ने(६)रेकीकरणमित्यन्ये । यथोपदेशं यथा गृह्य उक्तं तथा समिध आदध्यात्। गृह्ये विहितमपि स-

---

१. स्पष्टोऽर्थः इति० ग० पु०

२. "तस्मात् ब्रह्मचार्यहरहस्समिध आहृत्य साय प्रातरग्निं परिचरेत्, नोपर्युपसादयेत्, अधः प्रतिष्ठापयेत्" (गोप १ २. ६.) इति गोपथब्राह्मणम् ॥

३. इध्माहरणं इति क. ख. पु. ४. आप० गृ० ११. २२.

५. पा० सू० ३. ३. १२. ६. राशीकरणमित्यन्ये इति ख० ग० पु०

मिदाधानं विधीयते सर्वाचरणार्थम्। सायं प्रातरित्यादिकान्विशेषान् वक्ष्यामीति च ॥ १६ ॥

सायमेवाऽग्निपूजेत्येके ॥ १७ ॥

एके आचार्यास्सायमेवाग्निपूजा कार्या, न प्रातरिति मन्यन्ते ॥ १७ ॥

समिद्धमग्निं पाणिना परिसमूहेन्न समूहन्या ॥ १८ ॥

समिदाधाने समिद्धमग्निं पाणिनैव परिसमूहेत्, न समूहन्या। समूहनी सम्मार्जनी दर्भनिर्मिता वेदाकृतिः, आचारात् ॥ १८ ॥

प्राक्तु याथाकामी ॥ १९ ॥

प्राक्समिदाधानात् परिसमूहने याथाकामी भवति। यथाकामस्य भावो याथाकामी। ष्यञ्, षित्वादीकारः ॥ १९ ॥

नाऽग्न्युदकशेषेण वृथाकर्माणि कुर्वीताऽऽचामेद्वा ॥२०॥

अग्निपरिचर्यायां परिसमूहने परिषेचने च यदुपयुक्तमुदकं, तच्छेषेण वृथाकर्माणि अदृष्टप्रयोजनरहितानि पादप्रक्षालनादीनि न कुर्वीत। नाऽप्याचामेत्। अवृथाकर्मत्वादस्य पुनःप्रतिषेधः ॥ २० ॥

पाणिसंक्षुब्धेनोदकेनैकपाण्यावर्जितेन च नाऽऽचामेत् ॥ २१ ॥

पाणिसंक्षुब्धं (१)पाणिना सक्षोभितं तेनोदकेन नाऽऽचामेत्। इदं तटाकादिषु स्वयमाचमने। यदा पर आचामयति, तदैकेन पाणिना यदावर्जितं तेन नाऽऽचामेत्। किं तु उभाभ्यां हस्ताभ्यां करकादि गृहीत्वा यदावर्जितमुदकं, तेनैवाऽऽचामेत्। एवं च स्वयं वामहस्तावर्जितेनापि नाचामेत्। (अलाबुपात्रेण नालिकेरजेन वैणवेन चर्ममयेन ताम्रमयेन वा पात्रेण स्वयमाचमनमाचरन्ति शिष्टाः) ॥ २१ ॥

स्वप्नं च वर्जयेत् ॥ २२ ॥

पूर्वं 'मदिवास्वापी' (१. २ २८)त्यनेन (२)दिवास्वापः प्रतिषिद्धः। अनेन रात्रावपि यावदाचार्यो न स्वपिति, तावन्तं कालं स्वापः प्रतिषि

---

१. कुम्भादिगतमित्यधिकं ध. पु. ( ) एतच्चिन्हान्तर्गतो भागः ख० पुस्तके नास्ति।

२. दिवास्वापप्रतिषेधः इति, क. पु.

ध्यते । स्वप्नकथनं वर्जयेदित्येके ॥ २२ ॥

अथाऽहरहराचार्यं गोपायेद्धर्मार्थयुक्तैः कर्मभिः ॥ २३ ॥

अथ स्वप्नस्य प्रकृतत्वात् स्वप्नानन्तरं ब्राह्मे मुहूर्ते उत्थायेत्यर्थः । अहरहः नित्यमाचार्यं गोपायेत् रक्षेत् । किं दण्डादि गृहीत्वा ? नेत्याह— धर्मार्थयुक्तैः कर्मभिः । धर्मयुक्तानि कर्माणि समित्कुशपुष्पाहरणादीनि, अर्थयुक्तानि (१)युग्यघासाहरणादीनि ॥ २३ ॥

(२) स गुप्त्वा संविशन् ब्रूया 'द्धर्म गोपाय माजूगुपमह'मिति ॥ २४ ॥

स(३)ब्रह्मचारी धर्मार्थयुक्तैः कर्मभिर्यावदुत्थानात् यावदस्य संवेशनात् एवमाचार्यं गुप्त्वा संविशन् शयनं भजन् (४)'धर्मं गोपायमाजूगुपमह' मितीमं मन्त्रं ब्रूयात् । धर्मं गोपायतीति धर्मगोपायः आचार्यः तमहमाजूगुपमामिमुख्येन रक्षितवानस्मि, इदानीं तु संविशामीति मन्त्रार्थः ।

अपर आह—हे धर्म मा मां गोपाय रक्ष यस्मादहं आजूगुपमहमाचार्यमेतावन्तं कालमिति ॥ २४ ॥

प्रमादादाचार्यस्य बुद्धिपूर्वं वा नियमातिक्रमं रहसि बोधयेत् ॥ २५ ॥

प्रमादोऽनवधानम् । प्रमादात् बुद्धिपूर्वं यो आचार्यस्य वा नियमातिक्रमस्तं रहसि बोधयेत् । इत्थमयं नियमः पूज्यपादैरतिक्रम्यते इति ॥ २५ ॥

आनिवृत्तौ स्वयं कर्माण्यारभेत ॥ २६ ॥

यदि बोधितोऽप्याचार्यस्ततो न निवर्तते, ततः स्वयमेव तस्य कर्तव्यानि ब्रह्मयज्ञादीनि कर्माण्यारभेते कुर्यात् ॥ २६ ॥

निवर्तयेद्वा ॥ २७ ॥

---

१. एधसां हरणादीनि इति घ. पु.

२. "स यदहरहराचार्यकुलेऽनुष्ठिते सोऽनुष्ठाय ब्रूयात्-धर्मगुप्तो मा गोपायेति धर्मो हैनं गुप्तो गोपायेति" इति गोपथब्राह्मणम् (गो. ब्रा. १. २. ४.)

३. न्याय्यादुत्थानान्न्याय्याच्च संवेशनात् . इति क. ख. पु. अन्यायात्·····दन्याय्याच्च·····इति. ङ पु.

४. यावदुपात्त एवायं मन्त्रः ।

प्रसह्य वा स्वयं निवर्तयेत् । पित्रादिभिर्वा निवर्तयेत् ॥ २७ ॥

अथ यः पूर्वोत्थायी जघन्यसंवेशी तमाहुर्न स्वपितीति ॥ २८ ॥

यः पूर्वमाचार्यादुत्तिष्ठति प्रतिबुध्यते । जघन्यशब्दः पश्चादर्थे । जघन्यश्च संविशति, तं ब्रह्मचारिणं न स्वपितीति धर्मज्ञा आहु । प्रयोजनमुपनयने 'मा सुषुप्था' इति संशासनस्यायमर्थः, न स्वापस्यात्यन्ताभाव इति । अथशब्दश्च वाक्योपक्रमे ॥ २८ ॥

स य एवं प्रणिहितात्मा ब्रह्मचार्यत्रैवास्य सर्वाणि कर्माणि फलवन्त्यवाप्तानि भवन्ति यान्यपि गृहमेधे ॥२९॥

'आचार्याधीनः स्या' दित्यारभ्य यस्य नियमा उक्ताः, स ब्रह्मचारी, एवमुक्तेन प्रकारेण, प्रणिहितात्मा प्रकर्षेण निहित आचार्यकुले स्थापित आत्मा येन स तथोक्तः । प्रकर्षश्च(१)आत्मनस्तत्रैव शरीरन्यासः । वक्ष्यति (२)आचार्यकुले शरीरन्यासः " इति । अस्यैवंविधस्य ब्रह्मचारिणः अत्रैव ब्रह्मचर्याश्रमे सर्वाणि फलवन्ति ज्योतिष्टोमादीनि कर्माण्यवाप्तानि भवन्ति । तत्फलावाप्तिरेव तदवाप्तिः । यान्यपि कर्माणि गृहमेधे गृह्यशास्त्रे विवाहाद्यष्टकान्तानि, तान्यवाप्तानि भवन्ति । तदेवं नैष्ठिकब्रह्मचारिविषयमिदं सूत्रम् ॥ २९ ॥

इत्यापस्तम्बीये धर्मसूत्रे चतुर्थी कण्डिका ॥ ४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ(३) हरदत्तविरचितायामुज्वलायां
प्रथमप्रश्ने प्रथमः पटलः ॥ १ ॥

---

१. आन्तात्तत्रैव शरीरन्यासः इति ख. पु. अन्ततस्तत्रैव, इति, घ. पु.

२. आप. ध. २. २१. ६. ३. हरदत्तमिश्रविरचितायां इति क० पु०

अथ द्वितीयः पटलः ।

नियमेषु तपश्शब्दः ॥ १ ॥

'आचार्याधीनः स्या'दित्यादयो ये नियमाः अस्मिन्ब्रह्मचारिप्रकरणे निर्दिष्टाः, तपश्शब्दस्तेषु द्रष्टव्यः, न तु कृच्छ्रादिषु ॥ १ ॥

तदतिक्रमे विद्याकर्म निःस्रवति ब्रह्म सहाप-त्यादेतस्मात् ॥ २ ॥

तेषां नियमानामतिक्रमे विद्याकर्म विद्याग्रहणं ब्रह्म निःस्रवति गृहीतं वेदं निस्सारयति । कुतः, ? एतस्मात् नियमातिक्रमेणाध्येतुः पुरुषात् । न केवलमेतस्मात् । किं तर्हि? सहापत्यात् । अपत्येन सह वर्तत इति सहापत्यः (१)'वोपसर्जनस्ये'ति सभावाभावे रूपम् । अपत्यादपि ब्रह्म निःसारयति। यद्यप्यपत्यं नियमातिक्रमकारि न भवति, तथापि पितृदोषादेव ततोऽपि ब्रह्म निस्सारयति । नियमातिक्रमेण विद्याग्रहण कुर्वतः पुरुषात् सहापत्यात् गृहीतं ब्रह्म निस्सरति, ब्रह्मयज्ञादिषूपयुज्यमानमप्यकिञ्चित्करं भवतीत्यर्थो विवक्षितः । स्रवतेश्च सकर्मकस्य प्रयोगो भाष्ये दृष्टः 'स्रवत्युदकं कुण्डिकेति ।

अपर आह—(२)तदतिक्रमे नियमातिक्रमे विद्याग्रहणं न कर्तव्यम् । कुतः ? यतो निस्स्रवति ब्रह्म निस्सरतीत्यर्थः, शेषं समानमिति । विद्याकर्म निस्स्रवति ब्रह्म च निस्स्रवतीत्यन्ये । अन्ये च—कुर्वत इत्यध्याहार्यम् । तदतिक्रमेण विद्याकर्म कुर्वतो ब्रह्म निस्स्रवतीति ॥ २ ॥

न केवलमकिञ्चित्करं नियमातिक्रमेण विद्याग्रहणम्, प्रत्युताऽनर्थकारीत्याह—

कर्तपत्यमनायुष्यं च ॥ ३ ॥

कर्तशब्देन श्वभ्राभिधायिना नरको लक्ष्यते । पतत्यनेनेति पत्यम् । एवंभूतं विद्याग्रहणं नरकपातहेतुर्भवति । अनायुष्यं च अनायुष्करं च ॥ ३ ॥

---

१. पा.सू. ६ ३.८२. बहुव्रीह्यवयवस्य सहशब्दस्य सभावस्स्यद्विकल्पेन इति सूत्रार्थः।

२. तदतिक्रमे विद्याकर्म निस्स्रवतीति नियमातिक्रमेण विद्याग्रहणं न कर्तव्यम्, कुतः ? यतो निस्स्रवति ब्रह्मनिस्सारयतीत्यर्थः, इति क. पु.

र्षन् मनसा निर्दयेन शिवेन वा ध्यायति-इत्थमिदमस्याऽस्त्विति, तथैव तद्भवति । तथा यत्किञ्च सङ्कल्पयन्वाचा (१)क्रूरया मधुरया वा आह—'इत्थमिदमस्यास्त्विति, तथैव तद्भवति । एव यत्किञ्च सङ्कल्पयन् चक्षुषा घोरेण वा मैत्रेण वा अभिविपश्यति तथैव तद्भवतीत्युपदिशन्ति धर्मज्ञाः ॥ ८ ॥

अवश्यं धर्मयुक्तेनाध्येतव्यमित्युक्तम् । इदानीं ते धर्मा लक्षणतस्त्रिविधा इत्याह—

गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्ति(२)रिति ॥ ९ ॥

यैरनुष्ठितैः गुरुः प्रसीदति तानि गुरुप्रसादनीयानि पादप्रक्षालनादीनि कर्माणि । स्वस्तीत्यविनाशिनाम । तत्प्राप्तिसाधन स्वस्त्ययनम् । तच्च त्रिविधंदृष्टार्थमदृष्टार्थमुभयार्थं चेति । दृष्टार्थं बाहुनदीतरणादिनिषेधः । अदृष्टार्थं क्षारादिनिषेधः । उभयार्थं भिक्षाचरणादि । अध्ययनसम्वृत्तिरधीतस्य वेदस्याऽभ्यासः ॥ ९ ॥

अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः कर्माणि ॥ १० ॥

एतेभ्यः अन्यानि कर्माणि निवर्तन्ते ब्रह्मचारिणो, न कर्तव्यानीत्यर्थः ॥१०॥

स्वाध्यायधृग्धर्मरुचिस्तपस्व्यृजुर्मृदुस्सिद्ध्यति ब्रह्मचारी ॥ ११ ॥

स्वाध्यायधृक् अधीतस्य(३)वेदस्य धारयिता अविस्मर्ता । धर्मे रुचिर्यस्य स धर्मरुचिः । तपस्वी नियमेषु तपश्शब्दः तद्वान् । ऋजुः अमायावी । मृदु । क्षमावान् । एवभूतो ब्रह्मचारी सिध्यति सिद्धिं प्राप्नोति । उक्ता सिद्धिः (४)'अथो यत्किञ्च मनसे 'ति । तत्रोक्तानां पुनर्वचनमादरार्थम् । तदनुष्ठाने फलभूमा, अतिक्रमे च दोषभूमेति तात्पर्यम् ॥ ११ ॥

सदा महान्तमपररात्रमुत्थाय गुरोस्तिष्ठन्प्रातरभिवादनमभिवादयीताऽसावहं भो, इति ॥ १२ ॥

सदा प्रतिदिनं महान्तमपररात्रं रात्रेः पश्चिमे याम उत्तिष्ठेत् । उत्थाय च

---

१. घोरया इति. क. पु २. अयं 'इति' शब्द उत्तरसूत्रस्यादौ पठितः क० पुस्तके
३ 'स्वाध्यायस्य' इति क. ख. पु. ४. आप. ध १. ५. ८.

समीपे तिष्ठन् गुरोः प्रातरभिवादनमभिवादयीत—'असावहं भो' इति सावित्यत्राऽऽत्मनो नामनिर्देशः, यथा—'अभिवादये शर्माऽहं भो' इति ॥ १२ ॥ न । अ-

समानग्रामे च वसतामन्येषामपि वृद्धतरा प्राक्प्रातराशात् ॥ १३ ॥

अन्येषामप्याचार्यव्यतिरिक्तानाम् प्राक्प्रातराशात् प्रातर्भोजनात्प्राक् प्रातरभिवादमभिवादयीत, ते चेत् समानग्रामे वसन्ति ॥ १३ ॥

प्रोष्य च समागमे ॥ १४ ॥

यदा स्वयं प्रोष्य समागतो भवति, आचार्यादयो वा तदाऽप्यभिवादयीत । इदं नैमित्तिकम् । पूर्वं नित्यम् ॥ १४ ॥

अथ काम्यम्—

स्वर्गमायुश्चेप्सन् ॥ १५ ॥

अभिवादयीतेत्येव ॥ १५ ॥

अभिवादनप्रकारं वर्णानुपूर्व्येणाऽऽह—

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीतोरस्समं राजन्यो मध्यसमं वैश्यो(१) नीचैश्शूद्रः प्राञ्जलि ॥ १६ ॥

ब्राह्मणोऽभिवादयमानः आत्मनो दक्षिणं बाहुं श्रोत्रसमं प्रसार्याभिवादयीत । उरस्समं राजन्यः । दक्षिणं प्रसार्याभिवादयीतेत्यत्रानुवर्तते । एवमुत्तरयोरपि । मध्यसममुदरसमम् । ऊरुसममित्यन्ये । नीचैः पादसमं शूद्रोऽभिवादयीत । प्राञ्जलि यथा भवति तथा अभिवादयति । अञ्जलिं कृत्वेत्यर्थः । प्राञ्जलिरिति युक्तः पाठः ॥ १६ ॥

प्लावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वर्णानाम् ॥ १७ ॥

अभिवादनस्य यत्प्रत्यभिवादनं तत्राभिवादयितुर्नाम्नः प्लावनं कर्तव्यम् प्लुतः कर्तव्य इत्यर्थः । पूर्वेषां वर्णानां शूद्रवर्जितानामभिवादयमानानाम् ।

---

१. ...नीचैश्शूद्रः ॥ १६ ॥ प्राञ्जलि ॥ १७ ॥ इति पाठः क. घ. पु.

(१)प्रत्यभिवादेऽशूद्रे' इति पाणिनीयस्मृतिः । तत्र (२)'वाक्यस्य टेः प्लुत उदात्तः' इत्यनुवृत्तेः प्रत्यभिवादवाक्यस्यान्ते नामप्रयोगः तस्य टेः प्लुतः । 'आयुष्मान् भव सौम्या३ इति प्रयोक्तव्यः । स्मृत्यन्तरवशान्नाम्नश्च पश्चाद्-कारः । तथा च मनुः—

(३)आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥" इति ।

'आयुष्मान् भव सौम्य देवदत्त ३ अ' इति प्रयोगः । शम्भुर्विष्णुः पिनाकपाणिश्चक्रपाणिरित्यादीनां नाम्नां सम्बुद्धौ गुणे कृते 'एचोऽप्रगृह्यस्यादूरादूधूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' इत्ययं विधिर्भवति । अन्ते अकारः । (४) 'तयोर्य्वावचि संहितायाम्' इति यकारवकारौ च भवतः—शम्भ ३ व, विष्ण ३ व, पिनाकपाण ३ य, चक्रपाण ३ य, इति । अत्र सूत्रे 'प्रत्यभिवादने चे'ति चकारस्यार्थं न पश्यामः ।

अपर आह—'अभिवादने प्रत्यभिवादने च प्लावनमिति । अस्मिन्नपि पक्षे द्वन्द्वेनाभिहितत्वाच्चशब्दोऽनर्थक एव । अभिवादने च शास्त्रान्तरे न क्वापि प्लुतो विहितः । तस्मादनर्थक एव चकारः । अनर्थकाश्च निपाता बहुलं प्रयुज्यन्ते ॥ १७ ॥

उदिते त्वादित्य आचार्येण समेत्योपसंग्रहणम् ॥१८॥

उदिते त्वादित्ये आचार्येण अध्ययनार्थं समेत्य वक्ष्यमाणेन विधिनोपसंग्रहणं कुर्यात् ॥ १८ ॥

सदैवाऽभिवादनम् ॥ १९ ॥

अन्यदा सर्वदा पूर्वोक्तप्रकारेणाभिवादनमेव । अयमनुवाद उत्तरविवक्षया ॥ १९ ॥

उपसंग्राह्य आचार्य इत्येके ॥२०॥

अभिवादनप्रसङ्गे सदैव उपसंग्राह्य आचार्य इत्येके मन्यन्ते ॥ २० ॥

---

१ पा सू ८. २. ८३ शूद्रभिन्नविषये प्रत्यभिवादे यद्वाक्य 'आयुष्मान् भव सौम्य" इत्यादिरूप तस्य टेः प्लुतस्स्यात्, स चोदात्त इति सूत्रार्थः ।

२. पा. सू ८. २ ८२ ३. मनु. स्मृ २ १२५.

४. पा. सू ८ २. १०८. इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् इति सूत्रार्थः ।

ननु किमिदमुपसंग्रहणम् ? तदाह—

दक्षिणेन पाणिना दक्षिणं पादमधस्तादभ्यधिमृश्य सकुष्ठिकमुपसंगृह्णीयात् ॥ २१ ॥

आत्मनो दक्षिणेन पाणिना आचार्यस्य दक्षिणं पादं अधस्तादभ्यधिमृश्य, अधिशब्द उपरिभावे, अधस्ताच्चोपरिष्टाच्चाभिमृश्य । सकुष्ठिक सगुल्फम् । साङ्गुष्ठमित्यन्ये । उपसगृह्णीयात् । इदमुपसग्रहणम् । एतत्कुर्यात्२१॥

उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके ॥२२॥

उभाभ्यां पाणिभ्यां उभावेवाऽऽचार्यस्य पादौ अभिपीडयतो माणवकस्य उपसग्राह्यावित्येके मन्यन्ते । अभिपीडयत इति " (१)कृत्यानां कर्तरि"इति कर्तरि षष्ठी । अत्र मनुः—

(२)'व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥ इति ॥ २२ ॥

सर्वाह्णं सुयुक्तोऽध्ययनादनन्तरोऽध्याये ॥ २३ ॥

सर्वं च तदह्नश्च सर्वाह्णम् । (३)'राजाहस्सखिभ्यष्टच्' (४)'अह्नोऽह्न एतेभ्य' इत्यह्नादेशः । (५)'अह्नादन्ता'दिति णत्वम् । अत्यन्तसयोगे द्वितीया ।' सर्वाह्ण सदा सुयुक्तः सुसमाहितः अनन्यचित्तः । अध्ययनादनन्तरः नान्तरयतीत्यनन्तरः । अध्ययनाद्यथा आत्मान नान्तरयति यथा अध्ययनाग्र विच्छिद्येत तथा स्यात् । अध्याये स्वाध्यायकाले । अध्याय इत्यनुवादः । (६)'मनसा चानध्याय' इति विशेषविधानात् । 'अध्यायें'दिति प्रायेण पठन्ति । तत्र तकारोऽपपाठश्छान्दसो वा ॥ २३ ॥

तथा गुरुकर्मसु ॥ २४ ॥

गुरुकर्मसु च तथा स्यात् सुयुक्तोऽनन्तरश्च स्यात् ॥ २४ ॥

---

१. पा. सू. २. ३. ७१ २. म. स्मृ. २. ७२.

३. पा० सू० ५. ४ ९१. राजन्शब्दान्तादहन्शब्दान्तात् सखिशब्दान्ताच्च तत्पुरुषात् टच् स्यात् इति सूत्रार्थः ॥

४. सर्वै, कदेश, सङ्ख्यात, पुण्यशब्देभ्यः परस्याहन्शब्दस्याह्न इत्यादेशस्स्यात् समासान्ते परे इति सूत्रार्थ ।

५. ९. ४ ७. अदन्तपूर्वपदस्थाद्रेफात् परस्याह्नादेशस्य नस्य णस्स्यात् इति सूत्रार्थः ।

६. आप. ध. १. ५. २६.

मनसा चाऽनध्याये ॥ २५ ॥

अनध्यायकाले मनसा च अध्यायादनन्तरः स्यात् । सन्देहस्थानानि मनसा निरूपयेत् । अध्ययनविषयामेव चिन्तां कुर्यात् ॥ २५ ॥

आहूताध्यायी च स्यात् ॥ २६ ॥

आचार्येणाहूतस्सन्नधीयीत, नाध्यापने स्वयं प्रवर्तयेत् ॥ २६ ॥

॥ इत्यापस्तम्बीये धर्मसूत्रे पञ्चमी कण्डिका ॥

सदा निशायां गुरुं संवेशयेत्तस्य पादौ प्रक्षाल्य संवाह्य ॥ १ ॥

सदा प्रत्यहं निशायां अतिक्रान्ते प्रदोषे गुरुं संवेशयेत् । कथम् ? तस्य गुरोः पादौ प्रक्षाल्य सवाह्य च । संवाहनं मर्दनम् ॥ १ ॥

अनुज्ञातः संविशेत् ॥ २ ॥

(१)गुरुणाऽनुज्ञातस्तु स्वयं संविशेत् शयीत ॥ २ ॥

न चैनमभिप्रसारयीत ॥ ३ ॥

एनमाचार्यं प्रति पादौ न प्रसारयेत् ॥ ३ ॥

न खट्वायां सतोऽभिप्रसारणमस्तीत्येके ॥ ४ ॥

यदा तु गुरुः खट्वाया शेते तदा तं प्रति पादयोः प्रसारणं न दोषायेत्येके मन्यन्ते, स्वपक्षस्तु तत्रापि दोष इति ॥ ४ ॥

न चाऽस्य सकाशे संविष्टो भाषेत ॥ ५ ॥

अस्याऽऽचार्यस्य सकाशे स्वयं संविष्टः शयानो न भाषेत । कार्यावेदनादावुत्थायैव भाषेत ॥ ५ ॥

अभिभाषितस्त्वासीनः प्रतिब्रूयात् ॥ ६ ॥

आचार्येण(२)भिभाषितस्त्वासीनः प्रतिब्रूयात् । एतदाचार्ये आसीने शयाने वा ॥ ६ ॥

अनुत्थाय तिष्ठन्तम् ॥ ७ ॥

---

१. पश्चाद्गुरुणा इति ख. पु २. अभिभाषितस्सन् इति ख. पु.

यदा त्वाचार्यस्तिष्ठन् ब्रूते तदा तमनूत्थाय प्रतिब्रूयात् । उत्तरे द्वे सूत्रे स्पष्टार्थे ॥ ७ ॥

गच्छन्तमनुगच्छेत् ॥ ८ ॥ धावन्तमनुधावेत् ॥ ९ ॥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वासीदेत् ॥ १० ॥

उत्तरश्लोपानत्प्रतिषेधा'च्च सोपान'दित्यनुवादः 'अध्वापन्नस्त्वि'ति प्रतिप्रसोतुम् । आचार्यं न सोपानत्क आसीदेत् । नापि वेष्टितशिराः । अवहितपाणिः दात्रादिहस्तः एवंभूतोऽपि नासीदेत् ॥ ८–१० ॥

अध्वापन्नस्तु कर्मयुक्तो वाऽऽसीदेत् ॥ ११ ॥

अध्वानं प्राप्तोऽध्वापन्नः कर्मणि दात्रादिसाध्ये प्रवृत्तः कर्मयुक्तः एवंभूतस्तु सोपानत्कोऽप्यासीदेत् ॥ ११ ॥

न चेदुपसीदेत् ॥ १२ ॥

(१) न चेदाचार्यस्समीपे, उपसीदेत् उपविशेत् । यदि तूपविशेदध्वापन्नः कर्मयुक्तो वा तदोपानत्प्रभृतीनि विहायोपविशेत ॥ १२ ॥

देवमिवाचार्यमुपासीताऽविकथयन्नविमना वाचं शुश्रूषमाणोऽस्य ॥ १३ ॥

यो यं देवं भजते स तद्भावनया तमिवाऽऽचार्यमुपासीत । अविकथयन् (२)व्यर्थां कथामकुर्वन् । अविमनाः अविक्षिप्तमनाः । अस्याऽऽचार्यस्य वाचं शुश्रूषमाणः ॥ १३ ॥

अनुपस्थकृतः ॥ १४ ॥

(३)उपस्थकरणं प्रसिद्धम् । तत्कृत्वा नोपासीत ॥ १४ ॥

अनुवाति(४) वाते वीतः ॥ १५ ॥

वाते अनुवाति सति वीतः विपर्ययेणेतः उपासीत । प्रतिवातं तु वक्ष्यमाणेन प्रतिषिध्यते । मनुरप्याह—

(५)'प्रतिवातेऽनुवाते च नासीत गुरुणा सहे'ति ॥ १५ ॥

---

१. न चेदाचार्यसमीपे उपसीदेत् उपविशेत् इति ख, पु.

२. व्यर्थां कथा विकथा तामकुर्वन् इति. ख. पु.

३. आकुञ्चितस्य सव्यजानुनऽपरिदक्षिणं पादं प्रक्षिप्योपवेशनमुपस्थकरणम् ।

४. 'वाते' इति नास्ति ख. पु. ५. मनु. स्मृ. २. २०३.

अप्रतिष्ठब्धः पाणिना ॥ १६ ॥

पाणिना प्रतिष्ठब्धो न स्यात् पाणितलं भूमौ कृत्वा पाण्यवलम्बनो नाऽऽसीत ॥ १६ ॥

अनपाश्रितोऽन्यत्र ॥ १७ ॥

अन्यत्र कुड्याद्यपाश्रितो न स्यात् । कुड्याद्यपाश्रितो नासीत ॥ १७ ॥

यज्ञोपवीती द्विवस्त्रः ॥ १८ ॥

यदा द्विवस्त्रस्तदा वाससाऽन्यतरेण यज्ञोपवीती स्यात् । (१) "अपि वा सूत्रमेवोपवीतार्थे" इत्येष कल्पस्तदा न भवति ॥ १८ ॥

अधोनिवीतस्त्वेकवस्त्रः ॥ १९ ॥

यदा त्वेकवस्त्रो भवति तदा अधोनिवीतः स्यात् । न तस्य दीर्घस्याप्येकदेशेनोत्तरीयं कुर्यात् ॥ १९ ॥

अभिमुखोऽनभिमुखम् ॥ २० ॥

स्वयमाचार्याभिमुखः आत्मानं प्रत्यनभिमुखमाचार्यमुपासीत । (२)स्वयमाचार्यमपश्यन् आचार्यस्य पुरत आर्जवे नाऽऽसीत ॥ २० ॥

अनासन्नोऽनतिदूरे(३) च ॥ २१ ॥

अत्यासन्नो न स्यादतिदूरे च न स्यात् ॥ २१ ॥

यावदासीनो बाहुभ्यां प्राप्नुयात् ॥ २२ ॥

यावत्यन्तराले आसीन आचार्यं बाहुभ्यां प्राप्तुं शक्नुयात् तावत्यासीत ॥ २२ ॥

अप्रतिवातम् ॥ २३ ॥

आचार्यस्य (४)प्रतिवाते नाऽऽसीत ॥ २३ ॥

एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् ॥ २४ ॥

यदा एक एवाऽधीते तदा आचार्यस्य दक्षिणं बाहुं प्रति दक्षिणे पार्श्वे उपसीदत् उपविशेत् ॥ २४ ॥

यथावकाशं बहवः ॥ २५ ॥

---

१. आप ध २. ४. २२. २. स्वयमाचार्यमेव पश्यन् इति. ख पु.
३. चकारो नास्ति ख. पुस्तके ४. प्रतिवातं इति ख. पु

बहवस्तु शिष्या यथावकाशमुपसीदेयुः ॥ २५ ॥

तिष्ठति च नाऽऽसीताऽनासनयोगविहिते ॥ २६ ॥

आसनयोग आसनकल्पना । आसनयोगेन विहितस्सम्भावित आसनयोगविहितः । आसनयोगेनाऽसम्भावितेऽ आचार्ये तिष्ठति सति स्वयं नाऽऽसीत ॥ २६ ॥

आसीने च न संविशेत् ॥ २७ ॥

(१)'अशयनयोगविहिते' इति पूर्वानुसारेण गम्यते । शयनयोगेनासम्भावित आचार्ये आसीने स्वय न संविशेत् न शयीत ॥ २७ ॥

चेष्टति च चिकीर्षंस्तच्छक्तिविषये ॥ २८ ॥

व्यत्ययेन परस्मैपदम् । आचार्ये चेष्टति सति स्वयमपि तच्चिकीर्षन् स्यात् । किमविशेषेण, ? शक्तिविषये । यद्याचार्येण क्रियमाणमात्मनश्शक्तेर्विषयो भवति । 'चिकीर्ष' इति सन्प्रयोगादिच्छामेव प्रदर्शयेत् नाऽच्छिद्य कुर्यात् । प्रदर्शितायां त्विच्छायामाचार्यश्चेदनुजानीयात्, कुर्यात् । अशक्तिविषये तु नेच्छापि प्रदर्शयितव्या । चिकीर्षेदिति युक्तः पाठः ॥ २८ ॥

न चास्य सकाशेऽन्वक्स्थानिन उपसङ्गृह्णीयात् ॥ २९ ॥

आचार्यव्यतिरिक्ता गुरवोऽन्वक्स्थानिन इति स्मार्तो व्यवहारः । आचार्य. श्रेष्ठो गुरूणाम् । तमपेक्ष्यान्वक्स्थानं पदमेषामिति कृत्वा । आचार्यस्य सन्निधौ अन्वक्स्थानिनं नोपसङ्गृह्णीयात् ॥ २९ ॥

गोत्रेण वा कीर्तयेत् ॥ ३० ॥

न चैनमन्वक्स्थानिनं गोत्रेण अभिजनकुलादिना वा कीर्तयेत् न स्तुवीत भार्गवोऽयं महाकुलप्रसूत इति ॥ ३० ॥

न चैनं प्रत्युत्तिष्ठेदनुत्तिष्ठेद्वा(२)पि चेत्तस्य गुरुः स्यात् ॥ ३१ ॥

प्रत्युत्थानमप्यस्य न कर्तव्यमाचार्यस्य सकाशे । यदा पुनरसावा-

---

१. आसनयोग इति क० पु० २. अपि चेत्यादि सूत्रान्तरं. ख. च. पु ।

चार्यसकाशे स्वासित्वा गमनायोत्तिष्ठति तदाऽनूत्थानमपि न कर्तव्यम् । यद्यप्यसौ तस्य(१)आचार्यस्य मातुलादिः गुरुः स्यात् । (२)'आचार्यप्राचार्यसन्निपात' इति वक्ष्यति। तेनैव न्यायेन(३)मातुलादिष्वपि प्रसङ्गे इदमुक्तम् ॥ ३१ ॥

देशात्त्वासनाच्च संसर्पेत् ॥ ३२ ॥

किं तु देशादासनाच्च ससर्पेत्तस्य सम्मानार्थम् ॥ ३२ ॥

नाम्ना तदन्तेवासिनं गुरुमप्यात्मन इत्येके ॥ ३३ ॥

तस्याचार्यस्यान्तेवासिनं नाम्नैव कीर्तयेत् 'यज्ञशर्मन्नि' ति । यद्यप्यसावात्मनो गुरुर्भवति इत्येवमेके मन्यन्ते । स्वपक्षस्तु गुरोर्नामग्रहणं न कर्तव्यमिति ॥ ३३ ॥

यस्मिंस्त्वनाचार्यसम्बन्धाद्गौरवं वृत्तिस्तस्मिन्नन्वक्स्थानीयेऽप्याचार्यस्य ॥ ३४ ॥

यस्मिंस्तु पुरुषे शिष्याचार्यभावमन्तरेणापि विद्याचारित्र्यादिना लौकिकानां गौरवं तस्मिन्नन्वक्स्थानीये ऽप्याचार्ये या वृत्तिस्सा कर्तव्या। अन्वक्स्थानीयोऽप्यनन्वक्स्थान्येव ॥ ३४ ॥

भुक्त्वा चास्य सकाशे नानूत्थायोच्छिष्टं प्रयच्छेत् ॥ ३५ ॥

आचार्यस्य भुञ्जानस्याऽभुञ्जानस्य वा सकाशे भुक्त्वा अनूत्थाय छान्दसो दीर्घः । उत्थानमकृत्वा उच्छिष्टं न प्रयच्छेत् (४)'आर्याय वा पर्यवदध्या'दिति यद्विहितम् ॥ ३५ ॥

आचामेद्वा ॥ ३६ ॥

आचमनमप्यनुत्थाय न कुर्यात् ॥ ३६ ॥

किं करवाणीत्यामन्त्र्य ॥ ३७ ॥

आचम्य किं करवाणीति गुरुमामन्त्र्य ॥ ३७ ॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने षष्ठी कण्डिका ॥

---

१. माणवकस्य इति क. पु. २. आप० ध० १. ८. १९ पूजां वक्ष्यतीति ख० पु०
३. मातुलादिप्रसङ्गे इति क० पु० ४. आप० ध० १. ३. ४०.

उत्तिष्ठेत्तूष्णीं वा ॥ १ ॥

उत्तिष्ठेत् तूष्णीं वा । विकल्पः । आमन्त्रयेति लिङ्गात्(१)उत्थायाप्याचामद्याचार्यसकाश एवाऽऽचामेत् ॥ १ ॥

नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्याऽपेयात् ॥ २ ॥

उत्थाय कार्यवत्तया गन्तुमिच्छन् गुरोरप अपसव्यं न पर्यावर्तेत । किं तु प्रदक्षिणीकृत्याऽपेयात् ॥ २ ॥

न प्रेक्षेत नग्नां स्त्रियम् ॥ ३ ॥

यां प्रेक्षमाणस्य मनसो विकारो भवति तां नग्नां स्त्रिय नेक्षेत ॥ ३ ॥

(२)ओषधिवनस्पतीनामाच्छिद्य नोपजिघ्रेत् ॥ ४ ॥

ओषधयः फलपाकान्ताः । वनस्पतयो ये पुष्पैर्विना फलन्ति । वीरुद्वृक्षाणामप्युपलक्षणम् । तेषां पत्रपुष्पाण्याच्छिद्य नोपजिघ्रेत् । 'आच्छिद्ये'तिवचना(३)द्यादृच्छिकाघ्राणे न दोषः ॥ ४ ॥

उपानहौ छत्रं यानमिति वर्जयेत् ॥ ५ ॥

यान शकटादि । इतिशब्द एवंप्रकाराणामुपलक्षणार्थः । तत्र गौतमः-(४)वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवादवादनस्नानदन्तधावनहर्षनृत्तगीतपरिवादभयानीति ॥ ५ ॥

न स्मयेत ॥ ६ ॥

स्मितं न कुर्यात् ॥ ६ ॥

यदि स्मयेताऽपिगृह्य स्मयेतेति हि ब्राह्मणम् ॥ ७ ॥

यदि हर्षातिरेकं धारयितुं न शक्यते अपिगृह्य हस्तेन मुखं पिधाय स्मयेत इति ब्राह्मणं 'न स्मयेते' त्यारभ्य ॥ ७ ॥

---

१. उत्थायाप्याचमन न कुर्यात् , आचार्यसमीप एवाचामेत् । इति. ख. पु.

२. "अथैतत् ब्रह्मचारिणः पुण्यो गन्धो य ओषधिवनस्पतीनां तासां पुण्य गन्ध प्रच्छिद्य नोपाजिघ्रेत् तेन त पुण्यं गन्धमवरुन्धे" इति गोपथब्राह्मणम् । (गो. ब्रा १. २. २)

३. यादृच्छिके गन्धग्रहणे न दोषः इति ख० पु०

४. गौ. ध. २-१३.

(१)नोपजिघ्रेत् स्त्रियं मुखेन ॥ ८ ॥

स्नाता(२)मनुलिप्तां वा स्त्रियं बालामपि मुखेन नोपजिघ्रेत् । 'मुखेने' ति वचनाद्यदिच्छिके गन्धाघ्राणे न दोषः ॥ ८ ॥

न हृदयेन प्रार्थयेत् ॥ ९ ॥

हृदयेन मनसा स्त्रियं न प्रार्थयेत्—अपीयं मम स्यादिति ॥ ९ ॥

नाकारणादुपस्पृशेत् ॥ १० ॥

कारणेन विना स्त्रियं नोपस्पृशेत् । कारणं योक्त्रसन्नहनविमोचनविषमपतनधारणादि ॥ १० ॥

रजस्वलो रक्तदन्सत्यवादी स्यादिति हि ब्राह्मणम् ॥११॥

रजस्वलो मलिनगात्रः । रक्ता दन्ता यस्य स रक्तदन् । छान्दसो दन्नादेशः । पङ्किलदन्त इत्यर्थः । एतदुभय 'मुत्सन्नश्लाघ'(१-१-२७)इत्यनेन गतमपि पुनरुच्यते(३)श्रौतप्रायश्चित्तप्राप्त्यर्थम् । 'अनृतं वोक्त्वे'(२-१-२७) ति प्रायश्चित्तं वक्ष्यति । सत्यवादी स्यादिति ब्राह्मणम् ॥ ११ ॥

यां विद्यां कुरुते गुरौ तेऽप्यस्याऽऽचार्या ये तस्यां गुरोर्वैद्याः ॥ १२ ॥

आत्मीये गुरौ यां विद्यां कुरुते अधीते तस्यां विद्यायां गुरोर्वैद्या आचार्यास्तेऽप्यस्य माणवकस्याचार्याः । यद्यपि साक्षात्तेभ्यो न गृह्यते विद्या तथापि आचार्यवदुपचरितव्याः । 'तस्या' मिति वचनाद्विद्यान्तरे ये वैद्यास्तेषु नायं विधिः ॥ १२ ॥

यानन्यान् पश्यतोऽस्योपसङ्गृह्णीयात्तदात्वे त उपसङ्ग्राह्याः ॥ १३ ॥

अस्य माणवकस्य पश्यत अस्मिन् माणवके पश्यति यानन्यानाचार्य उपसङ्-

---

१. पञ्च ह वा एते ब्रह्मचारिण्यग्नयो धीयन्ते द्वौ पृथग्वस्तयोर्मुखे हृदये उपस्थ एव पञ्चम. । स यद्दक्षिणेन पाणिना स्त्रियं न स्पृशति तेनाहरहर्याजिना लोकमवरुन्धे, यत्सव्येन तेन प्रव्राजिनाम्, यन्मुखेन, तेनाग्निप्रस्कन्दिनां, यद्धृदयेन तेन शूराणां, यदुपस्थेन तेन गृहमेधिना, तैश्चेत् स्त्रियं पराहरत्यनग्निरिव शिष्यते ॥ इति गो. ब्रा. १. २ ४.

२. अनुलिप्ताङ्गी इति. ख पु. ३. श्रौतप्रायश्चित्तमतिक्रमे स्यादिति. ख. पु.

गृह्णीयात्ते माणवकस्याऽप्युपसङ्ग्राह्याः । किं सदा ? नेत्याह—तदात्वे तस्यां दशायाम् । अपर आह—तदा प्रभृति त उपसङ्ग्राह्याः । तुशब्दात् समावृत्तेनापि ॥ १३ ॥

गुरुसमवाये भिक्षायामुत्पन्नायां यमनुबद्धस्तदधीना भिक्षा ॥ १४ ॥

यदा द्वितीयं तृतीयं वा वेदमधीयानस्य माणवकस्य गुरुसमवायो भवति गुरवः समवेता भवन्ति, तदा भिक्षायामुत्पन्नायां य गुरुमिदानीमनुबद्धो माणवकः यतोऽधीते तदधीना भिक्षा, यच्च यावच्च लब्धं तत्तस्मै निवेदनीयम् । (१)तदुक्तश्च विनियोगः ॥ १४ ॥

समावृत्तो मात्रे दद्यात् ॥ १५ ॥

कृतसमावर्तनो विवाहात्प्रागर्जितं मात्रे दद्यात् ॥ १५ ॥

माता भर्तारं गमयेत् ॥ १६ ॥

माता पतिं प्रापयेत् ॥ १६ ॥

भर्ता गुरुम् ॥ १७ ॥

(२) प्रापयेत् । माणवकस्य गुरुम्, माणवकार्जितं द्रव्यं तद्भर्तृयुक्तम् ॥ १७ ॥

धर्मकृत्येषु वोपयोजयेत् ॥ १८ ॥

धर्मकृत्यानि विवाहादीनि । तेषु वोपयोजयेत् । गुरोरभावे भर्ता, तदभावे माता, सर्वेषाममावे समावृत्तस्स्वयमेव वा ॥ १८ ॥

कृत्वा विद्यां यावतीं शक्नुयात् वेददक्षिणामाहरेद्धर्मतो यथाशक्ति ॥ १९ ॥

यावतीं विद्यां कर्तुं शक्नुयात् वेदं वेदौ वेदान्वा तावतीं कृत्वा अधीत्य गुरवे दक्षिणामाहरेत् दद्यात् । यथाशक्ति धर्मत उपलब्धां न्यायार्जिताम् ॥१९॥ धर्मत इत्यस्यापवादः—

विषमगते त्वाचार्य उग्रतः शूद्रतो वाऽऽहरेत् ॥२०॥

---

१. ततश्च विनियोगः इति. क. पु. २. सोऽपि गुरु प्रापयेन्माणवकस्य इति ख. पु.

यदा स्वाचार्यो विषमगत आपद्गतः तदा उग्रतः शूद्रतो वाऽपि प्रतिगृह्य दक्षिणामाहरेत् । वैश्यात्शूद्रायां जात उग्र, उग्रकर्मा वा द्विजातिः ॥२०॥

सर्वदा शूद्रत उग्रतो वाऽऽचार्यार्थस्याहरणं धर्म्यमित्येके॥२१॥

सर्वदा आपद्यनापदि च, आचार्यार्थस्याचार्याय यो देयोऽर्थः तस्य, उग्रतः शूद्रतो वाऽऽहरण धर्म्यं धर्मादनपेतमित्येके मन्यन्ते । 'धार्म्य'मिति पाठे स्वार्थे ष्यञ् ॥ २१ ॥

दत्त्वा च नाऽनुकथयेत् ॥ २२ ॥

आचार्याय एवमाहृत्य दत्त्वा न कीर्तयेत्,-एतन्मया दत्तमिति ॥ २२ ॥

कृत्वा च नाऽनुस्मरेत् ॥ २३ ॥

गुरवे प्राणसंशयादौ महान्तमप्युपकारं कृत्वा नानुस्मरेत् नाऽनुचिन्तयेत्—अहो मयैतत्कृतमिति ॥ २३ ॥

आत्मप्रशंसां परगर्हामिति च वर्जयेत् ॥ २४ ॥

इतिकरणादेवंप्रकाराणामात्मश्लाघानिन्दादीनामपि प्रतिषेधः ॥ २४ ॥

प्रेषित(१)स्तदैव प्रतिपद्येत ॥ २५ ॥

इद कुर्वित्याचार्येण प्रेषितस्तदैव प्रतिपद्येत कुर्यात् क्रियमाणमपि कर्म विहाय, यद्यपि (२) तदाचार्यस्य भवति ॥ २५ ॥

शास्तुश्चाऽनागमाद्वृत्तिरन्यत्र ॥ २६ ॥

तस्मिंश्च 'विद्याकर्मान्त' मित्यस्यापवादः । यद्यधिगन्तुमिष्टा विद्या शास्तु शासितुराचार्यस्य सम्यङ्नाऽऽगच्छति तदा तस्यानागमात् अन्यत्र पुरुषान्तरे वृत्तिर्भवत्येव यस्य सम्यगागच्छति । (३)येषामाचार्यविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यत' इत्यवोचाम ॥ २६ ॥

अन्यत्रोपसङ्ग्रहणादुच्छिष्टाशनाच्चाऽऽचार्यवदाचार्यदारे वृत्तिः ॥ २७ ॥

अन्यत्रेत्युभयोरशेषः । आचार्यवदाचार्यदारे वृत्तिः कर्तव्या । कि-

---

१. तदेव इति ख पु. २. तदाचार्याय इति ख पु.

३ येषामित्याद्यवोचामत्येवन्तः पाठो नास्ति ख. पुस्तके

मविशेण ? अन्यत्रोपसङ्ग्रहणादुच्छिष्टाशनाच्च, पादोपसङ्ग्रहणमुच्छिष्टाशनं च इत्येतदुभयं वर्जयित्वा । अत्र मनुः—

(१)'गुरुवद्गुरुपत्नीषु युवतीर्नाभिवादयेत् ।' इति ।

गौतमस्तु, (२)'तद्भार्यापुत्रेषु चैवं नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसङ्ग्रहणानि' इति । 'दार' इत्येकवचन छान्दसम्॥२७॥

तथा समादिष्टेऽध्यापयति ॥ २८ ॥

य आचार्येण समादिष्टो नियुक्तोऽध्यापयति तस्मिन्नाचार्यदारवद्वृत्तिः । 'अध्यापयती'ति वर्तमाननिर्देशा(३)च्यावदध्यापनमेवायमतिदेशः ॥२८॥

वृद्धतरे च सब्रह्मचारिणि ॥ २९ ॥

अध्यापयतीति नाऽनुवर्तते । तन्निर्देशात् ज्ञानवयोभ्यामुभाभ्यां वृद्धो गृह्यते । सब्रह्मचारी सहाध्यायी, समाने ब्रह्मणि व्रत चरतीति । तस्मिन्नप्याचार्यदारवद्वृत्तिः ।

'आचार्यात्पादमादत्ते पाद शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादः कालेन पच्यते ॥'

इत्यध्ययने उपयोगसम्भवात् ॥ २९ ॥

उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ॥ ३० ॥

'उच्छिष्टाशनवर्ज'मिति वचनादुपसङ्ग्रहणं भवति । एतच्च ज्ञानवयोभ्यामुभाभ्यां वृद्धे । तदर्थं वृद्धतर इत्यनुवर्तते । गौतमीयस्तूपसङ्ग्रहणप्रतिषेधो वृद्धतरादन्यविषयः ॥ ३० ॥

समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ॥ ३१ ॥

कृतसमावर्तनस्याप्येतदेवानन्तरोक्तम् । एतेष्वाचार्यादिषु पुत्रान्तेषु सामयाचारिक समयाचारप्राप्तं वृत्तमान्तात् । समादिष्टे त्वध्यापयतीति(२६) विशेष उक्तः ॥ ३१ ॥

॥ इत्यापस्तम्बीयधर्मसूत्रवृत्तावुज्ज्वलायां सप्तमी कण्डिका ॥

---

१. मनु. स्मृ २. २१२. गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयो. । इति मुद्रितमनुस्मृतिपाठः ।

२. गौ. ध. २ ३१. ३२ ३. यावदध्यापनं तावदेवातिदेशः इति. ख. पु.

यथा ब्रह्मचारिणो वृत्तम् ॥ १ ॥

समावृत्तस्येति(१) वर्तते । समावृत्तस्य (२)ब्रह्मचारिणोऽकृतविवाहस्य यथा वृत्त वर्तनं तथा वक्ष्यामः ॥ १ ॥

मालयालिप्तमुख उपलिप्तकेशश्मश्रुरक्तोऽभ्यक्तो वेष्टि-त्युपवेष्टितौ काञ्चुक्युपानही पादुकी ॥ २ ॥

माली मालावान् । आलिप्तमुखश्चन्दनादिना । मुखग्रहणमुपलक्षणम् । (३)मुखमग्रे ब्राह्मणोऽनुलिम्पेदित्याश्वलायनवचनात् । सुगन्धिभिरामलकादिभिर्द्रव्यैरुपलिप्तानि संस्कृतानि केशश्मश्रूणि यस्य सः उपलिप्तकेशश्मश्रुः । अक्त अञ्जनेनाऽक्तोः । अभ्यक्तः तैलेन । वेष्टितौ वेष्टितशिराः । कटिप्रदेशो द्वितीयेन वाससा वेष्टितो यस्य सः उपवेष्टितौ । काञ्चुकश्चोपानच्च काञ्चुकोपानहम् । (४)द्वन्द्वाच्चुदषहान्तादित्यच् समासान्तः । तदस्यास्तीति काञ्चुकोपानही । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिप्रत्ययः । प्रसिद्धे पाठे काञ्चुकमेव काञ्चुकं तद्वान् काञ्चुकी । उपानद्वानुपानही । व्रीह्यादित्वादिनिः । पादुके दारुमये पादरक्षणे तद्वान् पादुकी ॥ २ ॥

उदाचारेषु चास्यैतानि न कुर्यात्कारयेद्वा ॥ ३ ॥

अस्याऽऽचार्यादेः पुत्रान्तस्य उदाचारेषु दृष्टिगोचरेषु देशेषु एतानि मालयादीनि न कुर्यात्कारयेद्वा ॥ ३ ॥

स्वैरिकर्मसु च ॥ ४ ॥

एतानि न कुर्यात् कारयेद्वा ॥ ४ ॥

तत्रोदाहरणम्—

यथा दन्तप्रक्षालनोत्सादनावलेखनानीति ॥ ५ ॥

दन्तप्रक्षालनं दन्तधावनम् । उत्सादनमुद्वर्तनम् । अवलेखनं कङ्कतादिना केशानां विभागेनाऽवस्थापनम् । इतिशब्दः प्रदर्शनार्थः । तेन स्नानभोजनमूत्रोच्चारादिष्वपि प्रतिषेधः ॥ ५ ॥

तद्द्रव्याणां च न कथयेदात्मसंयोगेनाऽऽचार्यः ॥ ६ ॥

---

१. अनुवर्तत इति ख. पु. २. कृतविवाहस्य' इति क पु ३. आश्व. गृ. ३. ७ १०.
४. पा. सू. ५. ४. १०६. चवर्गान्तात् वहान्ताच्च द्वन्द्वाट्टच् स्यात् समाहारे इति सूत्रार्थः ।

तस्य शिष्यस्य गृहस्थभूतस्य यानि द्रव्याण्युपस्थापितानि तेषां मध्ये एकेनापि द्रव्येण यथाऽऽत्मा संयुज्यते तथा न कथयेत्। आचार्यः शिष्यगृह(१)मेत्य अहो दर्शनीयं भोजनपात्रमित्यादि(२) लिप्सा यथा गम्यते तथा न कथयेदिति ॥ ६ ॥

स्नातस्तु काले यथाविध्यभिहृतमाहृतोऽभ्येतो वा न प्रतिसंहरेदित्येके ॥ ७ ॥

(३)'वेदमधीत्य स्नास्य'न्नित्यनेन विधिना स्नातः, तस्मिन्काले यथाविध्यभिहृतमाबद्ध लगादि आचार्येणाहृतः, स्वयमेव वा तत्समीपमभ्येतो न प्रतिसंहरेत न विमुञ्चेदित्येके मन्यते। स्वपक्षस्तु नदापि मुञ्चेदिति। 'काले यथाविध्यभिहृत'मिति वचनादपरेद्युरारभ्य प्रतिसंहरेदेव ॥ ॥ ७ ॥

उच्चैस्तरां नाऽऽसीत ॥ ८ ॥

स्वार्थे तरप्। आचार्यासनादुच्चासने नाऽऽसीत ॥ ८ ॥

तथा बहुपादे ॥ ९ ॥

नीचेऽप्यासने बहुपादे नाऽऽसीत ॥ ९ ॥

सर्वतः प्रतिष्ठिते ॥ १० ॥

आसने आसीत। आचार्यं पीठादावुपवेश्य स्वयं वेत्रासनादावासीत। तद्धि भूमौ सर्वतः प्रतिष्ठितम् ॥ १० ॥

शय्यासने चाऽऽचरिते नाविशेत् ॥ ११ ॥

आचार्येणाचरित उपभुक्ते शय्यासने नाऽऽविशेत्। शयने न शयीत आसने नासीत। पित्रादिष्वपि गुरुषु समानमिदम्। तथा च मनुर्विशेषेणाह-(४)शय्यासने चाध्युषिते श्रयसा न समाचरेत्।' इति ॥११॥ गतं समावृत्तस्य वैशेषिकम्। अथ ब्रह्मचर्यविधेरेव शेषः—

यानमुक्तोऽध्वन्यन्वारोहेत् ॥ १२ ॥

यानं शकटादि। आरोहेत्युक्तो गुरुणा पश्चादारोहेत। अध्वनि मार्गे

---

१. प्रत्यागत इति ख. पु. २. ईप्सा इति. ख. पु. ३. आप. गृ. १२ १.

४. मनु. २. ११९ 'शय्यासनेऽध्याचरिते' इति मेधातीथिसम्मतः पाठः। शय्या चासनं चेति द्वन्द्वैकवद्भाव'।

'छत्रं यानमिति वर्जये'दिति पूर्वोक्तस्य प्रतिषेधस्यापवादः यानं च गुर्वारूढमन्यद्वा ॥ १२ ॥

सभानिकषकटस्वस्तरांश्च ॥ १३ ॥

उक्तोऽध्वन्यन्वारोहेदित्येव । 'सभास्समाजांश्चे' त्यस्यापवादार्थं सभाग्रहणम् । निकषो नाम कृषीवलानामुपकरण, कृष्टं क्षेत्रं येन समीक्रियते, यच्च कस्मिंश्चिदारूढे(१) केनचिदाकृष्यते । तत्र गुरुणा आकृष्यमाणेऽपि तेनोक्तस्सन्नारोहेत । न त्वनौचित्यभयान्नारोहेदिति । कटो वीरणनिर्मिता शय्या । तत्र गुरुणोक्तस्सन् सहाऽऽसीत । उत्सर्गादावेष आचारः । स्वस्तरो नाम पलालशय्या । (२) नवस्वस्तरे संविशन्ती' ति दर्शनात् । तत्रापि गुरुणोक्तस्सन् सहासनादि कुर्यात् ॥ १३ ॥

नानभिभाषितो गुरुमभिभाषेत प्रियादन्यत् ॥१४॥

गुरुणाऽनभिभाषितो गुरु प्रति न किञ्चित् ब्रूयात् प्रियादन्यत् । प्रियं तु ब्रूयात् यथा ते पुत्रो जात इति ॥ १४ ॥

व्युपतोदव्युपजापव्यभिहासोदामन्त्रणनामधेयग्रहणप्रेषणानीति गुरोर्वर्जयेत् ॥ १५ ॥

व्युपतोद. (३)अङ्गुल्यादिघट्टनं यदाभिमुख्यार्थं क्रियते । व्युपजापः श्रोत्रयोर्मुहुर्मुहुर्जल्पनम् । चकारश्छान्दसोऽपपाठो वा । व्यभिहासः आभिमुख्येन हसनम् । उदामन्त्रणमुच्चैस्सम्बोधनम्, यथा बधिरं प्रति । नामधेयग्रहण दशम्यां पितृविहितस्य नाम्नो ग्रहणम् । न पूज्यनाम्नो भगवदादेः । प्रेषणमाज्ञापनम् । एतानि गुरुविषये न कर्तव्यानि । इतिकरणादेवंप्रकाराणामन्येषामपि प्रतिषेधः । यथाऽऽह मनुः—

(४) नोदाहरेत्तस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥ इति ॥ १५ ॥

आपद्यर्थं ज्ञापयेत् ॥ १६ ॥

आपदि व्युपतोदादिभिरप्यर्थमाभिमुख्येन ज्ञापयेत् । असति पुरुषान्तरे (५)वचनेनापि बोधयेत्, न साक्षात्प्रेषयेत्, यथा-शूलतोदो मे भवति,

---

१. केनचिदाकृष्यमाणे क्षेत्रे समं भवति. इति. घ. पु.
२. आप. गृ. १९-९
३ अङ्गुल्यादिना संघट्टनम् इति. घ. पु.
४. मनु. २-१९९
५ वचनेनैव इति क. पु.

स चाऽग्निना शाम्यति, न चात्र कश्चित्सान्निहितः, किं करोमि मन्दभाग्य इति ॥ १६ ॥

उत्तरे सूत्रे समावृत्तविषये—

सहवसन्साथं प्रातरनाहूतो गुरुं दर्शनार्थो गच्छेत् ॥१७॥

सह एकस्मिन् ग्रामे वसन् साथ प्रातरनाहूतोऽपि गुरुं दर्शनार्थो नान्यप्रयोजनो गच्छेत् ॥ १७ ॥

विप्रोष्य च तदहरेव पश्येत् ॥ १८ ॥

यदा ग्रामान्तरं गतः प्रत्यागच्छति तदा तदहरेवाऽऽचार्यं पश्येत् ॥१८॥

आचार्यप्राचार्यसन्निपाते प्राचार्योपसंगृह्योपसङ्गि-घृक्षेदाचार्यम् ॥ १९ ॥

आचार्यस्याऽऽचार्यः प्राचार्य प्रपितामहवत् । यदा आचार्यस्य प्राचार्यस्य च कार्यवशात् सन्निपातो मेलनं भवति, तदा प्राचार्याय द्वितीयार्थे चतुर्थी । प्राचार्यं पूर्वमुपसंगृह्य पश्चात्स्वाचार्यमुपसङ्ग्रहीतुमिच्छेत् । न केवलं मनसा किन्तु यथाऽऽचार्यो जानाति मामयमुपसङ्गिघृक्षतीति तथा चेष्टेत । अन्यथा अदृष्टार्थमुपदिष्टं स्यात् ॥ १९ ॥

प्रतिषेधेदितरः ॥ २० ॥

इतर आचार्यः प्रतिषेधेत् 'वत्स मा मोपसङ्ग्रही'रिति ॥ २० ॥

लुप्यते पूजा चाऽस्य सकाशे ॥ २१ ॥

अस्य प्राचार्यस्य सकाशे सन्निधौ आचार्यस्य पूजा लुप्यते न कार्या । न केवलमुपसङ्ग्रहणमेव । उत्तरसूत्रं समावृत्तविषयम् ॥ २१ ॥

मुहूंश्चाऽऽचार्यकुलं दर्शनार्थो गच्छेद्यथाशक्त्यधिहस्त्यमादायाऽपि दन्तप्रक्षालनानीति ॥ २२ ॥

मुहूंश्चेत्यनुस्वारदीर्घौ छान्दसौ । वीप्सालोपश्चात्र द्रष्टव्यः । मुहुर्मुहुरिति विवक्षितम् । ग्रामान्तरे वसन्नपि मुहुर्मुहुराचार्यकुलं दर्शनार्थमागच्छेत् । यथाशक्ति गोरसापूपादि अधिहस्त्य हस्ते भवमादाय स्वयमेव गृहीत्वेत्यर्थः । अपिशब्दोऽभावे विधिं द्योतयति—गोरसाद्यभावे दन्तकाष्ठान्यपीति । इतिशब्दः अन्तेवासिधर्माणां समाप्तिद्योतनार्थः ॥ २२ ॥

(१)मातरं पितरमाचार्यमग्नींश्च गृहाणि च रिक्त-
पाणिर्नोपगच्छेद्राजानं चेन्न श्रुतामिति ॥ २३ ॥

तस्मिन्गुरोर्वृत्तिः ॥ २४ ॥

तस्मिन्नन्तेवासिनि गुरोर्वृत्तिः । वृत्तेः प्रकारो वक्ष्यते ॥ २३ ॥ २४ ॥

पुत्रमिवैनमनुकाङ्क्षन् सर्वधर्मेष्वनपच्छादयमानः
सुयुक्तो विद्यां ग्राहयेत् ॥ २५ ॥

एनं शिष्यं पुत्रमिव(२) अस्याऽभ्युदयः स्यादिति अनुकाङ्क्षन् सर्वेषु धर्मेषु किञ्चिदप्यनपच्छादयमानः अगूहन् सुयुक्तः सुष्ठ्ववहितः तत्परो भूत्वा विद्यां ग्राहयेत् ॥ २५ ॥

न चैनमध्ययनविघ्नेनात्मार्थेषूपरुन्ध्यादनापत्सु ॥ २६ ॥

न चैन शिष्यमध्ययनविघ्नेनाऽऽत्मप्रयोजनेष्वनापत्सूपरुन्ध्यात। (३)उपरोधः अस्वतन्त्रीकरणम् । 'अनापत्स्वि' तिवचनादापद्यध्ययनविघातेनाऽप्युपरोधे न दोषः ॥ २६ ॥

अन्तेवास्यनन्तेवासी भवति विनिहितात्मा
गुरावनैपुणमापद्यमानः ॥ २७ ॥

'आपद्यमान' इत्यन्तर्भावितण्यर्थः । योऽन्तेवासी विनिहितात्मा द्वयोराचार्ययोः(४)विविधं निहितात्मा गुरावनैपुणमापादयति—नाऽनेनाऽयं प्रदेशः सम्यगुक्त इति, सोऽन्तेवासी न भवति । स त्याज्य इत्यर्थः(५) ।

अपर आह—योऽन्तेवासी वाङ्मनःकर्मभिरनैपुणमापद्यमानो गुरौ विसदृशं निहितात्मा भवति अनुरूपं न शुश्रूषते सोऽन्तेवासी न भवतीति॥२७॥

आचार्योऽप्यनाचार्यो भवति श्रुतात्परिहरमाणः॥२८॥

आचार्योऽप्यनाचार्यो भवतीति, त्याज्य इत्यर्थः । किं कुर्वन्? श्रुतात्परिहरमाणः तेन तेन व्याजेन विद्याप्रदानमकुर्वन् ॥ २८ ॥

---

१. इदं सूत्रं क. पुस्तक एव दृश्यते । नान्यत्र । २. अभ्यासादिषु इति ङ. पु.
३. उपरोधः स्वतन्त्रीकरणम्, इति. ङ. पु. ४. विधिवत् इति. ख. पु. ।
५. "अत्र मनुः—धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा । तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे इति—"इत्यधिकः पाठो दृश्यते ख. पुस्तके

अपराधेषु चैनं सततमुपालभेत ॥ २९ ॥

अपराधेषु कृतेष्वेनं शिष्यं सततमुपालभेत–इदमयुक्तं त्वया कृतमिति ॥२९॥

अभित्रास उपवास उदकोपस्पर्शनमदर्शनमिति दण्डा यथामात्रमानिवृत्तेः ॥ ३० ॥

अभित्रासो (१)भयोत्पादनम्। उपवासो भोजनलोपः। उदकोपस्पर्शनं शीतोदकेन स्नापनम्। अदर्शनं यथाऽऽत्मानं न पश्यति तथा करणम्। गृहप्रवेशनिषेधः। सर्वत्र प्यन्तात् प्रत्ययः। इत्येते दण्डाः शिष्यस्य यथामात्रं यावत्यपराधमात्रा तदनुरूपं व्यस्ताः समस्ताश्च। आनिवृत्तेः यावदसौ न ततोऽपराधान्निवर्तते तावदेते दण्डाः ॥ ३० ॥

निवृत्तं चरितब्रह्मचर्यमन्येभ्यो धर्मेभ्योऽनन्तरो भवेत्यतिसृजेत् ॥ ३१ ॥

एवं चरितब्रह्मचर्यं निवृत्तं गुरुकुलात् कृतसमावर्तनमित्यर्थः। एवंभूतमन्येभ्यो धर्मेभ्यो यमसावाश्रमं प्रतिपित्सते तत्र तेभ्योऽनन्तरो भव यथा त्वमन्तरितो न भवसि तथा भवेत्युक्त्वाऽतिसृजेत्। तं तमाश्रमं प्रतिपत्तुमतिसृजेत् ॥ ३१ ॥

इत्यापस्तम्बसूत्रवृत्तावुज्ज्वलायामष्टमी कण्डिका ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां प्रथमप्रश्ने द्वितीयः पटलः ॥ २ ॥

---

१ रज्जुवेण्वादिना भयोत्पादनम् इति, ख. पु.

एवमध्येतुरध्यापयितुश्च धर्मा उक्ताः। अथ देशकालकृता अध्ययनधर्मा उच्यन्ते—

श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाऽधीयीत ॥ १ ॥

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः ।
तेषु या या पौर्णमासी सा सा चेऽयादिका स्मृता ।
कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ॥

तदेवं सिंहस्थे सवितरि याऽमावास्या तदन्ते चान्द्रमसे मासे या मध्यवर्तिनी पौर्णमासी सा श्रावणी । श्रवणयोगस्तु भवतु वा मा वा । तस्यां श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य गृह्योक्तेन विधिनोपाकर्म कृत्वा स्वाध्यायमधीयीत । अधीयानश्च मासमेकं प्रदोषे प्रथमे रात्रिभागे नाधीयीत ग्रहणाध्ययनं धारणाध्ययनं च न कुर्यात् । प्रदोषग्रहणाद्रात्रावप्यूर्ध्वं न दोषः ॥ १ ॥

तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत् ॥ २ ॥

तिष्यः पुष्यः; तेन युक्ता पौर्णमासी तैषी श्रावणीवत्। तस्यां विरमेत् । उत्सर्जनं कुर्यात् । तस्यापि प्रयोगो(१)गृह्य एवोक्तः । रोहिण्यां वा, (२)तैषमासि तिष्यात्पूर्वा या रोहिणी तस्यां वा विरमेत् । अनयोः पक्षयोः पञ्च मासानधीयीत ॥ २ ॥

अर्धपञ्चमांश्चतुरो मासानित्येके ॥ ३ ॥

अर्धः पञ्चमो येषां ते अर्धपञ्चमाः । अर्धाधिकांश्चतुरो मासान् अधीयीतेत्यपेक्ष्यत (३)इत्येके मन्यन्ते । अस्मिन्पक्षे प्रोष्ठपद्यामुपाकरणं शास्त्रान्तरदर्शनात् । उत्सर्जनस्य वा प्रतिकर्षः । उत्सर्जने च कृते श्रावण्याः प्राक् शुक्लपक्षेषु धारणाध्ययनं वेदस्य, कृष्णपक्षेषु व्याकरणाद्यङ्गाध्ययनम् । पुनः श्रावण्यामुपाकृत्यागृहीतभागस्य ग्रहणाध्ययनमिति । प्रपञ्चितमेतद्(४)गृह्ये ॥ ३ ॥

---

१. आपस्तम्बगृह्यसूत्रान्तर्गतोपाकर्मोत्सर्जनपटलव्याख्यानेऽनाकुलायामित्यर्थः । (आप. गृ. सू. पृ. १५४) एतद्वचनबलादेव हरदत्तेनोपाकर्मोत्सर्जनाख्यः पटलः आपस्तम्बगृह्यान्तर्गतो व्याख्यात इत्यवगम्यते इति न्यरूपयाम गृह्यटिप्पण्याम् ।

२. 'तिष्ये मासि भवा या रोहिणी' इति ड. पु.

३. अत्र मनुः ४. ९५. द्रष्टव्यः । ४ आप. गृ. ७. १. पृ. ११०.

निगमेष्वध्ययनं वर्जयेत् ॥ ४ ॥

निगमाश्चत्वराः । ग्रामनिर्गमनामार्गा वा ; नियमेन गम्यते तेष्विति । तेषु सर्वप्रकारमध्ययनं वर्जयेत् ॥ ४ ॥

आनड्वहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत ॥ ५ ॥

अनड्वत्सम्बन्धिना वा शकृत्पिण्डेनोपलिप्य निगमेष्वप्यधीयीत॥५॥

श्मशाने सर्वतः शम्याप्रासात् ॥ ६ ॥

श्मशाने चाध्ययनं वर्जयेत् । सर्वतः सर्वासु दिक्षु । शम्या क्षिप्ता यावति देशे पतति ततोऽर्वागिति पञ्चमीनिर्देशाद्गम्यते ॥ ६ ॥

ग्रामेणाऽध्यवसिते क्षेत्रेण वा नाऽनध्यायः ॥ ७ ॥

यदा श्मशानं ग्रामतया क्षेत्रतया वा अध्यवसितं स्वीकृतं भवति तदा अध्येतव्यमेव ॥ ७ ॥

ज्ञायमाने तु तस्मिन्नेव देशे नाऽधीयीत ॥ ८ ॥

यदा तु तदध्यवसितमपि श्मशानं ज्ञायते-अयं स प्रदेश इति, तदा तावत्येव प्रदेशे नाऽधीयीत । न शम्याप्रासात् ॥ ८ ॥

(१) श्मशानवच्छूद्रपतितौ ॥ ९ ॥

शूद्रापतितसकाशेऽपि शम्याप्रासान्नाऽध्येयम् ॥ ९ ॥

समानागार इत्येके ॥ १० ॥

एके मन्यन्ते समानागारे शूद्रपतितौ वर्ज्यौ, न शम्याप्रासादिति ॥१०॥

शूद्रायां तु प्रेक्षणप्रतिप्रेक्षणयोरेवाऽनध्यायः ॥ ११ ॥

शूद्रायां तु यदा परस्परं प्रेक्षणं भवति तदैवाऽनध्यायः । न समानागारे, नापि शम्याप्रासादिति ॥ ११ ॥

तथाऽन्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने ॥१२॥

शूद्राव्यतिरिक्ताऽपि या स्त्री मैथुने वर्णव्यतिक्रान्ता नीचगामिनी तस्या मपि प्रेक्षणप्रतिप्रेक्षणयोरनध्यायः ॥ १२ ॥

ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन् सम्भा-

---

१ याज्ञवल्क्योऽत्र १. १४८. द्रष्टव्यः ।

षितुं ब्राह्मणेन सम्भाष्य तया सम्भाषेत ।
सम्भाष्य तु ब्राह्मणेनैव सम्भाष्याऽधीयीत ।
एवं तस्याः प्रजानिःश्रेयसम् ॥१३॥

यो वेदमध्येष्यमाणो मलवद्वाससा रजस्वलया सह सम्भाषितुमिच्छति स पूर्वं ब्राह्मणेन सम्भाष्य पश्चात्तया सम्भाषेत । सम्भाष्य च पुनरपि ब्राह्मणेनैव सम्भाष्याऽधीयीत । किमेवं सति भवति ? एवं तस्या मलवद्वाससः आगामिनी या प्रजा तस्या निःश्रेयसमभ्युदयो भवति । प्रजारूपं वा निःश्रेयसं तस्या भवति । 'प्रजानिःश्रेयस'मिति-वचनात् विधवादिभिः सह सम्भाषणे नैतत्कर्तव्यम् ॥ १३ ॥

(१) अन्तदृशवम् ॥ १४ ॥

अन्तदृशवो यत्र ग्रामे तत्र नाध्येयम् । एतेना 'न्तश्चाण्डाल'मिति व्याख्यातम् ॥ १४ ॥

अन्तश्चाण्डालम् ॥ १५ ॥

चण्डाल एव चाण्डाल । उभयत्र प्रथमा सप्तम्यर्थे । अव्ययीभावो वा विभक्त्यर्थे द्रष्टव्यः ॥ १५ ॥

(२)अभिनिस्सृतानां तु सीम्न्यनध्यायः ॥ १६ ॥

यदा शवाः सीम्नि अभिनिस्सृता भवन्ति तदा तत्राऽनध्यायः ॥ १६ ॥

सन्दर्शने चाऽरण्ये ॥ १७ ॥

अरण्ये च यावति प्रदेशे शवश्चण्डालो वा सन्दृश्यते तावत्यनध्यायः ॥ १७ ॥

तद्हरागतेषु च ग्रामं बाह्येषु ॥ १८ ॥

बाह्याः उग्रनिषादाद्यः परिपन्थिनः तेषु च ग्राममागतेषु तद्हरनध्यायः, तस्मिन्नहनि नाऽध्येतव्यम् ॥ १८ ॥

अपि सत्सु ॥ १९ ॥

ये विद्याचरित्रादिभिर्महान्तः सन्तः तेष्वपि ग्राममागतेषु तद्हरनध्यायः ॥ १९ ॥

---

१. मनु. ४. १०८ दत्रद्रष्टव्यः । २ अभिनिर्हृताना इति. ख. पु.

सन्धावनुस्तनिते रात्रिम् ॥ २० ॥

सन्धिः सन्ध्या तस्मिन् सन्धौ । अनुस्तनिते मेघगर्जिते सति रात्रिं (१)सर्वां रात्रिं नाऽधीयीत । वर्षतीविदम् । अन्यस्मिन्नधिकं वक्ष्यति ॥२०॥

स्वप्नपर्यन्तं विद्युति ॥ २१ ॥

अन्त्यो दीर्घ उपान्त्यो ह्रस्वः । विपर्यासश्छान्दसोऽपपाठो वा । सन्धौ विद्युति सत्यां स्वप्नपर्यन्तां रात्रिमनध्यायः न सर्वाम् । स्वप्नपर्यन्ता रात्रिः प्रहरावशिष्टा ॥ २१ ॥

एवं सायं सन्ध्यायामुक्तं, प्रातस्सन्ध्यायामाह—

उपव्युषं यावता वा कृष्णां रोहिणीमिति शम्या-
प्रासाद्विजानीयादेतस्मिन्काले विद्योतमाने
सप्रदोषमहरनध्यायः ॥ २२ ॥

उपव्युषं उषस्समीपे तत्र विद्योतमाने विद्युति सत्यामपरेद्युस्सप्रदोषमहरनध्यायः । प्रदोषादूर्ध्वं रात्रावध्ययनम् । यावता वा कालेन शम्याप्रासदर्भागवस्थितां गां कृष्णामिति वा रोहिणीमिति वा विजानीयात् । एतस्मिन्काले उपव्युषं विद्योतमान इत्यन्वयः । रोहिणी गौरवर्णा । इतिशब्दप्रयोगे द्वितीया प्रयुज्यते । तत्राऽन्वयप्रकारश्चिन्त्यः ॥ २२ ॥

दहेऽपररात्रे स्तनयित्नुना ॥ २३ ॥

रात्रेस्तृतीयो भागः सर्वोऽपररात्रः । तस्य त्रेधा विभक्तस्याद्योऽशो महारात्रः । अन्त्यो दहः । तस्मिन् दहेऽपररात्रे स्तनयित्नुना निमित्तेन सप्रदोषमहरनध्यायः ॥ २३ ॥

ऊर्ध्वमर्धरात्रादित्येके ॥ २४ ॥

अर्धरात्रादूर्ध्वमनन्तरोक्तो विधिरित्येके मन्यन्ते । स्वपक्षस्तु दह एवेति ॥ २४ ॥

गवां चाऽवरोधे ॥ २५ ॥

दस्युप्रभृतिभिरवरुद्धासु गोषु तावन्तं कालमनध्यायः । अवरोधो ग्रामाद्बहिर्गमनिरोधः ॥ २५ ॥

वध्यानां च यावता हन्यन्ते ॥ २६ ॥

---

१. अस्य सूत्रत्वेन परिगणनं कृतं क पु.

वर्षाहाणांचो रादीनामवरोधे यावता कालेन हन्यन्ते तावन्तं कालमनध्यायः ॥ २६ ॥

पृष्ठारूढः पशूनां नाऽधीयीत ॥ २७ ॥

हस्त्यश्वादीनां पशूनां पृष्ठाऽरूढः तत्राऽऽसीनस्सन्नाऽधीयीत ॥२७॥

अहोरात्रावमावास्यासु ॥ २८ ॥

अमावास्यासु द्वावहोरात्रौ नाऽधीयीत । तासु च पूर्वेषुश्चतुर्दशीषु च । तथा च मनुः(१)—'अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ।' इति ॥ २८ ॥

इत्यापस्तम्बसूत्रवृत्तावुज्वलायां नवमी कण्डिका ॥

चातुर्मासीषु च ॥ १ ॥

चतुर्षु मासेषु भवाश्चातुर्मास्य ।संज्ञैषा तिसृणां पौर्णमासीनां यासु चातुर्मास्यानि क्रियन्ते । काः पुनस्ताः?फाल्गुन्याषाढीकार्तिक्यः। चातुर्मास्यो यज्ञः। 'तत्र भव'इति वर्तमाने 'सञ्ज्ञायामणि' त्यण्प्रत्ययः । तासु चातुर्मासीषु पूर्ववद्वावहोरात्रावनध्यायः । गौतमस्तु स्वशब्देनाह(२) 'कार्तिकी फाल्गुन्याषाढी पौर्णमासी' ति । (३)पौर्णमास्यनन्तरप्रतिपत्सु च शास्त्रान्तरवशादनध्यायः । यथा होशनाः—'पर्वणीतिहासवर्जितानां विद्यानामनध्याय' इति । 'प्रतिपत्सु न चिन्तये' दिति च । एवं चतुर्दशीमात्रस्य वर्जने शास्त्रान्तरं(४) मूलं मृग्यम् । तत्र याज्ञवल्क्यः—

(५)'पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।' इति ॥ १ ॥

वैरमणे गुरुष्वष्टाक्य औपाकरण इति त्र्यहाः ॥ २ ॥

विरमणमुत्सर्जनं तदेव वैरमणम् । तस्मिन् वैरमणे । प्रथमान्तपाठे सप्तम्यर्थे प्रथमा । गुरुषु श्वशुरादिषु । संस्थितेष्विति प्रकरणाद्गम्यते ।

---

१. मनु. स्मृ ४. ११३.

२. गौ. ध. १६. ३२. ३. पौर्णमास्यन्तरे प्रतिपत्सु च इति. ख. पु.

४. मूलम्' इति. नास्ति क. पुस्तके । मृग्यमिति नास्ति ख. पुस्तके

५. या स्मृ १. १४६. ऋतुसन्धिषु भुक्त्वा च श्राद्धिक प्रतिगृह्य च इत्यधिकः पाठः ख. पुस्तके ।

अष्टकैवाऽष्टाक्यं स्वार्थिकः ष्यञ् । आदौ प्राप्ता वृद्धिर्मध्ये कृता । उपाकरणमेवौपाकरणम् । एतेषु निमित्तेषु त्र्यहा अध्ययनरहिताः । तत्र गुरुषु मरणादिनमारभ्य त्र्यहाः । इतरेषु पूर्वेद्युरपरेद्युस्तास्मिंश्च दिने नाधीयीत । अत्र गौतमः—(१)तिस्रोऽष्टकास्त्रिरात्रमन्त्यामेकेऽभितो वार्षिक'मिति । उपाकरणादूर्ध्वं प्रागुत्सर्जनात् यदध्ययनं तद्वार्षिकम् । तदाभितस्तस्यादावन्ते च यत्कर्म क्रियते तत्रापि त्रिरात्रमित्यर्थः । औशनसे च व्यक्तमुक्तम्(२)'उपाकर्मणि चोत्सर्गे त्र्यहमनध्याय' इति । मानवे च व्यक्तम्(३)'उपाकर्मणि चोत्सर्गे त्रिरात्र क्षपणं स्मृतम् ।' इति ॥ २ ॥

तथा सम्बन्धेषु ज्ञातिषु ॥ ३ ॥

ये सान्निकृष्टा ज्ञातयः भ्रातृतत्पुत्रपितृव्यादयः । तेष्वपि मृतेषु तथा त्र्यहमनध्यायः । ब्रह्मचारिणो विधिरयम् । आशौचवतां तु यावदाशौचमनध्यायः शास्त्रान्तरसिद्धः—

'उभयत्र दशाऽहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते ॥' इति ।

उभयत्र जनने मरणे च ॥ ३ ॥

मातरि पितर्याचार्य इति द्वादशाहाः ॥ ४ ॥

मात्रादिषु मृतेषु द्वादशाहमनध्यायः । अयं विधिर्गृहस्थानामपि । केचिदाशौचमपि तावन्तं कालमिच्छन्ति । नेति वयम्, अनध्यायप्रकरणात् ॥ ४ ॥

तेषु चोदकोपस्पर्शनं तावन्तं कालम् ॥ ५ ॥

मात्रादिष्वधिकं तावन्त कालमहरहस्स्नानमपि कार्यम , न केवलमनध्यायः ॥ ५ ॥

अनुभाविनां च परिवापनम् ॥ ६ ॥

अनु पश्चात् भूता जाता अनुभाविनः मृतापेक्षयाऽवरवयसः । तेषां परिवापनमपि भवति केशानाम् । (५)'कृत्यच' इति प्राप्तस्य णत्वस्य (६)'णे-

---

१. गौ १६. ३८–४०.

२. नेद वचनमिदानीमुपलभ्यमानायां पद्धतिकामौशनसस्मृतौ दृश्यते ।

३ मनु. ४. ११९. ४ मनु ५ ३.

५. "शिखामनु प्रवपन्त आर्ध्ये" इति वचनम् ! तस्य बलीयस्त्वादित्याह"इति ख. पु.

६. पा. सू ८. ४. २२. उपसर्गस्थान्निमित्तत. (रेफषकाराभ्यां) परस्याऽच उत्तरस्य कृत्प्रत्ययगतस्य नकारस्य णत्वं स्यादिति सूत्रार्थः ॥

(१)विभाषे' ति विकल्पः । अन्ये तु शावं दुःखमनुभवतां सर्वेषां परिवापनमिच्छन्ति ।

अपर आह—अनुभाविन उदकार्हाः । तेषां मरणे परिवापनमिति ॥ ६ ॥

न समावृत्ता वपेरन्नन्यत्र विहारादित्येके ॥ ७ ॥

विहारो यागदीक्षा । ततोऽन्यत्र न समावृत्ता वपेरन्नित्येके मन्यते । स्वमतं तु वपेरन्नेवेति ॥ ७ ॥

तत्र वपनस्याऽमङ्गलत्वं गुणविधिना परिहारं च वक्तुं ब्राह्मणमुदाहरति—

अथापि ब्राह्मणम्—रिक्तो वा एषोऽनपिहितो यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति ॥ ८ ॥

रिक्तः अन्तःशून्यो घटादिः । सोऽनपिहित पिधानरहितो यादृशः तादृश एषः यन्मुण्डो नाम । तस्य रिक्तस्यापिधानमेतत् यच्छिखा नाम । अनेन चैतदुक्तं-निषेधशास्त्रं सह शिखया वपनप्रतिषेधपरमिति ॥ ८ ॥

कथं तर्हि सत्रेषु शिखाया वपनम्? (२)वचनसामर्थ्यादित्याह—

सत्रेषु तु वचनाद्वपनं शिखायाः ॥ ९ ॥

स्पष्टम् ॥ ९ ॥

आचार्ये त्रीनहोरात्रानित्येके ॥ १० ॥

आचार्ये संस्थिते त्रीनहोरात्रानध्ययनं वर्जयेदित्येके मन्यते । स्वपक्षस्तु द्वादशाहः पूर्वमुक्तः ॥ १० ॥

श्रोत्रियसंस्थाया(३)मपरिसंवत्सरायामेकाम् ॥ ११ ॥

श्रोत्रियं (४)वक्ष्यति । तस्य संस्थायामपरिपूर्णसंवत्सराया श्रुतायामेकां रात्रिमेकमहोरात्रमध्ययनं वर्जयेत् । अत्र संस्थाश्रवणाद्दुर्वादिष्वपि सैव

---

१ पा. सू. ८. ४. ३. उपसर्गस्थान्निमित्तात्परस्य, णिजन्ताद्विहितो यः कृत्प्रत्ययः तदन्तस्य नकारस्य णत्वं विकल्पेन स्यात् इति सूत्रार्थः । २. ५६. पृष्ठे ५. टिप्पणी द्रष्टव्या ।

३. उपरि संवत्सरायां इति क. पुस्तकेऽपपाठः । ४. आप. ध. २. ६. ४. सूत्रे ।

निमित्तमनध्यायस्य ॥ ११ ॥

सब्रह्मचारिण्यत्येके ॥ १२ ॥

एके तु सब्रह्मचारिणो मरण एवाऽनन्तरोक्तमनध्यायमिच्छन्ति, न तु श्रोत्रियसामान्यमरणे ॥ १२ ॥

श्रोत्रियाभ्यागमेऽधिजिगांसमानोऽधीयानो वाऽनुज्ञाप्याधीयीत ॥ १३ ॥

श्रोत्रिये ऽभ्यागते अध्येतुकामोऽधीयानश्च तमनुज्ञाप्याधीयीत ॥ १३ ॥

अध्यापयेद्वा ॥ १४ ॥

अध्यापयितुकामोऽध्यापयन्वेति प्रकरणाद्गम्यते । सोऽपि तमनुज्ञाप्याध्यापयेदिति ॥ १४ ॥

गुरुसन्निधौ "चाधीहि भो" इत्युक्त्वाऽधीयीत ॥ १५ ॥

धारणाध्ययनं पारायणाध्ययनं वा कुर्वन् गुरौ सन्निहिते सति 'अधीहि भो' इत्युक्त्वाऽधीयीत ॥ १५ ॥ *

अध्यापयेद्वा ॥ १६ ॥

अध्यापयन्नपि तत्सन्निधावेवमेवोक्त्वाऽध्यापयेत् ॥ १६ ॥ *

उभयत उपसंग्रहणमधिजिगांसमानस्याधीत्य च ॥१७॥

उभयतः अध्ययनस्याऽऽदावन्ते च उपसंग्रहण कर्तव्यं यथाक्रम(१)मध्येतुकामस्याऽऽदावधीत्यान्ते ॥ १७ ॥ *

अधीयानेषु वा यत्राऽन्यो व्यवेयादेतमेव शब्दमुत्सृज्याऽधीयीत ॥ १८ ॥

बहुवचनमतन्त्रम् । अधीयानेषु च यत्राऽन्यो व्यवेयादन्तरा गच्छेत्, तत्रा 'व्यधीहि भो' इत्येतमेव शब्दमुत्सृज्य उच्चार्याऽधीयीत । प्रत्येकमुपदेशादेकवचनम् । अधीयीरन् ॥ १८ ॥

श्वगर्दभनादास्सलावृक्येकशकृत्कशब्दास्सर्वे वादितशब्दा रोदनगीतसामशब्दाश्च ॥१९॥

शुनां गर्दभानां च बहूनां नादः । बहुवचननिर्देशात् । सलावृकी

---

१. अध्येतुकामस्येत्यादि ङ पुस्तक एवास्ति । * मनौ. २ ७३ श्लोको द्रष्टव्यः ।

वृकजातावबान्तरभेदः । क्रोष्टीत्यन्ये । लिङ्गस्याविवक्षितत्वात्पुंसोऽपि ग्रहणम् । (१)'इन्द्रो यतीन् सालावृकेभ्य' इत्यादौ दर्शनात् । सर्वत्रादिस्वरो दीर्घः । स एवायं विकृतः प्रयुक्तः । एकसृकः एकचरः सृगालः । उलूको दिवाभीतः । एतेषां च शब्दाः । वादितानि वादित्राणि वीणावेणुमृदङ्गादीनि । तेषां च सर्वे शब्दाः । रोदनशब्दादयश्च । एते श्रूयमाणा (२)अनध्यायस्य हेतवः ॥ १९ ॥

शाखान्तरे च साम्नामनध्यायः ॥ २० ॥

वेदान्तरसकाशे(३)साम्नामनध्ययनम् । गीतिषु सामाख्या, तद्योगाद्वेदवचन इत्यन्ये ॥ २० ॥

सर्वेषु च शब्दकर्मसु यत्र संसृज्येरन् ॥ २१ ॥

आक्रोश(४)परिवादादिषु सर्वेषु शब्दकर्मसु अनध्यायः । यत्राध्ययनशब्देन ते संसृज्येरन् ॥ २१ ॥

छर्दयित्वा स्वप्नान्तम् ॥ २२ ॥

छर्दनं वमनम् । तत्कृत्वा स्वप्नान्तं यावन्नाऽधीयीत ॥ २२ ॥

सर्पिर्वा प्राश्य ॥ २३ ॥

अथ वा सर्पिः प्राश्याऽधीयीत ॥ २३ ॥

पूतिगन्धः ॥ २४ ॥

दुर्गन्ध उपलभ्यमानोऽनध्यायहेतुः ॥ २४ ॥

शुक्तञ्चाऽऽत्मसंयुक्तम् ॥ २५ ॥

यत्पक्वं कालपाकेनाऽम्लं जातं तच्छुक्तम् । तद्यावदात्मसंयुक्तं स्वोदरस्थमजीर्णं, यावत्तदनुगुण उद्गारस्तावदनध्यायहेतुः ॥ २५ ॥

प्रदोषे च भुक्त्वा नाऽधीयीत ॥ २६ ॥

तेनाऽधीत्यैव भुञ्जीत ॥ २६ ॥

प्रोदकयोश्च पाण्योः ॥ २७ ॥

भुक्त्वेत्येव । भुक्त्वा यावत्प्रोदकौ पाणी आर्द्रौ तावन्नाऽधीयीत । कोचित् भुक्त्वेति नानुवर्तयन्ति ॥ २७ ॥

---

१. तै. सं. ६. २. ७. २ या. स्मृतौ १. १४८–१५१. श्लोका द्रष्टव्याः ।

३. साम नाऽध्येयम् । इति. ख. पु. ४. परिहासादिषु. इति. क. पु.

प्रेतसंकल्पं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः ॥ २८ ॥

यो मृतोऽसपिण्डीकृतस्स प्रेतः । तदुद्देशेन दत्तमन्नं भुक्त्वा सप्रदोषमहर्नाऽधीयीत । प्रदोषादूर्ध्वं न दोषः । अत्र मनुः—

(१)यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥' इति ॥ २८ ॥

आ च विपाकात् ॥ २९ ॥

यदि तावता कालेन तदन्नं पक्वं जीर्णं न भवति, तत आविपाकात् तस्य नाऽधीयीत ॥ २९ ॥

अश्राद्धेन तु पर्यवदध्यात् ॥ ३० ॥

जीर्णे अजीर्णे च तस्मिन् अश्राद्धेनाऽन्नेन पर्यवदध्यात् तस्योपर्यश्राद्धमन्नं भुञ्जीतेत्युक्तं भवति । केचित् अत्र 'अश्राद्धेने' ति वचनात् पूर्वत्रापि प्रेतान्नमिति श्राद्धमात्र विवक्षितं मन्यन्ते ॥ ३० ॥

॥ इत्यापस्तम्बधर्मसूत्रे तदुत्तावुज्वलायां च दशमी कण्डिका ॥

काण्डोपाकरणे चाऽऽमातृकस्य ॥ १ ॥

काण्डोपाकरणं काण्डव्रतादेशनम् । तस्मिन्नहनि अमातृकस्यान्नं भुक्त्वा सप्रदोषमहरनध्यायः। अपर आह-भुक्त्वेति नाऽनुवर्तते । यथाचोत्तरत्र भुक्त्वाग्रहणम् । काण्डोपाकरणे अमातृकस्य माणवकस्य सप्रदोषमहरनध्यायः । एतेनोत्तर व्याख्यातम् ॥ १ ॥

काण्डसमापने चाऽपितृकस्य ॥२॥

काण्डसमापनं व्रतविसर्गः ॥ २ ॥

मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके ॥ ३ ॥

ये मनुष्या भूत्वा प्रकृष्टेन तपसा देवास्सम्पन्नास्ते मनुष्यप्रकृतयो (२)नन्दिकुबेरादयः । तेषां यज्ञः तत्प्रीत्यर्थं ब्राह्मणभोजनम्, तत्र भुक्त्वा

---

१. मनु. स्मृ ४. १११.　　२. 'नन्दीश्वरशरकुमारादयः' इति पाठान्तरम् ।

सप्रदोषमहरनध्याय इत्येके मन्यन्ते । मनुष्यमुखेन देवेष्विज्यमानेष्वित्यन्ये ॥ ३ ॥

पर्युषितैस्तण्डुलैराममांसेन च नाऽनध्यायः ॥ ४ ॥

'प्रेतसंकल्पं चाऽन्न'(१०.२८)मित्यस्यापवादः । पर्युषिता राज्यन्तरिताः ह्यः प्रतिगृहीताः, तेषु तण्डुलेष्वद्य पक्त्वा भुज्यमानेषु नानध्यायः । तथा आममांसेन तदहर्भक्षितेनापि नानध्यायः । पर्युषितेनेत्येके । 'पर्युषितै' रिति वचनात्तदहर्भक्षितैः सप्रदोषमहरनध्यायः ॥ ४ ॥

तथौषधिवनस्पतिमूलफलैः ॥ ५ ॥

ओषधिग्रहणेन वीरुधोऽपि गृह्यन्ते । वनस्पतिग्रहणेन वृक्षमात्रम् । तेषां मूलै. सूरणकन्दादिभिः फलैश्चाऽम्रादिभिः पक्वैरपक्वैश्च तदहर्भक्षितैरपि नाऽनध्यायः ॥ ५ ॥

यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत ॥ ६ ॥

यस्मिन्नहनि यत्काण्डमुपाकृतं न तत्तदहरधीयीत । तथा श्रावण्यां पौर्णमास्यामुपाकृत्य प्रशस्तेऽहरन्तरे यस्य काण्डस्यानुवाक्यमध्येतुमारम्भं कुर्वीत न तत्तदहरधीयीत । अहरित्यहोरात्रोपलक्षणम् ॥ ६ ॥

उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् ॥ ७ ॥

अनेकवेदाध्यायी यद्येकस्य वेदस्य पारायणं कुरुते तदा तस्य पारायणस्य (१)ये उपाकरणोत्सर्जने, तयोः कृतयोस्तां विद्यां तदहर्नाऽधीयीत । एतदेव ज्ञापकं पारायणस्याऽप्युपाकरणोत्सर्जने भवत इति । 'तां विद्यामि' ति वचनाद्विद्यान्तराध्ययने न दोषः ॥ ७ ॥

वायुर्घोषवान् भूमौ तृणसंवाहो वर्षति वा यत्र धाराः प्रवहेत् ॥ ८ ॥

घोषवान् कर्णश्रवः । भूमाववस्थितानि तृणानि संवाहयति उत्क्षिप्य गमयतीति तृणसंवाहः । वर्षति वा (२)मेघे धाराः प्रवहेत् विक्षिपेत् । यत्र देशे एवंविधो वायुस्तत्र तावन्तं कालं नाऽधीयीत । अत्र मनुः—

(३)"कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने" ॥ इति ॥ ८ ॥

---

१. उपाकरणोत्सर्जनयोः कृतयोः. इति ङ. पु. २. देवे. इति क. पु.

३. म. स्मृ. २. १०२

उत्तरे द्वे सूत्रे निगदसिद्धे—

(१)ग्रामारण्ययोश्च सन्धौ महापथे च विप्रोष्य च समध्ययनं तदहः ॥ ९ ॥

यदा(२) सहाऽधीयानाः कारणवशाद्विप्रवसेयुः । केचिच्चाचार्येण वा सङ्गतास्तदा समध्ययनं सहाऽधीयमानं प्रदेशं तदहर्नाधीयीत । विप्रोषितानां यदहः पुनर्मेलनं तदहर्नाधीयीतेत्यन्ये ॥ ९ ॥

स्वैरिकर्मसु च ॥१०॥

नाधीयीतेत्येव ॥ १० ॥

अत्रोदाहरणम्—

यथाहस्तप्रक्षालनोत्सादनानुलेखणानीति ॥ ११ ॥

णत्वमाकस्मिकम्, अपपाठो वा ॥ ११ ॥

तावन्तं कालं नाऽधीयीताऽध्यापयेद्वा ॥ १२ ॥

तेषु स्वैरिकर्मसु तावन्त कालमध्ययनमध्यापनञ्च वर्जयेत् ॥ १२ ॥

सन्ध्योः ॥ १३ ॥

सज्योतिषोऽज्योतिषोऽदर्शनात् उभे सन्ध्ये । तयोस्तावन्तं कालं नाधीयीताध्यापयेद्वा । एवमुत्तरत्राप्यनुवृत्तिः ॥ १३ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

तथा वृक्षमारूढोऽप्सु चावगाढो नक्तं चापावृते॥१४॥

विवृतद्वारमपावृतम् । तत्र नक्तं नाधीयीत ॥ १४ ॥

दिवा च पिहिते ॥ १५ ॥

संवृतद्वार पिहितम् । तत्र दिवा नाधीयीत ॥ १५ ॥

अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः ॥१६॥

वासन्तिको वसन्तोत्सवः । स च चैत्रमासि शुक्लत्रयोदश्यां भवति । आषाढशब्देनापि तस्मिन्मासे क्रियमाणस्तादृशः कश्चिदिन्द्रोत्सवादिर्विवक्षितः । तयोस्तदहरनुवाकाध्ययनमविहितम् । अनुवाकग्रहणान्न्यूने न दोषः ।

---

१. इद ११ शं च सूत्रं त्रिधा विच्छिन्न ङ. पु.

२. सह्याधीयमानेषु केचित् इति. ख. पु.

अपर आह—अनुवाकग्रहणान्मन्त्रब्राह्मणयोरेव प्रतिषेधः, नाङ्गानामिति ॥ १६ ॥

नित्यप्रश्नस्य चाऽविधिना ॥ १७ ॥

नित्यं प्रश्नाध्ययनं यत्र स नित्यप्रश्नो ब्रह्मयज्ञः । तस्य चाविधिना वक्ष्यमाणेन प्रकारेण विनाऽनुवाकाध्ययनमविहितम् । यद्यपि नित्यं ब्रह्मयज्ञाध्ययनं तथापि केनचिदप्यङ्गेन विना न कर्तव्यम् । तेन विस्मृत्य प्रातराशे कृते प्रायश्चित्तमेव न ब्रह्मयज्ञः । मनुः—

'स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्' । इति ॥ १७ ॥

तस्य विधिः ॥ १८ ॥

तस्य नित्यप्रश्नस्य विधिर्वक्ष्यते ॥ १८ ॥

अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशे ऽधीयीत यथाध्यायमुत्सृजन्वाचा ॥ १९ ॥

अकृतदिवाभोजन उदकसमीपं गत्वा प्रयतः स्नानमार्जनादिशुद्धः शुचौ देशे प्राच्यामुदीच्यां वा दिश्यच्छदिर्देशेऽधीयीति । यथाध्यायं यथा पाठमनुषङ्गरहितमुत्सृजन् आदित आरभ्य प्रथमादिष्वहस्सु(१) अधीयीत द्वितीयादिषूत्सृज्य ततः परमधीयीत । वाचा उच्चैरित्यर्थः ॥ १९ ॥

मनसा चाऽनध्याये ॥ २० ॥

अनध्याये च मनसाऽधीयीत नित्यस्वाध्यायम् ॥ २० ॥

विद्युति चाऽभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते ॥ २१ ॥

विद्युति अभ्यग्रायामविरतायाम् । स्तनयित्नौ चाऽभ्यग्रे । अप्रायत्ये आत्मनोऽशुचिभावे । प्रेतान्ने च भुक्ते । नीहारे च नीहारो हिमानी तस्मिंश्च वर्तमाने । मानसमनन्तरोक्तमध्ययनं परिचक्षते वर्जयन्ति ॥ २१ ॥

श्राद्धभोजन एवैके ॥ २२ ॥

एके त्वाचार्याः श्राद्धभोजन एव मानसं परिचक्षते, न विद्युदादिषु॥२२॥

विद्युत्स्तनयित्नुवृष्टिश्चापतौ(२) यत्र सन्निपतेयुस्त्र्यहमनध्यायः ॥ २३ ॥

१, अधीतं यत् तत् इति ङ. पु. २. "यत्र" इति नास्ति क. पु.

अपर्तौ यस्मिन् देशे यो वर्षाकालः ततोऽन्यस्तत्रापर्तुः । तत्र यदि विद्युदादयस्तन्निपतेयुः समुदितास्स्युः तदा त्र्यहमनध्यायः ॥ २३ ॥

यावद्भूमिर्व्युदकेत्येके ॥ २४ ॥

यावता कालेन भूमिः विगतोदका भवति तावन्तं कालमनध्याय इत्येके मन्यन्ते ॥ २४ ॥

एकेन द्वाभ्यां वैतेषामाकालम् ॥ २५ ॥

एतेषां विद्युदादीनां मध्ये एकेन द्वाभ्यां वा योगे आकालमनध्यायः । अपरेद्युरा तस्य कालस्य प्राप्तेरित्यर्थः ॥ २५ ॥

सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते च सर्वासा विद्यानां सार्वकालिकमाकालम् ॥२६॥

'सूर्याचन्द्रमसो' रिति वचनं बृहस्पत्यादिनिवृत्त्यर्थम् । भूमिचले भूकम्पे । अपस्वाने निर्घाते । उल्कायामुल्कापाते । अग्न्युत्पाते(१) ग्रामादिदाहे । एतेषु निमित्तेषु(२) सर्वेषु सर्वासां विद्यानाम्—

(३)अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ इत्युक्तानाम् । सार्वकालिकमृतौ चापर्तौ चाऽऽकालमनध्यायः । अत्र 'सर्वासामि'ति वचनादन्यत्र वेदानामेव प्रतिषेधः । अङ्गानामपीत्यन्ये ॥ २६ ॥

अभ्रं चापर्तौ सूर्याचन्द्रमसोः परिवेष इन्द्रधनुः प्रतिसूर्यमत्स्यश्च वाते पूतिगन्धे नीहारे च सर्वेष्वेतेषु तावत्कालम् ॥२७॥

अपर्तावभ्रं दृश्यमानं यावत् दृश्यते तावत्कालमनध्यायः । एवं परिवेषादिष्वपि योज्यम् । बृहस्पत्यादिपरिवेषे न दोषः । इन्द्रधनुः प्रसिद्धम् । सूर्यसमीपे तदाकृतिः प्रतिसूर्यः । मत्स्यः पुच्छवन्न-

---

१. गृहादिदाहे इति ग. पु २. सर्वेषु इति नास्ति. ख. ग. पु

३. विष्णु पु. अङ्गानि शिक्षाव्याकरणछन्दोनिरुक्तज्यौतिषश्रौत्रसूत्राणि, चत्वारो वेदाः, ऋगादयः प्रसिद्धाः, मीमांसा पूर्वमीमांसा, उत्तरमीमांसा च, न्यायविस्तरः गौतमप्रणीतमान्वीक्षक्याख्यं न्यायशास्त्रम्, वैशेषिकशास्त्रं च, पुराण मत्स्यादिपुराणानि, मन्वादिप्रणीतानि धर्मशास्त्राणि च विद्यापदवाच्यानीत्यर्थः ।

त्राम् । समाहारद्वन्द्वे छान्दसो लिङ्व्यत्ययः । सर्वेष्वेतेषु वातादिषु च त्रिषु तावत्कालमनध्यायः । वाते घोषवति । पूतिगन्धे दुर्गन्धे । नीहारे हिमान्याम् । वातादिग्रहण पूर्वोक्तानां श्वगर्दभादीनामुपलक्षणार्थम् । पुनरिह वचनं तावत्कालमिति विधातुम् । अत्रैव श्वगर्दभादिग्रहणे कर्तव्ये पूर्वत्र पाठस्य चिन्त्यं प्रयोजनम् ॥ २७ ॥

मुहूर्तं विरते वाते ॥ २८ ॥

वाते घोषवति विरतेऽपि मुहुर्तमात्रमनध्यायः । द्वे नाडिके मुहूर्तम्॥२८॥

सलावृक्यामेकमृक इति स्वप्नपर्यन्तम् ॥ २९ ॥

(१)'तावत्काल'मित्यस्याऽपवादोऽयम् । सलावृक्येकमृकशब्दौ व्याख्यातौ ॥ २९ ॥

नक्तं चारण्येऽनग्नावहिरण्ये वा ॥ ३० ॥

रात्रावग्निवर्जिते हिरण्यवर्जिते वाऽरण्ये नाधीयीत ॥ ३० ॥

अननूक्तं चाऽपर्वसु छन्दसो नाधीयीत ॥ ३१ ॥

उत्सर्जनादूर्ध्वमुपाकरणादर्वागपर्वतुः । तत्र छन्दसोऽननूक्तमंशमपूर्वेणाऽधीयीत । ग्रहणाध्ययनमपर्वसु न कर्तव्यम् । यद्यपि(२)तैष्यां पौर्णमास्यां रोहिण्यां वा विरमे' दित्युक्तम्, तथापि कियन्तं कालं तद्विरमणम् ? कस्माद्वाऽध्ययनम् ? इत्यपेक्षायामिदमुच्यते-एतावन्तं कालं ग्रहणाध्ययनं न कर्त्तव्यमिति । धारणाध्ययने न दोषः । तथा 'छन्दस' इति वचनादङ्गानां ग्रहणाध्ययने न दोषः ॥ ३१ ॥

प्रदोषे च ॥ ३२ ॥

प्रदोषे चाऽननूक्तमृतामपि नाधीयीत । (३)'मासं प्रदोषे नाधीयीते' त्येतत्तु धारणाध्ययनस्यापि प्रतिषेधार्थम् । अपर आह—यस्यां रात्रौ द्वादशी त्रयोदशी च मिश्रीभवतः, तस्यां प्रदोषे नाधीयीतानूक्तमननूक्तं च, ऋतावपर्वसु च । एष आचार इति ॥ ३२ ॥

सार्वकालिकमाम्नातम् ॥ ३३ ॥

आम्नातमधीतं तत्सार्वकालिकमपर्वसु प्रदोषे च सर्वस्मिन्काले ऽध्येतव्यम् ३३

यथोक्तमन्यदतः परिषत्सु ॥ ३४ ॥

---

१. आप. ध. १. ११. २७. २. आप. ध. १.९.२. ३. आप. ध. १. ९. १.

अत एतस्मादनध्यायप्रकरणोक्तादन्यदनध्यायनिमित्तम् । परिषत्सु-मानवादिधर्मशास्त्रेषु यथोक्तं (१)तथा द्रष्टव्यम् । तत्र वासिष्ठः (२)'दिग्दाहपर्वतप्रपातेषूपलरुधिरपांसुवर्षेष्वाकालिक' मिति ।

यमः—

(३)'श्लेष्मातकस्य शल्मल्या मधूकस्य तथाप्यधः ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥'

सङ्ग्रामोद्यानदेवतासमीपेषु नाधीयीतेति ॥ ३४ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तावुज्ज्वलायामेकादशी कण्डिका ॥

इति चापस्तम्बधर्ममूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां
प्रथमप्रश्ने तृतीयः पटलः ॥ ३ ॥

---

१. तथा इति नास्ति. क. पु.

२ व. स्मृ. १३ ८. दिग्नादपर्वतनादकम्पप्रपातेषु, इति मुद्रितपुस्तकपाठः । निमित्तप्रादुर्भावादारभ्याऽन्येषुर्यावत् स एव कालः स आकालः । तत्र भवमाकालिकम् ।

३. मुद्रितयमस्मृतौ बृहद्यमस्मृतौ वा नेदं वचनमुपलभ्यते ।

अथ चतुर्थः पटलः ॥

तपः स्वाध्याय इति ब्राह्मणम् ॥ १ ॥

योऽयं नित्यस्वाध्यायस्तत्तपः कृच्छ्रातिकृच्छ्रचान्द्रायणादिलक्षणं तपो यावत्फलं साधयति तावत्साधयतीत्यर्थः ॥ १ ॥

तत्र श्रूयते(१)स यदि तिष्ठन्नासीनः शयानो वा स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति ॥ २ ॥

तत्रैव ब्राह्मणे "स यदि तिष्ठन्नासीन' इत्यापत्कल्पः श्रूयते । तत्र (२)'दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्याय' मित्यादिर्मुख्यः कल्पो(३) ब्राह्मण एवोक्तः । इह पुनरासीनवचनं यथाकथञ्चिदासनार्थम् । सर्वथाऽप्यधीयानस्तप एव तत्तप्यत इति ब्राह्मणार्थः । मनुरप्याह—

(४)आहैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यस्त्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तिनोऽन्वहम् ॥' इति ।

स्रग्वीति स्वैरं दर्शयति ॥ २ ॥

एवं कर्तुर्नियमो नाऽऽपद्यतीवाऽऽदरणीय इत्युक्त्वा काले ऽप्याह—

अथापि वाजसनेयिब्राह्मणम्(५)ब्रह्मयज्ञो ह वा एष यत्स्वा-

---

१. तै. आ. २. १२. अत्र सूत्रे ब्राह्मणवाक्यानुपूर्वी योपात्ता सा क्वचित् ब्राह्मणे नोपलभ्यते । किन्तु एवमनुमीयते—तैत्तिरीयारण्यकद्वितीयप्रपाठकद्वादशानुवाकगतं "उत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीतैव स्वाध्यायम्" इत्यंशं 'तप एव तत् तप्यते तपो हि स्वाध्यायः' इति तत्रैव त्रयोदशानुवाकगतमंशं चाऽऽदायैकीकृत्य सूत्रेऽनूदितवान् सूत्रकार इति ।

२. तै. आ. २. ११ १ ३. तैत्तिरीयारण्यके स्वाध्यायब्राह्मण इत्यर्थः ।

४. मनु. २. १६७. " यदि ह वा अप्यभ्यक्तोऽलंकृतस्सुहृत्सुखे शयने शयानः स्वाध्यायमधीत आहैव स नखाग्रेभ्यस्तप्यते य एवं विद्वान् स्वाध्यायमधीते, तस्मात् स्वाध्यायोऽध्येतव्यः" (मा शत. ब्रा ११. ५. ३.) इति माध्यान्दिनशतपथब्राह्मणवाक्यमूलेयं मानवी स्मृतिरिति भाति ।

५. इदानीमुपलभ्यमानमाध्यन्दिनशतपथब्राह्मणपंक्तिस्त्विय्यम्-"तस्य वा एतस्य ब्रह्मयज्ञस्य चत्वारो वषट्काराः यद्वातो वाति यद्विद्योतते, यत् स्तनयति यदवस्फूर्जति तस्मादेवविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामलम्बट्काराय" इति ।

ध्यायस्तस्यैते वषट्कारा यस्तनयति यद्विद्योतते यदवस्फूर्जति यद्वातो वायति । तस्मात् स्तनयति विद्योतमानेऽवस्फूर्जति वाते वा वायत्यधीयीतैव वषट्काराणामच्छम्बट्काराय इति ॥ ३ ॥

अथापि अपि च स्वाध्यायो नाम य एष ब्रह्मयज्ञ ब्रह्म वेदः तत्साधनो यागः। यथा दर्शपूर्णमासादयः पुरोडाशादिसाधनाः। हवैशब्दौ प्रसिद्धिं द्योतयतः। तस्य यज्ञस्यैते वक्ष्यमाणाः स्तनयित्न्वादयो वषट्काराः वषट्कारस्थानीयाः। बहुवचननिर्देशात्(१) वषट्कारानुवषट्कारस्वाहाकारास्सर्वे प्रदानार्था गृह्यन्ते । (२)स्तनितं मेघशब्दः। विद्योतनं विद्युद्व्यापारः। अवस्फूर्जनमशनिपातः। तत्र 'अवस्फूर्जथुर्लिङ्ग' मिति दर्शनात्। 'वायती' ति 'ओवै शोषणे' इत्यस्य रूपम्। यथा आर्द्रप्रदेशश्शुष्को भवति तथा(३) वातीत्यर्थः। यस्मादेते वषट्काराः तस्मात् स्तननादिष्वनध्यायनिमित्तेषु सत्स्वप्यधीयीतैव। न पुनरनध्याय इति नाधीयीत। किमर्थम् ? वषट्काराणामेतेषामच्छम्बट्काराय अव्यर्थत्वाय । अन्यथा एते वषट्काराव्यर्थास्स्युः। ततश्च(४) यथा होत्रा वषट्कृते अध्वर्युर्न जुहुयात् तादृगेव तत्स्यात् ॥ ३ ॥

तस्य शाखान्तरे वाक्यसमाप्तिः ॥ ४ ॥

तस्य **वाजसनेयिब्राह्मणस्य** । शाखान्तरे वाक्यसमाप्तिर्भवति, न (५)तावति पर्यवसानम् ॥ ४ ॥

---

१. वषट्कारः सर्वत्र यागादौ हविःप्रक्षेपात् पूर्वं हविःप्रक्षेपार्थमेव पठ्यमानयाज्यायाः अन्ते पठ्यमानः "वौषट्" इति शब्दः। सोमयागे तत्तद्ग्रहहोमानन्तरं "सोमस्याग्ने वीहि३ वौषट्" इति द्वितीयवारं पठ्यमानोऽनुवषट्कारः। स्वाहाकारस्तु प्रसिद्धः।

२. स्तनन इति. ख. ग. पु. ३. वायतीत्यर्थः, इति क. पु.

४. दर्शपूर्णमासादियागेषु सर्वत्र हविःप्रदानसमये "अमुष्मा अनुब्रूहि" इति प्रैषानन्तर पुरोनुवाक्यामनूच्याऽऽश्राव्य प्रत्याश्रव्य याज्यामुक्त्वा वषट्कृते जुहोति" इति वचनात् वषट्कारानन्तर होमो विहितः। तत्र वषट्कारानन्तर होमाकरणे यादृशो दोषस्तादृशस्यादित्यर्थः।

५. 'तावतीति. नास्ति ख. पु.

तदेव (१)शाखान्तरं पठति—

अथ यदि वा वातो वायात्स्तनयेद्वा विद्योतेत वाऽवस्फू-र्जेद्वैकां वर्चमेकं वा यजुरेकं वा सामाऽभिव्याहरेद्भूर्भु-वस्सुवस्सत्यं तपः श्रद्धायां जुहोमीति वैतत् । तेनो-हैवाऽस्यैतदहस्स्वाध्याय उपात्तो भवति ॥ ५ ॥

अन्ते इतिशब्दोऽध्याहार्यः । वातादिषु सत्सु एकामृचमधीयीत । प्राप्ते प्रदेशे । यजु(२)र्वेदाध्ययन एकं यजुः । साम(३)वेदाध्ययन एक साम । सर्वेषु वा वेदेषु 'भूर्भुवः सुव' रित्यादिकं यजुरभिव्याहरेत्, न पुनर्यथापूर्वं प्रश्नमात्रम् । तेनैव तावतैवास्याऽध्येतुः तदहः तस्मिन्नहनि स्वाध्याय उपात्तो भवति(४) अधीतो भवतीति यावत् । केचित्तु 'भूर्भुवः सुव' रित्यादिक ब्राह्मणभागाध्ययनविषयं मन्यन्ते, न सार्वत्रिकम् ॥ ५ ॥

कस्मात् पुनर्वाजसनेयिब्राह्मणस्योदाहृते शाखान्तरे वाक्यसमाप्तिराश्रीयते न पुनर्यथाश्रुतमात्रं गृह्यते ? तत्राह—

एवं सत्यार्यसमयेनाऽविप्रतिषिद्धम् ॥ ६ ॥

एवं सति वाक्यपरिसमाप्तावाश्रीयमाणायामार्यसमयेन आर्याः शिष्टा मन्वादयः तेषां समयो व्यवस्था, तेन अविप्रतिषिद्ध भवति । इतरथा विप्रतिषिद्धं स्यात् ॥ ६ ॥

कथम् ?

अध्यायानध्यायं ह्युपदिशन्ति । तदनर्थकं स्याद्वाज-सनेयिब्राह्मणं चेदवेक्षेत ॥ ७ ॥

आर्या हि अध्यायमनध्यायं चोपदिशन्ति । तदुपदेशनमनर्थकं स्यात् यदि वाजसनेयिब्राह्मणं यथाश्रुतमवेक्षताऽध्येता ॥ ७ ॥

ननु-अनर्थकमेवेदमस्तु, श्रुतिविरोधात् । तत्राह—

आर्यसमयो ह्यगृह्यमानकारणः ॥ ८ ॥

योऽयमध्यायानध्यायविषय आर्यसमयः न तत्र किञ्चित्कारणं गृह्यते । यथा(५) 'वैसर्जनहीमीयं वासोऽध्वर्यवे ददाती' त्यत्रागृह्यमाण

---

१ किमिदं शाखान्तरमिति न ज्ञायते । २, ३. वेदाध्यायी इति क. पु.

४. स्वीकृतो भवति अधीतो भवतीत्यर्थ, इति. ख. पु

५. सोमयागे अग्नीषोमीयपश्वनुष्ठानकाले तदर्थं शालामुखीयाद्गने कांचिदशमुद्धृत्य

कारणश्चार्थसमयः श्रुत्यनुमानद्वारेण प्रमाणम्। अतो वाक्यपरिसमाप्तिरेव युक्ता। एवं हि वाजसनेयिब्राह्मणस्यापि नात्यन्तबाधः। अनध्यायोपदेशस्यापि प्रभूताध्ययनविषयतयाऽर्थवत्त्वमिति। सूत्रे 'अगृह्यमानकारण' इति णत्वाभावश्छान्दसः ॥ ८ ॥

का पुनरसौ स्मृतिः? या ब्रह्मयज्ञेऽप्यनध्यायमुपदिशति। मानवे तावद्विपर्ययः श्रूयते—

(१)'नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम्।' इति।

सामान्येनानध्यायोपदेशस्तु ब्रह्मयज्ञादन्यत्र चरितार्थः। तस्मात्तादृशी स्मृतिर्मृग्या। एवं तर्ह्यग्निहोत्रादिष्वपि मन्त्राणामनध्याय प्राप्नोति। नेत्याह—

विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम् ॥ ९ ॥

विद्या वेदाध्ययनम्। तां प्रत्यनध्यायः श्रूयते। न पुनर्मन्त्राणां कर्मयोगे। हेतुः परिभाषायामुक्तो(२)र्थान्तरत्वादिति। अर्थान्तरं हि कर्मणि प्रयोगो मन्त्राणाम्(३)न पुनर्ग्रहणाध्ययनम्। पारायणाध्ययनमध्येऽनध्यायागमो भवति वा न वेति चिन्त्यम्। एव श्रीरुद्रादिजपेऽपि ॥ ९ ॥

कथं पुनरार्थसमयः प्रमाणम्? यावता न तेषामतीन्द्रियेऽर्थे ज्ञानं सम्भवति। तत्राह—

ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते ॥ १० ॥

विधीयन्त इति विधयः कर्माणि। ते सर्वे स्मार्ता अपि ब्राह्मणेष्वे-

---

तस्य उत्तरवेदिस्थाहवनीयकुण्डे स्थापनार्थं अध्वर्यौ गच्छति तं यजमानस्तत्पत्नीपुत्रादयोऽनुगच्छेयुः। गच्छतस्तानहतेन दीर्घतमेन वस्त्रेणोपर्यावृच्छाद्य सर्वेष्वाहवनीयदेश प्राप्तेषु तत्र तमग्निं प्रतिष्ठाप्य, आच्छादनवस्त्रान्तं स्रुग्दण्डे बध्वाऽऽज्येन जुहोति। ते वैसर्जनहोमा उच्यन्ते। तच्च वासः अध्वर्यवे दद्यात् इति प्रकृतवाक्यार्थं। स्मृतेरस्या लोभादिमूलकत्वमापाद्यातएवाप्रामाण्यमुक्तं शबरस्वामिना। कुमारस्वामिना तु एव सति सर्वत्राऽनाश्वासप्रसङ्गमापाद्य मन्वादिस्मृतिवत् प्रामाण्यमेवाङ्गीकृतम्।

१. म. स्मृ. २. १०६. ब्रह्मसत्रं सततप्रवृत्तं सत्रम्, यथा सहस्रसंवत्सरादिकं सत्रं न कदाचिच्छिद्यते तद्वदिद नित्याध्ययनमित्यर्थः।

२. आप. प १. ४०. ३. अनुष्ठेयार्थप्रकाशकतया इत्यधिक ख. ग, पु.

वोक्ताः । नन्विदानीं ब्राह्मणानि नोपलभ्यन्ते । सत्यम्; तेषामुत्सन्नाः पाठा[1], अध्येतृदौर्बल्यात् । कथं तर्हि तेषामस्तित्वम् ? प्रयोगादनुमीयन्ते । **प्रयोगः स्मृतिनिबन्धनमनुष्ठानं च । तस्माद्ब्राह्मणान्यनुमीयन्ते मन्वादिभिरुपलब्धानीति । (१) कथमन्यथा स्मरेयुरनुतिष्ठेयुर्वा । सम्भवति च तेषां वेदसंयोगः ॥ १० ॥**

अथ प्रसङ्गादपस्मृतिरुच्यते—

यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति ॥११॥

यत्र(२)**पितृष्वसृसुतामातुलसुतापरिणयनादौ** । प्रीत्युपलब्धितः प्रवृत्तिर्न तत्रोत्सन्नपाठं शास्त्रमनुमीयते, **प्रीतेरेव प्रवृत्तिहेतोः सम्भवात् ॥ ११ ॥**

ततश्च—

तदनुवर्तमानो नरकाय राध्यति ॥ १२ ॥

तद्विधानमनुतिष्ठन्नरकायैव राध्यति **कल्पते ॥ १२ ॥**

अथ ब्राह्मणोक्ता विधयः ॥ १३ ॥

एवं स्मृत्याचारप्रामाण्यं श्रुतिमूलत्वमुक्तम् । (३) **अथ प्रत्यक्षब्राह्मणोक्ता एव केचिद्विधयो व्याख्यायन्ते तेषामपि स्मार्तेष्वनुप्रवेशार्थम् । तेन तदतिक्रमे स्मार्तातिक्रमनिमित्तमेव प्रायश्चित्तं भवति ॥ १३ ॥**

तेषां (४)महायज्ञा महासत्राणीति च संस्तुतिः ॥१४॥

तेषां **वक्ष्यमाणानां** महायज्ञा इति संस्तुतिः **स्वाध्यायब्राह्मणे । महासत्राणीति च संस्तुतिर्भवति बृहदारण्यकादौ । संस्तुतिग्रहणेन संस्तुतिमात्रमिदं न नामधेयं(५) धर्मातिदेशार्थमिति दर्शयति । तेन महायज्ञेषु सोम**

---

१. कथमपरथा इति ख. पु. २. 'पितृष्वसृसुता' इति नास्ति ख. ग. पु.

३ अथेदानीं इति ख. पु.

४ पञ्चैव महायज्ञाः तान्येव महासत्राणि (श. ब्रा. ११. ५.६.१) इति शतपथे ।

५. कुण्डपायिनामयनाख्ये सवत्सरसाध्ये सत्रविशेषे "मासमग्निहोत्रं जुहोतीति" श्रुतोऽग्निहोत्रशब्दस्तत्रत्यस्य कर्मविशेषस्य गौण्या वृत्त्या नामधेय सन् प्रसिद्धाग्निहोत्रात् धर्मातिदेशक इत्युक्तं पूर्वमीमांसायां सप्तमतृतीये । एव च क्वचित् नामत्वेनाभिधावृत्त्या प्रयुज्यमानस्य शब्दस्य प्रकरणान्तरेऽन्यत्र कर्मनामतया यदि श्रवणं, तदा न तत्र कर्मान्तरेऽपि तस्य शक्तिरङ्गीक्रियतेऽनेकार्थतादोषभिया । किन्तु प्रसिद्धतादृशकर्मनिष्ठगुणसमानगुणवत्त्वरूपां गौणी वृत्तिमाश्रित्य तद्बलात् तदीयधर्मातिदेशक• इति स्थितम् । प्रकृते तु न तथा । किन्तु स्तुतिमात्रमिति ।

यागेषु ये धर्माः 'न ज्येष्ठं भ्रातरमतीत्य सोमेन यष्टव्य' मित्यादयः, ये च महासत्रस्य गवामयनस्य धर्मा(१) इष्टप्रथमयज्ञानामधिकार' इत्यादयः उभयेऽपि ते वक्ष्यमाणेषु पञ्चमहायज्ञेषु न भवन्ति ॥ १४ ॥

के पुनस्ते ? तानाह—

(२)अहरहर्भूतबलिर्मनुष्येभ्यो यथाशक्ति दानम् ॥ १५ ॥

वैश्वदेवे वक्ष्यमाणेन बलिहरणप्रकारेण भूतेभ्योऽहरहर्भूतबलिर्देयः, एष भूतयज्ञः । मनुष्येभ्यश्च यथाशक्ति दानं कर्तव्यम् । एष मनुष्ययज्ञः ॥ १५ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वादशी कण्डिका ॥

देवेभ्यः स्वाहाकार आ काष्ठात् पितृभ्यः स्वधाकार ओदपात्रात् स्वाध्याय इति ॥ १ ॥

देवेभ्यः स्वाहाकारेण प्रदानम् आकाष्ठात् अशनीयाभावे काष्ठमपि तावद्देयम् । वैश्वदेवोक्तप्रकारेणैवैष देवयज्ञः । केचिद्वैश्वदेवाहुतीभ्यः पृथग्भूतामिमामाहुतिं मन्यन्ते । 'देवेभ्यः स्वाहे' ति च मन्त्रमिच्छन्ति । 'देवयज्ञेन यक्ष्य' इति सङ्कल्पमिच्छन्ति । वयं तु न तथेति(३) गृह्य एवाऽवोचाम । केचिदाहुः—'आकाष्ठा' दिति वचनादशनीयाभावेन भोजनलोपेऽपि यथाकथञ्चित् वैश्वदेवं कर्तव्यम्, पुरुषसंस्कारत्वादिति ।

---

१. इष्टप्रथमयज्ञैर्यष्टव्यम् इति. ख. पु. "आहिताग्नय इष्टप्रथमयज्ञाः गृहपतिसप्तदशास्त्रमासीरन्" इति सत्रेऽधिकारिनियमः । प्रथमयज्ञशब्देन सोमयाग उच्यतेऽग्निष्टोमसंस्थाकः । पूर्वं कृताधानाः अनुष्ठिताग्निष्टोमसंस्थाकसोमयागाः द्वादशाहादिषु सत्राख्येषु ज्योतिष्टोमविकृतिभूतेषु सोमयागेष्वधिकारिणः इति वाक्यार्थः ॥ तादृशानां नियमानां तत्रापेक्षा । अधीतवेदस्य सर्वस्याऽप्यत्राधिकार इति भावः ॥

२. "सूत्राणीमानि—शतपथब्राह्मणस्य काञ्चन प्रतिरूपतामनुभवन्ति" इयं हि शातपथी पंक्तिः—भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञः इति । अहरहर्भूतेभ्यो बलिं हरेत् । तथैतं भूतयज्ञं समाप्नोति, अहरहर्दद्यादोदपात्रात् तथैत मनुष्ययज्ञं समाप्नोति, अहरहस्स्वधा कुर्यादोदपात्रात् तथैतं पितृयज्ञं समाप्नोति, अहरहस्स्वाहा कुर्यादाकाष्ठात्तथैनं देवयज्ञं समाप्नोति । अथ ब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञ. इति ।

३. आपस्तम्बगृह्यसूत्रस्यानाकुलात्पर्यदर्शनसहितस्य चौखम्बामुद्रणालयमुद्रितस्य पुस्तकस्य १०४ पृष्ठे द्रष्टव्यम् ।

अपरे तु-अशनीयसंस्कार इति वदन्तो भोजनलोपे वैश्वदेवं न कर्तव्यमिति स्थिताः ।

पितृभ्यः स्वधाकारेण प्रदानम् आदपात्रात् अन्नाद्यभावे उदपात्रमपि स्वधाकारेण तावद्देयम् । पात्रग्रहणात् सह पात्रेण देयम् । एष पितृयज्ञः । स्वाध्याय(१) 'तस्य विधि' रित्यारभ्योक्तो नित्यस्वाध्यायः । स तु ब्रह्मयज्ञः इतिः समाप्तौ । इत्येते महायज्ञा इति । न चायमुपदेशक्रमोऽनुष्ठान उपयुज्यते । अनुष्ठानं तु—(२)ब्रह्मयज्ञो, देवयज्ञः, पितृयज्ञो, भूतयज्ञो, मनुष्ययज्ञ इति ॥ १ ॥

पूजां प्रसङ्गादाह—

पूजा वर्णज्यायसां कार्या ॥ २ ॥

वर्णतो(३) ये ज्यायांसः प्रशस्ततरा भवन्ति तेषामवरेण वर्णेन कार्या पूजा अध्वन्यनुगमनादिका उत्सवादिषु च गन्धलेपादिका ॥ २ ॥

वृद्धतराणां च ॥ ३ ॥

सजातीनामपि पूजा कार्या । तरपो निर्देशात्(४) विद्यावयःकर्म-भिर्वृद्धानां ग्रहणम् । हीनानामपीत्येके । तथा च मनुः—

(५)'शूद्रोऽपि दशमीं गत' इति ॥ ३ ॥

पूजा कार्येत्युक्तम् । तद्विरोधी हर्षो वर्ज्य इत्याह—

हृष्टो दर्पति दृप्तो धर्ममतिक्रामति धर्मातिक्रमे खलु पुनर्नरकः ॥ ४ ॥

अभिमतलाभादिनिमित्तश्चित्तविकारो हर्षः । तद्युक्तो हृष्टः । स दर्पति दृप्यति । दर्पो गर्वोऽभिमानः । दृप्तो धर्ममतिक्रामति, पूज्यपूजनादिकं प्रति स्तब्धत्वात् । खलुपुनश्शब्दौ वाक्यालङ्कारे । धर्मातिक्रमे खलु पुनर्नरको भवति

---

१. आ. ध. ११ २२.

२ शिष्टाचारोऽपि ब्रह्मयज्ञो देवयज्ञः, पितृयज्ञो, भूतयज्ञो, मनुष्ययज्ञ, इत्येवम् । न तु ब्राह्मणोक्तेनैव क्रमेणानुष्ठानम् । च. पुस्तके देवयज्ञो, भूतयज्ञः, इति पाठक्रमः ।

३. अत्र प्रथमान्तस्सर्वोऽप्येकवचनान्ततया पठ्यते क. पु.

४. वित्त बन्धुर्वय' कर्म विद्या भवति पञ्चमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ इति मनूक्तैर्विद्यादिभिर्वृद्धानामित्यर्थ. ॥

५. म. स्मृ. २. १३७. दशमीं गतः नवत्यधिकां अवस्था गत इत्यर्थः । वर्षाणा शतस्य दशधा विभागे दशम्यवस्था नवत्यधिका भवति ।

निरय प्रतिपद्यते । तस्माद्धर्मातिक्रममूलभूतो हर्षो न कर्तव्यः । यद्यपि भूतदाहीयेषु (१)दोषेषु वर्जनीयेषु हर्षोऽपि, (२)वक्ष्यते । तथापीह विशेषेण हर्षस्य वर्जनार्थोऽयमारम्भः । योगाङ्गत्वाद्वक्ष्यमाणस्य ॥ ४ ॥

न समावृत्ते समादेशो विद्यते ॥ ५ ॥

समावृत्तं शिष्यं प्रति आचार्येण समादेशो न देयः—इदं त्वया कर्तव्यमिति । यथा असमावृत्तदशायामाज्ञा दीयते—उदकुम्भमाहरेत्यादि, नैव मिदानीम् । स्वेच्छया करणे न प्रतिषेध्यम् ॥ ५ ॥

ओङ्कारस्स्वर्गद्वारं तस्माद्ब्रह्माऽध्येष्यमाण एतदादि प्रतिपद्येत ॥ ६ ॥

ओङ्कारः प्रणवः स्वर्गस्य द्वारमिव । यथा द्वारेण गृहाभ्यन्तरं प्राप्यते तथाऽनेन स्वर्गः । तस्मात् ब्रह्म वेदं स्वर्गसाधनमध्येष्यमाण एतदादि अनाचमनातमप्योङ्कारमादौ कृत्वा प्रतिपद्येत उपक्रमेताऽध्येतुम् ॥ ६ ॥

विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म ॥ ७ ॥

अध्ययने ऽनुपयुक्ता कथा विकथा । तां चान्यां कृत्वा एतदादि प्रतिपद्येत । एवं सति ब्रह्म वेदः लौकिक्या वाचा व्यावर्तते तया मिश्रितं न भवति ॥ ७ ॥

पुनरप्योङ्कारमेव स्तौति—

यज्ञेषु चैतदादयः प्रसवाः ॥ ८ ॥

यज्ञेषु दर्शपूर्णमासादिषु एतदादयः ओङ्कारादयः प्रसवा अनुज्ञावाक्यानि भवन्ति ब्रह्मादीनाम्—ॐ प्रणय, ॐ निर्वप, ॐ (३)स्तुध्वमिति ॥ ८ ॥

लोके च भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथा पुण्याहं स्वस्त्यृद्धिमिति ॥ ९ ॥

यथा यज्ञेष्वोङ्कारादयः प्रसवाः, लोके च भूतिकर्मसु पाणिग्रहणादिषु

---

१. दोषेषु वर्जनीयेषु इति नास्ति ख. पु. २. आप ध. १. २३. ६.

३ सोमयागे उद्गातृप्रस्तोतृप्रतिहर्तृख्यान् छन्दोगान् प्रति गुणिनिष्ठगुणाभिधानरूपस्तोत्रारम्भार्थमध्वर्युणाऽनुज्ञादानमिदम् ।

एतदादीन्येव वाक्यानि स्युः । तान्युदाहरति—यथेति । पुण्याहवाचने ॐ कर्मणः पुण्याहं भवन्तो ब्रुवन्त्विति वाचयिता वदति । (१)'ॐ पुण्याहं कर्मणोऽस्तु' इति प्रतिवक्तारः । (२)'ॐ कर्मणे स्वस्ति भवन्तो ब्रुवन्तु' इति वाचयिता । 'ॐ कर्मणे स्वस्ति' इतीतरे । (३)'ॐ कर्मण ऋद्धिं भवन्तो ब्रुवन्तु" इति वाचयिता । 'ॐ कर्मर्ध्यता'मितीतरे । तस्मादेवं प्रशस्त ॐकार इति ॥ ९ ॥

नाऽसमयेन कृच्छ्रं कुर्वीत त्रिःश्रावणं त्रिस्सहवचनमिति परिहाप्य ॥ १० ॥

समयः शुश्रूषा, तेन विना कृच्छ्रं दुःखं दुरवधारणं अपूर्वं ग्रन्थं न कुर्वीत । क्रियासामान्यवचनः करोतिरध्ययनेऽध्यापने च वर्तते । समयेन विना शिष्योऽपि कृच्छ्रं ग्रन्थं नाऽधीयीत । आचार्योऽपि नाध्यापयेत् । तथा च मनुः—

(४)'धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे' ॥ इति ।

किमविशेषेण ? नेत्याह—त्रिःश्रावण त्रिस्सहवचनमिति परिहाप्य वर्जयित्वा । त्रिःश्रावणमात्रे त्रिस्सहवचनमात्रे चान्यतरापेक्षया क्रियमाणे शुश्रूषा नाऽपेक्ष्या । ततोऽधिके सर्वत्रापेक्ष्येति ॥ १० ॥

अविचिकित्सा यावद्ब्रह्म निगन्तव्यमिति हारीतः ॥११॥

विचिकित्सा संशयः । तदभावोऽविचिकित्सा सा यावदुत्पद्यते तावद्ब्रह्म निगन्तव्यं नियमपूर्वमधिगन्तव्यमिति हारीतः आचार्यो मन्यते । अत्र पक्षे त्रिःश्रावणत्रिस्सहवचनयोरपि शुश्रूषितव्यम् । ब्रह्मग्रहणाद्वेदेषु नायं विधिः ॥ ११ ॥

न बहिर्वेदे गतिर्विद्यते ॥ १२ ॥

वेदाद्बहिर्भूते काव्यनाटकादिश्रवणे । गतिः शुश्रूषा न विद्यते यद्यपि तदुपयुक्तं वेदार्थज्ञाने ॥ १२ ॥

समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् ॥१३॥

---

१. ॐ पुण्याहं इति क.पु. २. ॐ कर्मणे स्वस्ति इति वाचयिता इति क. पु.
३. ॐ कर्मण ऋद्धिं इति क. पु ४. म स्मृ. २ ११२

य आचार्येण समादिष्टोऽध्यापयति तं यावदध्ययन यावदसावध्यापयते तावदुपसगृह्णीयात् । तथा (१)'समादिष्टेऽध्यापयती'त्यत्राऽऽचार्यदारवदवृत्तिरुक्ता । तत्र (२)चा'न्यत्रोपसङ्ग्रहणादि'ति वर्तते । (३)अत उपसङ्ग्रहणार्थोऽयमारम्भः ॥ १३ ॥

नित्यमर्हन्तमित्येके ॥ १४ ॥

स चेत्समादिष्टोऽर्हन् भवति(४) विद्यासदाचारादिना । ततो नित्य मुपसंगृह्णीयात् , इत्येके मन्यन्ते । स्वमत तु यावदध्ययनमिति ॥ १४ ॥

न गतिर्विद्यते ॥ १५ ॥

यद्यप्यसावर्हन् भवति तथाप्याचार्ये या गतिः शुश्रूषा सा तस्मिन्न कर्तव्या ॥ १५ ॥

वृद्धानां तु ॥ १६ ॥

तुशब्दार्थे । वृद्धाना चान्तेवासिनां न गतिर्विद्यते । पूर्ववयसाऽन्ते वासिना अवरवया आचार्यो न शुश्रूषितव्यः । अध्ययनादूर्ध्वमित्येके । अध्ययनकालेऽपीत्यन्ये । केचिदवरवयसाऽप्यन्तेवासिना न वार्धके गतिः कर्तव्येत्याहुः ॥ १६ ॥

ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते ॥ १७ ॥

ब्रह्मणि वेदविषये यदा मिथो विनियोगः क्रियते बह्वृचो यजुर्वेदिनः सकाशाद्यजुर्वेदमधीते सोऽपि तस्मादृग्वेदम् । तदाऽपि परस्परं शुश्रूषा न कर्तव्या ॥ १७ ॥

अत्र हेतुं स्वयमेवाह—

ब्रह्म वर्धत इत्युपदिशन्ति ॥ १८ ॥

द्वयोरपि ब्रह्म वर्धते । सैव ब्रह्मवृद्धि' शुश्रूषेत्युपदिशन्त्याचार्याः ॥१८॥

निवेशे वृत्ते संवत्सरेसंवत्सरे द्वौद्वौ मासौ समाहित आचार्यकुले वसेद्भूयःश्रुतिमिच्छन्निति श्वेतकेतुः ॥ १९ ॥

भूयःश्रवणमिच्छन् पुरुषो निवेशे दारकर्मणि वृत्तेऽपि प्रतिसंवत्सरं द्वौद्वौ

---

१. आप. ध १. ७ २८. २. आप ध १ ७ २७

३. तत इति क. पु ४. विद्यासदाचारादिना इति नास्ति ख. पु

मासौ समाहितो भूत्वाऽऽचार्यकुले वसेदिति श्वेतकेतुराचार्यो मन्यते ॥ १९ ॥

अत्र हेतुत्वेन श्वेतकेतोरेव शिष्यान्प्रति वचनम्—

एतेन ह्यहं योगेन भूयः पूर्वस्मात्कालाच्छुतम-
कुर्वीति ॥ २० ॥

एतेनानन्तरोक्तेन योगेनोपायेन अहं पूर्वस्मात् ब्रह्मचर्यकालात् भूयः (१)बहुतरं श्रुतमकुर्वीति कृतवानस्मि । अतो यूयमपि तथा कुरुध्वमिति ॥

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ २१ ॥


तदिद श्वेतकेतोर्वचनं श्रुत्यादिभिः शास्त्रैर्विरुद्धम् ॥ २१ ॥

कथमित्यत आह—

निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते ॥ २२ ॥

हिशब्दो हेतौ । यस्मात् निवेशे वृत्ते नैयमिकानि नियमेन कर्तव्यानि नित्यानि कर्माणि श्रूयन्ते ॥ २२ ॥

॥ इति त्रयोदशी कण्डिका ॥



कानि पुस्तकानि ?

(२)अग्निहोत्रमतिथयो यच्चान्यदेवं युक्तम् ॥ १ ॥

अग्निहोत्रम् , अतिथयः अतिथिपूजा ।

(३)'यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः ॥' इति ।

यच्चान्यदेव युक्तं एवंविधं श्राद्धसन्ध्योपासनादि । एवमेतैः कर्मभिरहरहराक्रान्तस्य न (४)शरीरकण्डूयनेष्वप्यवसरो भवति । स कथं

---

१ अधिकतर इति ख पु

२. अग्निहोत्रमतिथयः । यच्चान्यदेवं युक्तम् । इति सूत्रद्वयत्वेन परिगणित ख. च. पुस्तकयोः ।

३. वसि० स्मृ० ८. १६. वचनमिद स्मृतिमुक्ताफले 'दक्षः'—इत्यारभ्य पठितेषु वचनेषु मध्ये पठितम् । इदानमुपलभ्यमानमुद्रितदक्षस्मृतिपुस्तके तु नोपलभ्यते । वसिष्ठ स्मृतावेवोपलभ्यते ।

४. शिरःकण्डूयने इति ख पु.

द्वौद्वौ मासौ गुरुकुले वसेदिति ॥ १ ॥

अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ॥ २ ॥

यमाचार्यं माणवकोऽध्ययनं प्रयोजनमुद्दिश्य चोदयेत्–'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्न'मिति, स एनं माणवकं नैव प्रत्याचक्षीत। चशब्दोऽवधारणे ॥ २ ॥

किमविशेषेण ? नेत्याह—

न चास्मिन् दोषं पश्येत् ॥ ३ ॥

चणिति निपातोऽस्ति—(१)'निपातैर्यद्यदिहन्तकुविन्नेच्चण्कच्चिद्यत्रयुक्त'मिति। स चेदर्थे वर्तते। (२)'इन्द्रश्च मृडयाति न' इत्यादौ दर्शनात्। तस्यायं प्रयोगः—न चेदस्मिन् माणवके दोषमनध्याप्यताहेतुं पश्येत् ॥ ३ ॥

यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ॥ ४ ॥

समानमधीयानेषु माणवकेषु यदि कस्यचिद्यदृच्छया दृष्टहेतुमन्तरेण बुद्धिमान्द्यादिनाऽध्ययनस्या (३)संवृत्तिस्स्यात् अधीतो भागो माणवकान्तरवन्नागच्छेत् तदा तस्यां यदृच्छायामसंवृत्तौ तस्मिन्नाचार्ये गतिरेव शुश्रूषैव माणवकस्य शरणम्। तथा च मनुः—

(४)'यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥' इति।

अधिकं शुश्रूषितो हि गुरुस्सर्वात्मना त शिक्षयेदिति ॥ ४ ॥

मातरि पितर्याचार्यवच्छुश्रूषा ॥ ५ ॥

मातृग्रहणेन पितामहीप्रपितामह्योरपि ग्रहणम्। पितृग्रहणेन पितामहप्रपितामहयोः। सर्व एते आचार्यवच्छुश्रूषितव्याः ॥ ५ ॥

समावृत्तेन सर्वे गुरव उपसङ्ग्राह्याः ॥ ६ ॥

उक्ताश्चानुक्ताश्च ज्येष्ठभ्रातृमातुलादयः सर्वे गुरव समावृत्तेनाहरहरुपसंग्राह्याः ॥

प्रोष्य च समागमे ॥ ७ ॥

---

१. पा० सू० ८. ३. १०. २. ऋ. सं २. ४१ ११.
३. समावृत्तिः इति क. पु. ४ म स्मृ २ २१८

यदि स्वयं प्रोष्य समागतो भवति । गुरवो वा प्रोष्य समागताः । तदापि ते उपसङ्ग्राह्याः ॥ ७ ॥

भ्रातृषु भगिनीषु च यथापूर्वमुपसङ्ग्रहणम् ॥ ८ ॥

पूर्वेणैव सिद्धे क्रमार्थं वचनम्-यथापूर्वं ज्येष्ठक्रमेणेति ॥ ८ ॥

नित्या च पूजा यथोपदेशम् ॥ ९ ॥

(१)'पूजा वर्णज्यायसां कार्या, वृद्धतराणां चेत्युपदेशानुरोधेन या नित्या पूजा सा यथापूर्वं वृद्धक्रमेण ॥ ९ ॥

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः
प्रत्युत्थायाऽभिवदेत् ॥ १० ॥

(२)त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हती'ति वक्ष्यति । तेनावरवयस ऋत्विगादयोऽप्यभिवाद्यन्ते । तानभिवादयमानान् प्रत्युत्थायाऽभिव देत् । नान्येष्विव सुखमासीनोऽभिवदति । वयस्त उत्कृष्टानां तेषामिय मेव पूजा ॥ १० ॥

तूष्णीं वोपसंगृह्णीयात् ॥ ११ ॥

अथवा प्रत्युत्थाय स्वयमपि तास्तूष्णीमुपसंगृह्णीयात् । विद्याचारित्राद्य पेक्षो विकल्पः ॥ ११ ॥

अथाभिवाद्या उच्यन्ते—

दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम् ।
त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति ॥ १२ ॥

पुरेभवं पौरम् । पौरं च तत्सख्यं च पौरसख्यं सेवादिनिबन्धनं बा-न्धवं तदभिवादनस्य निमित्तम् । कीदृशम् ? दशवर्षान्तराळं, दशवर्षा-धिकः पौरस्सखा अश्रोत्रियोऽप्यभिवाद्य इति विवक्षितम् । पञ्चवर्षं तु चारणम् । सख्यमित्युपसमस्तमप्यपेक्ष्यते । चारणशब्दः शाखाध्यायिषु रूढः । तेषां सख्यं पञ्चवर्षमभिवादनस्य निमित्तम् । (३)श्रोत्रियं वक्ष्यति । त्रिवर्षपूर्वः श्रोतियोऽभिवादनमर्हति । स त्रिवर्षपूर्वतामात्रेणाभिवादनमर्हति, न पूर्वसंस्तवमपेक्षते ॥ १२ ॥

---

१. आप. ध. १. १३ २, ३ २. आप. ध. १ १४. १३
३ आप ध. २. ६. ४.

ज्ञायमाने वयोविशेषे वृद्धतरायाऽभिवाद्यम् ॥ १३ ॥

क्रमार्थमिदम्(१) वयोविशेषे ज्ञायमाने पूर्वं वृद्धतरायाऽभिवाद्यम् अभिवादनं कर्तव्यम् । पश्चाद्वृद्धायेति ॥ १३ ॥

विषमगतायाऽगुरवे नाभिवाद्यम् ॥ १४ ॥

उच्चैस्थाने नीचैस्स्थाने वाऽवस्थितो विषमगतः । तस्मै गुरुव्यतिरिक्ताय नाभिवाद्यम् । गुरवे त्वभिवाद्यमेव, दर्शने सति तूष्णीमवस्थानस्याऽयुक्तत्वात् ॥ १४ ॥

अन्वारुह्य वाभिवादयीत ॥ १५ ॥

इदमगुरुविषयम् । यत्रासावभिवादनीयः स्थितः तत्रान्वारुह्याभिवादयीत अभिवदेत् । अन्ववरुह्योत्थापे द्रष्टव्यम्, न्यायस्य तुल्यत्वात् । गुरौ तु दृष्टमात्र एवाभिवादनमित्युक्तम् ॥ १५ ॥

सर्वत्र तु प्रत्युत्थायाभिवादनम् ॥ १६ ॥

सर्वत्र गुरावगुरौ च प्रत्युत्थायैवाभिवादनं कर्तव्यम् ॥ १६ ॥
उत्तरे द्वे सूत्रे निगदसिद्धे ॥

(२)अप्रयतेन नाभिवाद्यं, तथाऽप्रयताया,ऽप्र

यतश्च न प्रत्यभिवदेत् ॥ १७ ॥

यद्यज्ञानादप्रयताय कश्चिदभिवादयेत् तथापि सोऽप्रयतो न प्रत्यभिवदेत् ॥ १७ ॥

पतिवयसः स्त्रियः ॥ १८ ॥

पत्युर्यद्वयस्तदेव स्त्रीणां वयः । तेन तदनुरोधेन ज्येष्ठभार्यादिष्वभिवादनम् ॥ १८ ॥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत ॥ १९ ॥

अवहितपाणिः समित्कुशादिहस्तः, दात्रादिहस्तो वा । अन्यत्प्रसिद्धम्॥

सर्वनाम्ना स्त्रियो राजन्यवैश्यौ च(३) न नाम्ना ॥ २० ॥

---

१. 'वचन'मित्यधिक ख. पु. २. इद सूत्रं त्रिधा विभक्त ख. च. पु.
३. 'न नाम्ना' इति पृथक् सूत्रं कृतं क. पु

स्त्रिय सर्वनाम्नैवाभिवादयीत अभिवादयेऽहमिति न नाम्ना(१) ऽसाधारणेन देवदत्तोऽहमभिवादय इति । एवं राजन्यवैश्यौ च ॥ २० ॥

मातरमाचार्यदारं चेत्येके ॥ २१ ॥

मातरमाचार्यदारं चैते अपि द्वे सर्वनाम्नैवाऽभिवादयीत । न नाम्नाभिवादयीतेत्येके मन्यन्ते । स्वमतं तु नाम्नैवेति ॥ २१ ॥

वयोविशेषेणाभिवादनं हीनवर्णे नास्तीत्याह—

दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः ।
पितापुत्रौ स्म तौ विद्धि तयोस्तु ब्राह्मणः पिता ॥

शिष्य प्रत्याचार्यस्याऽयमुपदेशः । स्मशब्दः श्लोकपूरणो निपातः । ब्राह्मणः क्षत्रिय इत्युपलक्षणमुत्तमाधमवर्णानाम् । विद्धि जानीहि । (२)शिष्टं स्पष्टम् ॥२२ ॥

कुशलमवरवयसं वयस्यं वा पृच्छेत् ॥ २३ ॥

ब्राह्मणविषयमिदम् । (३)क्षत्रियादिषु विशेषस्य वक्ष्यमाणत्वात् । वयसा तुल्यो वयस्यः । अवरवयस वयस्य वा ब्राह्मणं पथ्यादिषु सङ्गतं कुशलं पृच्छेत्–'अपि कुशल'मिति ॥ २३ ॥

अनामयं क्षत्रियम् ॥ २४ ॥

पृच्छेत् 'अप्यनामयं भवत' इति । आमयो रोग' तदभावोऽनामयम् ॥

अनष्टं वैश्यम् ॥ २५ ॥

'अप्यनष्टपशुधनोऽसी'ति ॥ २५ ॥

आरोग्यं शूद्रम् ॥ २६ ॥

शूद्रमारोग्य पृच्छेत्–'अप्यरोगो भवा'निति ॥ २६ ॥

नाऽसम्भाष्य श्रोत्रियं व्यतिव्रजेत् ॥ २७ ॥

श्रोत्रियं पथि सङ्गतमसम्भाष्य न व्यतिव्रजेत् न व्यतिक्रामेत् ॥ २७ ॥

---

१. असाधारणेन 'देवदत्तोऽहमभिवादये' इति क पुस्तके नास्ति ।
२. 'स्पष्टमन्य'दिति क. ख. च. पु. ३ इतरेषु इति क. पु.

अरण्ये च स्त्रियम् ॥ २८ ॥

अरण्यग्रहणं (१)सभयस्य देशस्योपलक्षणम् । तत्र स्त्रियमेकाकिनीं दृष्ट्वा असम्भाष्य न व्यतिव्रजेत् । सम्भाषणं च मातृवद्भगिनीवच्च–'भगिनि किं ते करवाणि न मेतव्यम्' इति ॥ २८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ चतुर्दशी कण्डिका ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां प्रथमप्रश्ने चतुर्थः पटलः ॥ ४ ॥

१ सहायरहितस्य' इति पाठान्तरम् । इति ख पुस्तकटिप्पण्याम् ।

अथ पञ्चमः पटलः ॥

सर्वेषामेव कर्मणां शेषभूतमाचमनं विधास्यंस्तदुपयोगिनो विधीनाह—

उपासने गुरूणां वृद्धानामातिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् ॥ १ ॥

गुरूणामाचार्यादीनाम्, अन्येषां च वृद्धानां पूज्यानामतिथीनां च उपासने यदा तानुपास्ते तदा, होमे साङ्गे पित्र्यादन्यत्र, जप्यकर्मणि जपक्रियायां भोजनाचमनयोश्च, स्वाध्यायाध्ययने च, यज्ञोपवीती स्यात् यज्ञोपवीती भवेत्। वासोविन्यासविशेषो यज्ञोपवीतम्(१) 'दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतम्, इति ब्राह्मणम्। वाससोऽसम्भवेऽनुकल्पं वक्ष्यति 'अपि वा सूत्रमेवोपवीतार्थं' (२-४-२२) इति। मनुरप्याह—

(२)'कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। इति ॥

(३)'उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः ॥' इति च।

एषु कर्मसु यज्ञोपवीतविधानात्कालान्तरे नावश्यम्भावः ॥ १ ॥

भूमिगतास्वप्स्वाचम्य प्रयतो भवति ॥ २ ॥

(४)आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत्।

अव्याप्ताश्चेद्रमेध्येन गन्धवर्णरसान्विताः(५) ॥ इति मनुः।

'शुचि गोनृत्तिकृच्चोर्व्यं प्रकृतिस्थं महीगतम्' इति। याज्ञवल्क्य.

(६) अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका।

दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकम् ॥' (७)इति।

---

१. तै. आ. २. १. २. म स्मृ. २. ४४.

३. म. स्मृ २ ६३. 'द्विजः' इति ख. च. पुस्तकयोः मुद्रितमनुस्मृतिपुस्तके च।

४. यज्ञोपवीतविधानात् इति. ख. पु. ५. म. स्मृ ५. १२७. या. स्मृ. १.१९२

६ अयं श्लोको मुद्रितमनुस्मृतिपुस्तकेषु नोपलभ्यते। ७. 'मनुः' इति क. पु.

श्रावणे मासि सम्प्राप्ते सर्वा नद्या रजस्वलाः(१) ।'

इति स्मृत्यन्तरम् । एवंभूतदोषरहितास्वप्स्वाचम्य प्रयतो भवति । प्रायत्यार्थमाचमनं भूमिगतास्वप्सु कर्तव्यमिति ॥ २ ॥

यं वा प्रयत आचमयेत् ॥ ३ ॥

यं वा प्रयतोऽन्य आचमयेत् सोऽपि प्रयतो भवति । सर्वथा स्वयं वामहस्तावर्जिताभिरद्भिराचमनं न भवति । एतेन शास्त्रान्तरोक्तं कमण्डलुधारणमप्याचार्यस्याऽनभिमतं लक्ष्यते । अलाबुपात्रेण नालिकेरपात्रेण वा स्वयमाचमनमाचरन्ति शिष्टाः ॥ ३ ॥

न वर्षधारास्वाचामेत् ॥ ४ ॥

पूर्वोक्तेन प्रकारेण प्रायत्यार्थस्याचमनस्य वर्षधारासु प्रसङ्गाभावात् पिपासितस्य पानप्रतिषेधार्थमिति केचित् । अपर आह-अस्मादेव प्रतिषेधाच्छिलयादिस्थकरकादेर्या धारा तत्र प्रायत्यार्थमाचमन(२) भवतीति ॥ ४ ॥

तथा(३) प्रदरोदके ॥ ५ ॥

भूमेः स्वयं दीर्णः प्रदेशः प्रदर तत्र यदुदकं तस्मिन् भूमिगतेऽपि नाऽऽचामेत् ॥ ५ ॥

तप्ताभिश्चाऽकारणात् ॥ ६ ॥

तप्ताभिरद्भिर्नाचामेत् अकारणात् ज्वरादौ कारणे सति न दोषः । 'तप्ताभि' रिति वचनात् शृतशीताभिरदोषः । तथा चोष्णानामेव प्रतिषेधः स्मृतिषु (४)प्रायो भवति ॥ ६ ॥

रिक्तपाणिर्वयस उद्यम्याऽप उपस्पृशेत् ॥ ७ ॥

वय इति पक्षिनाम । यो रिक्तपाणिस्सन् वयसे पक्षिण इयम्य तस्य प्रोत्सारणाय पाणिमुद्यच्छते स तत्कृत्वाऽप उपस्पृशेत् तेनैव पाणिना । 'रिक्तपाणि' रिति वचनात् काष्ठलोष्टादिसहितस्य पाणेरुद्यमने न दोषः । केचिदुपस्पर्शनमाचमनमाहुः ॥ ७ ॥

---

१. एतदनन्तर 'त्रिदिनं च चतुर्थेऽह्नि शुद्धास्स्युर्जाह्नवी यथा' इत्यर्धमाधिक दृश्यते ग. पु. स्मृत्यन्तरं' इति च नास्ति २. न भवत्येव इति ख. ग. पु

३. तस्मात् प्रदरादुदकं नाचामेत्' इति तैत्तिरीयब्राह्मणम् ।

४ प्रायशः इति. ख. पु. स्मृतिषु । इत्यन्तमेव च पुस्तके ।

शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ॥ ८ ॥

शक्तौ सत्यां मुहूर्तमप्यप्रयतो न स्यात् । आचमनयोग्यजलं दृष्ट्वैव मूत्र पुरीषादिकं कुर्यात् यदि तावन्तं कालं(१) वेगं धारयितुं शक्नुयात् इति ॥ ८ ॥

नग्नो वा ॥ ९ ॥

न मुहूर्तमपि स्यादिति सम्बध्यते, शक्तिविषय इति च । व्रणादिना कौपीनाच्छादनाशक्तौ न दोषः ॥ ९ ॥

नाप्सु सतः प्रयमणं विद्यते ॥ १० ॥

येन प्रयतो भवति तत्प्रयमणमाचमनम् । करणे ल्युट् । तदप्सु सतो वर्तमानस्य न भवति । जलमध्ये आसीनोऽपि नाचामेत् ॥ १० ॥

उत्तीर्य त्वाचामेत् ॥ ११ ॥

तीर उत्तीर्याचामेत् न जल इति । अयमर्थो न विधेयः । पूर्वेण गतत्वात् । तस्मादयमर्थः—यदा नदीमुत्तरति नावा प्रकारान्तरेण वा तदा तामुत्तीर्य तीरान्तरं गतः प्रयतोऽप्याचामेत् । नद्यादेरुत्तरणमाचमनस्य निमित्तमिति । (२)तुरप्यर्थः ॥ ११ ॥

नाऽप्रोक्षितमिन्धनमग्नावादध्यात् ॥ १२ ॥

श्रौते स्मार्ते लौकिके वाऽग्नौ अप्रोक्षितमिन्धनं नाऽऽदध्यात् न प्रक्षिपेत् । केचिल्लौकिके नेच्छन्ति ॥ १ ॥

मूढस्वस्तरे चासंस्पृशन्नन्यानप्रयतान्प्रयतो मन्येत।१३।

(३)पतितचण्डालसूतिकादेकपाशवस्पृष्टितत्स्पृष्टशुपस्पर्शने सचेल' मिति गौतम । (४)तस्मिन्विषय इदमुच्यते आसनतया शयनतया वा सुष्ठ्वास्तीर्णः पलालादिसङ्घातः स्वस्तर । पृषोदरादिषु दर्शनाद्रूपसिद्धिः । यत्रातिश्लक्ष्णतया पलालादेर्मूलाग्रविभागो न ज्ञायते स मूढः । मूढश्चासौ स्वस्तरश्च मूढस्वस्तर तस्मिन् पतितादिष्वप्रयतेष्वासीनेषु यः काश्चित्प्रयत उपविशेत् न च तान् संस्पृशेत् । तदा स

---

१ तावन्तं कालं इति नास्ति क पु २ तुशब्दोऽप्यर्थे इति. क. पु

३ गौ घ. १४ ३०. उदक्या रजस्वला

४ तत्रेदमुच्यते इति ग. पु. पाठस्समीचीनः ।

प्रयतो मन्येत । यथा प्रयतमात्मानं मन्यते प्रयतोऽस्मीति तथैव मन्येत । नैवंविधे विषये तत्स्पृष्टिन्यायः प्रवर्तते इति ॥ १३ ॥

तथा तृणकाष्ठेषु निखातेषु ॥ १४ ॥

तृणकाष्ठेष्वपि भूमौ निखातेषु तत्स्पृष्टिन्यायो न भवति ॥१४॥

प्रोक्ष्य वास उपयोजयेत् ॥ १५ ॥

शुद्धमपि वास प्रोक्ष्यैवोपयोजयेत् वसीत । अपर आह-अशुद्धस्यापि वाससः प्रोक्षणमेव शुद्धिहेतुरिति ॥ १५ ॥

शुनोपहतः सचेलोऽवगाहेत ॥ १६ ॥

शुना उपहतः स्पृष्टः । यद्यपि चेलं न शुना स्पृष्टं तथापि सचेलोऽवगाहेत भूमिगतास्वप्सु स्नायात् नोल्लुतादिभिः । दष्टस्य तु स्मृत्यन्तरे प्रायश्चित्तम् । तत्र वसिष्ठः(१)

ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति॥'

अङ्गिराः—

(२)'ब्रह्मचारी शुना दष्टस्त्रिरात्रेणैव शुद्ध्यति ।
गृहस्थस्तु द्विरात्रेण ह्येकाहेनाऽग्निहोत्रवान् ॥
नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
तदेव त्रिगुणं वक्त्रे मूर्ध्नि चैतस्याच्चतुर्गुणम् ॥
क्षत्रविट्शूद्रयोनिस्तु स्नानेनैव शुचिर्भवेत् ।
द्विगुणं तु वनस्थस्य तथा प्रव्रजितस्य च ॥
ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
यदा न दृश्यते सोमः प्रायश्चित्तं तदा कथम् ।
यां दिशं तु गतस्सोमस्तां दिशं त्ववलोकयेत् ॥
सोममार्गेण सा पूता पञ्चगव्येन शुद्ध्यति ॥' इति ॥ १६ ॥

प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥ १८ ॥

---

१. वचनमिदं न वसिष्ठस्मृतावुपलभ्यते ।

२. वचनानीमानि स्मृतिमुक्ताफलकारैरपि प्रायश्चित्तकाण्डे अङ्गिरोवचनत्वेनैवोपन्यस्तानि । परन्तु इदानमुपलभ्यमानमुद्रिताङ्गिर स्मृतिपुस्तके नोपलभ्यन्ते ॥ वासिष्ठत्वेन तु लिखितं ख. च. पुस्तकयोष्टिप्पण्याम् ।

शुना स्पृष्टं प्रदेश प्रक्षाल्याग्निना च संस्पृश्य पुनश्च प्रक्षाल्य पादौ च प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । व्यवस्थितविकल्पोऽयम् ॥

(१)ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानविधिः प्रोक्तो ह्यधः प्रक्षालनं स्मृतम् ॥'

इति मानवे दर्शनात् ॥ १७ ॥

अग्निं नाप्रयत आसीदेत् ॥ १८ ॥

अप्रयतस्सन्नग्निं नासीदेत् अग्नेरासन्नो न भवेत्, यावति देशे ऊष्मोपलम्भः । तत्राप्यशक्तौ न दोषः ॥ १८ ॥

इषुमात्रादित्येके ॥ १९ ॥

इषुमात्रादर्वाङ्नासीदेत् । ऊष्मोपलम्भो भवतु वा मा भूदित्येके मन्यन्ते ॥ १९ ॥

न चैनमुपधमेत् ॥ २० ॥

अप्रयत इत्येव । एनमग्निमप्रयतो नोपधमेत् । प्रयतस्य न दोषः ।

'मुखेनोपधमेदग्निं मुखाद्ध्यग्निरजायत ।'

इति स्मृत्यन्तरे दर्शनात् ।

(२) नाग्निं मुखेनोपधमेत्' इति मानवे दर्शनादुभयोर्विकल्पः । अपर आह—वाजसनेये श्रौतप्रकरणे 'मुखाद्ध्यग्निरजायत । तस्मान्मुखेनोपसमिन्ध्या' इति दर्शनात श्रौतेषु मुखेनोपसमिन्धनम्, अन्यत्र स्मार्ते प्रतिषेध इति ।

अन्ये तु वैणवेनायसेन वा सुषिरेणोपसमिन्धनमिच्छन्ति । एवं हि मुखव्यापारस्यान्वयाच्छ्रुतिरप्यनुगृहीता भवति, आस्यबिन्दूनां पतनशङ्काभयात् प्रतिषेधस्मृतिरपीति ॥ २० ॥

खट्वायां च नोपदध्यात् ॥ २२ ॥

खट्वाया खट्वाया अधोऽग्निं नोपदध्यात् । अत्राप्यशक्तौ न दोषः ॥२१॥

प्रभूतैधोदके ग्रामे यत्राऽऽत्माधीनं प्रयमणं तत्र वासो धार्म्यो ब्राह्मणस्य ॥ २१ ॥

---

१ म. स्मृ मुद्रितमनुस्मृतिपुस्तकेषु नाय श्लोक उपलभ्यते ।

२. म. स्मृ ४ ५३.

प्रभूत एधः उदकं च यस्मिन् ग्रामे तत्र वासो धार्म्यः धर्म्यः । अत्रापि न सर्वत्र । किं तर्हि ? यत्रात्माधीन प्रयमण प्रायत्यं मूत्रपुरीषप्रक्षालनादीनि यत्रात्माधीनानि तत्र । यत्र तु कूपेष्वेवोदकं तत्र बहुकूपेऽपि न वस्तव्यम् । ब्राह्मणग्रहणाद्वर्णान्तरस्य न दोषः । ग्रामग्रहणादेवंभूतेषु घोषादिष्वपि न वस्तव्यम् ॥ २२ ॥

मूत्रं कृत्वा पुरीषं वा मूत्रपुरीषलेपानन्नलेपानुच्छिष्टलेपान् रेतसश्च ये लेपास्तान्प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥ २३ ॥

मूत्रं पुरीष वा कृत्वा उत्सृज्य तयोर्मूत्रपुरीषयोर्ये लेपास्तस्मिन्प्रदेशे स्थिताः प्रदेशान्तरे वा पतिताः तान् सर्वान् । (१)अन्नलेपांश्चानुच्छिष्टानपि उच्छिष्टलेपांश्चानन्नलेपानपि । तथा रेतसश्च ये लेपाः स्वप्नादौ मैथुने वा तान् सर्वानद्भिर्मृदा च प्रक्षाल्य पादौ च लेपवर्जितावपि प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । अत्र मृत्प्रमाणस्य सङ्ख्यायाश्चानुक्तत्वात् यावता गन्धलेपक्षयो भवति तावदेव विवक्षितम् । तथा च याज्ञवल्क्यः—

(२)गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ।' इति ।

देवलस्तु व्यक्तमाह—

(३)'यावत्स शुद्धिं मन्येत तावच्छौचं समाचरेत् ।
प्रमाणं शौचसङ्ख्याया न शिष्टैरुपदिश्यते ॥' इति ।

पैठीनसि —

'मूत्रोच्चारे कृते शौचं न स्यादन्तर्जलाशये ।
अन्यत्रोद्धृत्य कुर्यात्तु सर्वदैव समाहितः ।' इति ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ पञ्चदशी कण्डिका ॥

---

१. अन्नले पानुच्छिष्टानप्युच्छिष्टलेपानन्नलेपानपि. इति ख, पुस्तकेऽपपाठः ।

२. या. स्मृ. १. १७. ३ मुद्रितदेवलस्मृताविद वचन नोपलभ्यते ।

तिष्ठन्नाऽऽचामेत् प्रह्वो वा ॥ १ ॥

तिष्ठन् प्रह्वो वा नाचामेत् । नायं प्रतिषेधः शक्यो वक्तुम् । कथम् ? 'आसीनस्त्रिराचामे' (१६ २.) इति वक्ष्यति । ततश्च यथा शयानस्याचमन न भवति तथा तिष्ठतः प्रह्वस्य च न भवति । एवं तर्हि शौचार्थस्याचमनस्य नायं प्रतिषेधः । किं तर्हि ? पानीयपानस्य प्रतिषेधः । तथा गौतमः–(१)'नाञ्जलिना जलं पिबेत् । न तिष्ठ' न्निति । अपर आह–अस्मादेव प्रतिषेधात्क्वचित्तिष्ठतः प्रह्वस्य चाऽऽचमनमभ्यनुज्ञातं भवति । तेन 'भूमिगतास्वप्सिव' त्यत्र तीरस्याऽयोग्यत्वे ऊरुदघ्ने (२)जानुदघ्ने वा जले स्थितस्याऽऽचमन भवति । गौतमीयेऽपि(३) न तिष्ठन्नुद्धृतोदकेनाचामे' दिति सूत्रच्छेदादुद्धृतोदकेनैव तिष्ठतः प्रतिषेध इति ॥ १ ॥

अथाऽऽचमनविधिः—

आसीनस्त्रिराचामेदुद्धृतयङ्गमाभिरद्भिः ॥ २ ॥

अद्भिः तृतीया द्वितीयार्थे । अत्राऽनुक्तं स्मृत्यन्तरवशा(४)दुपस्क्रियते । आसीनः शुचौ देशे, नासने, भोजनान्ते त्वासने । दक्षिणं बाहु(५) जान्वन्तरे कृत्वा प्राङ्मुख उपविष्टः उदङ्मुखो वा हृदयङ्गमा(६) अपः करतलस्थासु यावतीषु माषो निमज्जति तावती. फेनबुद्बुदरहिताः वीक्षिताः त्रिराचामेत् पिबेत्, ब्राह्मणः हृदयङ्गमाः, क्षत्रियः कण्ठगताः, वैश्यस्तालुगताः, शूद्रो जिह्वास्पृष्टास्सकृत् ॥ २ ॥

(७)त्रिरोष्ठौ परिमृजेत् ॥ ३ ॥

परिमृज्यात् ॥ ३ ॥

द्विरित्येके ॥ ४ ॥

तुल्यविकल्पः ॥ ४ ॥

सकृदुपस्पृशेत् ॥ ५ ॥

मध्यमाभिस्तिसृभिरङ्गुलीभिरोष्ठौ ॥ ५ ॥

---

१. गौ ध. ९ ९, १०. २. नाभिदघ्ने, इति च. पु

३ गौ. ९. १० गौतमोऽपि न तिष्ठन्नुद्धृतोदकेनाचामेत् इति सूत्रभेदादुद्धृतोदकेनैव तिष्ठतः प्रतिषेधमाह" इति क. पु.

४. 'उपस्तूयते' इति ग. पु. ५. ऊर्वन्तरे इति. ख ग. पु.

६. आपः इति. ख. ग. पु. ७. इदमग्रिम च सूत्रमेकीकृतं. ग. पुस्तके.

द्विरित्येके ॥ ६ ॥

तुल्यविकल्पः ॥ ६ ॥

दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेत् चक्षुषी नासिके श्रोत्रे च ॥७॥

दक्षिणेन पाणिना सव्यं पाणिं प्रोक्ष्य तथा पादौ शिरश्च, इन्द्रियाण्युपस्पृशेत् अङ्गुलीभिः । सर्वेषामिन्द्रियाणां प्रसङ्गे परिसङ्ख्येष्ट—चक्षुषी नासिके श्रोत्रे चेति । इन्द्रियाणीति वचनं स्वरूपकथनमात्रम् । तत्राऽङ्गुष्ठानामिकाभ्यां चक्षुषी । केचिद्युगपत्, केचित्पृथक् । अङ्गुष्ठप्रदेशिनीभ्यां नासिके । अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रे । (१)अत्र सहभावस्याऽशक्यत्वात् पृथग्भावस्य निश्चितत्वात् पूर्वत्रापि पृथगेवेति युक्तम् ॥ ७ ॥

अथाऽप उपस्पृशेत् ॥ ८ ॥

इन्द्रियस्पर्शनानन्तरं हस्तौ प्रक्षालयेत् ॥ ८ ॥

भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः परिमृजेत्सकृदुपस्पृशेत् ॥ ९ ॥

भोजनं करिष्यन् प्रयतोऽपि द्विराचमनं कुर्यात् । अत्र विशेषः—द्विः परिमृजेत्, न विकल्पेन त्रिः । सकृदुपस्पृशेत्, न विकल्पेन द्विः । 'प्रयतोऽपी'ति वचनादप्रायत्ये सर्वत्र द्विराचमनमाचार्यस्याऽभिप्रेतम् ।

तत्र स्मृत्यन्तरम्—

'भुक्त्वा क्षुत्वा च सुप्त्वा च छर्दित्वोक्त्वाऽनृतं वचः ।
आचान्तः पुनराचामेद्वासो विपरिधाय च' ॥ ९ ॥

श्यावान्तपर्यन्तावोष्ठावुपस्पृश्याऽऽचामेत् ॥ १० ॥

दन्तमूलात्प्रभृत्योष्ठौ । तत्राऽलोमकः प्रदेशः श्यावः । तस्यान्तः सलोमकः । तत्पर्यन्तावोष्ठावुपस्पृश्याऽऽचामेत् । ओष्ठयोरलोमकप्रदेशमङ्गुल्या(२) काष्ठादिना वोपस्पृश्याऽऽचामेदिति ॥ १० ॥

---

१. अत्र सहभावस्याशक्यत्वात् पृथगपीक्ष्यते । अत्र पृथक्भावस्य निश्चितत्वात् पूर्वत्रापि पृथगेवेति युक्तम् इति ख. च. पु. । युक्तमित्यन्ये' इति. क पु.

२. अङ्गुल्याऽऽत्मकनिष्ठादिना वेति क. पुस्तकेऽपपाठः ।

**न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सङ्घि-
र्यावन्न हस्तेनोपस्पृशति ॥ ११ ॥**

श्मश्रूणि यदा आस्यस्यान्तर्भवन्ति तदा तैरन्तरास्ये सङ्घिरुच्छिष्टो न भवति यावन्न हस्तेनोपस्पृशति । (१)उपस्पर्शने तूच्छिष्टो भवति । ततश्चाऽऽचामेदिति । अस्मादेव प्रतिषेधात् ज्ञायते—यत्किञ्चिदपि द्रव्य-मन्तरास्ये (२)सदुच्छिष्टताया निमित्तमिति ॥ ११ ॥

**य आस्याद्बिन्दवः पतन्त उपलभ्यन्ते
तेष्वाचमनं विहितम् ॥ १२ ॥**

भाषमाणस्याऽऽस्यात् पतन्तो ये लालाबिन्दव उपलभ्यन्ते चक्षुषा स्प-र्शनाद्वा उपलब्धुं योग्यास्तेष्वाचमनं विहितम् । वेदोच्चारणे तु गौतमः—(३)'मन्त्रब्राह्मणमुच्चारयतो ये बिन्दवः शरीर उपलभ्यन्ते न तेष्वा-चमन'मिति ॥ १२ ॥

ये भूमौ न तेष्वाचामेदित्येके ॥ १३ ॥

ये बिन्दवो भूमौ पतन्ति, न शरीरे, तेषु नाचामेदित्येके मन्यन्ते । स्वमत तु तेष्वप्याचामेदिति ॥ १३ ॥

**स्वप्ने क्षवधौ (४)शिङ्घाणिकाइन्वालम्भे लोहितस्य
केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं च
गत्वाऽमेध्यं चोपस्पृश्याऽप्रयतं च मनुष्यं नीवीं च परि-
धायाप उपस्पृशेत् ॥ १४ ॥**

स्वप्नः (५)स्वापः । क्षवधु- श्रुतम्, तयोः कृतयोः। शिङ्घाणिका नासिकाम-लम् । अश्रु नेत्रजलम्, तयोरालम्भे स्पर्शे । लोहितस्य रुधिरस्य । केशाना शि-रोगतानां भ्रूमिगताना च । अग्न्यादीनां चतुर्णामालम्भे । महापथं च गत्वा । अमेध्य च गोव्यतिरिक्तानां मूत्रपुरीषादि । ताम्बूलनिषेकादि चोपस्पृश्य । अप्रयतं च मनुष्यमुपस्पृश्य । नीवी प्रसिद्धा तद्योगादधोवासो लक्ष्यते । तच्च परिधायाप उपस्पृशेत्। केषुचित् स्नानं केषुचिदाचमनं केषुचित् स्पर्शनमात्र यावता प्रयतो मन्यते ॥ १४ ॥

---

१. स्पर्शने इति क. पु. २. सत् तदुच्छिष्टताया निमित्तमिति क. पु.

३. नास्ति वचनमिद मुद्रितगौतमधर्मकोशेषु मदीये लिखितपुस्तके च ।

४. शृङ्घाणिका शृङ्घणिका शृङ्गाणिका इत्यपि पाठाः । ५. स्वापन इति ख. पु.

आर्द्रं वा शकृदोषधीर्भूमिं वा ॥ १५ ॥

(१)उपस्पृशेदित्येव । त्रिष्वार्द्रशब्दस्सम्बध्यते लिङ्गवचनादिविपरिणामेन । आर्द्रं वा शकृदुपस्पृशेत् ओषधीर्वा आर्द्रा, भूमिं वा आर्द्राम् । पूर्वोक्तेष्वेव (२)कल्पेषु वैकल्पिकमिदम् ॥ १५ ॥

एवमाचमनं (३)सह निमित्तैरुक्तम् । अथाऽभक्ष्याधिकारः—

हिंसार्थेनाऽसिना मांसं छिन्नमभोज्यम् ॥१६॥

असिग्रहणं क्षुरादेरुपलक्षणम् । यन्मांसं पाककाले हिंसार्थेनाऽसिना छिन्नं तदभोज्यम् ॥ १६ ॥

दद्भिरपूपस्य नाऽपच्छिन्द्यात् ॥ १७ ॥

अपूपग्रहणं मूलफलादेरप्युपलक्षणम् । द्वितीयार्थे षष्ठी । दन्तैरपूपं नापच्छिन्द्यात् । किं तु हस्तादिभिरपच्छिद्य भक्षयेत् ॥ १७ ॥

यस्य कुले म्रियेत न तत्राऽनिर्दशे भोक्तव्यम् ॥ १८ ॥

यस्य कुले कश्चिन्म्रियते असपिण्डतायां सत्यां (४)तत्राऽनिर्गते दशाहे न भोक्तव्यम् । 'अनिर्दशे' इत्याशौचकालस्योपलक्षणम् । तेन क्षत्रियादिष्वधिकं पक्षिण्यादिषु न्यूनम् ॥ १८ ॥

तथाऽनुत्थितायां सूतकायाम् ॥ १९ ॥

सूतका सूतिका । तस्यामनुत्थितायाम् । उत्थानं नाम सूतिकागारे निवेशितानामुदकुम्भादीनामपनयनम् । तच्च दशमेऽहनि भवति । (५)'दशम्यामुत्थितायां'मिति गृह्ये उक्तत्वात् । अत्राप्याशौचकालोपलक्षणत्वाद्यावदाशौचमभोजनम् ।

अत्राऽङ्गिराः—

'ब्रह्मक्षत्रविशां भुक्त्वा न दोषस्त्वग्निहोत्रिणाम् ।
सूतके शव आशौच त्वस्थिसञ्चयनात्परम् ॥ इति ॥ १९ ॥

अन्तःशवे च ॥ २० ॥

---

१. उपस्पृशेदिति विपरिणामेनेत्यन्तो भाग क. पुस्तके नास्ति ।
२. 'सर्वेषु' इति ख च. पु । स्वल्पेषु इति ग. पु. । ३. 'सनिमित्त'मिति ख. पु.
४. 'तत्रातीते दशाहे भोक्तव्यम्' इति ग पु. ५. आप. गृ. १५ ८

याव(१)द्ग्रामान्न निर्हियते शवः तावत्तत्र न भोक्तव्यम् । आचारस्तु धनुश्शतादर्वाक् । तत्रापि प्रदीपमारोप्य उदकुम्भं चोपनिधाय भुञ्जते यदि (२)समानवंशं गृहं न भवति ॥ २० ॥

अप्रयतोपहृतमन्नमप्रयतं न त्वभोज्यम् ॥ २१ ॥

अप्रयतेनाऽशुचिना उपहृतं स्पृष्टमप्रयतं भवति । किंतु अशुद्धमप्यभोज्यं न भवति । कः पुनरप्रयतस्याऽभोज्यस्य च विशेषः ? उच्यते—अप्रयत मन्नमन्नावधिश्रितमद्भिः प्रोक्षितं भस्मना मृदा वा संस्पृष्ट वाचा च प्रशस्तं प्रयतं भवति भोज्यं च । अभोज्यं तु लशुनादि न कथञ्चि दपीति ॥ २१ ॥

अप्रयतेन तु शूद्रेणोपहृतमभोज्यम् ॥ २२ ॥

अप्रयतेन तु शूद्रेणोपहृतमानीतमन्नं न भोज्यम् , स्पृष्टमस्पृष्टं च । स्पृष्टमे वेत्यन्ये ॥ २२ ॥

यस्मिंश्चाऽऽऽन्ने केशास्स्यात् ॥ २३ ॥

तदप्यभोज्यम् । एतच्च पाकदशायामेव पतितेन केशेन सह यत्प· क्कमन्नं तद्विषयम् । (३)पश्चात् केशसंसर्गे तु घृतप्रक्षेपादिना संस्कृतस्य भोज्यत्वं स्मृत्यन्तरोक्तम् ॥ २३ ॥

अन्यद्वाऽमेध्यम् ॥ २४ ॥

अन्यद्वाऽमेध्य नखादि यस्मिन्नन्ने स्यात् तदप्यभोज्यम् । इदमपि पूर्ववत् ।

अत्र बौधायन·—

(४)'केशकीटनखरोमास्थिपुरीषाणि दृष्ट्वा तावन्मात्रमन्नमुद्धृत्य शेषं भोज्य'मिति । वसिष्ठस्तु (५)'कामं तु केशकीटानुत्सृज्याद्भि' प्रोक्ष्य भस्मनाऽथकीर्यं वाचा प्रशस्तमुपयुञ्जीते'ति ॥ २४ ॥

अमेध्यैरवमृष्टम् ॥ २५ ॥

---

१ ग्रामान्तं न इति क. पु.

२. समानवंशत्वं गृह्णाणा इति ख. पु. । समानं वंशगृहं न भवति इति क. पुस्तकेऽपपाठः ।

३. भोजनकाले तु केशपाते घृतप्रक्षेपादिना तु संस्कृतं भोज्यम् । इति. घ. पु.

४ बौ ध. २. १२. ६ ५ वा. ध १४ २३ उपभुञ्जीत इति ग. पु.

अमेध्यैः कलञ्जपलण्डुवाादिभिरवमृष्टं स्पृष्टमभोज्यम् ॥ २५ ॥

कीटो वाऽमेध्यसेवी ॥ २६ ॥

'यस्मिञ्श्वान्ने केशः स्या'दिति व्यवहितमपि सम्बध्यते । अमेध्यसेवी कीटः पूत्यण्डाख्यः ॥ २६ ॥

मूषिकलाङ्गं वा ॥ २७ ॥

पूर्ववत्सम्बन्धः । मूषिकला मूषिकपूरीषम् । अङ्ग वा । समस्तमपि मूषिकग्रहण सम्बध्यते । यस्मिन्नन्ने मूषिकस्याङ्गं पुच्छपादादि भवति तदप्यभोज्यम् ॥ २७ ॥

पदा वोपहतम् ॥ २८ ॥

प्रयतेनाऽपि पदा यत्स्पृष्टं तदप्यभोज्यम् ॥ २८ ॥

सिचा वा ॥ २९ ॥

सिक् वस्त्रदशा । परिहितस्य वाससः सिचा यत् स्पृष्टं तदप्यभोज्यम् ॥ २९ ॥

शुना वाऽपपात्रेण वा दृष्टम् ॥ ३० ॥

दृष्टमिति प्रत्येकमभिसम्बध्यते । शुना वा दृष्टमपपात्रेण वा दृष्टं यत्तदप्यभोज्यम् । पतितसूतिकाचण्डालोदक्यादयोऽपपात्राः, अपगताः पात्रेभ्यः । न हि ते पात्रे भोक्तुं लभन्ते ॥ ३० ॥

सिचा वोपहृतम् ॥ ३१ ॥

अपरिहितस्य शुद्धस्यापि वाससस्सिचा यदुपहृतमानीतं तदप्यभोज्यम् ॥ ३१ ॥

दास्या वा नक्तमाहृतम् ॥ ३२ ॥

दास्या रात्रावाहृतमभोज्यम् । स्त्रीलिङ्गनिर्देशात् दासेनाऽऽहृते न दोषः । अन्ये लिङ्गमविवक्षित मन्यन्ते । 'नक्त'मिति वचनाद्दित्वा न दोषः ॥ ३२ ॥

भुञ्जानं वा ॥ ३३ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ षोडशी कण्डिका ॥

यत्र शूद्र उपस्पृशेत् ॥ १ ॥

भोजनदशायां यदा शूद्र उपस्पृशेत् तदापि न भुञ्जीत । अत्र भुञ्जान-ग्रहणादन्यदा शूद्रस्पर्शे नाऽप्रायत्यमिति केचित् । अन्ये तु—सदा भवत्येवाऽप्रायत्यम् , भोजनदशायां त्वाधिक्यप्रतिपादनाय निषेध इति॥१॥

अनर्हद्भिर्वा समानपङ्क्तौ ॥ २ ॥

सर्वत्र वाशब्दः समुच्चये । अभिजनविद्यावृत्तरहिता अनर्हन्तः । तैस्सह समानायां पङ्क्तौ न भुञ्जीत ॥ २ ॥

भुञ्जानेषु वा यत्राऽनूत्थायोच्छिष्टं प्रयच्छेदाचामेद्वा ॥ ३ ॥

समानपङ्क्ताविति वर्तते । समानपङ्क्तौ बहुषु भुञ्जानेषु यत्रैको ऽनूत्थाय भोजनाद्विरम्य उच्छिष्टं शिष्यादिभ्यः प्रयच्छेत् आचामेद्वा, तस्यां पङ्क्तावितरेषां न भोक्तव्यम् । अतो बहुषु भुञ्जानेषु(१) एको मध्ये न विरमेत् । भोजनकण्टक इति हि तमाचक्षते ॥ ३ ॥

कुत्सयित्वा वा यत्राऽन्नं दद्युः ॥४॥

मूर्ख, वैद्यवेय, विषं भुङ्क्ष्वेति, एवं कुत्सयित्वा यत्रान्नं दद्युस्तदप्यभोज्यम् ॥ ४ ॥

मनुष्यैरवघ्रातमन्यैर्वाऽमेध्यैः ॥ ५ ॥

मनुष्यैरन्यैर्वा मार्जारादिभिरमेध्यैरवघ्रातमन्नमभोज्यम् । (२)अवेत्युपसर्ग-योगात् दूरस्थैर्गन्धाघ्राणे न दोषः ॥ ५ ॥

न नावि भुञ्जीत ॥ ६ ॥

नाव्यासीनो न भुञ्जीत, शुद्धेऽपि पात्रे ॥ ६ ॥

तथा प्रासादे ॥ ७ ॥

प्रासादो दारुमयो मञ्चः । तत्रापि न भुञ्जीत ॥ ७ ॥

कृतभूमौ तु भुञ्जीत ॥ ८ ॥

भूमावपि भुञ्जानः कृतायां गोमयादिना संस्कृतायां भुञ्जीत । (३)अपर आह—प्रासादोऽपि यदा मृदा कृतभूमिर्भवति, न केवलं दारुमयः, तदा तत्र भुञ्जीतैवेति ॥ ८ ॥

---

१. कोऽपि. इति. ग. पु. २ अवोपसर्गयोगात् इति क. पु.

३. इदं व्याख्यान्तर नास्ति. ग. पुस्तके ।

अनाप्रीते मृण्मये भोक्तव्यम् ॥ ९ ॥

यदि मृण्मये भुञ्जीत तदाऽनाप्रीते भोक्तव्यम्। आप्रीतं क्वचित्कार्ये पाकादावुपयुक्तम् ॥ ९ ।

आप्रीतं चेदभिदग्धे ॥ १० ॥

आप्रीतमेव चेल्लभ्यते, तदाऽग्निनाऽभितो दग्ध्वा तत्र भोक्तव्यम् ॥

परिमृष्टं लौहं प्रयतम् ॥ ११ ॥

लौह लोहविकारभूतं कांस्यादि भोजनपात्रं भस्मादिभिः परिमृष्टं सत् प्रयत भवति। तत्र भस्मना कांस्यम्। आम्लेन ताम्रम्। राजतं शङ्कुना। सौवर्णमद्भिरेवेत्यादि स्मृत्यन्तरवशाद्द्रष्टव्यम् ॥ ११ ॥

निर्लिखितं दारुमयम् ॥ १२ ॥

दारुमयं भाजनं निर्लिखितं तष्टं सत् प्रयतं भवति ॥ १२ ॥

यथागमं यज्ञे ॥ १३ ॥

यज्ञपात्रं तु यथागम शोधितं प्रयत भवति। तद्यथा अग्निहोत्रहवणी दर्भैराद्भिः प्रक्षालिता, सोमपात्राणि (१)मार्जालीये प्रक्षालितानि, आज्यपात्राण्युष्णेन वारिणा ॥ १३ ॥

नाऽऽपणीयमन्नमश्नीयात् ॥ १४ ॥

आपणः पण्यवीथी। तत्र यत्क्रीतं लब्ध वा । तदापणीयम्। तच्च कृतान्नं नाश्नीयात्। व्रीह्यादिषु न दोषः ॥ १४ ॥

तथा रसानामाममांसमधुलवणानीति परिहाप्य ॥१५॥

रसाः रसद्रव्याणि । तानप्यापणीयान्नाश्नीयात्। (२)आममांसादि वर्जयित्वा ॥ १५ ॥

तैलसर्पिषी तूपयोजयेदुदकेऽवधाय ॥ १६ ॥

तैलसर्पिषी त्वापणीये अप्युपयोजयेत्। उदकेऽवधाय निषिच्य पाकेन तैलसर्पिषी(३)शोधयित्वा । कार्यविरोधो यथा न भवति तथा उदकेन संसृज्येत्यन्ये(४) ॥ १६ ॥

---

१. मार्जालीय सोमयागे सदोनामकमण्डपस्याग्नेयकोण स्थितः स्थानाविशेषः।

२. आममांसादीनि परिहाप्य. इति ग पु. ३. शोषयित्वा इति ग. पु.

४ व्याचक्षते इत्यधिकं ख. ग. पु

कृतान्नं पर्युषितमखाद्यापेयानाद्यम् ॥ १७ ॥

कृतान्न पक्वान्नं तत्पर्युषितं पूर्वेद्यु पक्वं सत् अखाद्यम् । अपेयमनाद्यं च यथायोग खरविशदं द्रवं मृदुविशदं सिद्धं च ॥ १७ ॥

शुक्तं च ॥ १८ ॥

शुक्त यत्कालपाकनोऽम्लीभूत तदपर्युषितमपि अखाद्यापेयानाद्यम् ॥ १८ ॥

फाणितपृथुकतण्डुलकरम्ब(१) भरूजसक्तुशाकमांसपिष्टक्षीरविकारौषधिवनस्पतिमूलफलवर्जम् ॥ १९ ॥

अनन्तरोक्त विधिद्वयं फाणितादीन् वर्जयित्वा द्रष्टव्यम् । फाणितं पानविशेष । इक्षुरस इति केचित् । (२)भ्रष्टानां व्रीहीणां तण्डुलाः पृथूकृताः पृथुकाः । करम्बो दधिसक्तुसमाहारः य· करम्भ इति प्रसिद्धः । वेदेऽप्युभयं भवति(३) 'यत्करम्भैर्जुहोति' । (४)"धानाः करम्भः परिवाप" इति । भरूजाः भ्रष्टा यवाः । क्षीरविकारो दध्यादि । प्रसिद्धमन्यत् ॥ अथ 'शुक्तं चे'त्यस्य विधेः शेषः—

शुक्त चाऽपरयोगम् ॥ २० ॥

परेण द्रव्यान्तरेण योगो यस्य तत् परयोगं, ततोऽन्यदपरयोगम् । तदेव शुक्तं वर्ज्यम् । यत्तु दध्यादि द्रव्यान्तरसंसृष्टं शुक्तं तद्भोज्यमेव । एवं च पूर्वत्रैवाऽपरयोगमिति विशेषणं वक्तव्यम् । इदमेव वा सूत्रमस्तु । सूत्रद्वयकरणं त्वाचार्यप्रवृत्तिकृतम् । यथा 'सलाबूक्येकसूकोलूकशब्दा' (पृ. ५८) इति पूर्वं सामान्येनाऽभिधाय 'सलाबूक्यामेकसूक इति स्वप्नपर्यन्त'(पृ. ६५)मिति पश्चाद्विशेष उक्तः ॥ २० ॥

सर्वं मद्यमपेयम् ॥ २१ ॥

मद्य मदकरं तत्सर्वमपेयम् । अत्र स्मृत्यन्तरवशाद्व्यवस्था ।

तत्र मनुः—

(५)'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका न पातव्या(६) तथा सर्वा द्विजोत्तमैः ॥' इति ।

सुराव्यतिरिक्तं तु मद्यं ब्राह्मणस्य नित्यमपेयम् ।

---

१. 'भरुजे'ति ख. पु. भरिजेति क. पु. २ भर्जिताना इति. ख पु
३. तै. ब्रा ३ ८ १४. ४ तै. स. ६ ५ ११.
५. म. स्मृ. ११ ९४ ६ 'तथैवान्या' इति ग पु.

तथा च गौतमः—

(१)'मद्यं नित्यं ब्राह्मणस्य क्षत्रियवैश्ययोस्तु ब्रह्मचारिणो'रिति ॥२१॥

तथैलकं पयः ॥ २२ ॥

अवि एलका । तस्याः पयः क्षीरमपेयम् ॥ २२ ॥

उष्ट्रीक्षीरमृगीक्षीरसन्धिनीक्षीरयमसूक्षीराणीति ॥२३॥

उष्ट्रीमृग्यौ प्रसिद्धे । या गर्भिणी दुग्धे सा सन्धिनीति शास्त्रान्तरे प्रसिद्धा । एककालदोहेत्यन्ये । एकस्मिन् प्रसवे या अनेकं गर्भं सूते, सा यमसूः । उष्ट्र्यादीनां क्षीराण्यपेयानि । इतिकरणमेवं प्रकाराणामन्येषामेकशफादीनां क्षीरमपेयमिति ।

तथा च मनुः—

(२)'आरण्यानां च सर्वेषां मृगाणां महिषीं विना ।
स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥
अनिर्दशाया गोः क्षीरमौष्ट्रमेकशफ तथा ।
आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ॥ इति ॥२३॥

धेनोश्चाऽनिर्दशायाः ॥ २४ ॥

धेनुर्नवप्रसूता गौः । चकारादजामहिष्योश्च । (३)'अजा गावो महिष्यश्चे'ति मानवे दर्शनात् ॥ २४ ॥

तथा कीलालौषधीनां च ॥ २५ ॥

कीलालौषधयः सुरार्था ओषधयः । तासां च विकारभूतमन्नमनाद्यम्॥२५॥

(४)करञ्जपलण्डुपरारीकाः ॥ २६ ॥

(५)करञ्जं रक्तलशुनम् । पलण्डु श्वेतम् । परारीका कृष्णम् । (६)मण्डु-

---

१ गौ. ध. २. २० मद्य नित्यं ब्राह्मण', इत्येव सूत्रम् ॥ २ म. स्मृ. ५. ९, ८.

३ म. स्मृ. नाय श्लोको मानवे उपलभ्यते । प्रत्युत 'अनिर्दशाया गोः क्षीरे (५. ८) इति श्लोकव्याख्यानावसरे कुल्लूकभट्टेन "गोरिति पेयक्षीरोपलक्षणार्थम् । तेनाजामहिष्योरपि दशाहमध्ये प्रतिषेधः, इति लेखनात् 'अजा गावो महिष्यश्चे'त्यस्याऽमानवत्वमेवाऽनुमीयते । वस्तुतस्तु पाराशरीयं वचनमिदम् । (परा. स्मृ. ३. ७.) तत्रैव दर्शनात् ॥

४. कलञ्जपलाण्डुपरारीकाः इति क पु. परारिका इति. घ पु.

५. अनेनैव प्रमाणेन 'न कलञ्ज भक्षयेत्' इत्यादौ कलञ्जशब्दो रक्तलशुनपर इत्यस्माभिर्व्याख्यातं नञर्थनिरूपणावसरे मीमांसान्यायप्रकाशव्याख्यायां सारविवेचिन्याम् । तत्र प्रमाणान्तरमप्युपन्यस्त त त्रैव द्रष्टव्यम् ॥

६. डुण्डुभाख्यया इति ख. पु. सुहण्डुभाख्यया इति. क. पु.

भाष्यया म्लेच्छानां प्रसिद्धम् । एते चाऽभक्ष्याः ॥ २६ ॥

अभक्ष्यानां प्रतिपदपाठो न शक्यते इति समासेनाह—

यच्चाऽन्यत् परिचक्षते ॥ २७ ॥

यच्चान्यदेवंयुक्तं शिष्टाः परिचक्षते **वर्जयन्ति तदप्यभक्ष्यम्** । तत्राह मनुः—

(१)लशुनं गृञ्जनं चैव पलण्डुं कवकानि च ॥
अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ॥' इति ॥ २७ ॥

क्वाक्वभोज्यमिति हि ब्राह्मणम् ॥२८॥

क्वाकु छत्राकं तदभोज्यमभक्ष्यम् । ब्राह्मणग्रहणमुक्तार्थम् ॥ २८ ॥

एकखुरोष्ट्रगवयग्राममूकरशरभगवाम् ॥ २९ ॥

एकखुरा अश्वादयः । गवयो गोसदृशः पशुः । शरभोऽष्टपाद् आरण्यो मृगः । अन्ये प्रसिद्धाः । एतेषां मांसमभक्ष्यम् ॥ २९ ॥

धेन्वनड्वाहोर्भक्ष्यम् ॥ ३० ॥

धेन्वनड्वाहोर्मांसं भक्ष्यम् । गोप्रतिषेधस्य प्रतिप्रसवः ॥ ३० ॥

मेध्यमानड्वाहमिति वाजसनेयकम् ॥ ३१ ॥

(२)अनड्वाहो मांसं न केवलं भक्ष्यम्, किं तर्हि ? मेध्यमपीति वाजसनेयिनः समामनन्ति ॥ ३१ ॥

कुक्कुटो विकिराणाम् ॥ ३२ ॥

व्यवहितमप्यभोज्यमिति सम्बध्यते । पादाभ्यां विकीर्य कीटधान्यादि ये भक्षयन्ति ते मयूरादयो विकिरास्तेषां मध्ये कुक्कुटो न भक्ष्यः । स्मृत्यन्तरवशात् ग्राम्यो, नाऽऽरण्यः ॥ ३२ ॥

प्लवः प्रतुदाम् ॥ ३३ ॥

तुण्डेन प्रतुद्य ये भक्षयन्ति ते दार्वाघाटादयः प्रतुदाः । तेषां मध्ये प्लव एवाऽभक्ष्यः । प्लवः (३)शकटबलाख्यो बकविशेषः ॥ ३३ ॥

(४)क्रव्यादः ॥ ३४ ॥

---

१. म. स्मृ. ५ ५. २. आनड्वाहं मांस० इति ख. ग. पु.
३ शकटविलाख्य इति ख पु. शकावलाख्य इति. ग, पु शकबलाख्य इति. घ. ङ. पुस्तकयो. । ४ एतदादि सूत्रत्रयमेकीकृतं क पु.

क्रव्य मांसं तदेव केवलं येऽदन्ति ते क्रव्यादाः गृध्रादयः। ते ऽप्यभक्ष्याः

हंसभासचक्रवाकसुपर्णाश्च ॥ ३५ ॥

हंसः प्रसिद्धः। भास इयेनाकृतिः पीनतुण्डः। चक्रवाकः मिथुनचरः। सुपर्णः इयेनः। एते चाऽभक्ष्याः ॥ ३५ ॥

क्रुञ्चक्रौञ्च वार्ध्राणसलक्ष्मणवर्जम् ॥ ३६ ॥

क्रुञ्चा वृन्दचाराः। क्रौञ्चा मिथुनचराः। ते चाऽभक्ष्याः। सूत्रे क्रौञ्चेति विभक्तिलोपश्छान्दसः। किमविशेषेण क्रुञ्चक्रौञ्चा अभक्ष्याः। नेत्याह—वार्ध्राणसलक्ष्मणवर्जम्। श्वेतो लोहितो वा मूर्धा येषां ते लक्ष्मणाः त एव विशेष्यन्ते—वार्ध्राणसा इति। वार्ध्रं चर्म तदाकारा नासिका येषां ते वार्ध्राणसाः। एवंभूतान् लक्ष्मणान् वर्जयित्वा क्रुञ्चक्रौञ्चा न भक्ष्या इति।

अन्ये त्वाहुः—'क्रव्याद' इति प्राप्तस्य प्रतिषेधस्य क्रुञ्चादिषु चतुर्ष्वप्रतिषेध इति। तत्र लक्ष्मणा सारसी लक्ष्मणवर्जमिति(१) 'ङ्याप्पोस्संज्ञाच्छन्दसो'रिति ह्रस्वः। एवं क्रुञ्चादिशब्दस्याऽप्यजादिटाबन्तस्य ॥३६॥

पञ्चनखानां(२) गोधाकच्छपश्वाविद्छर्यकखड्ग-शशापूतिखषवर्जम् ॥ ३७ ॥

पञ्चनखा नरवानरमार्जारादयः। तेषां मध्ये गोधादीन् सप्त वर्जयित्वा अन्ये अभक्ष्याः। गोधा कृकलासाकृतिर्महाकाया। कच्छपः कूर्मः। श्वाविद् वराहविशेषः, यस्य नाराचाकाराणि लोमानि। शर्यकः शल्यकः, यस्य चर्मणा तनुत्राणं क्रियते। श्वाविच्छर्यक इति युक्तः पाठः। एके तु छकारं पठन्ति। छकारात्पूर्वमिकारम्। खड्गो मृगविशेषः, यस्य शृङ्गं तैलभाजनम्। शशः प्रसिद्धः। पूतिखष। शशाकृतिः हिमवति प्रसिद्धः ॥३७॥

अभक्ष्यश्चेटो मत्स्यानाम् ॥ ३८ ॥

मत्स्यानां मध्ये चेटाख्यो मत्स्यो न भक्ष्यः ॥ ३८ ॥

सर्पशीर्षो मृदुरः क्रव्यादो ये चाऽन्ये विकृता यथा मनुष्यशिरसः ॥३९॥

सर्पस्येव शिरो यस्य सोऽपि मत्स्यो न भक्ष्यः। मृदुरो मकरः ये च क्रव्यमेवाऽदन्ति शिंशुमारादयः तेऽप्यभक्ष्याः। ये च उक्तेभ्योऽन्ये

---

१. पा. सू. ६ ३.६३ २. पञ्चपञ्चनखा भक्ष्या., इत्यत्र द्वितीयसप्तमवर्जितानां ग्रहणम्।

मत्स्या विकृताकाराः । तत्रोदाहरणम्—यथा मनुष्याशिरसः जलमनुष्याख्या जलहस्त्यादयश्च । तेऽपि सर्वे न भक्ष्याः । अत्र मनुः—

(१)'अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥
(२)मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्व प्रवदन्ति मनीषिणः ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥' इति ।

(३)अप्रतिषिद्धेष्वपि भक्षणान्निवृत्तिरेव ज्यायसीत्यर्थः ॥ ३९ ॥

इत्यापस्तम्बधर्मसूत्रे सप्तदशी कण्डिका ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने पञ्चमः पटलः ॥ ५ ॥

---

१. म. स्मृ. ५ ५१. । २. श्लोकोऽयं नास्ति क. पु.

३. "अत्राप्रतिषिद्धेष्वपि निवृत्तिरेव ज्यायसी भक्षणपानमैथुनादिभ्य इत्यर्थः" इति ग पु. ।

अथ षष्ठः पटलः ॥

एवं तावन्निमित्तदुष्टं जातिदुष्टं कालदुष्टं चाऽभोज्यमुक्तम् । तत्र निमित्तदुष्टं 'यस्य कुले म्रियेते(पृ. ९२.)'त्यादि । जातिदुष्टं कलञ्जादि । कालदुष्टं पर्युषितादि । इदानीं प्रतिग्रहाशुचीनि कानिचिदनुज्ञाय कानिचित् प्रतिषेधति—

मध्वामं मार्गं मांसं भूमिर्मूलफलानि रक्षा गव्यूतिर्निवेशनं युग्यघासश्चोग्रतः प्रतिगृह्याणि ॥ १ ॥

मधु पक्वमपक्वं वा । आम तण्डुलादि । मृगस्य विकारो मार्गं मांसम् । भूमिः शालेयादिक्षेत्रम् । विश्रमस्थानमित्यन्ये । मूलफलानि(१) मूलकाम्रादीनि । रक्षा अभयदानम् । गव्यूतिर्गोमार्गः । निवेशन गृहम् । युग वहतीति युग्यो बलीवर्दः । तस्य घासो भक्ष्यं पलालादि । एतान्युग्रतोऽपि प्रतिगृह्याणि प्रतिग्राह्याणि अदुर्भिक्षेऽपि । उग्र. पापकर्मा द्विजातिः, वैश्याद्वा शूद्रायां जातः । उग्रग्रहण तादृशानामुपलक्षणम् ॥ १ ॥

एतान्यपि नाऽनन्तेवास्याहृतानीति हारीतः ॥ २ ॥

एतानि मध्वादीन्यपि अन्तेवास्याहृतान्येव प्रतिग्राह्याणि, न स्वयमुग्रत इति हारीत आचार्यो मन्यते ॥ २ ॥

आमं वा गृह्णीरन् ॥ ३ ॥

पूर्वोक्तेष्वामं स्वयमेव वा गृह्णीरन् द्विजा इति(२) हारीतस्यैव पक्षः ॥ ३ ।

कृतान्नस्य वा विरसस्य ॥ ४ ॥

आमस्याऽलाभे कृतान्नस्याऽपि विरसस्य लवणादिरसासंयुक्तस्य । षष्ठी निर्देशात् स्तोकम् । स्वयमन्तेवास्याहृतं वा गृह्णीरन् ॥ ४ ॥

न सुभिक्षाः स्युः ॥ ५ ॥

अनन्तरोक्तविधानद्वये यद्गृहीतमन्नं तेन सुभिक्षाः सुहिता न भवेयुरेव । यावता प्राणयात्रा भवति तावदेव गृह्णीरन् , न यावता सौहित्यं तावदिति ॥ ५ ॥

स्वयमप्यवृत्तौ सुवर्णं दत्वा पशुं वा भुञ्जीत ॥ ६ ॥

यदि तु दुर्भिक्षतया आत्मनोऽपि वृत्तिर्न लभ्यते प्रागेव पोष्यवर्गस्य,

---

१. मूलकन्दादीनि इति क. पु २ हारीताचार्यस्य, इति छ. पु.

तदा स्वयमप्यवृत्तौ यत्रैव लभ्यते तत्रैव कृतान्नमपि भुञ्जीत । तत्र गुण-विधिः— सुवर्णं दत्वा सकृदेवोपकल्पितमुपरिष्टात्सुवर्णेन स्पृष्ट्वा । एतेन पशुं वा दत्वेत्यपि व्याख्यातम् । 'पशुरग्नेः, (१)अग्निः पशुरासी'दिति मन्त्रलिङ्गात्(२) गोसूक्तेनाऽग्नेरुपस्थानदर्शनाच्च ॥ ६ ॥

नाऽत्यन्तमन्ववस्येत् ॥ ७ ॥

न पुनरत्यन्तमन्ववसीदेत् ॥ ७ ॥

वृत्तिं प्राप्य विरमेत् ॥ ८ ॥

यदा विहिता वृत्तिर्लभ्यते तदा निषिद्धाया विरमेत् । न पुन'स्स-कृत्प्रवृत्ताया' किमवकुण्ठनने"ति न्यायेन तत्रैव रमेत । अत्र छान्दोग्यो पनिषत्—'(३)मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तर्ह चाक्रा-यण इभ्यग्रामे प्रद्राणक उवास । स हेभ्यं कुल्माषान् खादन्तं विभिक्षे' इत्यादि । मन्त्रवर्णश्च भवति(४) 'अवस्यो शुन अन्त्राणि पेच' इति । अवस्यो वृत्त्यभावेन । अपर आह-दुर्भिक्षे स्वयमप्यवृत्तौ आ तन्निवृ-त्तेर्यत्र कुत्रचिच्छीलेऽपि दातरि भुञ्जानो वसेत् यां च यावतीं च स्वर्ण-मात्रां य कञ्चन पशु वा तस्मै दत्वा । न पुनरत्यन्तमन्ववस्येत् वृत्तिं प्राप्य विरमेदिति ॥ ८ ॥

एवमापदि वृत्तिमुक्त्वा सुभिक्षेऽनापदि वृत्तिमाह—

त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समा-वृत्तेन न भोक्तव्यम् ॥ ९ ॥

समावृत्तो द्विजातिः क्षत्रियादीनां त्रयाणां वर्णानां गृहे न भुञ्जीत ॥ ९ ॥

प्रकृत्या ब्राह्मणस्य भोक्तव्यमकारणादभोज्यम् ॥ १० ॥

---

१ तै. स. ५. ७. २६. २. ऋ. स. ६. २८. १

३. छा. उ १. १०. "मटचीहतेषु मटच्यः अशनयः ताभिर्हतेषु नाशितेषु कुरुषु सस्येष्वित्यर्थः । ततो दुर्भिक्षे जाते आटिक्या अनुपजातपयोधरादिव्यञ्जनया जायया उषस्तिर्ह नामत· चक्रस्यापत्यं चाक्रायणः इभः हस्ती तमर्हतीतीभ्य· ईश्वर· हस्त्यारोहो वा । तस्य ग्रामः इभ्यग्रामः तस्मिन् प्रद्राणकः अन्नालाभात् । द्रा कुत्सायां गतौ । कुत्सिता गतिं गतः । अन्त्यावस्था प्राप्त इत्यर्थः । उवास उषितवान् कस्यचिद्गृहमाश्रित्य । सो-ऽन्नार्थमटन्निभ्यं कुल्माषान् कुत्सितान्माषान् खादन्त भक्षयन्त यदृच्छयोपलभ्य विभिक्षे" इति शाङ्करभाष्यम्। ४. ऋ. सं ४. १८. १३.

ब्राह्मणस्यात्र प्रकृत्या स्वभावेनैव भोक्तव्यम्। कारणादेव स्वभोज्यम्॥१०॥

कारणमाह—

यत्राऽऽप्रायश्चित्तं कर्माऽऽसेवते प्रायश्चित्तवति ॥ ११ ॥

(१) यत्र यदा वैश्वदेवाग्निहोत्रादीनि नित्यमाभ्युदयिक वाऽप्राय-श्चित्तं कर्माऽऽसेवते तात्पर्येण करोति प्रायश्चित्तवत्यात्मनि चोदितं प्रा-यश्चित्तं (२)प्राणायामोपवासविधिकृच्छ्रादि न करोति तदा पत-स्मात् कारणात् ब्राह्मणस्याऽन्नमभोज्यमिति ॥ ११ ॥

चरितनिर्वेषस्य भोक्तव्यम् ॥ १२ ॥

चरितो निर्वेषः प्रायश्चित्तं येन तस्याऽन्नं भोक्तव्यम्। तद्भोजने न दोषः। निष्ठया भूतकालस्याऽभिधानाच्चर्यमाणेऽपि निर्वेषे न भोक्तव्यम्। किं तर्हि? चरिते ॥ १२ ॥

सर्ववर्णानां स्वधर्मे वर्तमानानां भोक्तव्यं शूद्रवर्जमित्येके ॥ १३ ॥

शूद्रवर्जितानां स्वधर्मे वर्तमानानां त्रयाणां वर्णानामन्नं भोज्यम्। न ब्राह्मणस्यैवेत्येके मन्यन्ते ॥ १३ ॥

तस्याऽपि धर्मोपनतस्य ॥ १४ ॥

तस्याऽपि शूद्रस्याऽन्नं भोज्यम्, यद्यसौ धर्मार्थमुपनतः आश्रितो भ-वति। धर्मग्रहणादर्थार्थमुपनतस्याऽभोज्यम्। आपत्कल्पश्चाऽयम् ॥१४॥

सुवर्णं दत्त्वा पशुं वा भुञ्जीत नाऽत्यन्तमन्नव-स्येदृत्तिं प्राप्य विरमेत् ॥ १५ ॥

गतम् ॥ १५ ॥

सङ्घान्नमभोज्यम् ॥ १६ ॥

सङ्घो गणः तस्य यत् स्वमन्नं न त्वेकस्य। तदभोज्यं यद्यपि ते सर्वे दद्युः ॥ १६ ॥

---

१. यत्र यदा अग्निहोत्रवैश्वदेवाद्यकरणे प्रायश्चित्तं मुक्त्वा तदनुरूप, नित्यमाभ्यु-दयिक वा कर्मासेवते तात्पर्येण करोति न प्रायश्चित्तवत्यात्मनि चोदिते प्रायश्चित्त, तदैत-स्मात्कारणादभोज्यमिति इति - क पु.। २ प्राणायामपथिकृदादि इति. ख. पु

परिकुष्टं च ॥ १७ ॥

'भोक्तुकामा आगच्छत' इत्येवं परिकुश्य सर्वत आहूय यद्दीयते तत्परिकुष्टं तदभोज्यम् ॥ १७ ॥

सर्वेषां च शिल्पाजीवानाम् ॥ १८ ॥

चित्रनिर्माणादिकं शिल्प ये आजीवन्ति(१) तेषां सर्वेषामपि ब्राह्मणादीनामन्नमभोज्यम् ॥ १८ ॥

ये च शस्त्रमाजीवन्ति ॥ १९ ॥

ये च शस्त्रेण जीवन्ति तेषामप्यन्नमभोज्यम् । क्षत्रियवर्जम्,(२)तस्य विहितत्वात् ॥ १९ ॥

ये चाऽऽधिम् ॥ २० ॥

आजीवन्तीत्यपेक्षते । स्वगृहे परान् वासयित्वा तेभ्यो भृतिग्रहणमाधिः, यः स्तोम इति प्रसिद्धः ।

परभूमौ कुटिं कृत्वा स्तोमं दत्त्वा वसेत्तु यः ।
इति ।

तं चाऽऽधिं ये आजीवन्ति तेषामप्यन्नमभोज्यम् । ये तु प्रसिद्धमाधिमाजीवन्ति तेषां वार्धुषिकत्वादेव(३) सिद्धो निषेधः ॥ २० ॥

भिषक् ॥ २१ ॥

अभोज्यान्न इति प्रकरणाद्गम्यते । भिषक् भैषज्यवृत्तिः । धर्मार्थं तु ये सर्पदष्टादींश्चिकित्सन्ति ते भोज्यान्ना एव ॥ २१ ॥

वार्धुषिकः ॥ २२ ॥

वृद्ध्याजीवी । सोऽप्यभोज्यान्नः ॥ २२ ॥

दीक्षितोऽक्रीतराजकः ॥ २३ ॥

दीक्षितो(४) दीक्षणीयेष्ट्या संस्कृतः सोऽपि यावत् क्रीतराजको न

---

१ आजीवन्ति इत्यनन्तरं 'आजीवन्ति तेन ये जीवन्ति' इत्यधिकं क. पु.

२. तस्य विहितत्वात्, इति नास्ति क. पु.

३. अभोज्यान्नत्वं सिद्धम्, इति ख ग. पु.

४. ज्योतिष्टोमे—'आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणः', इत्यनेन दक्षिणीयेष्टिर्नाम काचिदिष्टिर्विहिता । सा च यजमानसंस्कारार्था, इति निर्णीत पूर्वमीमांसायां पञ्चमाध्याये । तया संस्कृतो यजमानो यावत् यागार्थद्रव्यं सोमलतां न क्रीणाति

भवति सोमक्रयं न करोति तावदभोज्यान्न. ॥ २३ ॥

अग्नीषोमीयसंस्थायामेव ॥ २४ ॥

भोक्तव्यमिति वक्ष्यमाणमपेक्षते । अग्नीषोमीये **पशौ** संस्थिते **समाप्त एव भोक्तव्यम्** । **न प्रागिति** ॥ २४ ॥

पक्षान्तरमाह—

हुतायां वपायां दीक्षितस्य भोक्तव्यम् ॥ २५ ॥

अग्नीषोमीयस्य वपायां हुतायां वा दीक्षितस्यान्नं भोक्तव्यम् । **तथा च बह्वृचब्राह्मणम्**—'अशितव्यं वपायां हुतायाम्' इति ॥ २५ ॥

पक्षान्तरमाह—

(१)यज्ञार्थे वा निर्दिष्टे शेषाद्भुञ्जीरन्निति हि ब्राह्मणम् २६

इदं यज्ञार्थमिति व्यादेशे कृते शेषाद्भुञ्जीरन्निति ब्राह्मणं भवति । ब्राह्मणग्रहणं प्रीत्युपलब्धित' प्रवृत्तेरपस्मृतिता मा भूदिति प्रत्यक्षमेवाऽत्र ब्राह्मणमिति ॥ २६ ॥

क्लीबः ॥ २७ ॥

षण्डकः । **सोऽप्यभोज्यान्न.** ॥ २७ ॥

राज्ञां प्रैषकरः ॥ २८ ॥

राज्ञामिति बहुवचनात् ग्रामादेर्यः प्रैषकरः तस्याऽपि प्रतिषेधः ॥२८॥

अहविर्याजी ॥ २९ ॥

यश्चाऽहविषा नररुधिरादिना यजतेऽभिचारादौ यथा 'यमभिचरेत्तस्य लोहितमवदानं कृत्वे' ति **सोऽप्यभोज्यान्नः** ॥ २९ ॥

चारी ॥ ३० ॥

चारो गूढचरः स्पशः । **सोऽप्यभोज्यान्नः** ॥ ३० ॥

तावत्पर्यन्तामित्यर्थः । प्रथमदिने 'अपराह्णे दीक्षयेत्' इति अपराह्णे दीक्षा विहिता । ततः पूर्वं दीक्षणीयेष्टिः । तत्समनन्तरदिने सोमक्रयण विहितम् । ततश्च प्रथमदिनेऽपराह्णादनन्तर द्वितीयदिनमध्याह्नात् पूर्वं दीक्षितान्नं न भोक्तव्यमिति फलितम् । इदं चैकदीक्षापक्षे । अनेकदीक्षापक्षे तु तदनुरोधेन दिनसंख्यावृद्धिः प्रत्येतव्या ॥

१. Cf. आप श्रौ १० १५ १६.

अविधिना च प्रव्रजितः ॥ ३१ ॥

यश्चाऽविधिना प्रव्राजितः शाक्यादिस्सोऽप्यभोज्यान्नः ॥ ३१ ॥

यश्चाऽग्नीनपास्यति ॥ ३२ ॥

(१)(योऽनापद्यग्निं त्यक्त्वा प्रायश्चित्तं न करोति सोऽप्यभोज्यान्नः । अपि च) अविधिनेत्येव । यश्चाऽविधिना उत्सर्गेष्टया विनाऽग्ननिपास्यति सोऽप्यभोज्यान्नः ॥ ३२ ॥

यश्च सर्वान् वर्जयते सर्वान्नी च श्रोत्रियो निराकृति-र्वृषलीपतिः ॥ ३३ ॥

यश्च सर्वान् वर्जयते भोजने न क्वचिद्भुङ्क्ते न कञ्चिद्भोजयति स सर्ववर्जी । यश्च सर्वान्नी सर्वेषामन्नं भुङ्क्ते तावुभावप्यभोज्यान्नौ । श्रोत्रिय इत्युभयोरशेषः । श्रोत्रियोऽपि सन्नभोज्यान्न एवेति । निराकृतिः निःस्वाध्यायः । निर्व्रत इत्यन्ये । सोऽप्यभोज्यान्न । वृषलीपतिः क्रमविवाहे यस्य वृषली पत्नी जीवति इतरा मृताः स वृषलीपतिः । स श्रोत्रियोऽप्यभोज्यान्न इति ॥ ३३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावष्टादशी कण्डिका ॥१८॥

मत्त उन्मत्तो बद्धोऽणिकः प्रत्युपविष्टो यश्च प्रत्युपवेशयते तावन्तं कालम् ॥ १ ॥

मदकरद्रव्यसेवया (२)विकृतिं गतो मत्तः । उन्मत्तो भ्रान्तः । बद्धो निगलितः । अणिकः पुत्रात् श्रुतग्राही, पुत्राचार्य इति शास्त्रेषु निन्दितः। प्रत्युपविष्टः ऋणादिना कारणेनाऽधमर्णादिकं निरुध्य तत्पार्श्वे उपविष्टः । प्रत्युपवेशयिता त्वितरः, तस्य परिहारमकुर्वंस्तेन सह कामं सुचिरमास्यतामित्यासीनः । ता एते मत्तादयस्तावन्तं कालमभोज्यान्नाः, यावन्मदाद्यनुवृत्तिः । अपर आह—अणिकः ऋणस्य दाता प्रत्युपवेष्टुरिदं विशेषणमिति ॥ १ ॥

क आहृयान्नः ॥ २ ॥

यद्येते अभोज्यान्नाः कस्तर्हि आहृयान्नः ? कस्य तर्ह्यन्नमश्नीयमिति ।

---

१. कुण्डलान्तर्गतोऽधिकः क पु २. अप्रकृतिं इति. ख, पु.

यद्यप्येते अभोज्यान्ना इत्युक्ते परिशिष्टा भोज्यान्ना इति गम्यते। तथाप्यनेकमतोपन्यासार्थं प्रश्नपूर्वक आरम्भः ॥ २ ॥

य ईप्सेदिति कण्वः ॥ ३ ॥

य एव प्रार्थयते स एवाऽऽद्यान्न इति कण्व ऋषिर्मन्यते (१)प्रतिषिद्धवर्जम् ॥ ३ ॥

पुण्य इति कौत्सः ॥ ४ ॥

सर्ववर्णानां स्वधर्मे वर्तमानानां' (१८.१३.) मित्युक्तत्वात् भोज्यान्नास्सर्वे पुण्या एव । इह पुनः पुण्यग्रहणमतिशयार्थम् । तपोहोमजप्यैः स्वधर्मेण च युक्त पुण्य । स स्वयमप्रार्थयमानोऽपि भोज्यान्न इति कौत्सस्य पक्षः ॥ ४ ॥

यः कश्चिद्ददादिति वार्ष्यायणिः ॥ ५ ॥

यः कश्चित्पुण्योऽपुण्यो वा सततं दानशील. । स भोज्यान्न इति वार्ष्यायणिराह ।

तथा च मनुः—

(२)श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ।' इति ॥ ५ ॥

अत्रोपपत्तिः—

यदि हि रजः स्थावरं पुरुषे भोक्तव्यमथ चेच्चलं दानेन निर्दोषो भवति ॥ ६ ॥

रजः पापम् । तद्यदि पुरुषे कर्तरि स्थावरं स्थिरं नोपभोगमन्तरेण क्षीयते तदा ततः प्रतिग्रहेऽपि भोक्तरि संक्रमाभावात् भोक्तव्यम् । अथ चेच्चलमुपभोगमन्तरेणाऽपि क्षीयते तदा सततदानशीले न मुहूर्तमपि पापमवतिष्ठत इति कुतो भोक्तुर्दोष इति ॥ ६ ॥

शुद्धा भिक्षा भोक्तव्यैककुणिकौ काण्वकुत्सौ तथा पुष्करसादिः ॥ ७ ॥

धार्मिकेणोद्यता आहृता भिक्षा शुद्धा । सा भोज्येत्येकादीनां पञ्चानां पक्षः । पुष्करसादिः(३) पौष्करसादिः । आदिवृद्ध्यभावश्छान्दसः ॥ ७ ॥

---

१. प्रतिषिद्धवर्जम् , इति नास्ति क. पुस्तके ।

२. म. स्मृ ४ २२८ ३. 'आचार्यः' इत्यधिक क. पुस्तके,

सर्वतोपेतं वार्ष्यायणीयम् ॥ ८ ॥

सर्वत उपेतं सर्वतोपेतम् । छान्दसो गुणः । उपेतमयाचितोपपन्नम् । तत्सर्वतोऽपि भोज्यमिति वार्ष्यायणीय मतम् ॥ ८ ॥

इदानी स्वमतमाह—

पुण्यस्येप्सतो भोक्तव्यम् ॥ ९ ॥

कण्वकुत्सयोः पक्षौ समुच्चितावाचार्यस्य पक्षः(१) ॥ ९ ॥

पुण्यस्याऽप्यनीप्सतो न भोक्तव्यम् ॥ १० ॥

यः प्रार्थितोऽपि नेत्यसकृदुक्त्वा कथंचिदापादितेप्स.(२) सोऽनीप्सन्नित्युच्यते, तस्य पुण्यस्याऽप्यभोज्यमिति । अपर आह—अनीप्सत इति कर्तरि षष्ठी । पुण्यस्याप्यन्नं न भोज्यं, यदि भिक्षमाणः पूर्ववैरादिना स्वयमीप्सन्न भवतीति ॥ १० ॥

यतः कुतश्चाऽभ्युद्यतं भोक्तव्यम् ॥ ११ ॥

'सर्वतोपेत' (१९ ८.) मित्युक्तमेव पुनरुच्यते विशेषविवक्षया ॥११॥ तमाह—

नाऽननियोगपूर्वमिति हारीतः ॥ १२ ॥

'अद्य तुभ्यमिदमाहारिष्यामि तदत्रभवता ग्राह्य'मिति निवेदनं नियोगः । तदभावः अनियोगः । पुनर्नञ्तमासः । द्वौ नञौ प्रकृतमर्थं गमयत । अननियोगो नियोगः तत्पूर्वं चेदभ्युद्यतं न भोज्यमिति ॥ १२ ॥

अथ पुराणे श्लोकावुदाहरन्ति—

(३)उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् ।
भोज्यां मेने प्रजापतिरपि दुष्कृतकारिणः ॥
न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च ।
न च हव्यं वहत्यग्निर्यस्तामभ्यर्थिमन्यते ॥ इति॥१३॥

---

१. 'आचार्यस्य पक्षेण' इति क, पु. २. सोऽल्पेप्सुस्सन्ननीप्सन्नित्युच्यते' इति क पु.
३. नाद्यतनभविष्यत्पुराणीयमिदं वचनम् । Cf मनु ४. २५१ २५२.

अथ अपि च पुराणे—

(१)सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च ।
वंशानुचरित चैव पुराण पञ्चलक्षणम् ॥'

इत्येवलक्षणे भविष्यदादौ । उद्यता हस्ताभ्यामुद्यम्य धारिताम् । आहृतां स्वयमानीताम् । पूर्वमनिवेदितां भिक्षाम् । दुष्कृतकारिणोऽपि सकाशात् भोज्या मेने प्रजापतिर्मनुः, मनुः प्रजापतिरस्मीति(२)दर्शनात् । यस्तु तामभ्यधिमन्यते प्रत्याचष्टे तस्य पितरः कव्य नाश्नन्ति । कियन्तं कालम् ? दश वर्षाणि पञ्च च । अग्निश्च हव्यं न वहति । तावन्तमेव कालमिति प्रत्याख्यातुर्निन्दार्थवादः ॥ १३ ॥

(३)चिकित्सकस्य मृगयोर्दशल्यकृन्तस्य पाशिनः ।
कुलटायाःषण्डकस्य च तेषामन्नमनाद्यम् ॥१४॥

चिकित्सको भिषक् । मृगयुर्मृगघाती लुब्धकः । शल्यकृन्तः शस्त्रेण ग्रन्थ्यादीनां छेत्ता अम्बष्ठः । पाशी पाशवान् पाशजालेन मृगादीनां ग्राहकः । कुलात्कुलमटतीति कुलटा व्यभिचारिणी । षण्डकः तृतीयाप्रकृतिः । एतेषां चिकित्सकादीनामन्नमनाद्यम् । चिकित्सकषण्डकयोः पुनर्वचनमुद्यतस्याऽपि प्रतिषेधार्थम् ।(४) पूर्वत्र तर्हि ग्रहणं शक्यमकर्तुम् । एवं तर्हि सूत्रकारस्य स प्रतिषेधः । अयं तु पुराणश्लोके प्रतिषेध इत्यपौनरुक्त्यम् ॥ १४ ॥

अथाऽप्युदाहरन्ति—

अन्नादे भ्रूणहा मार्ष्टि अनेना अभिशंसति ।
स्तेनः प्रमुक्तो राजानि याचन्नृतसङ्करे ॥इति॥१५॥

षडङ्गस्य वेदस्याऽध्येता भ्रूण । तं यो हतवान् स भ्रूणहा । सोऽन्नादे मार्ष्टि लिम्पति । किम् ?प्रकरणादेन इति गम्यते । भ्रूणघ्नो योऽन्नमत्ति तस्मिंस्तदेन संक्रामति । तस्मात्तस्योद्यतमप्यभोज्यामिति प्रकरणसङ्गतः पादः । इतरत् पुराणश्लोके पठ्यमाने पठितम् । अनेनसं योऽभिशंसति मिथ्यैव ब्रूते–इदं त्वया कृतमिति । स तस्मिन्नाभिशंसति तदेनो

---

१. अमरको. १. वा ५.

२. मनु· प्रजापतिर्यस्मिन्निति दक्षे दर्शनात् , इति क. पु. प्रजापतिर्यस्मिन्निति मानवे दर्शनात्' इति ख. पु.

३. Cf मनु. ४. २११. २१२ ४ पूर्वत्र तर्हि ग्रहणस्य वैयर्थ्यम् ।

मार्ष्टि । मनुस्तु—

(१)पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः ।
वचनात्तुल्यदोषस्स्यान्मिथ्या द्विर्दोषभाग्भवेत् ॥

इति द्वैगुण्यमाह । तदभ्यासे द्रष्टव्यम् । स्तेनः प्रकीर्णकेश' (२५४.) इति वक्ष्यति । स एव तृतीयस्य पादस्याऽर्थः । कर्तृभेदादपौनरुक्त्यम् । सङ्करः प्रतिज्ञा प्रतिश्रवः । सत्यसङ्कर इति यथा । य. प्रतिश्रुत्य न ददाति सोऽनृतसङ्कर इति । ककारस्तु छान्दसः । तस्मिन् याचकः स्वयमेनो मार्ष्टि । तस्मात्प्रतिश्रुतं देयमिति ॥ १५ ॥

॥ इत्यापस्तम्बसूत्रवृत्तावेकोनविंशी कण्डिका ॥ १९ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु-
ज्वलायां प्रथमप्रश्ने षष्ठः पटलः ॥ ६ ॥

१ म. स्मृ. श्लोकोऽयमिदानीं मुद्रितकोशेषु नोपलभ्यते ।

अथ सप्तमः पटलः ॥

नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत् ॥ १ ॥

इमं लौकिकं लोके विदितं ख्यातिलाभपूजात्मकम्, अर्थं प्रयोजनम्। पुरस्कृत्य अभिसन्धाय। धर्मान्न चरेत् ॥ १ ॥

किं कारणम ?

निष्फला ह्यभ्युदये भवन्ति ॥ २ ॥

हि यस्मादेवं क्रियमाणा धर्मा अभ्युदये फलकाले निष्फला भवन्ति। (१)लोकार्थं ह्यसौ धर्मं चरति, न कर्तव्यमिति श्रद्धया। न च श्रद्धया विना धर्मः फलं साधयति। (२) 'यो वै श्रद्धामनारभ्येति श्रुतेः॥

किमत्रेदानीं दृष्टं फलं त्याज्यमेव ? नेत्याह—

तद्यथाऽऽम्रे फलार्थे(३)निमित्ते छाया गन्ध इत्यनूत्पद्यते, एवं धर्मे चर्यमाणमर्था अनूत्पद्यन्ते ॥ ३ ॥

तदिति वाक्योपन्यासे। फलार्थं ह्याम्रवृक्षो निर्मीयते आरोप्यते। तस्मिन् फलार्थे(४)निमित्ते छाया गन्धश्चाऽनूत्पद्यते। एवं धर्मे चर्यमाणमर्थाः ख्यात्यादयोऽनूत्पद्यन्ते अनुनिष्पद्यन्ते। तथैव स्वीकार्या.(५)। न चोद्देश्यतया।

तथा चाह—

'यथेक्षुहेतोः सलिलं प्रसेचयेत्तृणानि वल्लीरपि च प्रसिञ्चति।
तथा नरो धर्मपथेन वर्तयन् यशश्च कामांश्च वसूनि चाऽश्नुते ॥'इति॥३॥

नो चेदनूत्पद्यन्ते न धर्महानिर्भवति ॥ ४ ॥

यद्यपि दैवादर्था नाऽनूत्पद्यन्ते तथापि धर्मस्तावद्भवति। स च स्वतन्त्रः पुरुषार्थः। किमन्यैरर्थैरिति ॥ ४ ॥

अनसूर्युदुष्प्रलम्भः स्यात्कुहकशठनास्तिकबालवादेषु॥५॥

कुहक प्रकाशे शुचिरेकान्ते यथेष्टचारी। शठः वक्रचित्तः। नास्तिक.

---

१ लोकभक्त्या इति क, पु

२. तै. स १. ६ ८. यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधते, इति श्रुतिः। अस्या अयमर्थः—

३. ४. निमित्ते इति क पु. ५. नचोद्देश्यतया इति नास्ति क.

(१)प्रेत्यभावापवादी । बालः श्रुतरहितः । एतेषां वादेषु अनसूयुः स्यात् । असूयया द्वेषो लक्ष्यते । द्वेष्टा न स्यात् । तान् विषयीकृत्य द्वेषमपि न कुर्यात् । तथा दुष्प्रलम्भश्च स्यात् । प्रलम्भनं विसंवादनं मिथ्याफलाख्यानम् । (२)गृधिवञ्च्योः प्रलम्भन' इति दर्शनात् । दुष्प्रलम्भो विसंवादयितुं मिथ्याफलाख्यानेन प्रवर्तयितुमशक्यः । कुहकादिवादेषु वञ्चितो न स्यात् । तद्वशो न स्यादित्यर्थः ॥ ५ ॥

वञ्चनस्य सम्भवमाह—

न धर्माधर्मौ चरत 'आवं स्व' इति, न देवगन्धर्वा न पितर इत्याचक्षते'ऽयं धर्मोऽयमधर्म, इति ॥ ६ ॥

आवमिति छान्दस रूपम् । भाषायां तु(३)'प्रथमायाश्च द्विवचने भाषाया'मित्यात्व प्राप्नोति । यदि हि धर्माधर्मौ विग्रहवन्तौ गोव्याघ्रवच्चरेतामावा स्व इति ब्रुवाणा, यदि वा देवादयः प्रकृष्टज्ञाना ब्रूयुरिमौ धर्माधर्माविति ततः कुहकादिवादेषु न स्याद्वञ्चना । तदभावात्तु वञ्चनासम्भव इति । इदं चात्र द्रष्टव्यम्—प्रत्यक्षादेर्न गोचरौ धर्माधर्मौ । किंतु नित्यानिर्दोषवेदगम्यौ । तदभावे तन्मूलधर्मशास्त्रगम्याविति ॥ ६ ॥

यत्र तु प्रायश्चित्तादौ विषयव्यवस्था दुष्करा तत्र निर्णयमाह—

यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो, यं गर्हन्ते सोऽधर्मः ॥ ७ ॥

आर्याः शिष्टास्त्रैवर्णिकाः । बहुवचनाच्चत्वारस्त्रयो वा । यथाऽऽह याज्ञवल्क्यः—

(४)'चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्मस्स्यादेको वाऽध्यात्मवित्तमः ॥' इति ॥ ७ ॥

इदानी श्रुतिस्मृत्योः प्रत्यक्षयोरदर्शने शिष्टाचारादप्यवगम्य धर्मः कार्य इत्याह—

सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत ॥८॥

सम्यग्विनीताः । आचार्याधीनः स्या'(२.१९)दित्यादिना विनयनसम्प

---

१. प्रेत्याभाववादी इति. क पु. २. पा. सू. १. ३ ६९.
३. पा. सू. ७. २. ८८ ४ या. स्मृ. १ ९.

ज्ञाः । वृद्धाः परिणतवयसः । यौवने विषयवश्यताऽपि स्यादितीदमुक्तम् । आत्मवन्तो जितेन्द्रियाः । अलोलुपा अकृपणाः । अदाम्भिका अधर्मध्वजा, एकान्तप्रकाशयोरेकवृत्ताः । एवंभूतानामार्याणां सर्वजनपदेषु यदेकान्तेनाऽव्यभिचारेण समाहितमनुमतं वृत्तमनुष्ठानम्, न मातुलसुतापरिणयनवत्कतिपयविषयम्, तद्वृत्तसादृश्यं भजेत । तदनुरूपं चेष्टेत । न तेषामनुष्ठानं निर्मूलम् । सम्भवति च वैदिकानामुत्सन्नपाठब्राह्मणानुभव इति ॥ ८ ॥

एवमुभौ लोकावभिजयति ॥ ९ ॥

एव श्रुतिस्मृतिसदाचारमूलमनुष्ठानं कुर्वन् उभौ लोकावभिजयति इमं चाऽमुं च ॥ ९ ॥

अविहिता ब्राह्मणस्य वणिज्या ॥ १० ॥

क्रयविक्रयव्यवहारो वणिज्या । सा स्वयं कृता ब्राह्मणस्य वृत्तिर्न विहिता प्राप्तानुवादोऽ(१)यमपवादविधानार्थ ॥ १० ॥

आपदि व्यवहरेत पण्यानामपण्यानि व्युदस्यन् ॥ ११ ॥

ब्राह्मणवृत्तेरभाव आपत् । तस्यां सत्याम् । पण्यानाम् । (२)व्यवहरणोः समर्थयो'रिति कर्मणि षष्ठी । व्यवहरेत । क्रयश्च विक्रयश्च व्यवहारः, पण्यानि क्रीणीयात् विक्रीणीत चेत्यर्थः । अपण्यानि वक्ष्यमाणानि व्युदस्यन् वर्जयन् । कृत्स्नाया वैश्यवृत्तेरुपलक्षणमिदम् । क्षत्रियवृत्तिश्च (३)दण्डापूपिकया सिद्धा । तथा च गौतमः—(४)'तदलाभे क्षत्रियवृत्तिः । स्तदलाभे वैश्यवृत्ति'रिति ॥ ११ ॥

अपण्यान्याह—

मनुष्यान् रसान् रागान् गन्धान्नं चर्म गवां वशां हलेष्मोदके तोक्मकिण्वे पिप्पलीमरीचे धान्यं मांसमायुधं सुकृताशां च ॥१२॥

मनुष्या दारदासादयः । रसा गुडलवणादयः, क्षीरादयो वा । रागाः कुसुम्भादयः रज्यन्तेऽनेनेति । रज्यन्त इति वा रागा वस्त्रादयः ।

---

१. नापदि विधानार्थ' इति क पु २. पा सू ३, ३, ५७.

३. कश्चित् दण्डे प्रोतान् अपूपान् कस्यचित् निकटे निक्षिप्य बहिर्गत्वा पुनः प्रतिनिवृत्य तं पृष्टवान्-क्व मे दण्ड इति । तेनोक्तम्—मूषिकैर्भक्षित इति । तदा तेनाऽर्थापत्या कल्पित यदा दण्डोऽपि मूषिकैर्भक्षितः तदा किमु वक्तव्यमपूपास्तैर्भक्षिता इति । अय दण्डापूपिकान्याय' ॥ ४. गौ. ध. ७ ६, ७

गन्धाश्चन्दनादयः । गवां मध्ये वशा वन्ध्या गौः । श्लेष्म जतुवज्रादिः, येन विश्लिष्टं चर्मादि सन्धीयते । 'यथा(१) श्लेष्मणा चर्मण्यं वाऽन्यद्वा विश्लिष्टं सश्लेषये' दिति बह्वृचब्राह्मणे दर्शनात् । उदकं कुम्भजलम् । तोक्म ईषदङ्कुरितानि व्रीह्यादीनि । किण्वं सुराप्रकृतिद्रव्यम् । सुकृत पुण्यं तस्य फलं सुकृताशा । शिष्टानि प्रसिद्धानि । (२)एतान्यपण्यानि वर्जयित्वा अन्येषां पण्यानां व्यवहरेत । मनुष्यादीन्वर्जयित्वेत्येव सिद्धे 'अपण्यानी'ति वचनमन्येषामप्यपण्यानां व्युदासार्थम् । तत्र मनु.

(३)सर्वान् रसानपोहेत कृतान्नं च तिलैस्सह ।
अश्मनो लवणं चैव पशवो ये च मानुषाः ॥
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोम गन्धांश्च सर्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥
आरण्यांश्च पशून् सर्वान् दंष्ट्रिणश्च वयांसि च ।
मद्य नीलीं च लाक्षां च सर्वांश्चैकशफान् पशून् ॥'

इति ॥ १२ ॥

तिलतण्डुलांस्त्वेव धान्यस्य विशेषेण न विक्रीणीयात् ॥ १३ ॥

धान्यानां मध्ये तिलतण्डुलानेव विशेषतोऽतिशयेन न विक्रीणीयात् न विक्रीणीत । अन्येषां विकल्पः । स्वयमुत्पादितेषु नाऽयं प्रतिषेधः । मानवे हि श्रुतम् (४)—

'काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलाञ्छुद्धान् धर्मार्थमचिरस्थितान् ॥' इति ॥१३॥

अविहितश्चैतेषां मिथो विनिमयः ॥ १४ ॥

विनिमयः परिवर्तनम् । येषां विक्रयः प्रतिषिद्धः तेषां परस्परेण विनिमयोऽप्यविहितः प्रतिषिद्धः, न कर्तव्य इत्यर्थः ॥ १४ ॥

तेष्वेव केषां चिद्विनिमयोऽनुज्ञायते—

अन्नेन चाऽन्नस्य मनुष्याणां च मनुष्यै रसानां च

---

१. ऐ. ब्रा. ५ प. ३२. ख २. आपणीयानि इति क. पु
३. म. स्मृ. १०. ८६, ८९. ४. म. स्मृ. १०-९०.

रसैर्गन्धानां च गन्धैर्विद्यया च विद्यानाम् ॥१५॥

अन्नादीनां विद्यान्तानां विनिमयो भवत्येवेत्यर्थः । तथा च वसिष्ठः(१)—रसा रसैस्समतो हीनतो वा ..... । तिलतण्डुलपक्वान्नं विद्यामनुष्याश्च विहिताः परिवर्तनेन' इति । मानवे तु विशेषः—

(२)रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।

कृतान्नं चाऽकृतान्नेन तिला धान्येन तत्समाः ॥' इति ।

गौतमीये तु—(३)विनिमयस्तु । रसानां रसैः । पशूनां च । न लवणकृतान्नयोः । तिलानां च । समेनाऽऽमेन तु पक्वस्य सम्प्रत्यर्थ' इति । तस्मादत्र प्रतिषेधानुवृत्तिर्न शङ्कनीया । पूर्वत्र चोक्त 'ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते' (१३.१७) इति । (४)विनिमयाभ्यनुज्ञानादेव विद्यादीनां विक्रयोऽपि प्रतिषिद्धो वेदितव्यः ॥ १५ ॥

अक्रीतपण्यैर्व्यवहरेत् ॥ १६ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ विंशतितमी कण्डिका ॥ २० ॥

मुञ्जबल्बजैर्मूलफलैः ॥ १ ॥

अक्रीतानि स्वयमुत्पादितानि अरण्यादाहृतानि वा यानि पण्यानि तैर्व्यवहरेत मुञ्जादिभिः ॥ १६ ॥

मुञ्जबल्बजास्तृणविशेषाः ॥ १ ॥

तृणकाष्ठैराविकृतैः ॥ २ ॥

तृणानां विकारो रज्ज्वादिभावः । काष्ठानां विकारः स्थूणादिभावः । तृणत्वादेव सिद्धे मुञ्जबल्बजग्रहणं विकारार्थम् ॥ २ ॥

नाऽत्यन्तमन्ववस्येत् ॥ ३ ॥

प्रतिषिद्धानामपि विक्रयविनिमयाभ्यां जीवेत् । न पुनरत्यन्तमन्ववस्येत् अवसीदेत् । तथा च गौतमः(५) 'सर्वथा तु वृत्तिरशक्तावशौद्रेण । तदप्येके प्राणसंशय' इति । मनुरपि—

(६)'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।

आकाशमिव पङ्केन न स दोषेण लिप्यते' ॥ इति ॥ ३ ॥

---

१ ब. ध. २-३२—३९ २. म. स्मृ १०. ९४.

३. गौ ध ७ १६—२१ ४. नियमाभ्य. इति क. पु.

५. गौ. ध. ७ २२, २३ ६. म. स्मृ १०-१०४

वृत्तिं प्राप्य विरमेत् ॥ ४ ॥

गतम् ॥ ४ ॥

न पतितैस्संव्यवहारो विद्यते ॥ ५ ॥

पतिताः स्तेनादयो वक्ष्यमाणास्तैः सह न कश्चिदपि व्यवहार कर्तव्यः । तत्र मनुः(१)—

संवत्सरेण पतति पतितेन सहाऽऽचरन् ।
याजनाध्यापनाद्योनाप्त तु यानासनाशनात् ॥' इति ।

यानादिभिस्संवत्सरेण पतति । याजनादिभिस्तु सद्य एव ॥ ५ ॥

तथाऽपपात्रैः ॥ ६ ॥

अपपात्राश्चण्डालादय । तैश्च संव्यवहारो न कर्तव्य ॥ ६ ॥

अथ पतनीयानि ॥ ७ ॥

द्विजातिकर्मभ्यो हानिः पतनं, तस्य निमित्तानि कर्माणि वक्ष्यन्ते ॥७॥

स्तेयमाभिशस्त्यं पुरुषवधो ब्रह्मोज्झं गर्भशातनं मातुः पितुरिति योनिसम्बन्धे सहापत्ये स्त्रीगमनं सुरापानमसंयोगसंयोगः ॥ ८ ॥

स्तेयं सुवर्णचौर्यम् । आभिशस्त्यं ब्रह्महत्या । 'ब्राह्मणमात्रं च हत्वाभिशस्त' (२४ ७.) इति वक्ष्यमाणत्वात् । पुरुषवधो मनुष्यजातिवधः । तेन स्त्रीवधोऽपि गृह्यते । ब्रह्मोज्झं उज्झ उत्सर्गे । भावे घञ् । छान्दसो लिङ्व्यत्ययः । ब्रह्म वेदः तस्याऽधीतस्य नाशनं ब्रह्मोज्झम् । औषधादिप्रयोगेण गर्भस्य वधो गर्भशातनम् । मातुर्योनिसम्बन्धे मातृष्वस्रादौ । पितुर्योनिसम्बन्धे पितृष्वस्रादौ सहापत्ये अपत्येन सहिते स्त्रीगमन मातृष्वसुगमनं तत्सुतागमनं मातुलसुतागमनं चेत्यर्थः ।

(२)'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः ॥

इति मानवे निषिद्धायाः सुरायाः, पानं सुरापानम् । असंयोगाः, संयोगानर्हाः प्रतिलोमादयः । तैः संयोग एकगृहवासादिः असंयोगसंयोगः । एतानि पतनीयानि ॥ ८ ॥

गुर्वीसखिं गुरुसखिं च गत्वाऽन्यांश्च परतल्पान् ॥ ९ ॥

---

१. म स्मृ ११. १८० २. म. स्मृ ११ ९४.

सखीशब्दस्य छान्दसो ह्रस्वः । गुर्वीसखी मात्रादीनां सखी । गुरुसखी पित्रादिनां सखी तां गत्वा । किम्? पततीत्युत्तरत्र श्रुतमपेक्ष्यते । अन्याश्च परतल्पान् गत्वा पतति । तल्पशब्देन शयनवाचिना दारा लक्ष्यन्ते ॥ ९ ॥

नाऽगुरुतल्पे पततीत्येके ॥ १० ॥

गुरुदारव्यतिरेकेण परतल्पगमने पातित्यं नास्तीत्येके मन्यन्ते । यद्यपि सामान्येन पतनीयानीत्युक्तम् , प्रायश्चित्ते तु गुरुलघुभावो द्रष्टव्यः ॥ १० ॥

अधर्माणां तु सततमाचारः ॥ ११ ॥

तुश्चार्थे । उक्तव्यतिरिक्तानामप्यधर्माणां सततमाचारः पतनहेतुः ॥११॥

अथाऽशुचिकराणि ॥ १२ ॥

अशुचिं पुरुषं कुर्वन्तीत्यशुचिकराणि, तानि वक्ष्यन्ते ॥ १२ ॥

शूद्रगमनमार्यस्त्रीणाम् ॥ १३ ॥

त्रैवर्णिकस्त्रीणां शूद्रगमनमशुचिकरम् ॥ १३ ॥

प्रतिषिद्धानां मांसभक्षणम् ॥ १४ ॥

येषां मांसं प्रतिषिद्धं तेषां मांसस्य भक्षणमशुचिकरम् ॥ १४ ॥

तत्रोदाहरणम्—

शुनो मनुष्यस्य च कुक्कुटसूकराणां ग्राम्याणां क्रव्यादसाम् ॥ १५ ॥

ग्राम्याणामिति वचनादारण्यानामप्रतिषेधः । अदनमदः, भावेऽसुन्प्रत्ययः । क्रव्यविषयमदनं येषां ते क्रव्यादसः केवलं मांसवृत्तयो गृध्रादयः ॥ १५ ॥

मनुष्याणां मूत्रपुरीषप्राशनम् ॥ १६ ॥

मूत्रपुरीषग्रहणं तादृशस्य रेतसोऽप्युपलक्षणम् ॥ १६ ॥

शूद्रोच्छिष्टमपपात्रगमनं चाऽऽर्याणाम् ॥ १७ ॥

शूद्रोच्छिष्टं भुक्तमार्याणां त्रैवर्णिकानामशुचिकरम् । अपपात्राः प्रतिलोमस्त्रियः तासां च गमनम् ॥ १७ ॥

एतान्यपि पतनीयानीत्येके ॥ १८ ॥

यान्येतान्यशुचिकरत्वेनाऽनुक्रान्तानि एतान्यपि पतनीयान्येवेत्येके मन्यन्ते।

अतोऽन्यानि दोषवन्त्यशुचिकराणि भवन्ति ॥१९॥

उक्तव्यतिरिक्तानि दोषवन्ति कर्माणि दुष्प्रतिग्रहहिंसादीनि तान्यशुचिकराणि भवन्ति ॥ १९ ॥

दोषं बुध्वा न पूर्वः परेभ्यः पतितस्य समाख्याने स्याद्वर्जयेत्स्वेन धर्मेषु ॥ २० ॥

पतितस्य दोषं परैरविदितं बुध्वा परस्य समाख्याने पूर्वो न स्यात् । परैरविदितं स्वयं विद्वानपि न परेभ्यः पूर्वमाचक्षीत । किं तु स्वयं धर्मकृत्येष्वेन वर्जयेत्, यथा परे न जानन्ति । अन्यथा दोषवान् स्यात् ॥२०॥

इत्यापस्तम्बधर्मसूत्रवृत्तावेकविंशी कण्डिका ॥ २१ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने सप्तमः पटलः ॥७॥

अथाऽष्टमः पटलः ॥

(अध्यात्मपटलः)

अध्यात्मिकान् योगाननुतिष्ठन्न्यायसंहिताननैश्चारिकान् १

श्रीमच्छङ्करभगवत्पादप्रणीतं विवरणम् ॥

अथ 'अध्यात्मिकान् योगान्'—इत्याद्यध्यात्मपटलस्य संक्षेपतो विवरण प्रस्तूयते। किमिह प्रायश्चित्तप्रकरणे समाम्नानस्य प्रयोजनमिति । उच्यते—कर्मक्षयहेतुत्वसामान्यात्। अनिष्टकर्मक्षयहेतूनि हि प्रायश्चित्तानि भवन्ति। सर्वे च कर्म वर्णाश्रमविहितमनिष्टमेव विवेकिनः, देहग्रहणहेतुत्वात्। तत्क्षयकारणं चाऽऽत्मज्ञानम्, प्रवृत्तिहेतुदोषनिवर्तकत्वात्। दोषाणां च निर्घाते आत्मज्ञानवतः पण्डितस्य धर्माधर्मक्षये क्षेमप्राप्तिरिह विवक्षितेत्यात्मज्ञानार्थमध्यात्म(१)पटलमारभ्यते, कर्मक्षयहेतुत्वसामान्यात्।

ननु वर्णाश्रमविहितानां कर्मणामफलहेतुत्वात् तत्क्षयो नेष्ट इति, न,

"सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्" (२. २. २.)

इत्यादिश्रवणात्। अपरिमितवचनात् क्षेमप्राप्तिरेवेति चेन्न, 'तत्परिवृत्तौ कर्मफलशेषेण' (२ २. ३.) इत्यादिश्रवणात्। गौतमश्च—

(२)'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय" इत्यादिना संसारगमनमेव दर्शयति कर्मणां फलम्। सर्वाश्रमाणां हि दोषनिर्घातलक्षणानि समयपदानि विधिनाऽनुतिष्ठन् सार्वगामी भवति, न तु स्वधर्मानुष्ठानात्। वक्ष्यति च—

'विधूय कविः' (२२. ५) "सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्याऽत्मानमन्विच्छेद्" (२. २१. १३) इत्यादि।

"तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति"(२. २१. २)

---

१. अत्र पटलशब्दो नपुंसकलिङ्गः प्रयुक्तः। 'समूहे पटलं न ना' (अमरको. ३. ३. २००) इत्यमरकोशात्तु समूहवाचिनः पटलशब्दस्यैव क्लीबत्वम्। 'तिलके च परिच्छेदे पटलः' इति शेषकोशात् परिच्छेदवाचकस्य पटलशब्दस्य तु पुल्लिङ्गतैवेत्यवगम्यते। अत एव च सर्वे ग्रन्थकाराः 'इति प्रथमः पटलः, इत्येव लिखन्ति। अतोऽत्रापि पुल्लिङ्गेनैव भाव्यं यद्यपि पटलशब्देन तथापि भेदाविवक्षया प्रयोग कृत इति भाति॥

२ गौ. ध. ११. २९

इति वचनात् क्षेमशब्दस्य चाऽपवर्गार्थत्वात् सर्वाश्रमकर्मणां ज्ञानरहितानामेव फलार्थत्वं, ज्ञानसंयुक्तानि तु क्षेमप्रापकाणि, यथा विषदध्यादीनि मन्त्रशर्करादिसंयुक्तानि कार्यान्तरारम्भकाणि, तद्वदिति चेत्-न; अनारभ्यत्वात् क्षेमप्राप्तेः । यदि हि क्षेमप्राप्तिः कार्या स्यात् तत इद चिन्त्यम्-किं केवलैः कर्मभिरारभ्या? ज्ञानसहितैर्वा?ज्ञानकर्मभ्यां वा? केवलेन ज्ञानेन कर्मासंयुक्तेन वेति । न त्वारभ्या केनचिदपि; क्षेमप्राप्तेः नित्यत्वात् । अतोऽसदिदम्-ज्ञानसंयुक्तानि कर्माणि क्षेमप्राप्तिमारभन्ते इति । ज्ञानसंयुक्तानां ज्ञानवदेव क्षेमप्राप्तिप्रतिबन्धापनयकर्तृत्वमिति चेत्-न, सकार्यकारणानामेव कर्मणां क्षेमप्राप्तिप्रतिबन्धकत्वात् । अविद्यादोषहेतूनि हि सर्वकर्माणि सहफलैः कार्यभूतैः क्षेमप्राप्तिप्रतिबन्धकानि । तदभावमात्रमेव हि क्षेमप्राप्तिः । न च तदभाव आत्मज्ञानादन्यतः कुतश्चिदुपलभ्यते । तथाह्युक्तम्—

"निर्हृत्य भूतदाहान् क्षेमं गच्छति पण्डितः" (२२. ११.) इति । पाण्डित्यं चेहात्मज्ञानं, प्रकृतत्वात् । श्रुतेश्च (१)"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" इति । अभयं हि क्षेमप्राप्तिः । (२)'अभयं वै जनक ! प्राप्तोऽसि' इति श्रुत्यन्तरात् ।

"तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति" (२.२१.२.) इत्याचार्यवचनमन्यार्थम् । कथम् ? यथोपदिष्टेष्वाश्रमधर्मेष्वव्यग्रो निष्कामस्सन् प्रवर्तमानो ज्ञानेऽधिकृतो भवति, न यथेष्टं(३) चेष्टन् कामकामी जायापुत्रवित्तादिकामापहृतव्यग्रचेताः । ज्ञानी च सन् सर्वसन्न्यासकर्मेण क्षेमं गच्छतीत्येषोऽर्थः । न हि दोषनिर्घातः कदाचिदपि कर्मभ्य उपपद्यते । समिथ्याज्ञानानां हि दोषाणां प्रवृत्तौ सत्यां प्राबल्यमिहोपलभ्यते । 'सङ्कल्पमूलः कामः' इति च स्मृतेः । प्रवृत्तिमान्ये च' दोषतनुत्वदर्शनात् । न चाऽनिर्हृत्य समिथ्याज्ञानान् दोषान् क्षेमं प्राप्नोति कश्चित् । न च जन्मान्तरसञ्चितानां शुभकर्मणां विहितकर्मभ्यो निवृत्तिरुपपद्यते, शुद्धिसामान्ये विरोधाभावात् । सत्सु च तेषु तत्फलोपभोगाय शरीरग्रहणं, ततो धर्माधर्मप्रवृत्तरागद्वेषौ, पुनः शरीरग्रहणं चेति संसारः केन वार्यते ? तस्माच्च कर्मभ्यः क्षेमप्राप्तिस्तत्प्रतिबन्धनिवृत्तिर्वा।

कर्मसहिताज्ज्ञानादविद्यानिवृत्तिरिति चेत् ! यद्यपि ज्ञानकर्मणोर्मिश्रकार्यत्वाद् विरोधः तथापि तैलवर्त्यग्नीनामिव संहत्य कर्मणा

१. तैत्ति. उ. २, ९. २. बृ. उ. ४. २. ४.

३. 'चेष्टन्' इति शत्रन्तः प्रयोगस्साधुरिति न प्रतीमः ।

ज्ञानमविद्यादि संसारकारणं निवर्तयतीति चेन्न । क्रियाकारकफलानुपमर्देनाऽऽत्मलाभाभावात् ज्ञानस्य कर्मभिः संहतत्वानुपपत्तेः । तैलवर्त्यग्नीनां तु सहभावित्वोपपत्तेरितरेतरोपकार्योपकारकत्वोपपत्तेश्च संहतत्वं स्यात् । न तु ज्ञानकर्मणोस्तदुभयानुपपत्तेः संहतत्वं कदाचिदपि सम्भवति । केवलज्ञानपक्षे शास्त्रप्रतिषेधवचनादयुक्तमिति चेन्न । ज्ञानकार्यानिवर्तकत्वाच्छास्त्रप्रतिषेधवचनस्य ।

योऽयं कर्मविधिपरैः केवलज्ञानपक्षस्य सर्वसन्न्यासस्य विप्रतिषेधो विरोधः, स नैव ज्ञानकार्यमविद्यादोषक्षयं वारयति (१)'भिद्यते हृदयग्रन्थिः' (२)'तस्य तावदेव चिरम्' (३)'मृत्युमुखात् प्रमुच्यते' इत्येवमादिश्रुतिस्मृतिशतसिद्धम्, कर्मविधिपरत्वात् प्रवृत्तिशास्त्रस्य । न च (तत्) ज्ञानस्वरूपं ब्रह्मात्मैकत्वविषयं वारयति, सर्वोपनिषदामप्रामाण्यानर्थक्यप्रसङ्गात्, 'पुः प्राणिनः'(२२ ४.) 'आत्मा वै देवता' इत्यादिस्मृतीनां च । तस्माद्यद्यपि बहुभिः प्रवृत्तिशास्त्रैर्विप्रतिषिद्धं केवलज्ञानशास्त्रमात्मैकत्वविषयमलं, तथापि सकार्यस्य ज्ञानस्य बलवत्तरत्वान्न केनचिद्वारयितुं शक्यम् ।

जीवतो दुःखानिवर्तकत्वाज्ज्ञानस्याऽनैकान्तिकं क्षेमप्रापकत्वमिति चेत्, न, 'भिद्यते हृदयग्रन्थिः' 'ब्रह्मविदाप्नोति परम्', 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' (४)'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिस्मृतिन्यायेभ्यः । बहुभिर्विप्रतिषिद्धत्वात् सर्वत्यागशास्त्रस्य लोकवत् त्याज्यत्वमिति चेन्न, तुल्यप्रमाणत्वात् । मानसान्तानि सर्वाणि कर्माण्युक्त्वा । (५)"तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्" इति तपःशब्दवाच्यानां कर्मणामवरत्वेन संसराविषयत्वमुक्त्वा न्यासशब्दवाच्यस्य ज्ञानस्य केवलस्य 'न्यास एवात्यरेचयत्' (६)'त्यागेनैके अमृतत्वमानशुः' इत्यमृतत्वफलं दर्शयति शास्त्रम् ।

(७)"तस्यैव विदुषो यज्ञस्याऽऽत्मा यजमानः" इत्यादिना च विदुषः सर्वकर्म(मी)मांभावं दर्शयति;

"द्वौ पन्थानावनुनिष्क्रान्ततरौ कर्मपथश्चैव पुरस्तात् सन्न्यासश्च, तयोः सन्न्यास एवातिरेचयति"

इति च । विप्रतिषेधवचनस्य निन्दापरत्वादयुक्तमिति चेन्न । अ-

---

१ मु. उ. २. २. ८. २. छा. उ. ६. १४. २. २. कठो. २. ३ १५,
४. मुण्ड. उ. ३. २ ९. ५. नारा. उ. ७८.
६. नारा. उ. ३. ७. नारा. उ. ८०

विद्वद्विषयस्य कर्मणः स्तुत्यर्थत्वोपपत्तेः । मन्दबुद्धयो हि लोकेऽदृष्टप्रयोजनाः प्ररोचनेन प्रवर्तयितव्याः कर्मसु । न दृष्टप्रयोजना विद्वांसः । परनिन्दा हि परस्तुतिरिति केवलज्ञाननिन्दया कर्मस्तुतिपरमाचार्यवचनम् ।

यत्तु "बुद्धे चेत् क्षेममप्रापणम्, इहैव न दुःखमुपलभेत" (२.२१.१६) इति ज्ञानस्य साधनत्वानैकान्तिकवचनं, तद् (१) 'ब्रह्मविदाप्नोति परम्' इत्यादिवाक्येभ्यः प्रत्युक्तम्, आचार्यान्तरवचनाच्च 'त्यज धर्ममधर्मं च' 'न तत्र क्रमते बुद्धिः' 'नैष्कर्म्यमाचरेत्' 'तस्मात् कर्म न कुर्वन्ति' इत्यादेः । तस्मात् केवलादेव ज्ञानात् क्षेमप्राप्तिः ॥

अध्यात्मिकान् योगानिति । अध्यात्मं भवन्तीत्यध्यात्मिकाः । छान्दसं ह्रस्वत्वम् । के ते अध्यात्मिका योगाः ? वक्ष्यमाणा अक्रोधादयः । ते हि चित्तसमाधानहेतुत्वाद् योगाः । बाह्यनिमित्तनिरपेक्षत्वाच्चाध्यात्मिकाः । तानध्यात्मिकान् योगान् । न्यायसहितान् उपपत्तिसमन्वितान् । ते हि क्रोधादिषु दोषनिर्घातं प्रति समर्था उपपद्यन्ते न्यायतः । अनैश्चारिकान् निश्चारयन्ति मनोऽन्तःस्थं बहिर्विषयेभ्य इति नैश्चारिकाः क्रोधादयो दोषाः, तत्प्रतिपक्षभूता ह्येते ऽनैश्चारिकाः । अक्रोधादिषु हि सत्सु चित्तमनिश्चरणस्वरूपं प्रसन्नमात्मावलम्बनं तिष्ठति । अतस्ताननुतिष्ठेत् सेवेत । अक्रोधादिलक्षणं चित्तसमाधानं कुर्यादित्यर्थः । तथा हि परः स्व आत्मा लभ्यते । क्रोधादिदोषापहृतचेतस्तया हि स्वोऽपि पर आत्माऽविज्ञातोऽलब्ध इव सर्वस्य यतः, अतस्तल्लाभाय योगानुष्ठानं कुर्यात् ॥ १ ॥

उज्ज्वला ।

उक्तानि पतनीयान्यशुचिकराणि च कर्माणि । तेषां प्रायश्चित्तानि वक्ष्यन्नादित आत्मज्ञानं तदुपयोगिनश्च योगानधिकुरुते । तस्यापि सर्वपापहरत्वेन मुख्यप्रायश्चित्तत्वात् । श्रूयते हि—

(२)भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' इति ।

(३)'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यास्य सर्वे पाप्मानः प्रदूयन्त' इति च । याज्ञवल्क्योऽप्याह—

(४)इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम् ॥' इति ।

---

१. तै. उ. २. १. २. मुण्डकोप. २. २ ८
३. छा. उ. ५. २४. ३ ४. या स्मृ. १. ८.

अध्यात्मनि भवानध्यात्मिकान्। छान्दसो वृद्ध्यभावः। आत्मनो लम्भयितॄन्। योगान् चित्तसमाधानहेतून् वक्ष्यमाणानक्रोधादीनुपायान्। अनुतिष्ठेत् सेवेत न्यायसंहितान् उपपत्तिसमन्वितान्, उपपद्यन्ते हि ते न्याय्यतः क्रोधादीना दोषाणा निर्घाते। अनैश्चारिकान् निश्चारश्चित्तस्य बहिर्विक्षेपः, तस्मै ये प्रभवन्ति क्रोधादयो वक्ष्यमाणाः ते नैश्चारिकाः तत्प्रतिपक्षभूतान्। अक्रोधादिषु सत्सु चित्तमनिश्चरणशीलमात्मालम्बनं निश्चलं तिष्ठति तस्मात्ताननुतिष्ठेत्। आत्मानं लब्धुमक्रोधादिलक्षण चित्तसमाधानं कुर्यादिति ॥ १ ॥

विवरणम्।

पुत्रवित्तादिलाभो हि परो दृष्टो लोके। किमात्मलाभेन ? इत्यत आह—

आत्मलाभान्न परं विद्यते ॥ २ ॥

आत्मलाभाद् आत्मनः परस्य स्वरूपप्रतिपत्तेः न पर लाभान्तरं विद्यते। तथा विचारित बृहदारण्यके(१)'तदेतत् प्रेयः पुत्राद्' इत्यादिना ॥ २ ॥

उज्ज्वला।

किंपुनरात्मा प्रयत्नेन लब्धव्यः ? ओमित्याह—

आत्मलाभात्परमुत्कृष्टं लाभान्तर नास्ति। तस्मात्तस्य लाभाय यत्न आस्थेय इति। कः पुनरसावात्मा ? प्रत्यगात्मा। नन्वसौ नित्यलब्धः। न हि स्वयमेव स्वस्याऽलब्धो भवति। सत्यम्, प्रकृतिमेलनात्तद्धर्मतामुपगतो विनष्टस्वरूप इव भवति। प्रकृत्या हि नित्यसम्बद्धः पुरुषः। तथाविधश्च सम्बन्धो यथा परस्पर विवेको न ज्ञायते। अन्योन्यधर्माश्चान्योऽन्यत्राऽध्यस्यन्ते। यथा क्षीरोदके सम्पृक्ते न ज्ञायते विवेकः—इयत् क्षीरमियदुदकमिति, अमुष्मिन्नवकाशे क्षीरममुष्मिन्नवकाश उदकमिति। यथा वा अग्नियोगोलकयोरभिसम्बद्धयोर्यै अग्निधर्मा उष्णत्वभास्वरत्वादयः ते अयोगोलके ऽध्यस्यन्ते। ये वा अयोगोलकधर्माः काठिन्यदैर्घ्यादयः ते ऽग्नावध्यस्यन्ते। एवं हि तत्र 'प्रतिपत्तिः—एकं वस्तु उष्णं दीर्घं भास्वरं कठिनमिति। तद्वदिहापि पुरुषधर्माश्चैतन्यादयः प्रकृतावध्यस्यन्ते। प्रकृतिधर्माश्च सुखदुःखमोहपरिणामादयः पुरुषे। ततश्च एकं वस्तु चेतनं सुखादिकलिल परिणामीति व्यवहारः।

वस्तुतस्तु तस्मिन् सङ्घाते अचेतनांशः परिणामी। चेतनांशस्तु तमनुधावति। येन येन रूपेण परिणमति तेन तेनाऽभेदाध्यासमापद्यते।

---

१. बृह उ. १. ४. ८.

यथा क्षीरावस्थागतं घृतं क्षीरे दध्यात्मना परिणमति तामप्यवस्थामनुप्रविशति तद्वदिहापि । तदिदमुच्यते-(१)'तत्सृष्ट्वा तदेवानुप्राविश' दिति । सर्गेऽप्यात्मनः कर्तृत्वमिदमेव-यदुत भोक्तृतया निमित्तत्वम् । तदेवं स्वभावतः स्वच्छोऽप्यात्मा प्रकृत्या सहाभेदमापन्नः तद्धर्मा भवति। एवं तद्विकारेण महता तद्विकारेणाऽहङ्कारेण, इत्याशरीरादुद्रष्टव्यम् । स्थूलोऽहं कृशोऽहं देवोऽहं मनुष्योऽहं तिर्यगहमिति । तस्यैवंगतस्यापेक्षितव्यस्वरूपलाभः नीचैरिव वर्धितस्य राजपुत्रस्य । तद्यथा-शबरादिभिर्बाल्यात्प्रभृति स्वसुतैस्सह संवर्धितो राजपुत्रस्तज्जातीयमात्मानमवगमयन्मात्रा स्वरूपे कथिते लब्धस्वरूप इव भवति । तथा प्रकृत्या (२)वेद्ययैव स्वरूपान्तरं नीत आत्मा मातृस्थानीयया(३) 'तत्त्वमसी' ति श्रुत्या स्वभाव नीयते-यदेवंविधं परिशुद्धं वस्तु तदेव त्वमसि, यथा मन्यसे 'मनुष्योऽहं दुःखयह' मित्यादि न तथेति । यथा य एवंभूतो राजा स त्वमसीति राजपुत्र. ।

ननु तत्त्वमसीति ब्रह्मणा तादात्म्यमुच्यते। को ब्रूते ? नेति । ब्रह्माऽपि नान्यदात्मनः । किं पुनरयमात्मा एक ? आहो स्विन्नाना ? किमनेन ज्ञानेन ? त्वं तावदेवंविधश्चिदेकरसो नित्यनिर्मलः संसर्गात्कलुषतामिव गतः । तद्वियोगश्च ते मोक्षः । त्वयि मुक्ते यद्यन्ये सन्ति ते संसरिष्यन्ति । का ते क्षतिः ? अथ न सन्ति तथापि कस्ते लाभ इत्यलमियता । महत्येषा कथा । तदप्येते श्लोका भवन्ति-

नीचानां वसतौ तदीयतनयैः सार्धं चिरं वर्धित
स्तज्जातीयमवैति राजतनयः स्वात्मानमप्यञ्जसा ।
संघाते महदादिभिस्सहवसंस्तद्रूपरः पूरुषः
स्वात्मानं सुखदुःखमोहकलिलं मिथ्यैव धिङ्मन्यते ॥ १ ॥
दाता भोगपरः समग्रविभवो यः शासिता दुष्कृतां
राजा स त्वमसीति मातृमुखतः श्रुत्वा यथावत्स तु ।
राजीभूय(४) जयार्थमेव यतते तद्वत्पुमान् बोधितः
श्रुत्या तत्त्वमसीत्यपास्य दुरितं ब्रह्मैव सम्पद्यते ॥ २ ॥
इत्येवं बहवोऽपि राजतनयाः प्राप्ता दशामीदृशीं
नैवान्योन्यभिदामपश्य सहसा सर्वे भजन्त्येकताम् ।
किं तु स्वे परमे पदे पृथगमी तिष्ठन्ति भिन्नास्तथा

---

१. तै. उ. २. ६. २. वद्यया. इति. ख. पु
३. छा. उ. ६. ९. ३, ४. यथार्थमेव क. पु.

क्षेत्रज्ञा इति तत्त्वमादिवचसः का भेदवादे क्षतिः ॥ ३ ॥
तेष्वेको यदि जातु मातृवचनात् प्राप्तो निजं वैभवं
नान्येन क्षतिरस्य यत्किल परे सत्यन्यथा च स्थिता ।
यद्वान्ये न भवेयुरेवमपि को लाभोऽस्य तद्वद्गतिः
पुंसामित्यभिदां भिदां च न वयं निर्बध्य निश्चिन्महे॥४॥ इति॥

तत्राऽऽत्मलाभीयाञ्श्लोकानुदाहरिष्यामः ॥ ३ ॥

विवरणम् ।

सत्य क्रोधादयो दोषा आत्मलाभप्रतिबन्धभूता अक्रोधादिभिर्नि र्ह(न्य?न्य)न्ते; तथापि न मूलोद्धर्तनेन निवृत्तिः क्रोधादीनाम्, सर्वदोष-बीजभूतमज्ञानं न निवृत्तमिति तस्य चाऽनिवृत्तौ बीजस्याऽनिवर्तित त्वात् सकृन्निवृत्ता अपि क्रोधादयो दोषा पुनरुद्भविष्यन्तीति ससा-रस्याऽऽत्यन्तिकोच्छेदो न स्यात् । तद्दोषबीजभूतस्याऽज्ञानस्य मतान्, ज्ञानादन्यतो न निवृत्तिरित्यात्मस्वरूपप्रकाशनायात्मज्ञानाय मतान् शास्त्रान्तरोपनिबद्धयः, तत्र तस्मिन् आत्मलाभप्रयोजने निमित्ते । आ त्मानं करतलन्यस्तमिव ल(म्भि ? म्भयि)तुं समर्थान् आत्मलाभीयान् श्लोकानुदाहरिष्यामः उद्धृत्याऽऽहरिष्याम. । ग्रन्थीकृत्य दर्शयिष्याम इत्यर्थः ॥ ३ ॥

उज्वला ।

तदिहाऽपेक्षितमात्मज्ञानमुपादिश्यते । तच्च त्रिविधम्-श्रुतं मननं निदिध्यासनमिति । (२)श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रवणात् । तत्र श्रुतमुपनिषदादिशब्दजन्यं ज्ञानम् । मननमुपपत्तिभि र्निरूपणम् । एवं श्रुते मते चात्मनि साक्षात्कारहेतुरविक्षिप्तेन चेतसा निरन्तरं भावना(३)निदिध्यासनम्। तत्राऽऽत्मसिद्धये श्रोतं ज्ञानं तावदाह-

तत्रेति वाक्योपन्यासे । आत्मलाभीयानात्मलाभप्रयोजनान् । अनुप्रव-चनादिषु दर्शनाच्छलप्रत्ययः । श्लोकान् पादबद्धानौपनिषदान् मन्त्रान् । उदाहरिष्यामः उद्धृत्याहरिष्यामः ग्रन्थे निवेशयिष्यामः ॥ ३ ॥

पूः प्राणिनः सर्व एव गुहाशयस्याऽहन्यमानस्य
विकल्मषस्याऽचलं चलनिकेतं येऽनुति-
ष्ठन्ति तेऽमृताः ॥ ४ ॥

---

१. बृ. उ. २. ४. ५ २. ध्यानमिति. ख. च. पु.

विवरणम् ।

पूः पुरं शरीरम् । प्राणिन प्राणवन्तः । सर्व एव ब्रह्मादीनि स्तम्बपर्यन्तानि प्राणिनः । पुरं पुरमिव राज्ञः उपलब्ध्यधिष्ठानम् । कस्य पुरम् ? गुहाशयस्याऽऽत्मनः । यथा स्वकीयपुरे राजा सचिवादिपरिवृत उपलभ्यते, एव देहस्थात्मा बुद्ध्यादिकरणसंयुक्त उपलभ्यते । उपलभते च बुद्ध्यादिकरणोपसंहृतान् भोगान् । अतोऽविद्यावरणात्मभूतायां बुद्धिगुहायां शेत इति गुहाशयः । तस्य पुरम् । तस्यां बुद्धावविद्यादिदोषमलापनये विद्वद्भिस्त्यक्तैषणैरुपलभ्यते । इदमपरं विशेषणं गुहाशयस्याऽहन्यमानस्य, छेदनभेदनजरारोगादिभिर्हन्यमाने देहे न हन्यते । (१)'न वधेनाऽस्य हन्यते' इतिच्छान्दोग्ये । तस्य विकल्मषस्य, कल्मषं पापं तदस्य नास्तीति विकल्मषः । सर्वे ह्यविद्यादोषसहितं धर्माधर्माख्यं कर्म कल्मषं भवति, विकल्मषस्येति विशेषणेन तत् प्रतिषिध्यते तत्कार्यं जरारोगादिदुःखरूपमहन्यमानस्येति । एवं हेतुफलसम्बन्धरहितस्याऽसंसारिण उपलब्ध्यधिष्ठानं पूः सर्वे प्राणिनः । अतो न संसार्यन्यो ऽस्ति । (२)'एको देवः सर्वभूतेषु गूढ' इति श्वेताश्वतरे । (३)"एष सर्वेषु भूतेषु गुढोऽत्मा न प्रकाशते" इति च काठके । (४)'नान्यदतोऽस्ति द्रष्टा' इत्यादि वाजसनयके । (५) 'स आत्मा तत्त्वमसी'ति च छान्दोग्ये । पूर्वार्धेन ब्रह्मणो याथात्म्यमुक्त्वोत्तरार्धेन तद्विज्ञानवतस्तद्विज्ञानफलमाह—यस्य सर्वे प्राणिनः पुर अहन्यमानस्य विकल्मषस्य, तस्य सर्वप्राणिसम्बन्धादर्थसिद्धमाकाशवत् सर्वगतत्वम्, 'आकाशवत् सर्वगतश्च नित्य' इति च श्रुतेः। सर्वगतस्य चाऽचलत्वमर्थसिद्धमेव । तमचलं चलनिकेतं चलायां हि प्राणिगुहायां स्वयं शेते तमचलं चलनिकेतम् । येऽनुतिष्ठन्ति ममात्मेति साक्षात् प्रतिपद्यन्ते, तेऽमृताः अमरणधर्माणो भवन्ति ॥ ४ ॥

उज्वला ।

गुहेति प्रकृतिनाम ।

'यत्तत्स्मृत कारणमप्रमेयं ब्रह्म प्रधानं प्रकृतिप्रसूतिः ।
आत्मा गुहा योनि(६)रनाद्यनन्त क्षेत्रं तथैवामृतमक्षरं च ॥' इति

पुराणे दर्शनात् । तस्यां शेते तया जहाऽऽविभागमापन्नास्तिष्ठतीति गुहाशय आत्मा ।

---

१. छा. उ. ८ १० ४.
२. श्वेता. उ. ६. ११.
३. कठो १ ३, १२.
४. बृ. उ. ३. ८. ११
५. छा. ६. ८. ९.
६ अनायनन्त इति. ख. पुस्तके'

(१)'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः,
इति च मन्त्रान्तरम्। अहन्यमानस्य न ह्यसौ शरीरे हन्यमानेऽपि हन्यते
(२)तथा चोक्तं भगवता-(३)'न हन्यते हन्यमाने शरीरे' इति। विकल्मषस्य
निर्लेपस्य। सर्व एव हि धर्माधर्मादिरन्तःकरणस्य धर्मः, आत्मनि त्वध्य-
स्तः। एवंभूतस्यात्मनः सर्व एव प्राणिनः ब्रह्माद्यास्तिर्यगन्ताः प्राणादि-
मन्तः संघाताः पूः पुरं उपभोगस्थानम्। यथा राजा पुरमधिवसन्
सचिवैरानीतान् भोगानुपभुङ्क्ते, तथाऽयं देवादिशरीरमधिवसन् करणै-
रुपस्थापितान् भोगानुपभुङ्क्ते। तमेवंभूतमचलं सर्वगतत्वेन निश्चलम्।
चलनिकेतं निकेतं स्वस्थानं शरीरं तद्यस्य चलं तं येऽनुतिष्ठन्ति उपासते
एवंभूतोऽहमिति प्रतिपद्यन्ते, तेऽमृता मुक्ता भवन्तीति।' ४॥

विवरणम्।

कथं तदनुष्ठानमिति? उच्यते—

यदिदमिदिहेदिह लोके विषयमुच्यते।
विधूय कविरेतदनुतिष्ठेद्गुहाशयम्॥ ५॥

यदिदं प्रत्यक्षतोऽवगम्यमानं स्त्र्यन्नपानादिसंभोगलक्षणम्। इदिति
किञ्चिदर्थे। यत्किञ्चिदिदं प्रत्यक्षम्। इहाऽस्मिन् लोके। विषयम्।
इदंशब्दसामानाधिकरण्यान्नपुंसकलिङ्गप्रयोगो विषयमिति। उभयलि-
ङ्गो वा विषयशब्दः। द्वितीय इच्छब्द इहशब्दश्च। तयोः क्वचिन्नियो
गः। इच्छब्दश्चार्थे। इहशब्दोऽमुष्मिन्नर्थे। लोकशब्दः काकाक्षिवदुभ-
यत्र सम्बध्यते। इह लोके इह च लोकेऽमुष्मिंश्च यदिदं विषयमुच्यते,
स्वर्गादिलोके पार्श्वस्थमध्यस्थो व्यपदिशति इह लोके इति च लोके इत
तत्सर्वं विधूय परित्यज्य। कविः क्रान्तदर्शी, मेधावीत्यर्थः। फलं सा-
धनं च तद्विधूय एषणात्रयाद् व्युत्थायेत्यर्थः। अनुतिष्ठेद् गुहाशयं य-
थोक्तलक्षणमात्मतत्त्वम्॥ ५॥

उज्ज्वला।

विषयसङ्गपरित्यागेनाऽयमुपास्य इत्याह—

यदिद, विषयं, मेतदिति सर्वत्र लिङ्गव्यत्ययश्छान्दसः। एवमितिशब्दे
तकारस्य दकारः। इतिशब्दः प्रसिद्धौ। इहशब्द आश्चर्ये। इतिशब्देना-

---

१. तै. आ (नारायणोपनिषदि) १०. १.
२. 'तथा चोक्तं भगवता—न हन्यते हन्यमाने शरीरे।' इति नास्ति क. पुस्तके.
३. भगवद्गी. २. २०.

वृत्तेन शब्दादिषु विषयेष्ववान्तरप्रकारभेदः प्रतिपाद्यते। विषयापहृत चेतसो हि वदन्ति–'इति ह तस्या गीतम्, इति ह तस्याः सुखस्पर्शः, इति ह तस्या रूपं निष्टप्तमिव कनकम्, इति ह तस्याः स्वादिष्ठोऽधरमणिः, इति ह तस्या गन्धो घ्राणतर्पणः' इति। एवं दिव्यमानुषभेदोऽपि द्रष्टव्यः। अत्राऽनन्तरमपर इतिशब्दोऽध्याहार्यः। इति ह इति हेति योऽथ लोके विषय उच्यते, सामान्यापेक्षमेकवचनम्, एतद्धित्वा गुहाशयमनुतिष्ठेत्। कविर्मेधावी ॥ ५ ॥

विवरणम्।

तत् क्वाऽनुष्ठातव्यमिति। उच्यते—

आत्मन्नेवाऽहमलब्ध्वैतद्धितं सेवस्व नाऽहितम्।
अथाऽन्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया।
महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ॥ ६ ॥

आत्मन्नेव आत्मन्येव। प्रत्यगात्मा हि परमात्मा। सर्वं ह्यत्रानुष्ठेयम्। यदि देहादन्यत्राऽनुष्ठीयेत, सोऽनात्मा कल्पितः स्यात्। तस्माद् देहादिसङ्घात आत्मन्येव विधूय बाह्यासङ्गं गुहाशयमात्मतत्त्वमनुष्ठेयम्। किमन्येष्वननुष्ठेयमिति भगवतो मतम्? बाढम्, प्रथममेव नान्येष्वनुष्ठेयमात्मतत्त्वम्। कथं तर्हि? सर्वप्रयत्नेनाऽपि स्वदेहादिसङ्घाते यथोक्तमात्मतत्त्वं न लभेत, अथाऽहमन्येष्वादित्यादिषु प्रतीच्छामि अभिवाञ्छामि। साधुष्ठानं साधोः परमात्मनः उपलब्धिस्थानं, यत्र गुहाशयं ब्रह्मतत्त्वमनुष्ठेयम्। अनपेक्षयाऽन्यत् पुत्रवित्तलोकादिसुखं छित्वा निःस्पृहतया। न ह्यात्मानुष्ठानं बाह्यार्थाकाङ्क्षा च सह सम्भवतः। कस्मात् पुनरनेकान्यन्यानि हितप्रकाराण्यनपेक्ष्याऽऽत्मानुष्ठानमेव यत्नत आस्थीयत इत्यत आहाऽऽचार्यः—यथान्यान्यहितानि हितबुध्या परिगृहीतानि, न तथैवमात्मसेवनम्। किं तर्हि? (य)तद्धितमेव। तस्मात् सेवस्वेति। किंविशिष्टश्चाऽऽत्मा सेवितव्य इत्याह—महान्तम् अमितान्तम् अनन्त (र)त्वादबाह्यत्वाच्च महानात्मा, तं महान्तम्। गुणैर्वोपाधिसहचारिभिर्महान्तं, बृंहणमिति यद्वत्। तेजसस्कायं तेजःशरीरमित्यर्थः। चैतन्यात्मज्योतिःस्वरूपम्। तद्धि तेजसां तेजः। (१)'येन सूर्यस्तपति तेजसेद्धः'(२) 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। सर्वत्र सर्वदेहेषु ब्रह्मादिस्तम्बपर्यन्तेषु। निहितं स्थितम्, उपलब्धिरूपेणाभिव्यक्त-

---

१. तै. ब्रा. १३. ९. ७. २. मुण्ड. २. २. १०.

मित्यर्थः। न हि ब्रह्मणोऽभिव्यक्तिनिमित्तत्वव्यतिरेकेण कस्यचिदाधारत्वसम्भवः। निराधारं हि ब्रह्म, सर्वगतत्वोपपत्तेः। प्रभु प्रभवति सर्वानीश्वरान् प्रति, अचिन्त्यशक्तित्वात्। एवमाद्यनन्तगुणविशिष्टमात्मानं सेवस्वेति ॥ ६ ॥

उज्वला।

विषयत्यागे हेतुमाह—

शिष्यं प्रत्याचार्यस्य वचनमेतत्। द्वौ चात्र हेतू विषयाणां त्यागे—पराधीनत्वमहितत्वं च। महान्त गुणतः। तेजसस्कायं तेजसश्शरीरं तेजोराशिं स्वयंप्रकाशम्। (१)'आत्मज्योतिः सम्राडिति होवाचे'ति बृहदारण्यकम्। सर्वत्र निहित सर्वगतम्। प्रभु स्वतन्त्रम्। एवभूतं गुहाशयं एतावन्तं कालं अहमात्मन्, सप्तम्येकवचनस्य लुक्, आत्मनि। अस्मिन् मदीये सङ्घाते अन्यानपेक्षयैव लब्धुं योग्यमलब्ध्वा अथाऽन्येषु इन्द्रियादिषु तं तं विषयं प्रतीच्छामि लङर्थे लट्, प्रत्यैच्छम्। इदानीं तु त लब्ध्वा न तथाविधोऽस्मि। त्वमप्येतदेव हितं साधुष्ठानं साधुमार्गं सेवस्व नाहितं विषयानुधावनमिति ॥ ६ ॥

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः।
अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्छुचिः।
स सर्वं परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम्॥७॥

विवरणम्।

विशिष्टमात्मानं सेवस्वेति क्रियापदमनुवर्तते। किं च सर्वभूतेषु ब्रह्मादिष्वनित्येषु यो नित्योऽविनाशी। विपश्चिन्मेधावी, सर्वज्ञ इत्यर्थः। अमृतोऽत एव। यो ह्यनित्योऽसर्वज्ञः स मर्त्यो दृष्टः; अयं तु तद्विपरीतत्वादमृतः। ध्रुव अविचलः। निष्कम्पस्वभाव इत्यर्थः। अनङ्गः स्थूलशरीररहित इत्यर्थः। स्थूले हि शरीरे शिरआद्यङ्गानि सम्भवन्ति। अशरीर इति लिङ्गशरीरवर्जित इत्येतत्। अशब्दः नाऽस्य शब्दगुणः सम्भवति। शब्दविद्धि सन् अन्यथा शब्दात्मकः शब्दात्मकमेव विजानीयात्। न चैतदस्ति। अतोऽशब्दः। तथा अस्पर्शः आकाशवायुभूतद्वयगुणप्रतिषेधेन शब्दादयो गन्धावसानाः सर्वभूतगुणाः प्रतिषिद्धा वेदितव्याः। तत इदं सिद्धमाकाशादपि सूक्ष्मत्वम्। शब्दादिगुणबाहुल्याद्वाय्वादिषु स्थौल्यतारतम्यमुपलभ्यते। शब्दादिगुणाभावान्निरतिशयसूक्ष्मत्वं सर्वगतत्वादि चाऽप्रतिबन्धेन धर्मजातं तर्केणाऽपि

१. बृह. उ. ४. ३ ६. अत्र पाठभेदो दृश्यते.

शक्यं स्थापयितुम् । महान्, अत एव शुचिर्निरञ्जनः । अथवा शुचि. पावन इत्यर्थः । शुचि हि वस्तु पावनं दृष्टम्, यथा लोके वाय्वग्न्यादि । किञ्च य आत्मा प्रकृतः, स सर्वम् । (१)'इदं सर्वं यदयमात्मे'ति हि वाजसनेयके । न ह्यात्मव्यतिरेकेण किञ्चिन्निरूप्यमाणमुपपद्यते । अत एव परमा प्रकृष्टा । काष्ठा अवसानम् । (२)'सा काष्ठा सा परा गतिरि'ति काठके । संसारगतीनां अवसानं निष्ठा समाप्तिरित्यर्थः । स वैषुवतं मध्यं सर्वस्य, सर्वान्तरश्रुतेः । विषुवत्सु वा(३) दिवाकीर्त्येषु मन्त्रेषु नित्यं प्रकाश्यं भवतीति वैषुवतः । स परमात्मा ।

ननु 'स सर्वं परमा काष्ठा स वैषुवत'मित्युक्तम् । कस्मात् पुनस्तदात्मतत्त्वं विभक्तमुपलभ्यत इति । उच्यते—स परमात्मा वैभाजनं, विभाक्तिर्विभजनं विवेकः आत्मनो यस्मिन् देहे क्रियते, तत् । विभाजनमेव वैभाजनम् । आत्मनो विवेकोपलब्ध्यधिष्ठानं हि शरीरम् । तच्चाऽनेकधा विभक्तम् । तदुपाध्यनुवर्तित्वाद् वैभाजनम् सर्वथा शुद्धमेव सर्वैर्नोपलभ्यते । किं तर्हि ? विभक्तो विपरीतश्चोपलभ्यते ॥ ७ ॥

उज्वला ।

पुनरप्यसौ कीदृश इत्याह—

सर्वभूतेषु मनुष्यादिषु सङ्घातेषु यो नित्यः विनश्यत्स्वपि न विनश्यति विपश्चित् मेधावी चित्स्वरूपः । अमृतः नित्यत्वादेवाऽमरणधर्मा । अतः ध्रुवः एकरूपः, विकाररहितः । न प्रधानवद्विकारिणस्ततो धर्मिरूपेणाऽस्य नित्यत्वमित्यर्थः । अनङ्गः करचरणाद्यङ्गरहितः । अशब्दोऽस्पर्श इति भूतगुणानामुपलक्षणम् । शब्दादिगुणरहितः अशरीरः सूक्ष्मशरीरेणाऽपि वर्जितः । महाञ्च्छुचि. महत्त्व शौचस्य विशेषणम् । परमार्थतोऽत्यन्तशुद्धः । स सर्वं प्रकृत्यभेदद्वारेण । स एव परमा काष्ठा, ततः पर गन्तव्याभावात् । स वैषुवत विषुवान्नाम गवामयनस्य मध्ये भवमह. । 'एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये सम्वत्सरस्ये'ति दर्शनात् । विषुवानेव वै.

---

१ बृह उ. ४. ५. ७ २. काठ. १. ३ ११.

३. गवामयनाख्यस्सत्रसत्सरसाध्यस्सत्रविशेष । स एकषष्ट्यधिकशतत्रयदिवस (३६१) साध्यः । तत्राशीत्युत्तरशत (१८०) दिनानि पूर्व पक्ष. । तावन्त्येव दिनान्युत्तरं पक्षः । मध्यमं यदहरेकाशीत्युत्तरशततमरू (१८१) पं स विषुवान् । तत्र दिवाकीर्त्याख्य साम ब्रह्मसाम भवति । तेन च साम्ना परमात्मा गीयते । अतो विषुवद्वत् मध्यस्थानत्वात् तत्प्रतिपाद्यत्वाद्वा ब्रह्म वैषुवतमिति भाव. ।

षुवतम् । तद्यथा सम्वत्सरस्य मध्ये भवति एवमङ्गानामेष मध्ये । (१)'मध्यं ह्येषामङ्गानामात्मे'ति बह्वृचब्राह्मणम् । स एव च वैभाजनं पुरं विविधैर्भागैर्भजनीयं विभजनम् । तदेव वैभाजनं प्रज्ञादिरनुशासिकादिश्च । यथा समृद्धं पुरं सर्वैरर्थिभिः प्राप्यमेवमयमपीति ॥ ७ ॥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चाऽस्य सदाऽऽचरेत् ।
दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ॥ ८ ॥

विवरणम् ।

अतस्तदुपाध्यनुवर्तिस्वभावदर्शनमविद्याख्यं हित्वा विद्यया शास्त्रजनितदर्शनेन त यथोक्तलक्षणमात्मानमनुतिष्ठेत् । । सर्वत्र सर्वस्मिन् काले । किञ्च न केवलमनुष्ठानमात्रमस्य । प्राध्वं बन्धनम् आत्मैकत्वरसप्रवृत्तां स्थिरां बाह्यैषणाव्यावृत्तरूपां सर्वसन्न्यासलक्षणाम् । तद्धि बन्धनं विदुषो ब्रह्मणि । एवं हि बद्धो ब्रह्मणि संसराभिमुखो नाऽऽवर्तते । तस्माद् बन्धनं चाऽस्य सदाऽऽचरेत् । तदनुष्ठानबन्धने सदाचरतः किं स्यादिति ? उच्यते—दुर्दर्शं दुःखेन ह्येषणात्यागादिना स दृश्यत इति दुर्दर्शम् । निपुणं यस्माद्धि दुर्दर्शं तस्मान्निपुणम् । अत्यन्तकौशलेन समाहितचेतसा युक्तो यः पश्येत् साक्षादुपलभेत—अहमात्मेति, स मोदेत । एवं दृष्ट्वा हर्षमानन्दलक्षणं प्राप्नुयात् । विष्टपे विगतसन्तापलक्षणेऽस्मिन् ब्रह्मणीत्यर्थः ॥ ८ ॥

उज्वला ।

तमेवंभूतमात्मानं योऽनुतिष्ठेदुपासीत यश्चाऽस्य सर्वत्र सर्वास्ववस्थासु सदा प्राध्वमानुकूल्यमाचरेत् । आनुकूल्य प्रतीपिद्धवर्जनं नित्यनैमित्तिककर्मानुष्ठान च । यश्च दुर्दर्शं निपुण(२) सूक्ष्मतः युक्त. समाहितो भूत्वा पश्येत् साक्षात्कुर्यात् । सः विष्टपे विगतताप स्वे महिम्नि स्थितो मोदेत सर्वदुःखवर्जितो भवति । संसारदशायां वा तिरोहितं निरतिशयं स्वमानन्दमनुभवतीति ॥ ८ ॥

॥ इत्यापस्तम्बसूत्रवृत्तावुज्वलायां द्वाविंशी कण्डिका ॥ २२ ॥

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः ।
आत्मानं चैव सर्वत्र यः पश्यत्स वै ब्रह्मा नाकपृष्ठे विराजति ॥ ९ ॥ १ ॥

---

१. ऐ. ब्रा. ६. प. ८. ख. २. सूक्ष्ममेत इति क. ख. पु.

विवरणम् ।

किञ्च आत्मन् पश्यन् आत्मनि पश्यन् उपलभमानः । सर्वभूतानि सर्वाणि (भूतानि) । सर्वेषां भूतानामात्मस्वरूपतामेव पश्यन्नित्यर्थः । सवत्राऽऽत्मानं च परम् । न मुह्येत् मोह न गच्छेत् । न ह्यात्मैकत्वदर्शिनो मोहावतारः; (१)'तत्र को मोह' इति च मन्त्रलिङ्गात् । कीदृग्विशिष्टमात्मदर्शनं मोहनिबर्हणमित्याह—चिन्तयन् उपसंहृतकरणः कविः मेधावी सन् ध्यायमानः । न शब्दजनितदर्शनमात्रेण मोहापगमः । सर्वभूतेष्वनुप्रविष्टमेकं संव्यवहारकाले यो हि युक्तः पश्येत्, स वै ब्रह्मा ब्राह्मणः । नाकपृष्ठे सुकरागौ(?) ब्रह्मणि । विराजति विविधं दीप्यते ॥९॥

उज्वला ।

सर्वाणि भूतानि आत्मन् आत्मनि शेषत्वेन स्थितानि पश्यन् उपनिषदादिभिर्जानन् । पश्चाच्चिन्तयन् युक्तिभिर्निरूपयन्, यो न मुह्येत मध्ये मोहं न गच्छेत् । कविर्मेधावी । पश्चाच्च सर्वत्रैव शेषत्वेन स्थितमात्मनं पश्येत् साक्षात्कुर्यात् । स वै ब्रह्मा ब्राह्मण. नाकपृष्ठे तत्सदृशे स्वे महिम्नि स्थितो विराजति स्वयं प्रकाशते ॥ १ ॥

निपुणोऽणीयान् बिसोर्णाया यस्सर्वमावृत्य तिष्ठति ।
वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति ।
स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽ
नन्यस्य ज्ञेयात्परमेष्ठी विभाजः ।
तस्मात्काया: प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः॥

विवरणम् ।

किञ्च निपुण· सर्ववित् अणीयान् अणुतरो बिसोर्णायाः बिसततन्तोरपि । कोऽसौ ? य प्रकृत आत्मा सर्वं समस्तं जगदावृत्य संव्याप्य तिष्ठति । किञ्च वर्षीयान् वृद्धतरः स्थूलतरश्च पृथिव्याः । सर्वात्मको हि सः । ध्रुव. नित्यः सर्वं कृत्स्नमारभ्य संस्तम्भनं कृत्वा । तिष्ठति वर्तते । (२)'येन द्यौरुग्रा पृथवी च दृढा' इति मन्त्रलिङ्गात् । स सर्वेश्वरः सर्वज्ञः एको विज्ञेय इत्यर्थः । स परमात्मा इन्द्रियैर्जन्यते यज्ज्ञानं जगतोऽस्य, तस्मात् ज्ञानादन्यो विलक्षणः, लौकिकज्ञानादन्य इति विशेषणाज्ज्ञानात्मक इत्यतेत् सिद्धम् । 'सत्यं ज्ञानमनन्तमि'ति च श्रुतेः । अस्य जगत इन्द्रियजन्यज्ञानादन्य इत्युक्तम् । अतश्च तद्व्यतिरिक्तं ज·

१. ईशा. उ. ७. २. ऋ ८. ७. ३.

गादिति प्राप्तम् । अतस्तन्मा भूदित्याह—अनन्यस्य अपृथग्भूतस्य जगतः, ज्ञेयात् ज्ञातव्यात् परमार्थस्वरूपाद्व्यात् परमेश्वराद् घटादेरिव मृदः । स च परमेष्ठी परमे प्रकृष्टे स्वे महिम्नि हृदाकाशेऽवस्थातुं शीलमस्येति परमेष्ठी । स्वयमेव विभाजः विभक्तो देवपितृमनुष्यादिना ज्ञातृज्ञेयज्ञानभेदेन च, यस्मात् स एव ज्ञेय आत्मा स्वतो विभजति जगदनेकधा । तस्मादेवाऽऽत्मनः काया. शारीराण्याकाशादिक्रमेण प्रभवन्ति सर्वे ब्रह्मादिलक्षणाः । अतो मूलं स जगतः । (१)'यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः । अत एव स शाश्वतिकः । यो हि पृथिव्यादिविकारः, सोऽब्दादिक्रमेण विनश्येत्, पर मूलकारणमापद्यते, सोऽशाश्वतिकोऽनित्यः । अयं चाऽऽत्मा परं मूलम् । न तस्याऽप्यन्यन्मूलमस्ति, यतो जातो विनश्येत्, मूलमापद्यते, ततस्तद्विलक्षणत्वाच्छाश्वतिकः शाश्वदेकरूपः । अतो नित्यः एकत्वमहत्त्वमूलत्वेभ्यश्च ॥ १० ॥

उज्ज्वला ।

निपुणो मेधावी चित्स्वरूपः । बिसोर्णाया बिसतन्तोरप्यणीयान् सूक्ष्मः । य सर्वमावृत्य व्याप्य तिष्ठति । यश्च पृथिव्या अपि वर्षीयान् प्रवृद्धतरः सर्वगतत्वादेव सर्वभारस्य विष्टभ्य शेषित्वेनाऽधिष्ठाय तिष्ठति । ध्रुवः एकरूपः । अस्य जगतो यदिन्द्रियैर्ज्ञान इन्द्रियजन्यं ज्ञानं तस्मात् । कीदृशात् ? अनन्यस्य ज्ञेयात्, पञ्चम्यर्थे षष्ठी, ज्ञेयात् नीलपीताद्याकारादनन्यभूतं नीलपीताद्याकारं, तस्माद्विषज्ञानादन्य इत्यर्थः । श्रूयते च (२)'तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमय' इति ।

(३)'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।

तमेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥' इति पुराणम् । स्वभावतः स्वच्छस्य चिद्रूपस्यऽऽत्मनो नीलपीताद्याकारकालुष्यं तद्रूपाया बुद्धेरनुरागकृतं भ्रान्तमित्यर्थः । वैषयिकज्ञानादन्य इति विशेषणेन ज्ञानात्मक इत्यपि सिद्धम् । (४) 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति च श्रुतिः । एवंभूतस्याऽऽत्मा परमेष्ठी परमे स्वरूपे तिष्ठतीति । विभाज इत्यस्य परेण सम्बन्धः । विभजत्यात्मानं देवमनुष्यादिरूपेण नानाशरीरानुप्रवेशेनेति विभाक् । तस्माद्विभाजो निमित्तभूतात् सर्वे काया देवमनुष्यशरीराणि प्रभवन्ति उत्पद्यन्ते । स मूल प्रपञ्चसृष्टेर्भोक्तृतया मूलकारणम् । स नित्यः अविनाशी । शाश्वतिक एकरूपः अविकारः ॥ २ ॥

---

१. तै. उ. ३. १. २. तै. उ. २. ५.

विवरणम्।

एवं यथोक्तमात्मानं विदितवत आध्यात्मिका योगा न्यायसहिता अप्रतिबन्धेन भविष्यन्ति। मिथ्याप्रत्ययपूर्वका हि दोषाः। दोषनिमित्तश्च धर्माधर्मजनितः संसारः दोषनिवृत्तावत्यन्तं विनिवर्तते इत्येतमर्थं दर्शयिष्यन्नाह--

दोषाणां तु निर्घातो योगमूल इह जीविते। निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः॥ ११॥ ३॥

दोषाणां तु क्रोधादीनां निर्घातः विनाशः। योगा अक्रोधादयः, तन्मूलः तन्निमित्तमित्येतत्। अक्रोधादिषु हि सत्सु प्रतिबन्धिनो दोषा दुर्बलत्वान्निर्हन्यन्ते। इह जीवित इति दोषप्रभवकर्मयोनीमत्तत्वाज्जीवितस्य देहधारणावसानो दोषव्यापार इत्येतद् दर्शयति। तत्प्रतिपक्षेष्वक्रोधादिषु कथं नु नाम मुमुक्षवः प्रयत्नातिशयं कुर्युरिति योगदोषयोरितरेतरविरोधित्वे सति स्थितिगतिवद् योगेभ्यो दोषाणामेव निर्घातः, न तु विपर्यय इत्येतत्। कथमिति चेत्? उच्यते--सम्यग्दर्शनसचिवत्वाद् बलवन्तो योगाः। मिथ्याप्रत्ययसचिवत्वात् दुर्बलत्वान्निर्हन्यन्ते। निहन्तीत्येतदप्युक्तम्। बुद्धिबलवद्भिश्चस्तद्धीनानां लोके निर्घातो दृष्टः। 'अक्रोधनः' (१. १. २३) 'क्रोधादीश्च—' (१. ११. २५) इति लिङ्गात्। निर्हृत्य अपहृत्य। भूतदाहान् दोषेषु(न?) ह्युद्भूतेषु भूतानि दह्यन्त इव अग्निना परितप्यन्ते। अतो भूतदाहा दोषा उच्यन्ते। तान् निर्हृत्य। क्षेमं निर्भयं मोक्षं गच्छति।

"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" "अभयं वै जनक प्राप्तोऽसि' 'न भवति विदुषां ततो भयम्' इत्यादिश्रुतिस्मृतिभ्यः। न दोषप्रशममात्रेणाऽब्रह्मविदः क्षेमप्राप्तिरित्याह--पण्डित इति। ब्रह्मविदि ह्यत्र पण्डितशब्दः प्रयुक्तो, न शास्त्रविदि। (१)"तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य" इति श्रुतेः। इहाऽऽत्मविद्याधिकारात्।

यदि तर्हि दोषनिर्हरणं पण्डितोऽप्यपेक्षेत, तं प्रति न हि ब्रह्मविद्या क्षेमप्राप्तिनिमित्तम्। यदि ब्रह्मविद्यैव क्षेमप्राप्तिनिमित्तं, ब्रह्मविद्यानन्तरमेव न दुःखमुपलभेत। नैष दोषः। उक्तो ह्यत्र परिहारः--सम्यग्ज्ञानबलावष्टम्भाद् बलिनो योगा दुर्बलान् दोषान् मिथ्याप्रत्ययभवान् निर्हन्तुमलमिति। तस्माद् ब्रह्मविद्ययैव क्षेमप्राप्तिः। अन्यथा दोषनिर्हरणकर्मक्षययोरसम्भवात्।

---

१. ब. उ. ३. ५. १.

विद्यया चेद् दोषनिर्हरणकर्मक्षयाद्यवश्यं भवतः, तत इदमयत्नकार्यत्वाद् दोषनिर्हरणस्य नित्यानुवादरूपमनर्थकम्, निर्हन्त्येति, न, प्रवृत्तकर्माक्षिप्तत्वाद् दोषाणाम्। द्विविधानि ह्यनेकजन्मान्तरकृतानि कर्माणि-फलदानाय प्रवृत्तान्यप्रवृत्तानि च। यत्तु प्रवृत्तं कर्म, तेनाक्षिप्ता दोषाः कर्तुः सुखदुःखादिफलदानाय, दोषाभावे फलारम्भकत्वानुपपत्तेः। न हि रागद्वेषादिशून्ये सुखदुःख प्रवृत्तिलब्धिः कदाचित् कस्यचिदिह दृश्यते। तस्मात् फलदानाय प्रवृत्तेन कर्मणाऽऽक्षिप्ता दोषाः प्रसङ्गेन प्राप्तबला यत्नतो निर्हर्तव्या। प्रवृत्त्याधिक्यहेतुत्वप्रसङ्गात्। अत एवेदमुक्तम्-दोषाणां तु निर्घातो योगमूले इह जीवित इति। मन्दमध्यमोत्तमापेक्षत्वाच्च। ब्रह्मविदामपि न सर्वेषां समा ब्रह्मप्राप्तिपत्तिः, विवेकातिशयदर्शनात् कस्यचित्। 'एष ब्रह्मविदां वरिष्ठ' इति च श्रुतेः सम्यग्दर्शनसम्पन्न' इति च स्मृतेः। मन्दमध्यमब्रह्मविदपेक्षया त्यागवैराग्येन्द्रियजयाविधेरर्थवत्त्वम्. उत्तमब्रह्मविदां त्वर्थप्राप्तमेतत् सर्वमित्यनुवादमात्रम्। (१)'रसोऽप्यस्य परं दृष्ट्वा निवर्तते, इति वचनात्,गुणातीतलक्षणवचनेभ्यश्च। प्रवृत्तकर्माक्षिप्तदोषात् तज्ज्ञानितचेष्टाभ्यश्च भवन्ति विदुषोऽपि देहान्तरोत्पत्तिरिति चेद्—मुक्तेषुवत् प्रवृत्तकर्माक्षिप्तत्वाद् विद्वद्दोषचेष्टानां प्रवृत्तकर्मविभागनैवोपक्षीणशक्तित्वात् प्रयोजनान्तराभावाच्च न जन्मान्तरारम्भकत्वमुपपद्यते। यद्यप्रवृत्तं कर्म, तत स्त्यवावस्थमेव ब्रह्मविद्याहुताशनदग्धबीजशक्तित्वान्नाल जन्मान्तरारम्भाय, 'क्षीयन्ते चाऽस्य कर्माणि'(२) 'ज्ञानाग्निः सर्वकर्माणि'इत्यादिश्रुतिस्मृतिभ्यः। अतः सिद्धा पण्डितस्य दोषनिर्हरणात् क्षेमप्राप्तिः ॥ ११ ॥

उज्वला।

दोषाणा वक्ष्यमाणानां क्रोधादीनां निर्घातः निर्मूलनम्। इह जीविते योगमूलः योगा वक्ष्यमाणा अक्रोधादयः तन्मूलकः। अतश्च तान् भूतदाहीयान् भूतानि दहत क्रोधादीन्दोषान् निर्हत्य क्षेमं गच्छति आत्मत्राणद्वारेण। पण्डितो(३)लब्धज्ञानः आत्मसाक्षात्कारी। क्षेम अभय मोक्षम्(४)अभय वै जनक प्राप्तोऽसी'ति बृहदारण्यकम्॥ समाप्ताः श्लोकाः॥ ३ ॥

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ॥ १२ ॥ ४ ॥

भूतानां दाहो भूतदाहः तस्मै हिताः भूतदाहीयाः तस्मै हितमिति छः।

---

१. श्रीभ० गीता० २. ५९. २. श्रीभगव. ४. ३७.

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादासूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १२ ॥ ९ ॥

विवरणम् ।

तत्र क्रोधस्ताडनाक्रोशनादिहेतुरन्तःकरणविक्षोभो गात्रस्वेदकम्पनादिलिङ्गः । हर्षस्तद्विपरीतोऽभीष्टलाभजनितो बाष्परोमाञ्चनादिलिङ्गः । रोषोऽनिष्टविषयो मानसो विक्रियाविशेषः । लोभः परद्रव्येप्सा, स्वद्रव्याविनियोगस्तीर्थे । मोह कार्याकार्याविवेकिता । दम्भ आत्मनो धार्मिकत्वप्रकाशनम् । द्रोहः परानिष्टचिकीर्षा । मृषोद्यमनृतवचनम् । अत्याशपरीवादौ अत्याशोऽतिमात्रमशनम् । परीवादोऽसमक्षं परदोषाभिधानम् । असूया परगुणेष्वक्षमा । काममन्यू कामः स्त्रीव्यानिकराभिलाषः । मन्युस्तद्विघातकृत्सु द्वेषः । अनात्म्यम् अनात्मवत्ता । एष क्रोधादिरयोगः, असमाधानलक्षणो ह्येष चेतसो विक्षेपप्रकारः । तेषां योगमूलो निर्घातः ॥ १२ ॥ १३ ॥

उज्वला ।

(१)ताडनाक्रोशादिहेतुकोऽन्तःकरणविक्षोभः स्वेदकम्पादिलिङ्गः क्रोधः । हर्षः इष्टलाभाच्चेतस उद्रेको रोमाञ्चादिलिङ्गः । रोषः क्रोधस्यैव कियानपि भेदो मित्रादिषु प्रतिकूलेषु मनसो वैलोम्यमात्रकार्यकरः । लोभो द्रव्यसङ्गः, यो धर्मव्ययमपि रुणद्धि । मोहः कार्याकार्ययोरविवेकः । स च प्रायेण क्रोधादिजन्योऽपि पृथगुपादिश्यते कदाचित्तदभावेऽपि सम्भवतीति । दम्भो धार्मिकत्व(२)प्रकाशनेन लोकवञ्चनम् । द्रोहोऽपकारः । मृषोद्यमनृतवादः । अत्याशोऽत्यशनम् । परीवादः परदोषाभिधानम् । असूया परगुणे(३)ष्वक्षमा । कामः स्त्रीसंसर्गः । मन्युः गूढो द्वेषः । अनात्म्यं अजितेन्द्रियत्वं जिह्वाचापलादि । अयोगो विक्षिप्तचित्तता । एते भूतदाहीया दोषाः । तेषां योगमूलो निर्घातः ॥ ९ ॥

के पुनस्ते योगा इति, उच्यते--

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्ष-

---

१. आक्रोशादि इति ख. पु. २. प्रदर्शनेन इति क. पु. ३. अक्षमता इति क. पु.

मानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन् विधिना (१)सार्वगामी भवति ॥ १४ ॥ ६ ॥

विवरणम् ।

अक्रोधोऽहर्षः इत्येवमाद्या अयोगविपरीताः । अतस्ते समाधिलक्षणत्वाद् योगाः । संविभागः आत्मनो यात्रासाधनस्याऽर्थिभ्यः संविभजनम् । त्यागः इष्टादृष्टभोगानां शक्तितः परित्यजम्, तत्साधनानां च । आर्जवम् ऋजुता, अदुष्टाकलनपूर्विका वाङ्मनःकायानां प्रवृत्तिः । मार्दव मृदुत्वम् । शमोऽन्तःकरणोपशमः । दमो बाह्यकरणोपशमः । इदमन्यद् योगलक्षणं संक्षेपत उच्यते–सर्वभूताविरोधो योगः, विरोधे हि भूतानां पीडा, तदभावेऽपीडा । स एव सर्वभूतापीडालक्षणो योगः । आर्यम् आर्याणां भावः अक्षुद्रता । आनृशंसम् आनृशंस्यम्, अक्रौर्यम् । तुष्टिः लब्धव्यस्याऽलाभेऽपि चेतसः प्रसन्नतयाऽवस्थानं लाभ इव । सर्वभूताविरोधलक्षणाहिंसा परिव्राजकस्यैव सम्भवतीत्यार्यादीनां त्रयाणामन्येषां चाऽविरुद्धानां सर्वाश्रमान् प्रति प्राप्तिरितीतिशब्दसामर्थ्याद्, इतिशब्दस्य च प्रकारवचनत्वादार्यादीनीत्थंप्रकाराणि सर्वाश्रमान् प्रति गमयति सर्वाश्रमाणां समयपदानीति । समयस्थानानीत्येतत् । अवश्यानुष्ठेयानीत्यर्थः । तान्येतानि यथोक्तान्यनुतिष्ठन् विधिना सर्वगामी सर्वगमनशीलः, ज्ञानाभिव्यक्तिक्रमेण । भवति मुच्यते इत्यर्थः ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवत्पादाचार्यस्य कृतिषु आपस्तम्बीयधर्मशास्त्राध्यात्मपटलविवरणम् ॥ ❀

उज्ज्वला ।

के पुनस्ते योगाः ? तानाह—

एते चाऽक्रोधादयोऽपि भावरूपाः न क्रोधाद्यभावमात्रम्, क्रोधादिनिर्घातहेतुतयोपदेशात् । के पुनस्ते ? अक्रोधः, क्रोधादिषु प्रसक्तेष्वपि मा कार्षमिति सङ्कल्पः । अहर्षः, इष्टलाभालाभेषु चेतस ऐकरूप्यम् । अरोषः मित्रादिषु प्रतिकूलेष्वपि मनोविकाराभावः । अलोभः सन्तोषोऽलम्बुद्धिः । अमोहोऽवधानम् । अदम्भो धर्मानुष्ठानम् । अद्रोहः परेष्वपकारिष्वप्यनपकारः । अनसूया परगुणेष्वभिमोदनम् । सत्यवचनं यथा-

दृष्टार्थवादित्वम् । सम्विभागः आत्मान(१)मुपरुध्याऽप्यन्नादिदानम् । त्यागोऽपरिग्रहः । आर्जवं मनोवाक्कायानामेकरूपत्वम् । मार्दव सुपगम्यता । शमः मन्युपरित्यागः । दम.(२)इन्द्रियजयः । एताभ्यामेव गतत्वात् पूर्वत्र स्वस्मिन् क्रमे अकामः, अमन्युः, आत्मवत्त्वमिति नोपदिष्टम् । सर्वभूतैरविरोधः ।सर्वग्रहणं क्षुद्रैरविरोधार्थम् । योग. ऐकाग्र्यम् । आर्याणां भावः आर्य शिष्टाचारानुपालनम् । आनृशस आनृशस्य व्यवहारवचनादौ प्रसक्तनैष्ठुर्यस्य वर्जनम् । तुष्टिरनिर्वेदः । समयो व्यवस्था । सा च प्रकरणाद्धर्मज्ञानाम् । पदं विषयः । एते अक्रोधादयः सर्वेषामाश्रमाणां सेव्याः, न केवलं योगिनामेवेति धर्मज्ञानां समय इत्यर्थः । एते हि भाव्यमानाः क्रोधादीन् समूलघातं घ्नन्ति । अतश्च तान्यनुतिष्ठन् विधिना सार्वगामी भवति । तान्यक्रोधादीनि तुष्टयन्तानि । विधिना यथाशास्त्रम् । अनुतिष्ठन् सार्वगामी सर्वस्मै हितः सार्वः आत्मा तं गच्छति प्राप्नोति । 'विधिने'ति वचनात्(३)'प्राणिनां तु वधो यत्र तत्र स्याऽनृतं वदेत् ।' इत्यादिके विषये अनृतवचनादावपि न दोष इति ॥ ६ ॥

इति श्रीहरदत्तविरचितायामापस्तम्बधर्मसूत्रवृत्तावुज्वलायां त्रयोविंशी कण्डिका ॥ २३ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्नेऽष्टमः पटलः ॥८॥

---

१. अवरुध्य इति क. पु. २. इन्द्रियनिग्रहः इति ग. पु

३. द्वित्रेष्वप्यादर्शपुस्तकेषु 'प्राणिनां तु वधो यत्र' इत्येव पाठस्समुपलभ्यते । परन्तु श्लोकार्धमिदं याज्ञवल्क्यीयम् । तत्र "वर्णिनां हि वधो यत्र" इत्येव मुद्रितपुस्तकेषु पाठस्समस्ति । (या. स्मृ. २. ८३.) किञ्च मनौ—एतत्समानार्थकश्लोक एवमुपलभ्यते—

शूद्रविट्क्षत्रविप्राणां यत्रैतोक्तौ भवेद्वधः ।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥ इति । (म. स्मृ. ८. १०४)

अनयोरेकार्थत्वमभ्युपगम्यैव विज्ञानेश्वरेणाऽपि "यत्र वर्णिना शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधस्सम्भाव्यते" इति याज्ञवल्क्यीय वचनं व्याख्यातम् । अन्यैरपि विश्वरूपापरार्कादिभि 'वर्णिनाम्' इत्येवं पाठ. स्वीकृत. । अतोऽत्रापि 'वर्णिना' इत्येव पाठस्साधीयानिति युक्तमुत्पश्याम. ॥

अथ नवमः पटलः ॥

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् ॥ १ ॥

क्षत्रियं हत्वा गवां सहस्रं ब्राह्मणेभ्यो दद्यात्। किमर्थम्? वैरयातनार्थं वैरं पाप तस्य यातनं निर्हरणं तदर्थम् "ऋषभश्चात्राऽधिकः सर्वत्र प्रायश्चित्तार्थं"(२४. ४)इति वक्ष्यति। तेन प्रायश्चित्तरूपमिदं दानम्। प्रायश्चित्तं च पापक्षयार्थम्। तत्किमर्थं वैरयातनार्थमित्युच्यते? केचिन्मन्यन्ते-नाऽभुक्तं क्षीयते कर्म पुण्यमपुण्यं च। प्रायश्चित्तं तु नैमित्तिकं कर्मान्तरं (१)यथा गृहदाहादौ क्षामवत्यादय इति। तान्निराकर्तुमिदमुक्तम्। श्रौतेऽप्युक्तं—(२)दोषनिघातार्थानि भवन्ती"ति। अपर आह—यो येन हन्यते स हतो म्रियमाणस्तस्मिन्वैरं करोति—अपि नामाऽहमेनं जन्मान्तरेऽपि वध्यासमिति। तस्य वैरस्य यातनार्थमिदमिति प्रायश्चित्तार्थत्वमपि वक्ष्यमाणेन सिद्धमिति ॥ १ ॥

शतं वैश्ये ॥ २ ॥

वैश्ये हते गवां शतं दद्यात् ॥ २ ॥

दश शूद्रे ॥ ३ ॥

शूद्रे हते दश दद्यात्। गा इति प्रकरणाद्गम्यते ॥ ३ ॥

ऋषभश्चाऽत्राधिकः सर्वत्र प्रायश्चित्तार्थः ॥ ४ ॥

सर्वेष्वेतेषु निमित्तेषु ऋषभोऽप्यधिको देयः। न केवलं गा एव। इदं प्रायश्चित्तत्रयं मानवेन समानविषयम्। यथाऽऽह—

(३)अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः।
ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः ॥
त्र्यब्दं चरेद्व्रतं नियतो जटी ब्रह्महणो व्रतम्।
वसन् दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥

---

१. 'यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत् भागधेयेनैवैन-शमयति नाऽस्माऽपरं गृहान् दहति'(तै.स. २. २. २.) इति विहिता आहिताग्नेर्यजमानस्य गृहे दग्धे तादृशगृहदाहनिमित्तका क्षामवदग्निदेवताकेष्टिः क्षामवतीष्टिः।

२. आप० श्रौ० १. १. ४ ३. म. स्मृ. ११. १२७-१३०

एतदेव चरेद्दण्डं प्रायश्चित्तं द्विजोत्तमः ।
प्रमाप्य वैश्यं वृत्तस्थ दद्याद्वैकशतं गवाम् ॥
एतदेव व्रतं कृत्स्नं षण्मासान्शूद्रहा चरेत् ।
ऋषभैकादशा वाऽपि दद्याद्विप्राय गास्सिताः ॥' इति ॥ ४ ॥

स्त्रीषु चैतेषामेवम् ॥ ५ ॥

एतेषां क्षत्रियादीनां स्त्रीषु च हतासु एवमेव प्रायश्चित्तं यथा पुरुषेषु॥५॥

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाऽभिशस्तः॥६॥

उक्तेषु यौ पूर्वौ वर्णौ क्षत्रियवैश्यौ तयोर्यो वेदाध्यायः अधीतवेदः तं हत्वा अभिशस्तो भवति । अभिशस्त इति ब्रह्मण्योऽभिधानम्। सवनगतं वा, तयोरेव वर्णयोः यः सवनगतः सवनशब्देन न प्रातस्सवनादीन्युच्यन्ते, नापि यागमात्रम् । किं तर्हि ? सोमयागः । तत्र यो दीक्षितः सवनगतः 'ब्राह्मणो वा एष जायते यो दीक्षित' इति दर्शनात् । तं च हत्वाऽभिशस्तो भवति । पूर्वयोर्वर्णयोरिति किम् ? ब्राह्मणे मा भूत् । इष्यते ब्राह्मणे । वक्ष्यति च 'ब्राह्मणमात्रं 'चे'(२४.७.)ति । एवं तर्हि शूद्रे मा भूत् । न शूद्रो वेदाध्यायः सवनगतो वा भवति । इदं तर्हि प्रयोजनं पूर्वयोर्वर्णयोरेव यथा स्यात्तयोरेव यावनुलोमौ(१) करणाम्बष्ठौ तयोर्मा भूदिति । तेनान्ये वर्णधर्मा अनुलोमानामपि भवन्ति ॥ ६ ॥

ब्राह्मणमात्रं च ॥ ७ ॥

हत्वाऽभिशस्तो भवति । मात्रग्रहणाच्चाऽभिजनविद्यासंस्कारायपेक्षा ॥

गर्भं च तस्याऽविज्ञातम् ॥ ८ ॥

तस्य ब्राह्मणमात्रस्य । गर्भं च स्त्रीपुन्नपुंसकभेदेनाऽविज्ञातम् । हत्वाभिशस्तो भवति ॥ ८ ॥

आत्रेयीं च स्त्रियम् ॥ ९ ॥

(२)'ऋतुस्नातामात्रेयीमाहु'रिति वसिष्ठः । तस्येति वर्तते । आत्रेयीं च ब्राह्मणस्त्रियं हत्वाऽभिशस्तो भवति । ब्रह्महा भवति । सम्भवत्यस्यां ब्राह्मणगर्भ इति । अत्रिगोत्रजा आत्रेयीत्यन्ये ॥ ९ ॥

तस्य निर्वेषः ॥ १० ॥

---

१. इतरपुस्तकेषु "सवर्णाम्बष्ठौ" इत्येव पाठः । २. वि. ध. १०. १४.

तस्य सर्वप्रकाराभिशस्तस्य निर्वेषः प्रायश्चित्तं वक्ष्यते ॥ १० ॥

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽर्धशा-
णीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ ११ ॥

कृत्वेति वचनान्न परकृता कुटी ग्राह्या । वाक् यता नियता येन स वाग्यतः वाचयमः । आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः । शवशिर. ध्वजो यस्य स शवशिरोध्वजः । सकारलोपश्छान्दसः । स्वव्या-पादितस्य शिरो ध्वजदण्डस्याग्रे प्रोतं कृत्वेत्यर्थः। यस्य कस्य चिच्छवस्ये त्यन्ये । शणस्य विकारः शाणी पटी तस्या अर्धमर्धशाणी तस्याः पक्ष मर्धशाणीपक्ष आयामविस्तारयोरुभयोरप्यर्धम् । अधो नाभि उपरिजानु च यथा भवति तथा तावन्तं प्रदेशमाच्छाद्य । सापेक्षत्वात् 'ग्रामे प्रतिष्ठेते' (२४.१४.)ति वक्ष्यमाणेन सम्बन्धः । मध्ये क्रियान्तरविधिः ॥ ११ ॥

तस्य पन्था अन्तरा वर्त्मनी ॥ १२ ॥

तस्य ग्रामं प्रविशतः वर्त्मनी अन्तरा शकटादेर्वर्त्मनोर्मध्ये पन्था वेदि-तव्यः । अपर आह-यत्र रथ्यादावुभयोः पार्श्वयोर्वर्त्मनी भवतः तत्र तयोर्मध्येन सूकरादिपथेन सञ्चरेदिति ॥ १२ ॥

दृष्ट्वा चाऽन्यमुत्क्रामेत् ॥ १३ ॥

अन्यमार्यं दृष्ट्वा पथ उत्क्रामेत् । तत्र कौटिल्यः(१) 'पञ्चारत्नयो रथपथ-श्चत्वारो हस्तिपथः द्वौ क्षुद्रपशुमनुष्याणा'मिति । तेन मनुष्येषु द्वौ हस्तावुत्क्रामेदिति ॥ १३ ॥

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत ॥ १४ ॥

खर्परमात्रं खण्डम् । (२)लोहितकमनाग्नीतम् । एवम्भूतं शरावं भिक्षा-पात्रं गृहीत्वा ग्रामे प्रतिष्ठेत । ग्रामं गच्छेत् ॥ १४ ॥

कोऽभिशस्ताय भिक्षामिति(३) सप्ताऽगारं चरेत् ॥१५॥

(४)अभिशस्तो ब्रह्महा । तस्मै मह्यं को धार्मिको भिक्षां ददातीति उच्चैर्ब्रुवाणः सप्ताऽगाराणि चरेत् । सप्तग्रहणमधिकनिवृत्त्यर्थम् । द्वित्रेष्वेवा-गारेषु यदि पर्याप्तं लभ्यते तदा तावत्येव ॥ १५ ॥

---

१. कौटि. अर्थ. २ ४. २२. २. लोहितं मनाक्ताम्रम् इति. क. पु.
३. सप्तागाराणि इति क. पु. ४. अभिशस्ते को धार्मिकः, इत्येव पाठः ग. पु.

सा वृत्तिः ॥ १६ ॥

सप्तस्वगारेषु या च यावती लभ्यते सैव वृत्तिः अपर्याप्ताऽपि ॥१६॥

अलब्ध्वोपवासः ॥ १७ ॥

यदि सप्तागारेषु न किञ्चिल्लभ्यते तदोपवास एव तस्मिन्नहनि ॥

गाश्च रक्षेत् ॥ १८ ॥

एवं प्रायश्चित्तं कुर्वन्नहरहर्गाश्च रक्षेत् ॥ १८ ॥

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः ॥ १९ ॥

तासां गवां निष्क्रमणसमये प्रवेशनसमये च द्वितीयो ग्रामेऽर्थः प्रयोजनम्। भिक्षार्थं प्रथममुक्तम्। नाऽन्यथा ग्रामं प्रविशेदित्युक्तं भवति ॥

द्वादश वर्षाणि(१) चरित्वा सिद्धः सङ्घिस्सम्प्रयोगः ॥ २० ॥

एवं द्वादश वर्षाणि व्रतमेतच्चरित्वा साङ्घिः सम्प्रयोगः कर्तव्यः। साङ्घिः सह सम्प्रयुज्यते येन विधिना स कर्तव्यः। स शिष्टाचारे शास्त्रान्तरे च सिद्धः स उच्यते—कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत्। सा यद्यागत्य श्रद्धाना भक्षयति तदा सम्यगनेन व्रतं चरितमिति जानीयात्, अन्यथा नेति ॥ २० ॥

आजिपथे वा कुटिं कृत्वा ब्राह्मणगव्योऽपजिगीषमाणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः ॥ २१ ॥

सङ्ग्रामेण जेतव्या दस्यवो येन पथा ग्रामं प्रविश्य गवादिकमपहृत्याऽपसरन्ति स आजिपथः। तस्मिन्वा कुटिं कृत्वा वसेत्। किं चिकीर्षन्? ब्राह्मणगव्य·(२) 'वा छन्दसी'ति पूर्वसवर्णाभावे यणादेशः। ब्राह्मणगवीरपजिगीषमाणः दस्यूनपजित्य प्रत्याहर्तुमिच्छन्। एव वसन् दस्युभिर्ह्रियमाणं गवादिकमुद्दिश्य तैर्युद्धं कुर्वन् त्रिः प्रतिराद्धः तैरपजितः अपजित्य वा तान् गवादिक प्रत्याहृत्य ब्राह्मणेभ्यो दत्वा मुक्तो भवति तस्मादेनसः। द्वादशवार्षिके प्रवृत्तस्येदम्। एवमुत्तरमपि ॥ २१ ॥

आश्वमेधिकं वाऽवभृथमवेत्य मुच्यते ॥ २२ ॥

अथ वाऽश्वमेधावभृथे स्नात्वा मुच्यते ॥ २२ ॥

---

१ 'व्रतमेतदिति अधिकं पुस्तके २. पा. सू ६. १. १०६.

धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव ॥ २३ ॥

धर्मस्याऽग्निहोत्रादेः, अर्थस्य च कुल्यकरणादेः (१) युगपद्यत्र सन्निपातः तत्रोभयानुग्रहासम्भवे धर्मलोपेन योऽर्थं गृह्णाति तस्याऽप्येतदेव प्रायश्चित्तम्। अथवा धर्मं हित्वाऽर्थहेतोः कौटसाक्ष्यादि करोति तद्विषयमेतत्। अत्र गौतमः—

(२)'कौटसाक्ष्यं राजगामि पैशुनं गुरोरनृताभिशंसनं महापातकसमानी'ति। मनुरपि—

(३)'अनृतं च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चाऽलीकनिर्बन्धः समानि ब्रह्महत्यया' ॥ इति ॥ २३ ॥

गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् ॥ २४ ॥

गुरुः पित्राचार्यादिः। श्रोत्रियोऽधीतवेदः। स यदि कर्मसमाप्तो भवति सोमान्तानि कर्माणि समाप्तानि यस्य स कर्मसमाप्तः। तौ हत्वा एतेनैवाऽनन्तरोक्तेन विधिना ओत्तमादुच्छ्वासात्। उत्तम उच्छ्वासः प्राणवियोगः। आ तस्माच्चरेत् ॥ २४ ॥

नास्याऽस्मिँल्लोके प्रत्यापत्तिर्विद्यते॥ २५ ॥

अश्वमेधावभृथादिषु सम्भवत्स्वपि अस्याऽस्मिल्लोके अस्मिन् जीविते प्रत्यापत्तिः शुद्धिर्नास्तीत्यर्थः ॥ २५ ॥

कल्मषं तु निर्हण्यते ॥ २६ ॥

मृतस्य कल्मषं निर्हण्यते। (४)तेन पुत्रादिभिः संस्कारादिः कर्तव्य इति भावः। अन्ये तु पूर्वं सूत्रं तन्निवृत्त्यर्थं मन्यन्ते। प्रत्यापत्तिः पुत्रादिभिः पित्रादिभावेन सम्बन्ध इति ॥ २६ ॥

इति हरदत्तविरचितायामापस्तम्बसूत्रवृत्तौ चतुर्विंशी कण्डिका ॥२४॥

---

१. कुल्यकरणादेः इति नास्ति क. च. पु. २. गौ. ध. २०. ९.

३. म. स्मृ. ११. ५६.

४. तेन पुत्रादिभिस्संस्कारार्थौर्ध्वदेहिकाः कार्या इति भावः, इति ख. पु.

गुरुतल्पगामी सव्रणं शिश्नं परिवास्याऽञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् ॥ १ ॥

गुरुत्र पिता, नाऽऽचार्यादिः । तल्पशब्देन शयनवाचिना भार्या लक्ष्यते । सा च साक्षाज्जननी(१) । न तत्सपत्नी । तां गत्वा सव्रणं साण्डं शिश्नं परिवास्य क्षुरादिना छित्वाऽञ्जलावाधाय दक्षिणां दिश व्रजेत् । अनावृत्तिम् आवृत्तिर्न क्रियते यस्यां तां दिशमनावर्तमानो गच्छेत् । अथ ये(२) दक्षिणस्योदधेस्तीरे वसन्ति तेऽपि यावद्देशं गत्वा उदधिमेव प्रवेक्ष्यन्ति । मरणं ह्यत्र विवक्षितम् । अत्र सर्वतः—

(३)पितृदारान् समारुह्य मातृवर्जं नराधमः ।
भगिनीं मातुरार्यां वा स्वसारं वाऽन्यमातृजाम् ॥
एता गत्वा स्त्रियो मोहात्(४) तप्तकृच्छ्रं समाचरेत् ॥ इति ।

नारदस्तु—

'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
(५)पितृव्यपत्नी शिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ।
आसामन्यतमां गत्वा गुरुतल्पग उच्यते ।
शिश्नस्योत्कृन्तनं तत्र नाऽन्यो दण्डो विधीयते ॥ इति ॥ १ ॥

ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात् ॥ २ ॥

आयसी ताम्रमयी वा अन्तस्सुषिरा स्त्रीप्रकृतिरत्र सूर्मिः । तां ज्वलितामग्नौ तप्ताम् । परिष्वज्य समाप्नुयात् समाप्तिं गच्छेत् म्रियेत ॥ २ ॥

सुरापोऽग्निस्पर्शां सुरां पिबेत् ॥ ३ ॥

'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।'

तस्या. पाता सुराप. । सः अग्निस्पर्शां (६)अग्निकथितां सुरां पिबेत् । तया दग्धकायः शुद्ध्यति ॥ ३ ॥

स्तेनः प्रकीर्णकेशोंऽसे मुसलमाधाय राजानं गत्वा कर्माऽऽचक्षीत । तेनैनं हन्याद्वध्ये मोक्षः ॥ ४ ॥

---

१. तत्सपत्नी वा इति ग. पु. २. अथेति नास्ति ग. पु.
३. संव. स्मृ. १५८. १५९. ४ तप्तकृच्छ्रान् षडाचरेत् . इति. छ. पु.
५. पितृव्यसखिशिष्यस्त्री इति. क. पु. ६. अतिश्रपिता, इति. ख. ग. पु.

स्तेनो ब्राह्मणस्वर्णहारी । अंसे स्वे स्कन्धे । मुसलमाधाय आयसं खादिरं वा धारयन् । राजान गत्वा कर्मोऽऽचक्षीत-एवंकर्माऽस्मि, शाधि मामिति। स तेन मुसलेन एन स्तेनं हन्यात्, यथा मृतो भवति ।(१)वधेन स्तेयात् मोक्षो भवति ॥ ४ ॥

अनुज्ञातेऽनुज्ञातारमेनः स्पृशति ॥ ५ ॥

यदि राजा दयादिना तमनुजानीयात् गच्छेति, तदा तमनुज्ञातारं राजानमेव तदेनः स्पृशति ॥ ५ ॥ उत्तरमृजु ॥ ६ ॥

अग्निं वा प्रविशेत् ॥ ६ ॥

तीक्ष्णं वा तप आयच्छेत् ॥ ७ ॥

तीक्ष्ण तप. महापराकादि । तद्वा आयच्छेत् आवर्तयेत् ॥ ७ ॥

भक्तापचयेन वाऽऽत्मानं समापयेत् ॥ ८ ॥

भक्तमन्नम् । तस्याऽपचयो ह्रासः । प्रथमे दिने यावन्तो ग्रासाः तेषामेकेन न्यूना द्वितीये । एवं तृतीयादिष्वपि आ एकस्माद्ग्रासात् । तत्रापि यदि न समाप्तिः ततस्तत्रैव ग्रासपरिमाणापचयः कर्त्तव्यः । एवं भक्तापचयेनाऽऽत्मानं समाप्नुयात् समापयेत् ॥

कृच्छ्रसंवत्सरं वा चरेत् ॥ ९ ॥

अथ वा सवत्सरमेकं नैरन्तर्येण कृच्छ्रांश्चरेत् । एषामेनस्सु गुरुषु गुरूणि, लघुषु लघूनीति व्यवस्था ॥ ९ ॥

अथाऽप्युदाहरन्ति ॥ १० ॥

अस्मिन्नेव विषये पुराणश्लोकमप्युदाहरन्तीत्यर्थः ॥ १० ॥

स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा ब्रह्महत्यामकृत्वा । चतुर्थकाला मितभोजिनः स्यु(२)रपोऽभ्यवेयुः सवनानुकल्पम् । स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुदन्ते ॥ ११ ॥

ब्रह्महत्याव्यतिरिक्तानि स्तेयादीनि कृत्वा चतुर्थकालाश्चतुर्थो भोजन-

---

१. वधे सति स्तेनस्य मोक्षो मुक्तिर्भवत्येनसो नान्यथा इति. क च. पु.

२ अपोऽभ्युपेयु· इति. क छ पु.

कालो येषाम् । यथा-अद्य दिवा भुङ्क्ते श्वो नक्तमिति, ते तथोक्ता । तथापि मितभोजिनः न मृष्टाशिनः । (१)अपोऽभ्यवेयुः भूमिगतास्वप्सु स्नानं कुर्युः । सवनानुकल्पं, यथा सवनानि प्रातस्सवनादीन्यनुकल्पितानि अनुसृतान्यनुष्ठितानि भवन्ति तथा(२) त्रिषवणमित्यर्थः । तिष्ठेयुरहनि, रात्रावासीरन् । एवं स्थानासनाभ्यां विहरन्तः कालक्षेपं कुर्वन्तः । एते त्रिभिर्वर्षैस्तत्पापमपनुदन्ते ॥ ११ ॥

प्रथमं वर्णं परिहाप्य प्रथमं वर्णं हत्वा सङ्ग्रामं गत्वाऽवतिष्ठेत तत्रैनं हन्युः ॥ १२ ॥

प्रथमो वर्णो ब्राह्मणः । तं हत्वा सङ्ग्रामं गत्वा सेनयोर्मध्येऽवतिष्ठेत । किं सर्वे ? नेत्याह—प्रथम वर्ण परिहाप्य ब्राह्मणवर्जमितरो वर्णः क्षत्रियादिरित्यर्थः । तत्र स्थितमेनं ते सैनिका हन्युः, त एनं हत्वा विदध्युः । अघ्नन्त एनास्विनः स्युः, यथा राजा स्तेनम् । स मृतश्शुद्ध्यति ॥ १२ ॥

अपि वा लोमानि त्वचं मांसमिति हावयित्वाऽग्निं प्रविशेत् ॥ १३ ॥

अनन्तरोक्त एव विषये प्रायश्चित्तान्तरम् । इतिशब्दो लोहितादीनामप्युपलक्षणार्थः । आत्मनो लोमादीन्युत्कृत्य पुरोहितेन हावयित्वा होमं कारयित्वा पश्चात् स्वयं तस्मिन्नग्नौ प्रविशेत्, मृतः शुद्ध्यति । तत्राऽग्निमुपसमाधाय जुहुयात्(३) "लोमानि मृत्योर्जुहोमि, लोमभिर्मृत्यु वासये स्वाहा । त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये स्वाहा ॥ लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वासये स्वाहा । स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्यु वासये स्वाहा । मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वासये स्वाहा । अस्थीनि मृत्योर्जुहोमि अस्थभिर्मृत्युं वासये स्वाहा । मज्जानं मृत्योर्जुहोमि मज्जभिर्मृत्युं वासये स्वाहा । मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासये स्वाहा" ।इत्येते मन्त्राः वसिष्ठेन पठिताः ॥१३॥

वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिकाश्ववर्हिसायां शूद्रवत्प्रायश्चित्तम् ॥ १४ ॥

---

१. अपोऽभ्युपेयुः इति. क छ, पु,

२. सोमयागे प्रातर्मध्यन्दिने सायमिति त्रिषु कालेषु प्रातस्सवन, माध्यन्दिनं सवनं, तृतीयसवनं, इति सवनत्रयमनुस्यूततयाऽनुष्ठीयते तद्वत् कालत्रयेऽपि स्नान कुर्युरित्यर्थः ।

३. ब. ध. २०. २६.

वायसः काकः । प्रचलाकः कामरूपी कृकलासः । बर्हिणो मयूरः । चक्रवाको दिवा मिथुनचर, रात्रौ विरही । हंसो मानसवासी। भासो गृध्रविशेषः । नकुलमण्डूकादय. प्रसिद्धाः । डेरिका गन्धमूषिका । एतेषां समुदितानां वधे शूद्रवत्प्रायश्चित्तम् । प्रत्येक वधे तु कल्प्यम् । केचित् प्रत्येक वध एतत्प्रायश्चित्तमित्याहुः ॥ १४ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने पञ्चविंशी कण्डिका ॥ २५ ॥



धेन्वनड्वहोश्चाऽकारणात् ॥ १ ॥

धेनु· पयस्विनी गौः । अनड्वान् अनोवहनयोग्यो बलीवर्दः । तयोः कारणमन्तरेण हिंसायां शूद्रवत्प्रायश्चित्तं कर्तव्यम् । कारणं कोपो मांसेच्छा वा । ताभ्यां विना, अबुद्धिपूर्वमित्यर्थः । बुद्धिपूर्वं तु(१) 'गाश्च वैश्यव' दित्यादि स्मृत्यन्तरे द्रष्टव्यम् ॥ १ ॥

धुर्यवाहप्रवृत्तौ चेतरेषां प्राणिनाम् ॥ २ ॥

धुरं वहतीति धुर्यौ बलीवर्दः । तेन वोढु शक्त्या धुर्यवाहाः। तावत्सु हिंसायाः प्रवृत्तौ सत्याम् । इतरेषा प्राणिना केवल प्राणा एव येषां नाऽस्थीनि तेषां हिंसायां शूद्रवत्प्रायश्चित्तमिति । अत्र गौतमः(२)'अस्थन्वतां सहस्रं हत्वा अनस्थिमतामनुद्धारे चे'ति ॥ २ ॥

अनाक्रोश्यमाक्रुश्याऽनृतं वोक्त्वा त्रिरात्रमक्षीरक्षारलवणभोजनम् ॥ ३ ॥

येन यो न कथञ्चनाऽऽक्रोशमर्हति स पित्राचार्यादिरनाक्रोश्यः । तमाक्रुश्य अनृतं वोक्त्वा पातकोपातकवर्जे, त्रिरात्र क्षीरादि भोजने वर्जयेत । क्षीरग्रहणेन तद्विकाराणां दध्यादीनामपि(३) ग्रहणमित्याहुः ॥ ३ ॥

शूद्रस्य सप्तरात्रमभोजनम् ॥ ४ ॥

शूद्रस्त्वनन्तरोक्तविषये सप्तरात्रमुपवसेत् ॥ ४ ॥

स्त्रीणां चैवम् ॥ ५ ॥

'क्षत्रियं हत्वे' (२४. १.) त्यादिषु अनृतवचनान्तेषु निमित्तेषु यानि

---

१ गौ. ध. २३. १८. २. गौ. ध. २३. २०. ३. वर्जनमाहु. इति क. पु

प्रायश्चित्तान्युक्तानि तानि स्त्रीणामप्येवमेव कर्तव्यानि । एतत् 'चत्वारो वर्णा' इति जात्याभिधानादेव(२) प्राप्तं सन्नियमार्थमुच्यते—अत ऊर्ध्वं पुरुषस्यैव न स्त्रीणामिति । अपर आह—जात्याभिधानादेव सिद्धे अतिदेशार्थं वचनम् । अतिदेशेषु चाऽर्धं प्राप्यते इति स्मार्तो न्यायः । तेन स्त्रीणामर्धप्राप्त्यर्थं वचनमिति । तथा च भार्गवः—

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ॥' इति ॥ ५ ॥

येष्वाभिशस्त्यं तेषामेकाङ्गं छित्वाऽप्राणिहिंसायाम् ॥६॥

येषु हतेषु 'सवनगत वाऽभिशस्त, (२४.९) इत्यादिना अभिशस्तत्वमुक्तं तेषामेकाङ्ग छित्वा शूद्रवत्प्रायश्चित्तं कुर्यात् । अप्राणिहिंसायां यदि छेदनेन तस्याङ्गस्य शक्ति(२)र्न हन्यते ॥ ६ ॥

(३)अनार्यवपैशुनप्रतिषिद्धाचारेष्वभक्ष्याभोज्यापेयप्राशने शूद्रायां च रेतस्सिक्त्वाऽयोनौ च दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वाऽब्लिङ्गाभिरप उपस्पृशेद्धारुणाभिर्वाऽन्यैर्वा पवित्रमन्त्रैर्यथा कर्माभ्यासः ॥ ७ ॥

आर्याणां भाव आर्यम् । तस्मिन्नाचारेऽस्ति तदार्यवम् । मत्वर्थीयो वप्रत्ययः । ततोऽन्यदनार्यवम् । असत्यभाषणादि । पैशुनं परदोषकथन राजगामि प्रतिषिद्धाचार. 'छूतविनमैथुनयोः कर्माऽप्सु वर्जये' (३०.१९) इत्यादेरनुष्ठानम् । अभक्ष्यं वृथाकृसरादि । अभोज्यं केशकीटादुपहतम् । अपेयम् अनिर्दशायाः गोः क्षीरादि । एतेषां प्राशने । शूद्राया च वेश्याप्रभृतौ रेतः सिक्त्वा । अयोनौ च जलादौ रेतः सिक्त्वा । दोषवच्च कर्म श्रौतमाभिचारिकम् । अभिसन्धिपूर्वं बुद्धिपूर्वं कृत्वा । अनभिसन्धिपूर्वं वा परपीडादिकरं कर्म कृत्वा । अब्लिङ्गाभिः(४) "आपो हि ष्ठा मयोभुव' इति तिसृभि(५) हिरण्य

---

१. प्रायश्चित्त प्राप्तम् . तन्नियम' इति क. पु. २. न भज्यते इति ग. पु. ।
३. गौतमीये २६. १५. सूत्र द्रष्टव्यम् ।
४. तै. ५ ६. १०. यो वश्शिवतमो रस', तस्मा अरं गमाम व , इत्यग्रिमे ऋचौ ।
५. तै. सं. ६ ६ १ यासा राजा वरुणः, यासा देवा दिवि, शिवेन मा चक्षुषा, इत्यग्रिमं ऋक्त्रयम् ।

वर्णाश्शुचयः पावका' इति चतसृभिरप उपस्पृशेत् । तूष्णीं प्रथमं स्नात्वा पश्चादेतैर्मन्त्रैर्मार्जनं कुर्यात् । वारुणीभिर्वा (१)'इमं मे वरुण, 'तत्त्वा यामि; 'त्वन्नो अग्ने' इत्येताभिरन्यैर्वा पवित्रैः (२) पवमानस्सुवर्जन' इत्येतेनानुवाकेन (३) शुद्धवतीभिः (४) तरत्समन्दीयेन च । यथा कर्माभ्यासकृतः (५) तावत्कृत्वोऽप उपस्पृशेत् । रहस्यप्रायश्चित्तमेतदित्याहुः ॥७॥

गर्दभेनाऽवकीर्णीं निर्ऋतिं पाकयज्ञेन यजेत ॥ ८ ॥

यो ब्रह्मचारी स्त्रियमुपेयात् सोऽवकीर्णी गर्दभेन निर्ऋतिं यजेत पाकयज्ञेन स्थालीपाकविधानेन । अत्र मनुः--

(६) 'अविकीर्णा तु काणेन गर्दभेन चतुष्पथे ।
पाकयज्ञविधानेन, यजेत निर्ऋतिं निशि ॥' इति ।

हारीतस्तु—

"स्त्रीष्ववकीर्णी निर्ऋत्यै चतुष्पथे गर्दभं पशुमालभेत पाकयज्ञधर्मेण । भूमौ पशुपुरोडाशश्रपणमप्स्ववदानैः प्रचार्याऽऽज्य जुहोति 'कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा । कामाभिद्रुग्धोस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा" इति ॥ ८ ॥

तस्य शूद्रः प्राश्नीयात् ॥ ९ ॥

तस्य गर्दभस्य सर्पिष्मद्धविरुच्छिष्टं शूद्रः प्राश्नीयात् (७)'तेन सर्पिष्मता ब्राह्मण' मित्यस्याऽपवादः ॥ ९ ॥

मिथ्याधीतप्रायश्चित्तम् ॥ १० ॥

नियमातिक्रमेणाऽधीतं मिथ्याधीतम् । तद्दोषनिर्हरणाय प्रायश्चित्तं वक्ष्यते ॥ १ ॥

सम्वत्सरमाचार्यहिते वर्तमानो वाचं यच्छेत्स्वाध्याय एवोत्सृजमानो वाचमाचार्ये आचार्यदारे वा भिक्षाचर्ये च ॥११॥

आचार्यहिते वर्तमानो वाचंयमः स्यात् । (८)स्वाध्यायादिष्वेषु वाचमुत्सृ-

---

१ तै सं० ४. २. ११. २. तै. ब्रा. १. ४. ८
३ ऋ. सं. ८. ९५. ६. ४. ऋ सं. ८.९५.७
५. कृत. तथोपस्पृशेत्. इति. क. पु ६. म. स्मृ. ११. ११८.
७ आप. गृ. ७. १५. ८. वागुत्सर्गस्स्वाध्याय एव इति. ख. पु.

जमानः । आचार्यं तं प्रति कार्यनिवेदनेऽप्येवमाचार्यदारे । भिक्षाचर्यं भिक्षाचरणम् । तत्र च 'भवति भिक्षां देहि'इति । अस्मादेव ज्ञायते–असमावृत्तविषयमेतदिति ॥ ११ ॥

एवमन्येष्वपि दोषवत्स्वपतनीयेषूत्तराणि यानि वक्ष्यामः ॥ १२ ॥

यथा मिथ्याधीतस्येदं प्रायश्चित्तमेवमुत्तराणि यानि प्रायश्चित्तानि वक्ष्यामः तान्यन्येष्वपि । अपिशब्दान्मिथ्याधीतेऽपि । दोषवत्स्वपतनीयेषु पतनीयव्यतिरिक्तेषु कर्मसु येष्वाहृत्य प्रायश्चित्त नोक्त तद्विषयाणि द्रष्टव्यानि ॥ १२ ॥

काममन्युभ्यां वा जुहुयात्कामोऽकार्षीन्मन्युरकार्षीदिति १३

स्वाहाकारान्ताभ्यां होमः । आज्यं द्रव्यम् ॥ १३ ॥

जपेद्वा ॥ १४ ॥

अस्मिन् पक्षे न स्वाहाकारः । केचित्तु 'कामाय स्वाहा' 'मन्यवे स्वाहे'ति होममिच्छन्ति । जपपक्षे तु सूत्रोपदिष्टौ मन्त्राविति । दोषाभ्यासानुरूपं जपहोमयोरावृत्तिः ॥ १४ ॥

पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूत उदकमुपस्पृश्य सावित्रीं प्राणायामशस्सहस्रकृत्व आवर्तयेदप्राणायामशो वा ॥१५॥

पर्वणि पौर्णमास्याममावास्यायां वा । तिलानेव भक्षयति नान्यदोदनादिकमिति तिलभक्ष । श्वोभूते उदकमुपस्पृश्य स्नात्वा सावित्रीं प्राणायामशः प्राणायामेन एकस्मिन्प्राणायामे यावत्कृत्व आवर्तयितुं शक्यं तावत्कृत्व आवर्तयेत् । एवमा सहस्रपूर्तेः प्राणायामावृत्तिः । अप्राणायामशो वा (१)जपकाले प्राणानायच्छेत् , तूष्णी जपेद्वेति ॥ १५ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने षड्विंशी कण्डिका ॥२६॥

१, जपकाल इत्यादि नास्ति ख च. पु.

आवण्यां वा पौर्णमास्यां तिलभक्ष उपोष्य वा श्वो भूते (१)माहानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वा ॥ १ ॥

गिरिप्रभवा समुद्रगामिनी नदी महानदी तत्र भवं माहानदम् । समित्सहस्रं याज्ञिकस्य वृक्षस्य। 'आदध्या'दिति वचनान्न होमधर्मः स्वाहाकारः(२) 'जुहोतिचोदना स्वाहाकारप्रदान,' इत्युक्तत्वात् । जपेद्वा ॥१॥

इष्टियज्ञक्रतून्वा पवित्रार्थानाहरेत् ॥ २ ॥

पवित्रार्थाः शुद्ध्यर्थाः (३)मृगाराद्या इष्टयः । (४)यज्ञक्रतवः सोमयागा अग्निष्टोमादयः । तान्येतानि षट् प्रायश्चित्तानि एनस्सु गुरुषु गुरूणि, लघुषु लघूनि ॥ २ ॥

अभोज्यं भुक्त्वा नैष्पुरीष्यम् ॥ ३ ॥

अभोज्यस्य मार्जारादिमांसस्य भक्षणे निष्पुरीषभावः कर्तव्यः । यावदुदरं निष्पुरीषं भवति तावदुपवस्तव्यम् ॥ ३ ॥

तत्किय्ता कालेनाऽवाप्यते ? तदाह—

तत्सप्तरात्रेणाऽवाप्यते ॥ ४ ॥

तत् नैष्पुरीष्यम् । सप्तरात्रेणाऽवाप्यते सप्तरात्रमुपवस्तव्यमित्यर्थः । सप्तरात्रमुपवसेदित्येव सिद्धे नैष्पुरीष्यवचनाद्येषां त्रिरात्रेणैव तदवाप्यते तेषां तावतैव शुद्धिः । तथा च गौतमः—(५)'अभोज्यभोजने निष्पुरीषभावः त्रिरात्रावरमभोजनं सप्तरात्रं वे'ति ॥ ४ ॥

हेमन्तशिशिरयोर्वोभयोस्सन्ध्योर्वोदकमुपस्पृशेत् ॥५॥

उभयोः सन्ध्ययोः सायं प्रातश्च । उदकमुपस्पृशेत् भूमिगतास्वप्सु स्नायात् । उद्धृताभिर्वा शीताभिः ॥ ५ ॥

कृच्छ्रद्वादशरात्रं वा चरेत् ॥ ६ ॥

---

१. महानद इति छ पु

२. (आप. प. ३.४.) "जुहोतिचोदना स्वाहाकारप्रदान इत्युक्तत्वात् । जपेद्वा" इति नास्ति. क. छ. पु.

३. अग्नयेऽहोमुचेऽष्टाकपालः (तै.स. ७. ५. २२.) इति विहितेष्टिर्मृगोरष्टिदर्शहविष्का ।

४. यज्ञाः क्रतवः । इति. क. छ. पु. ५. गौ. ध. २६. ४.

द्वादशरात्रसाध्यो व्रतविशेषः कृच्छ्रद्वादशरात्रः ॥ ६ ॥

तस्य विधिमाह(१)—

त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहम्, त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किञ्चनेति कृच्छ्रद्वादशरात्रस्य विधिः॥७॥

आदितस्त्रिष्वहस्सु नक्तं नाऽश्नीयात्। दिवैव भुञ्जीत। ततस्त्र्यहमदिवाशी रात्रावेव भुञ्जीत। न दिवा। ततस्त्र्यहमयाचितमेव भुञ्जीत। याच्ञाप्रतिषेधोऽयम्। तेन स्वद्रव्यस्याऽप्रतिषेधः। तथा च गौतमः (२)'अथाऽपरं त्र्यह न कंचन याचे'दिति। ततस्त्र्यहं नाश्नाति किञ्चन फलादिकमपीति। एवं कृच्छ्रद्वादशरात्रस्य विधिः। तत्र स्मृत्यन्तरवशाद्विष्यमन्न, ब्रह्मचर्यं, स्त्रीशूद्रादिभिरसम्भाषणं च द्रष्टव्यम् ॥ ७ ॥

एतमेवाऽभ्यस्येत्संवत्सरं स कृच्छ्रसंवत्सरः ॥ ८ ॥

एतमेव विधिं संवत्सरं निरन्तरमभ्यस्येत्। स एष कृच्छ्रसंवत्सरो वेदितव्यः। यः पूर्वोक्तः 'कृच्छ्रसंवत्सरं वा चरे' (२५. ९) इति ॥ ८ ॥

अथाऽपरं बहून्यप्यपतनीयानि कृत्वा त्रिभिरनश्नन् पारायणैः कृतप्रायश्चित्तो भवति ॥ ९ ॥

अथाऽपरं प्रायश्चित्तमुच्यते। अनश्नतैव निरन्तर त्रीणि पारायणानि कर्तव्यानि। आदित आरभ्याऽऽसमाप्तेर्वेदस्याऽध्ययनं पारायणम्। बहून्यपि। अपिशब्दात्किं पुनरेकं द्वे वा ॥ ९ ॥

अनार्यां शयने बिभ्रद्ददद्वृद्धिं कषायपः।
अब्राह्मण इव वन्दित्वा तृणेष्वासीत पृष्ठतप् ॥१०॥

अनार्यां शूद्रा तां शयने बिभ्रत् उपगच्छन्। ददद्वृद्धिं वृद्ध्यर्थं द्रव्यं ददत्। वृद्ध्याजीव इत्यर्थः। सुराव्यतिरिक्त मद्य कषायः। (३) तस्य पाता कषायपः। यश्चाऽब्राह्मण इव सर्वान् वन्दी भूत्वा स्तौति स सर्वोऽपि तृणेषूदयादारभ्याऽऽसीत। यावदस्याऽऽदित्यः पृष्ठं पश्चाद्भागं तपति। आदित्ये तपति तदानुगुण्याचरणात् स्वयमेव पृष्ठतापित्युच्यते। अभ्यासे अभ्यासो यावता शुद्धिं मन्यते ॥ १० ॥

---

१. मनौ. ११. २११ श्लोको द्रष्टव्य. । २. गौ ध. २६. ४.

३. 'तत् पिबतीति कषायपः' इति ग. पु.

यदेकरात्रेण करोति पापं कृष्णं वर्ण ब्राह्मणस्सेवमानः
चतुर्थकाल (१)उदकाभ्यवायी त्रिभिर्वर्षैस्तदप-
हन्ति पापम् ॥ ११ ॥

कृष्णो वर्ण शूद्रः । तमाज्ञाकरो भूत्वा वृत्त्यर्थं सेवमानः । शिष्टं स्पष्टं गतं च । अपर आह—शूद्रां मैथुने सेवमान इति । अस्मिन्पक्षे ऋतावुपगमने अपत्योत्पत्तावि दं द्रष्टव्यम् । मनुः—

(२)वृषलीफेनपीतस्य निश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥' इति ॥ ११ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने सप्तविंशी कण्डिका ॥ २७ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु-
ज्वलायां प्रथमप्रश्ने नवमः पटलः ॥ ९ ॥

---

१. उदकाभ्युपायी इति. ह. पु. २. म. स्मृ. ३. १९.

दशमः पटलः॥

यथा कथा च परपरिग्रहमभिमन्यते स्तेनो ह भवती-ति कौत्सहरीतौ तथा काण्वपुष्करसादी ॥ १ ॥

(१)यथा कथा च आपद्यनापदि वा भूयांसमल्पं वा, परपरिग्रहं परस्व-मभिमन्यते-ममेदमस्त्विति बुद्धौ कुरुते(२) सर्वथा स्तेन एव भवतीति कौत्सादयो मन्यन्ते ॥ १ ॥

संत्यपवादाः परपरिग्रहेष्विति वार्ष्यायणिः ॥ २ ॥

वार्ष्यायणिस्तु मन्यते केषुचित्परपरिग्रहेषु स्तेयस्याऽपवादास्सन्तीति॥ तानेवोदाहरति—

शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ॥ ३ ॥

शमी बीजकोशी तस्वामुष्यन्ते दह्यन्ते कालवशेन पच्यन्ते इति शम्योषाः कोशीधान्यानि मुद्गनाषचणकादीनि । युग वहतीति युग्यः श-कटवाही बलीवर्दः, तस्य घासो भक्षस्तृणादिः युग्यघासः । एते आदीय मानाः स्वामिनो न प्रतिषेधयन्ति स्वामिभिः प्रतिषेधं न कारयन्ति । एते-ष्वादीयमानेषु स्वामिनो न प्रतिषेद्धुमर्हन्तीत्यर्थः । स्वयंग्रहणेऽपि न स्तेयदोष इति यावत् । अत्र स्मृत्यन्तरे विशेषः—

'चणकव्रीहिगोधूमयवानां मुद्गमाषयो. ।
अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकाऽध्वनि स्थितैः ॥'

मनुस्तु—

(३)'द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥ ३ ॥

अतिव्यवहारो व्यृद्धो भवति ॥ ४ ॥

शम्योषादिष्वपि अतिव्यवहारो व्यृद्धो दुष्टो भवति, अतिमात्रापहारे स्ते-यदोषो भवतीत्यर्थः ॥ ४ ॥

---

१. 'कथा' इति छान्दस रूप कथमित्यर्थ. । दृष्टं च "तमब्रुवन् कथा ह्यस्था." (तै.सं. २.६.३.) "कथा मा निरभागिति" (तै.स.३.१.९) इत्यादौ ।

२. बुद्धौ कृत्वाऽऽदत्त इत्यर्थ , इत्यधिक क. छ. पु. ३. म. स्मृ. ८. ३४१.

सर्वत्राऽऽनुमतिपूर्वमिति हारीतः ॥ ५ ॥

सर्वेषु द्रव्येषु सर्वास्ववस्थासु स्वाम्यनुमतिपूर्वमेव ग्रहणमिति हारीत आचार्यो मन्यते ॥ ५ ॥

न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ॥ ६ ॥

'न पतितैः सव्यवहारो विद्यते'(२१.५.) इत्युक्तेऽपि पुनरुच्यते–आचार्यादिषु विशेषं वक्ष्यामीति ॥ ६ ॥

न चाऽस्माद्भोगानुपयुञ्जीत ॥ ७ ॥

अस्मात्पतिताद्दाचार्यात् ज्ञातेर्वा पित्रादेः भोगान् भोगसाधनानि दायप्राप्तान्यपि नोपयुञ्जीत न गृह्णीयात् ॥ ७ ॥

यदृच्छासन्निपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ॥ ८ ॥

यदि पतितैराचार्यादिभिर्यदृच्छया सन्निपातः सङ्गतिः स्यात् तदाऽविधिनोपसगृह्य तुष्णीं तैस्सह किञ्चिदप्यसम्भाष्य व्यतिव्रजेत् गच्छेत् । न क्षणमपि सह तिष्ठेत् ॥ ८ ॥

माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपि ॥ ९ ॥

पुत्रत्वस्य, स्वार्थिकस्त्वः । यथा 'देहत्वमेवान्य'दिति । पुत्रस्य कृते माता भूयांसि इष्टार्थानि गर्भधारणाशुचिनिर्हरणस्तन्यदानप्रदक्षिणनमस्कारोपवासादीनि कर्माणि करोति तस्मात्तस्यां पतितायामपि शुश्रूषा अभ्यङ्गस्नापनादिका । नित्या नित्यमेव कर्तव्या ॥ ९ ॥

न तु धर्मसन्निवापः स्यात् ॥ १० ॥

एकस्मिन् धर्मे सहाऽन्वयो धर्मसन्निवापः । स पतितया मात्रा सह न कर्तव्यः । नामसु ब्रह्मण्यायां मातुर्नामग्रहणम् । वरुणप्रघासेषु (१)यावन्तो यजमानस्याऽमात्याः सस्त्रीकास्तावन्त्येकातिरिक्तानी'त्येवमादिकमुदाहरणम् । किं पुनरेवमादिषु मातुरन्वयः शुश्रूषा ? ओमित्याह । अन्विता हि सा सम्मता मन्यते । निरस्ता तु विमता । वैश्वदेवार्थं च पाके सा न भोजयितव्या । मृतायास्तु तस्याः संस्कारादिकाः क्रियाः कर्तव्याः नेति विप्रतिपन्नाः ॥ १० ॥

---

१. आप. श्रौ ८. ५. ४१. करम्भपात्रनिर्माणे संख्याविधिरयम् ।

अधर्माहृतान् भोगाननुज्ञाय न वयं चाऽधर्मश्चेत्यभि व्याहृत्याऽधो नाभ्युपरिजान्वाच्छाद्य त्रिषव-णमुदकमुपस्पृशन्नक्षीराक्षारलवणं भुञ्जा-नो द्वादश वर्षाणि नाऽगारं प्रविशेत् ॥ ११ ॥

ब्राह्मणस्वहरणम् ,

(१)चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्य तु गच्छति ॥

इत्येवमादिकमुदाहरणम् । ये अधर्माहृता भोगास्ताननुज्ञाय परि-त्यज्य 'न वयं चाऽधर्मश्चे'ति प्रैषं ब्रूयात् । तस्यार्थः—वयं चाऽधर्मश्च सह न वर्तामह इति । अधो नाभीत्यादि (२४.११.)गतम् । नात्राऽर्धशाणीपक्षो भिक्षाचर्यं वा ॥ ११ ॥

ततस्सिद्धिः ॥ १२ ॥

एतस्य द्वादशवार्षिकस्याऽन्ते सिद्धिः शुद्धिर्भवति ॥ १२ ॥

अथ सम्प्रयोगस्स्यादार्यैः ॥ १३ ॥

प्रायश्चित्तोपदेशात सिध्युपदेशाच्च सिद्धे पुनर्वचनं 'ज्ञा-नात्साम्यं तु गच्छती'त्यस्याऽपवादार्थम् ॥ १३ ॥

एतदेवाऽन्येषामपि पतनीयानाम् ॥ १४ ॥

उक्तव्यतिरिक्तानि यानि पतनीयानि पूर्वमुक्तानि तेषु यत्राऽऽहृत्य प्रायश्चित्तं (२)नोक्तं तेषामप्येतदनन्तरोक्तमेव प्रायश्चित्तं वेदितव्यम् । उक्तविषये विकल्प इत्यन्ये । तत्र ज्ञानाज्ञानकृतो विकल्पः ॥ १४ ॥

गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत आदीप्याऽभिदहेदात्मानम् ॥१५॥

यस्तु गुरुतल्पगामी सोऽन्तःप्रवेशयोग्यां सुषिरां सूर्मिं कृत्वा प्रविशेत् प्रविश्योभयत-पार्श्वयो(३)र्वह्निमादीपयेत् । आदीप्याऽऽत्मानमभिदहेत् । "ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुया (२५. २.)" दित्यत्रैव कियानपि

---

१. म. स्मृ. ११ १७६. २. अनुक्त. इति. क. ख. पु.
३. वह्निमिति नास्ति क. छ. पु.

विशेषः । अनन्तरोक्तस्य वैकल्पिकस्य निवृत्त्यर्थं वचनम् ॥ १५ ॥

मिथ्यैतदिति हारीतः ॥ १६ ॥

हारीतस्त्वृषिर्मन्यते—एतदनन्तरोक्तं मरणान्तिकप्रायश्चित्तं मिथ्या न कर्तव्यमिति ॥ १६ ॥

कुत इत्यत आह—

यो ह्यात्मानं परं वाऽभिमन्यतेऽभिशस्त एव स भवति ॥ १७ ॥

हिशब्दो हेतौ । यस्मात् य आत्मन परं वाऽभिमन्यते मारयति सोऽभिशस्त एव भवति ब्रह्महैव भवति । (१)न च पतनीयापनोदनं चिकीर्षुरन्यत् पतनीयं कर्तुमर्हतीति । हेत्वभिधानादभिशस्तवचनाच्चाऽन्येषामपि मरणान्तिकानां ब्राह्मणविषये निवृत्तिः ॥ १७ ॥

किं तर्हि तस्य प्रायश्चित्तमिति ? आह—

एतेनैव विधिनोक्तमादुच्छासाच्चरेन्नाऽस्याऽस्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्पं तु निर्हण्यते ॥ १८ ॥

'अधोनाभ्युपरिजान्वि' (२८.११.) त्यादि यदनन्तरोक्तमेतेनैव विधिना । शिष्टं गतम् ॥ १८ ॥

दारव्यतिक्रमी खराजिनं बर्हिर्लोम परिधाय 'दारव्यतिक्रमिणे भिक्षा'मिति सप्ताऽगाराणि चरेत् । सा वृत्तिः षण्मासान् ॥ १९ ॥

(२) यस्तु अन्तरेणैव निमित्तं कौमारान् दारान् परित्यजति स दारव्यतिक्रमी । खरस्य, गर्दभस्याऽजिन बर्हिर्लोम परिधाय वासित्वा दारव्यतिक्रमिणे भिक्षां दत्तेति सप्तागाराणि भिक्षां चरेत् । (३)कौमारदारपरित्यागिने भिक्षां दत्ते'ति वासिष्ठे । (४)सा वृत्ति. षण्मासान् । तत. सिद्धिः ॥ १९ ॥

---

१ न च महापातकस्य ब्रह्महत्या प्रायश्चित्त भवितुमर्हतीति. क. पुस्तके.

२. धर्मप्रजादिकमन्तरेण कौमारान् दारान्' इति क ख. पु.

३ ब घ. कौमारदारव्यतिक्रमिणे. इति. ख. पु. कौमारदारपरित्यागिने इति, क. पु.

४ षण्मासादूर्ध्वं शुद्ध. इति. ग. पु. 'सा वृत्ति'रित्यादि पृथक्सूत्रं च ॥

स्त्रियास्तु भर्तुर्व्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम् ॥ २० ॥

भर्तुर्व्यतिक्रम इति छान्दसो रेफलोपः । व्यतिक्रमः परित्यागः । या तु स्त्री भर्तारं परित्यजत्यन्तरेण निमित्तं, तस्यास्तावन्त कालं षण्मासान् कृच्छ्रद्वादशरात्राभ्यासः प्रायश्चित्तम् ॥ २० ॥

अथ भ्रूणहा श्वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय ॥२१॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्नेऽष्टाविंशी कण्डिका ॥२८॥

खट्वाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रये'न्नहिम आर्यैः सह सम्प्रयोगो विद्यते'। एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नाऽस्यामिल्लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते ॥ १ ॥

षडङ्गस्य वेदस्याऽध्येता, तदर्थवित्, प्रयोगशास्त्रस्य सव्याख्यस्यार्थवित् कर्मणामनुष्ठाताऽनुष्ठापयिता च ब्राह्मणो भ्रूणः । तथा च बौधायनः—(१)'वेदानां किञ्चिदधीत्य ब्राह्मणः । एकां शाखामधीत्य श्रोत्रियः । अङ्गाध्याय्यनूचानः । कल्पाध्याय्यृषिकल्पः । सूत्रप्रवचनाध्यायी भ्रूणः' इति । तं यो हतवान् स भ्रूणहा । स शुनः खरस्य वाऽजिनं बहिर्लोम परिधाय पुरुषस्य यस्यकस्यचिन्मृतस्य शिरः, प्रतीपानार्थम् । प्रतिर्धात्वर्थानुवादः (२)'उपसर्गस्य घञ्यमनुष्ये बहुल'मिति बाहुलको दीर्घः । पानमेव प्रतीपानम् । पानग्रहणमुपलक्षणम् । भोजनमपि तत्रैव । खट्वाङ्ग दण्डार्थे, खट्वाया अङ्गं खट्वाङ्गमीषादि तद्दण्डकृत्ये आदाय । 'भ्रूणहाऽस्मीत्येवं कर्मनिबन्धनमात्मनो नामधेयं प्रब्रुवाणश्चङ्क्रम्येत इतस्ततश्चरेत् । कापालिकतन्त्रप्रसिद्धस्य खट्वाङ्गस्य वा ग्रहणम् । भिक्षाचरणकाले च को भ्रूणघ्ने भिक्षां द-

---

१ बौधा. गृ. १. ११. २. पा. सू. ६. ३ १२२.

दातीति चरेत् । चरित्वा ग्रामे प्राणवृत्तिं प्राणयात्रामात्रं प्रतिलभ्य शून्यागारं वृक्षमूलं वा निवासार्थमभ्युपाश्रयेत्—'न हि म आर्यैः सह सम्प्रयोगो विद्यते' इत्येवं मन्यमानः । कियन्तं कालमेवं चरितव्यमित्यत आह—एतेनैवेत्यादि । गतम् । 'श्रोत्रियं वा कर्मसमाप्त(२४.२४.)' मित्यत्र यः श्रोत्रियः (१)ग्रन्थधारी अर्थज्ञश्च न भवति अनुष्ठापविता च न भवति तस्य ग्रहणम्॥१॥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २ ॥

क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादेनाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव । न तु प्रमादकृतमिति दोषाभावः ॥ २ ॥

सह सङ्कल्पेन भूयः ॥ ३ ॥

सङ्कल्पेन सह वधे कृते भूयः प्रभूततरं भवति । तेन प्रमादकृते लघुप्रायश्चित्तम् , बुद्धिपूर्वे तु गुर्विति । यत्पुनः पूर्वमुक्तं 'दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वे(२६.७)' ति तत्र तेषु प्रायश्चित्तेषु विशेषाभावादिदमुक्तम् ॥ ३ ॥

एवमन्येष्वपि दोषवत्सु कर्मसु ॥ ४ ॥

अन्येष्वपि हननव्यतिरिक्तेषु दोषवत्सु कर्मसु एवमेव द्रष्टव्यम्—अबुद्धिपूर्वं कृतेऽल्पो दोष , बुद्धिपूर्वं महानिति ॥ ४ ॥

तथा पुण्यक्रियासु ॥ ५ ॥

पुण्यक्रियास्वप्येष एव न्यायः—अबुद्धिपूर्वेऽल्पं फलम्, बुद्धिपूर्वं महदिति। तद्यथा—ब्राह्मणस्वान्यपहृत्य चोरेषु धावत्सु यदृच्छया काश्चिच्छूर आगतस्तान् हन्यात् , स्वयमेव वा शूरं दृष्ट्वा चोरा अपहृतानि द्रव्याण्युत्सृज्य पलायेरन् तदा शूरस्याऽल्पं पुण्यफलम् । यदा तु बुद्धिपूर्वं स्वयमेव चोरेभ्यः प्रत्याहृत्य स्वानि स्वामिभ्यो ददाति तदा महदिति । एवं स्वभार्यां बुद्ध्या परदारगमनेऽल्पम्, अन्यत्र महदिति ॥६॥

परीक्षार्थोऽपि ब्राह्मण आयुधं नाऽऽददीत ॥ ७ ॥

गुणदोषज्ञानं परीक्षा । तया अर्थः प्रयोजनं यस्य सः । एवभूतोऽपि ब्राह्मण आयुधं न गृह्णीयात् किं पुनर्हिंसार्थं इत्यपिशब्दार्थः ॥ ७ ॥

---

१. श्रुतिधारी इति. क. पु.

अस्य प्रतिप्रसवः—

यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन् दोष इति पुराणे ॥ ७ ॥

यस्तु हिंसार्थं मारणार्थमभिक्रान्तमभिपतितं हन्ति न तस्मिन् दोषो विद्यत इति पुराणे श्रुतम् । दोषाभावे हेतुः—यस्मान्मन्युरेव मन्युं स्पृशति न पुनः पुरुषः पुरुषम् । अत्र वसिष्ठबौधायनौ—

(१)स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् ।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥ इति ।

मनुस्तु–

(२)शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।
द्विजातीनां च वर्णानां विप्लवे कालकारिते ।
आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ॥
स्त्रीविप्राभ्यवपत्तौ च घ्नन् धर्मेण न दुष्यति ॥' इति ॥

गौतमः-(३) प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीते'ति ॥

वसिष्ठः—

(४)अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् ॥' इति ॥ ७ ॥

पतितैरकृतप्रायश्चित्तैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति प्रतिपादयितुं पूर्वपक्षमाह—

अथाऽभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्ये-तरेतरयाजका इतरेतराध्यापका मिथो विवाहमानाः ॥८॥

अथशब्दोऽर्थान्तरप्रस्तावं सूचयति । अभिशस्ता. पतिताः । समवसाय चरेयुः । अवसानं गृहम् । समित्येकीभावे । ग्रामाद्बहिरेकस्मिन् प्रदेशे गृहाणि कृत्वा चरेयुः । धार्म्यं धर्म्यं वक्ष्यमाणं वृत्तमिति । सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा । निश्चित्येत्यर्थः । इतरेतरं याजयन्तः । इतरेतरमध्यापयन्तः परस्परं विवाहसम्बन्धं च कुर्वन्तश्चरेयुः वर्तेरन्निति ॥

---

१. व. ध. ३. १८. बौ १. १० १२ २ म स्मृ ८ ३४८, ३४९.
३. गौ. ध ७ २५ ४. व. ध. ३. १६, १७.

पुत्रान् सन्निष्पाद्य ब्रूयुर्विप्रजतास्मदेवं ह्यस्मत्स्वार्थास्सम्प्रत्यपत्स्यतेति ॥ ९ ॥

अथ ते पुत्रान् सन्निष्पाद्य ब्रूयुः हे पुत्राः अस्मत अस्मत्तः । विप्रव्रजत विविधं प्रकर्षेण च स्नेहमुत्सृज्याऽऽर्यसमीपं गच्छत । एव ह्यस्मत्सु अस्माकं स्वार्थाः शिष्टाः सम्प्रत्यपत्स्यत । (१) 'आशंसायां भूतवच्चेति' भविष्यति लुङ् । सकारात्परो यकारोऽपपाठश्छान्दसो वा । सम्प्रतिपत्तिं करिष्यन्ति । आर्याणामप्येतदभिप्रेतं भविष्यति । यस्मादस्माभिरेव पतनीयं कर्माऽनुष्ठितं न भवद्भिः । न च पतितेनोत्पादितस्य पातित्यम्, अन्यत्वात् ॥ ९ ॥

एतदेवापेपादयति—

अथाऽपि न सेन्द्रियः पतति ॥ १० ॥

न हि पतितो भवन् सहेन्द्रियेण पतति, पुरुष एव पतति, नेन्द्रियं शुक्लमिति । अथापिशब्दावपि चेत्यस्यार्थे ॥ १० ॥

कथं न सेन्द्रियः पततीत्याह—

तदेतेन वेदितव्यमङ्गहीनोऽपि साङ्गं जनयति ॥ ११ ॥

तदनन्तरोक्तमर्थरूपमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यम् । चक्षुरा यङ्गहीनोऽपि साङ्गं चक्षुरादिमन्तं जनयति, एवमधिकारविकलः साधिकारं जनयिष्यति । स्त्रिया अपि कारणत्वात् तस्याश्च दोषाभावात् ॥ ११ ॥

दूषयति—

मिथ्यैतदिति हारीतः ॥ १२ ॥

एतदनन्तरोक्तमर्थरूपं मिथ्या न युक्तमिति हारीतो मन्यते ॥ १२ ॥

कुत इत्याह—

दधिधानीसधर्मा स्त्री भवति ॥ १३ ॥

दधि धीयते यस्यां सा दधिधानी स्थाली तया सधर्मा सदृशी स्त्री भवति ॥

ततः किम् ?

यो हि दधिधान्यामप्रयतं पय आतञ्च्य मन्थति न तेन धर्मकृत्यं क्रियेत एवमशुचि शुक्लं यन्निर्वर्तते न तेन सह सम्प्रयोगो विद्यते ॥ १४ ॥

यो हि पुरुषः दधिधान्या स्थाल्याम्, अप्रयतं श्वाद्युपहतम्, पय आतञ्च्य

---

१. पा. सू. ३ ३ १३२.

तक्राद्यातञ्चनेन संस्कृत्य मन्थति न तेन तदुत्पन्नेन घृतादिना धर्मकृत्यं यागादिकं क्रियते । एवं पतितसम्बन्धेनाऽशुचि शुक्लं स्त्रियां निषिक्तं शोणितेनाक्तं यन्निर्वर्तते येन रूपेण निष्पद्यते न तेन सह सम्प्रयोगो विद्यते शिष्टानाम् । अत्र चा 'शुचि शुक्ल' मित्येतेन 'दथापि न सेन्द्रिय पततीत्यस्य दूषणम् । न हि वाचानिकेऽर्थे युक्तय क्रमन्ते । तथा च समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । यथाऽऽह वसिष्ठः—

(१)'पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः । सा हि परगामिनी तामारिक्थामुपेयात्' । इति ॥ १४ ॥

अभीचारा(२)नुव्याहारावशुचिकरावपतनीयौ ॥ १५ ॥

अभिचार एवाऽभीचारः । (३)'उपसर्गस्य घञी'ति दीर्घः । अभीचारः श्येनादिः । अनुव्याहारः शापः । तौ ब्राह्मणविषयेऽपि क्रियमाणावशुचिकरावेव, न तु पतनीयौ ॥ १५ ॥

पतनीयाविति हारीतः ॥ १६ ॥

हारीतस्तु तावपि पतनीयाविति मन्यते ॥ १६ ॥

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान् द्वादशार्धमासान् द्वादश द्वादशाहान् द्वादश सप्ताहान् द्वादश त्र्यहान् द्वादश द्व्यहं द्वादशाहं सप्ताहं त्र्यहं द्व्यहमेकाहम् ॥ १७ ॥

अशुचिकराणामपि कर्मणां येषामाहत्य प्रायश्चित्तं नोक्तं तेषामपि पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव प्रायश्चित्तिः । कियन्तं कालम् ? द्वादश मासाद्येकाहान्तम् ॥ १७ ॥

किमविशेषेण सर्वेष्वेवाऽशुचिकरेष्वयं कालविकल्पः ? नेत्याह—

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः ॥ १८ ॥

इत्येषोऽशुचिकरनिर्वेषो यथा कर्माभ्यासस्तथा वेदितव्यः । बुद्धिपूर्वं सानुबन्धेऽभ्यासे च भूयांसं कालम्, विपरीते विपर्यय इति ॥ १८ ॥

॥ इत्यापस्तम्बसूत्रवृत्तौ प्रथमप्रश्ने एकोनत्रिंशी कण्डिका ॥ २९ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलाया प्रथमप्रश्ने दशमः पटलः ॥ १० ॥

---

१. व. प. ३. २. अनुव्यवहार इति. क ३. पा. सू. ६. ३ १२२.

अथैकादशः पटलः ॥

'न समावृत्ता वपेरन्' (८. ७.) स्नातस्तु काल' (१०.७.) इत्यादिषु प्रसक्तस्य स्नानस्य कालमाह--

विद्यया स्नातीत्येके ॥ १ ॥

वेदविद्या विद्या । तया सम्पन्नः स्नानं कुर्यादित्येके मन्यन्ते । मनुरत्याह--

(१)वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्' ॥ इति ॥ १ ॥

तथा व्रतेनाऽष्टाचत्वारिंशत्परीमाणेन ॥ २ ॥

परिमाणमेव परीमाणम् । छान्दसो दीर्घः । अष्टाचत्वारिंशद्ग्रहणं (२)'पादूनम्,अर्धेने' (२.१३,१४) त्यादिपूर्वोक्तस्याप्युपलक्षणम् । अष्टाचत्वारिंशदादिपरिमाणेन व्रतेन (३)वा सम्पन्नः स्नायात् असम्पन्नोऽपि विद्यया ॥ २ ॥

विद्या व्रतेन चेत्येके ॥ ३ ॥

विद्येति तृतीयैकवचनस्याकारस्य(४) 'सुपां सुलुक्' इत्यादिना लुक् । विद्यया वृतेन चोभाभ्यां सम्पन्नः स्नायादित्येके मन्यते । एवं च (५)वेदमधीत्य स्नास्य' न्नित्यत्र वेदमधीत्येत्युपलक्षणम् । अत्र याज्ञवल्क्यः--

(६)वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥' इति ।

---

१. म. स्मृ. ३ २.

२. पादूनम्, अर्धेन, त्रिभिर्वा' इत्येतेषा पूर्वोक्तानामुपलक्षणम् । इति. क. पु.

३ अथ ब्रह्मचर्यविधि 'इत्यारभ्य प्रपञ्चितेन समिदाधानभिक्षाचरणगन्धादिवर्जनादिरूपेण । अस्ति च तेषु व्रतशब्द. 'यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः" इति । इह तु समुदायाभिप्रायमेकवचनम् । तेन वा व्रतेन सम्पन्नस्स्नायात् । असम्पन्नोऽपि विद्यया । 'चत्वारि वेदव्रतानी' त्येषां तु ग्रहणमत्र नाऽऽशङ्कनीयम् । यथोक्तं विश्वरूपे । इत्यधिकः पाठो ग. पु.

४. पा सू. ७ १. ३९ ५. आप गृ १२. १. ६ याज्ञ स्मृ. १. ५२.

* अत्र व्रतशब्देनाऽग्नीन्धनभैक्षाचरणादयो ब्रह्मचारिधर्मा उच्यते। तेषु हि कालपरिमाणस्य श्रुतत्वात् पारं नीत्वेति युज्यते। दृश्यते च तेषु व्रतशब्दः। 'यथा व्रतेषु समर्थस्स्याद्यानि वक्ष्याम इति। न तु सावित्र्यादीनि वेदव्रतान्युच्यन्ते। तेषां तत्तत्प्रदेशाध्ययनशेषतया तदभावेऽभावाद्वेदं व्रतानि वेति विकल्पानुपपत्तेः। अतः कालविशेषावच्छिन्नानि व्रतानि वेदमुभयं वा पारं नीत्वेत्यर्थः * ॥ ३ ॥

तेषु सर्वेषु स्नातकवदृवृत्तिः ॥ ४ ॥

विद्यास्नातको व्रतस्नातक उभयस्नातक इति त्रयः स्नातका उक्ताः तेषु सर्वेषु स्नातकवत् 'तदर्हतीति वतिः। स्नातकार्हा वृत्तिः पूजा(१)यत्राऽस्मा अर्चितिं' मित्यादिः कार्या। न तु व्रतस्नातके न्यूना, उभयस्नातकेऽधिकेति ॥ ४ ॥

यद्यप्येवं तथाऽपि पूजयितुः फलविशेषोऽस्तीत्याह—

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ॥५॥

कर्तव्येषु कर्मस्ववधान समाधि। श्रुति श्रुतम् ॥ ५ ॥

अथ स्नातकव्रतानि ॥ ६ ॥

इत उत्तरं स्नातकव्रतान्यधिकृतानि वेदितव्यानि। यद्यपि वक्ष्यमाणेषु कानिचित् साधारणान्यपि भवन्ति तथाऽपि भूम्ना स्नातकव्रतान्यधिक्रियन्ते ॥ ६ ॥

पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा ।७।

यदा ग्रामान्निष्क्रामति ग्राम वा प्रविशति तदा पूर्वेण द्वारेणोत्तरेण वा कुर्यात्, न द्वारान्तरेण। शीलयेदिति वचनाद्यदृच्छया द्वारान्तरेण निष्क्रमणप्रवेशनयोरपि न प्रायश्चितम् ॥ ७ ॥

सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च ॥ ८ ॥

अहोरात्रयोः सन्धानं सन्धि। तौ च द्वौ-सायं प्रातश्च। (२)सज्योतिष्याज्योतिषोऽदर्शनात्' इति गौतमः। तयोस्सन्ध्ययोर्ग्रामाद्बहिरासीत।

---

* एतच्चिन्हान्तर्गतो भागोऽधिकपाठतया परिगणित ख पुस्तके। ग. पुस्तके नास्ति पाठः। अन्यत्र तु यथायथमस्ति।

१. आप. गृ. १३. २.

२. गौ. २. ११, 'सज्योतिषि' इत्यादि 'गौतम' इत्यन्तं नास्ति छ. पु.

वाग्यतश्च भवेत् । मनुः पुनराह—

(१)पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात् ।
पश्चिमां तु समासीत सम्यगृक्षविभावनात् ॥' इति

(२)'तिष्ठेत् पूर्वामासीतोत्तराम्, इति गौतमः । एते ब्रह्मचारिविषये । स्नातके आसनस्य वाङ्नियमनस्य चाऽत्र विधानात् ।

अन्ये तु-आसनग्रहण स्थानस्याऽप्युपलक्षणम्, वाग्यमश्च लौकिक्या वाचो निवृत्तिः, न सावित्रीजपस्येति वर्णयन्ति ॥ ८ ॥

अहिताग्निविषयेऽस्याऽपवादः—

विप्रतिषेधे श्रुतिलक्षणं बलीयः ॥ ९ ॥

विरोधो विप्रतिषेध अग्निहोत्रिणो बहिरासनमग्निहोत्रहोमश्च विरुध्येते । तथा च श्रूयते-'समुद्रो वा एष यदहो रात्रः, तस्यैते गाधे तीर्थे यत्सन्धी तस्मात् सन्धौ होतव्यम्" इति । तत्र श्रुतिलक्षणमग्निहोत्रमेव कर्तव्यम्, न स्मार्तं बाहिरासनम् । तस्य कल्प्यमूलत्वादितरस्य च कल्पमूलत्वादिति । (३)जैमिनिरत्याह—(४)विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति ॥९॥

सर्वान्रागान्वाससि वर्जयेत् ॥ १० ॥

कुसुम्भाद्यस्सर्वे रागाः वाससि वर्जनीयाः, न केनाचिद्रक्तं वासो बिभृयादिति ॥ १० ॥

कृष्णं च स्वाभाविकम् ॥ ११ ॥

यच्च स्वभावतः कृष्णं कम्बलादि तदपि न वसीत ॥ ११ ॥

अनूद्धासि वासो वसीत ॥ १२ ॥

उद्धासनशीलमुद्धासि उल्बणम् । ततोऽन्यदनूद्धासि । छान्दसो दीर्घः । एवंभूतं वासो वसीत आच्छादयेत् ॥ १२ ॥

अप्रतिकृष्टं च शक्तिविषये ॥ १३ ॥

प्रतिकृष्टं निकृष्टं जीर्णं मलवत् स्थूलं च । तद्विपरीतमप्रतिकृष्टम् । तादृशं च वासो वसीत शक्तौ सत्याम् ॥ १३ ॥

---

१. म. स्मृ. २ १०१ २. गौ. ध २. ११.
३. इत्यादि नास्ति. छ. पु. ४. जै सू १. ३. ३.

दिवा च शिरसः प्रावरणं वर्जयेन्मूत्रपुरीषयोः कर्म परिहाप्य ॥ १४ ॥

चकारः पूर्वापेक्षया समुच्चयार्थः । दिवा शिरसः प्रावरणं पटादिना न कुर्यात् । किमधिशेषेण ? नेत्याह—मूत्रपुरीषयोः कर्म क्रियां परिहाप्य वर्जयित्वा ॥ १४ ॥

शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्यात् भूम्यां किञ्चिदन्तर्धाय ॥

दिवा रात्रौ च मूत्रपुरीषे कुर्वन् शिरः प्रावृत्य कुर्यात् । भूम्या किञ्चिदन्तर्धाय तृणादिकम्, न साक्षात् भूम्यामेव । इह कामचारे प्राप्ते 'दिवा च शिरसः प्रावरणं वर्जये' दित्युक्तम् । तस्य पर्युदासः कृतः-'मूत्रपुरीषयोः कर्म परिहाप्ये' ति । तत्र मूत्रपुरीषकाले स एव कामचारः स्थितः । अत आरभ्यते-शिरस्तु प्रावृत्येति । एव तर्हीदमेवाऽस्तु । न पूर्वः पर्युदासः । सोऽप्यवश्यं कर्तव्यः । अन्यथा 'शिरस्तु प्रावृत्ये'त्यस्य रात्रौ चरितार्थत्वात् दिवा प्रतिषेध एव स्यात् । गौतमस्तु रात्रौ सदैव प्रावरणमाह(१) 'न प्रावृत्य शिरोऽहनि पर्येत्, प्रावृत्य रात्रौ, मूत्रोच्चारे चे'ति ॥ १५ ॥

छायायां मूत्रपुरीषयोः कर्म वर्जयेत् ॥ १६ ॥

'न चोपजीव्यच्छायास्वि'ति स्मृत्यन्तरे दर्शनात् यस्यां पथिकादयो विश्राम्यन्ति सा गृह्यते । तेन छत्रच्छायादेरप्रतिषेधः मेघच्छायाया अप्यप्रतिषेधः, अवर्जनीयत्वात् ॥ १६ ॥

स्वां तु छायामवमेहेत् ॥ १७ ॥

छान्दसस्तुगभावः । द्वितीयाश्रुतेः प्रतिशब्दाध्याहारः । अवमेहनं मूत्रकर्म । अनुपजीव्यत्वान्नायं पूर्वस्य प्रतिषेधस्य विषय इति प्रतिप्रसवोऽयं न भवति । तेन सति सम्भवे स्वामेव छायां प्रत्यवमेढव्यम् ॥१७॥

(२) न सोपानन्मूत्रपुरीषे कुर्यात् ॥ १८ ॥ कृष्टे ॥ १९ ॥ पथि ॥२०॥ अप्सु च ॥२१॥ तथा(३)ष्ठीवनमैथुनयोः कर्मा-

---

१. गौ. ध. ९. ३५, ३६, ३७

२ एतदादि 'कर्म वर्जये'दित्यन्तमेकसूत्रतया परिगणितं ख. पुस्तके । सूत्रद्वादशकतया छेदः कृतः क० पु० ३ ष्ठीवन इति. ख पु.

ऽप्सु वर्जयेत् ॥२२॥ अग्निमादित्यमपो ब्राह्मणं गा देवताश्चाऽभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत् ॥ २३ ॥

स्पष्टानि चत्वारि । ष्ठेवनमास्यश्लेष्मादीनामुत्सर्गः । देवता· देवता प्रतिमाः ॥ १८-२३ ॥

अश्मानं लोष्टमार्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत् ॥ २४ ॥

फलपाकावसाना ओषधय· । ये पुष्पैर्विना फलन्ति ते वनस्पतय । 'आर्द्रा' निति वचनात् शुष्केषु न दोषः । 'ऊर्ध्वा'निति वचनाद्धातादिनिमित्तेन भग्नेषु न दोषः । 'एतैरश्मादिभिर्मूत्रपुरीषयोश्शोधनं न कुर्यात् ॥

अग्निमादित्यमपो ब्राह्मणं गा देवताद्वारं प्रति पादं च शक्तिविषये नाऽभिप्रसारयेत् ॥ २५ ॥

शक्तौ सत्यां अग्न्यादीन्प्रति पादौ न प्रसारयेत् ॥ २५ ॥

अथाऽप्युदाहरन्ति ॥ २६ ॥

॥ इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने त्रिंशी कण्डिका ॥ ३० ॥

प्राङ्मुखोऽश्नानि भुञ्जीत्तोच्चरेद्दक्षिणामुखः ।
उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति ॥ १ ॥

उच्चारः पुरीषकर्म । पादावनेजनं पादप्रक्षालनम् । भोजनादिषु चत्वारो नियम्यन्ते । मनुस्तु—

(१)'आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते(२) ऋतं भुङ्क्ते उदङ्मुखः' ॥ इति ।

याज्ञवल्क्यश्च—

(३)'दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥' इति ॥ १ ॥

आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्यादक्षिणां दिशं दक्षिणापरां वा ॥ २ ॥

---

१. म. स्मृ. २. ५२. २. ऋत सत्यं, तत्फलमिच्छन् । ३. या स्मृ. १. १६.

आवसथो गृहम् । तस्य दूरतो मूत्रपुरीषे कुर्यात्, दक्षिणां दिशम् । द्वितीयानिर्देशादभिनिष्क्रम्येति गम्यते । दक्षिणापरा नैर्ऋती ॥ २ ॥

अस्तमिते च बहिर्ग्रामादारादावसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेत् ॥ ३ ॥

अस्तमित आदित्ये बहिर्ग्रामान्मूत्रपुरीषे न कुर्यात् । तथा अन्तर्ग्रामेऽपि गृहस्य दूरतो न कुर्यात् । दृष्टार्थोऽस्य प्रतिषेधश्चोरव्याघ्रादिशङ्कया । निर्भये देशे नाऽस्ति दोषः ॥ ३ ॥

देवताभिधानं चाऽप्रयतः ॥ ४ ॥

देवतानामग्न्यादीनामभिधानं चाऽप्रयतस्सन् वर्जयेत् । (१)अपिधानमित्यपि पाठे एष एवार्थः ॥ ४ ॥

परुषं चोभयोर्देवतानां राज्ञश्च ॥ ५ ॥

देवतानां राज्ञश्चेत्युभयोः । राज्ञयपेक्षया द्विवचनम् । परुष निन्दां वर्जयेत् ॥ ५ ॥

ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जयेत् ॥ ६ ॥

ब्राह्मण गा च पादेन नोपस्पृशेत् । इतिशब्दः प्रकारे । तेन विद्यावयोवृद्धानामब्राह्मणानामपि वर्जनम् ॥ ॥ ६ ॥

हस्तेन चाऽकारणात् ॥ ७ ॥

कारणमभ्यङ्गकण्डूयनादि । तेन विना हस्तेनाऽप्युपस्पर्शन वर्जयेत् पूर्वोक्तानाम् ॥ ७ ॥

गोरदक्षिणानां कुमार्याश्च परीवादान्वर्जयेत् ॥ ८ ॥

गोरदक्षिणाया अपि दक्षिणानामगवामपि हिरण्यादीनां कुमार्याः कन्यायाश्च दोषान् सतोऽपि न कथयेत् । अध्यात्मप्रकरणे योगाङ्गतया परीवादः प्रतिषिद्धः । अनन्तरं च वक्ष्यति(२) 'क्रोधादींश्च भूतदाहीयान् वर्जयेदिति । इदं तु वचनं गवादिषु प्रायश्चित्तातिरेकार्थम् ॥ ८ ॥

स्पृहतीं च गां नाऽऽचक्षीत ॥ ९ ॥

स्पृहती सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् ॥ ९ ॥

संसृष्टां च वत्सेनाऽनिमित्ते ॥ १० ॥

---

१ अपिधानमित्यपाठः । एष एवार्थ इति ख. ग. पु. २. आप. ध. ३१. २३.

या च गौर्वत्सेन ससृज्यते तामपि न ब्रूयादनिमित्ते-इयं ते गौर्वत्से-न पीयत इति । 'अनिमित्ते' इति वचनात्(१) 'यस्य हविषे वत्सा अ-पाकृता धयेयु'रित्यादिके निमित्ते सति वक्तुर्नास्ति दोषः ॥ १० ॥

नाऽधेनुमधेनुरिति ब्रूयात् । धेनुभव्येत्येव ब्रूयात् ॥ ११ ॥

या च गौरधेनु- पयस्विनी भवति तामप्यधेनुरिति न ब्रूयात् ॥११॥ किं तर्हि धेनुभव्येत्येव ब्रूयात्—भविष्यन्ती धेनुर्धेनुभव्या । 'धेनोर्भव्यायां (मुम् वक्तव्य) इति मुम् न भवति । क्त्यगतत्वेनाऽव्ययत्वात् । वक्तव्यत्वे च सति शब्दनियमोऽयम् । न पुनरधेनुदर्शन एवं वक्तव्यम् ॥१२॥

(२) न भद्रं भद्रमिति ब्रूयात् ॥ १३ ॥

यत् भद्रं तत् भद्रमिति न ब्रूयात् ॥ १३ ॥

किं तु ?

पुण्यं प्रशास्तमित्येव ब्रूयात् ॥ १४ ॥

पुण्यं प्रशास्तमित्यनयोरन्यतरेण शब्देन ब्रूयात् । प्रशास्तं प्रशस्तम्। छान्दसो दीर्घः ॥ १४ ॥

(३) वत्सतन्तीं च नोपरि गच्छेत् ॥ १५ ॥

वत्सानां बन्धरज्जुर्वत्सतन्ती । तस्या उपरि न गच्छेत् तां न लङ्घयेत् । व-त्सग्रहणं गोजातेरुपलक्षणम् ॥ १५ ॥

प्रेङ्खावन्तरेण च नाऽतीयात् ॥ १६ ॥

प्रेङ्खौ डोलास्तम्भौ । तोरणस्तम्भावित्यन्ये । तावन्तरेण नाऽतीयात्—त योर्मध्ये न गच्छेत् ॥ १६ ॥

नाऽसौ मे सपत्न इति ब्रूयात् यद्यसौ मे सपत्न इति ब्रूयात् द्विषन्तं भ्रातृव्यं जनयेत् ॥ १७ ॥

असौ देवदत्तो मे सपत्न इति न ब्रूयात् सदासि । किं कारणम् ? यद्यसौ मे सपत्न इति ब्रूयात्, द्विषन्तं. क्रियाशब्दोऽयम्, विद्विषाणं भ्रातृव्यं सपत्नं जनयेत् 'व्यन् सपत्ने' इति भ्रातृशब्दे व्यन्प्रत्ययः । एवं ह्युक्ते स मन्येत—नाऽकस्मादयं ब्रूते नूनमस्य मयि द्वेषो वर्तत इति । ततश्च तत्प्र-तीकारार्थं यतमानस्सपत्न एव जायते इति ॥ १७ ॥

---

१ आप. श्रौ. ९. १. २३. २. म स्मृ. ४. १३९. ३ म. स्मृ. ४ ३८.

नेन्द्रधनुरिति परस्मै ब्रूयात् ॥१८॥

इन्द्रधनुराकाशे पश्यन् परस्मै तेन शब्देन न ब्रूयात्। यद्यवश्यं वक्तव्यं मणिधनुरिति ब्रूयात्। गौतमीये (१) दर्शनात् ॥ १८ ॥

न पततः सञ्चक्षीत ॥ १९ ॥

पतत. पक्षिणः सङ्घीभूय स्थितान् सञ्चक्षीत न गणयेत्--इयन्त एत इति। अपर आह--'पुण्यक्षयेण स्वर्गात्पततः सुकृतिनः परस्मै न सञ्चक्षीत-ज्योतींषि पतन्तीति न कथयेत् ॥ १९ ॥

उद्यन्तमस्तं यन्तं चाऽऽदित्यं दर्शने वर्जयेत ॥ २० ॥

उदयसमये अस्तमयसमये वा आदित्यं न पश्येत्।

(२)मनुस्तु—

नेक्षेतोद्यन्तमादित्यं नाऽस्तं यन्तं कदाचन।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥' इति ॥ २० ॥

दिवाऽऽदित्यः सत्वानि गोपायति नक्तं चन्द्रमाः। तस्मादमावास्यायां निशायां स्वाधीय आत्मनो गुप्तिमिच्छेत् प्रायत्यब्रह्मचर्यकाले चर्यया च ॥ २१ ॥

दिवा अहनि। आदित्य. सत्वानि गोपायति प्राणिनो रक्षति, आलोकदानेन। नक्तं रात्रौ चन्द्रमाः। तस्मादमावास्यायां निशायां रात्रौ स्वाधीयः वकारश्छान्दसः। अन्तिकबाढयोर्नेदसाधौ। बाढतरं भृशतरं आत्मनो गुप्तिं रक्षणमिच्छेत्। केन प्रकारेण ? प्रायत्यब्रह्मचर्याभ्यां काले चर्यया च। अयं तावदर्थानुरूपः पाठः। अधीयमानस्तु प्रमादश्छान्दसो वा। प्रयतस्य भावः प्रायत्यं नित्यप्रायत्यादधिकेन प्रायत्येन स्नानादिजेन। ब्रह्मचर्येण मैथुनत्यागेन। काले कृतया चर्यया देवार्चनजपादिकया च ॥२१॥

कस्मात्पुनरस्यां रात्रौ चन्द्रमा न गोपायतीत्याह—

सह ह्येतां रात्रिं सूर्याचन्द्रमसौ वसतः ॥ २२ ॥

एतां रात्रिम्। अत्यन्तसंयोगे द्वितीया। सर्वामेतां रात्रिं सूर्याचन्द्रमसौ सह वसत.। न च सूर्येण सह वसतश्चन्द्रमसः प्रकाशोऽस्ति ॥ २२ ॥

न कुसृत्या ग्रामं प्रविशेत् ॥ २३ ॥

कुसृतिः कुमार्गः। तया ग्राम न प्रविशेत् ॥ २३॥

---

१. गौ. ध. ९. २२. २. म स्मृ ४. ३६.

यदि प्रविशे 'नमो रुद्राय वास्तोष्पतय' इत्येतामृचं जपेदन्यां वा रौद्रीम् ॥ २३ ॥

यदि गत्यन्तराभावात् प्रविशेत्(१) 'नमो रुद्राये' त्यादिकामृचं जपेत् । अन्यां वा रौद्रीम्(२) 'इमां रुद्राय तवस'इद्यादिकाम् । अत्र वाजसनेयगृह्ये—(३)'वनं प्रवेक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय वनसदे स्वस्ति मा सम्पारये' ति । पन्थानमारोक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय पाथिषदे स्वस्ति मा सम्पारये'ति । अपः प्रवेक्ष्यन्ननुमन्त्रयते—'नमो रुद्रायाऽप्सुषदे स्वस्ति मा सम्पारये'ति । तस्माद्यत्किञ्चन कर्म कुर्वन् स्यात् सर्वं 'नमो रुद्राये' त्येव कुर्यात् 'सर्वो ह्येष रुद्र' इति श्रुतेरिति । भारद्वाजगृह्येऽप्यस्मिन्विषये कियानेव भेदः ॥ २४ ॥

नाऽब्राह्मणायोच्छिष्टं प्रयच्छेत् ॥ २५ ॥

अब्राह्मणः शूद्रः । (४)'न शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्या'दिति वासिष्ठे दर्शनात् । तस्मा उच्छिष्टं न प्रयच्छे'दित्यनाश्रितविषयम् ॥२५॥

यदि प्रयच्छेद्दन्तान् स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत्॥२६॥

इदमाश्रितविषयम् । दन्तान्नखेन स्कुप्त्वा विलिख्य तन्मलं तस्मिन्नुच्छिष्टेऽवधाय प्रयच्छेत् । 'स्कुप्त्वे'ति स्कुभ्नातेः कत्वाप्रत्यये छान्दसं भकारस्य चर्त्वम् । स्कुनोतेर्वा पकार उपजनः ॥ २६ ॥

क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत् ॥ २७ ॥

क्रोधादयो भूतदाहीया अध्यात्मपटले(२२.५) व्याख्याताः । तद्वचनं योगिविषयमित्ययोगिनोऽपि स्नातकस्य क्रोधादिनिवृत्त्यर्थमिदं वचनम् । इदमेव तर्ह्युभयार्थमस्तु—योग्यर्थमयोग्यर्थं च । एवं सिद्धे तद्वचनं क्रोधादिवर्जनस्य योगाङ्गत्वप्रतिपादनार्थम् । तेन क्रोधाद्यनुष्ठाने योगसिद्धिर्न भवति । न पुनः स्नातकव्रतलोपप्रायश्चितमिति ॥ २७ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने एकत्रिंशी कण्डिका ॥ ३१ ॥

---

१. ब्रा ३. ७ ९ नमो रुद्राय वास्तोष्पतये । आयने विद्रवणे । उद्यायने यत्परायणे । आवर्तने निवर्तने । यो गोपायति तस्मै हुवे ॥ इति समग्रा ऋक् ॥

२. 'इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय' इतिरुद्राध्यायगता (तै०सं०४ ५.१०)

३ पार. गृ. २. १५. ११. ४. व. ध. १८ १४.

प्रवचनयुक्तो वर्षाशरदं मैथुनं वर्जयेत् ॥ १ ॥

प्रवचनमध्यापनम् । तेन युक्तो वर्षासु शरदि च मैथुनं वर्जयेत् ऋतावपि॥१॥

मिथुनीभूय च न तया सह सर्वां रात्रिं शयीत ॥ २ ॥

मिथुनीभूय मैथुनं कृत्वा तया भार्यया सह तां रात्रिं सर्वां न शयीत ॥ २ ॥

शयानश्चाऽध्यापनं वर्जयेत् ॥ ३ ॥

दिवा नक्तं च शयानस्याऽध्यापनप्रतिषेधः । स्वयं तु धारणार्थमधीयानस्य न दोषः ॥ ३ ॥

न च तस्यां शय्यायामध्यापयेद्यस्यां शयीत ॥ ४ ॥

यस्यां शय्यायां भार्यया सह शयीत रात्रौ तस्यां शय्यायामासीनोऽपि नाऽध्यापयेत् ॥ ४ ॥

अनाविःस्रगनुलेपणस्यात् ॥ ५ ॥

आविर्भूते प्रकाशिते स्रगनुलेपने यस्य एवंभूतो न स्यात् । णत्वं पूर्ववत्॥

सदा निशायां दारं प्रत्यलङ्कुर्वीत ॥ ६ ॥

'दारं प्रती'ति वचनादुपगमनार्थमलङ्करणम् । तेन भार्यायां अशक्त्यादिना उपगमनायोग्यत्वे नाऽयं नियमः ॥ ६ ॥

सशिरा वमज्जनमप्सु वर्जयेत ॥ ७ ॥

वमज्जनमवमज्जनम् । 'वष्टि वागुरिरल्लोपमवाप्योरुपसर्गयो' रित्यकारलोपः । तत्सशिरा वर्जयेत् । सह शिरसा स्नानं न कुर्यात् । अवगाहनविधयः सर्वे स्नातकव्यतिरिक्ते चरितार्थाः, नैमित्तिकाश्च । स्नातकस्य तु नित्यस्नानमवगाहनरूपं न भवतीत्याचार्यस्य पक्षः ॥ ७ ॥

अस्तमिते च स्नानम् ॥ ८ ॥

अस्तमिते आदित्ये सर्वप्रकारं स्नानं वर्जयेत् ॥ ८ ॥

पालाशमासनं पादुके दन्तप्रक्षालनमिति च वर्जयेत् ॥९॥

पालाशमासनादि वर्जयेत् । दन्तप्रक्षालनं दन्तकाष्ठम् । इतिशब्दः प्रकारे । तेनाऽन्यदपि गृहोपकरणं पालाशं वर्जयेत् ॥ ९ ॥

स्तुतिं च गुरोस्समक्षं यथा सुस्नातमिति ॥ १० ॥

'सुस्नात' मित्यादिकां च स्तुतिं गुरोस्सन्निधौ वर्जयेत् ॥ १० ॥

आ निशाया जागरणम् ॥ ११ ॥

निशा रात्रेर्मध्यमो भागः । आ तस्मात् जागृयात् न स्वप्यात् ॥११॥

अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः ॥१२॥

निशायामनध्यायः अध्ययनमध्यापनं च न कुर्यात् । शिष्येभ्यस्तु धर्मोपदेशोऽनुज्ञायते ॥ १२ ॥

मनसा वा स्वयम् ॥ १३ ॥

निशायामनध्यायस्य प्रतिप्रसवः-मनसा वा स्वयं चिन्तयेदिति ।१३।

ऊर्ध्वमर्धरात्रादध्यापनम् ॥ १४ ॥

अयमपि प्रतिप्रसवः । निशायामपि षोडश्या नाडिकाया आरभ्याध्यापनं भवतीति ॥ १४ ॥

नाऽपररात्रमुत्थायाऽनध्याय इति संविशेत् ॥ १५ ॥

रात्रेस्तृतीयो भागोऽपररात्रः । ऊर्ध्वमर्धरात्रादुत्थायाऽध्यापयन्नपररात्रे न संविशेत् न शयीत । यद्यपि तस्मिन्नधीत्यादिरनध्यायः प्राप्तो भवति । किं पुनः स्वाध्याये । तथा च मनुः—

(१)'न निशान्ते परिश्रान्तो ब्रह्माऽधीत्य पुनः स्वपेत् ।' इति ॥१५॥

(२)काममपशयीत ॥ १६ ॥

अनेन स्तम्भाद्युपाश्रयणेनाऽऽलीनस्य स्वापोऽनुज्ञायते । श्रिञ्सेवायाम् । तत्र रेफलोपश्छान्दसः । तथा शकारस्य द्विर्वचनम् ॥ १६ ॥

मनसा वाऽधीयीत ॥ १७ ॥

अयमप्यूर्ध्वमर्धरात्रादुत्थायाऽध्यापयतोऽनध्यायप्राप्तावेवोच्यते। मनसा प्राप्तं प्रदेशमधीयीत स्वयं चिन्तयेत् । उपाश्रित्य वा स्वप्यात् ॥१७॥

क्षुद्रान् क्षुद्राचरितांश्च देशान्न सेवेत ॥ १८ ॥

क्षुद्रानल्पकान् पुरुषान्न सेवेत । क्षुद्रैर्नीषादादिभिरधिष्ठितांश्च देशान्न सेवेत ॥ १८ ॥

सभास्समाजांश्च ॥ १९ ॥

---

१. म स्मृ ४. ९९ २ काममुपशयीत इति म. पु.

सभास्समाजाश्च व्याख्याताः । तान्न सेवेत ॥ १९ ॥

समाजं चेद्गच्छेत्प्रदक्षिणीकृत्याऽपेयात् ॥ २० ॥

यद्यर्थात् समाजं गच्छेत् तं प्रदक्षिणीकृत्याऽपेयादपगच्छेत् ॥ २० ॥

नगरप्रवेशनानि च वर्जयेत् ॥ २१ ॥

बहुवचननिर्देशात् बहुकृत्वो नगरं न प्रवेष्टव्यम् । यदाकदाचिद्या-दृच्छिके प्रवेशे न प्रायश्चित्तम् ॥ २१ ॥

प्रश्नं च न विब्रूयात् ॥ २२ ॥

विविच्य वचनं विवचनं निर्णयः । पृष्टमर्थं न विविच्य ब्रूयादिद-मित्थमिति । दुर्निरूपार्थविषयमिदम् ॥ २२ ॥

अथाऽप्युदाहरन्ति ॥ २३ ॥

अपि चाऽस्मिन्नर्थे श्लोकमुदाहरन्ति ॥ २३ ॥

मूलं तूलं बृहति दुर्विवक्तुः प्रजां पशूनायतनं हिनस्ति ।
धर्मप्रह्लाद न कुमालनाय रुदन् ह मृत्युर्व्युवाच प्रश्नम् ।
इति ॥ २४ ॥

दुर्निरूपमर्थं सहसा निर्णीय यो दुर्विवक्ति अन्यथा वर्णयति स दु-र्विवक्ता । तस्य दुर्विवक्तुस्तदेव दुर्वचनमेव मूलं तूलं च बृहति । मूलं पितृ-धनम् । तूलमागामिनी सम्पत् । तदुभयमपि बृहति उत्पाटयति । दन्त्योष्ठ्यो वकारः किमेतावदेव ? न, प्रजां पुत्रादिकाम् । पशून् गवादिकान् । आयतनं गृहं च हिनस्ति । अतो दुर्वचनसम्भवात् प्रश्नमात्रमेव न विब्रूयादिति। अत्रेतिहासः-कस्यचिदृषेर्धर्मप्रह्लादः कुमालनश्चेति द्वौ शिष्यावास्ताम् । तौ कदाचिदरण्यान्महान्तौ समिद्भारावाहृत्य श्रमा(१)द्दृष्टिपूत एवाचार्यगृहे प्राक्षिपताम् । तयोरेकेनाऽऽक्रान्त आचार्यस्य शिशुः पुत्रो मृतः । ततः शिष्यावाहूयाऽऽचार्यः पप्रच्छ-केनायं मारित इति । तावुभावपि न मयेत्यूचतुः । तथा पतितस्य परित्यागमदुष्टस्य परिग्रहं कर्तुमश-क्नुवन्नृषिर्मृत्युमाहूय पप्रच्छ—केनाय व्यापादित इति । ततो धर्मसङ्क टे पतितो मृत्यूरुदन्नेव प्रश्नं व्युवाच विविच्य कथितवान्। कथम् ? हे धर्मप्रह्लाद न कुमालनाय । षष्ठ्यर्थे चतुर्थी । कुमालनस्य नेदं पतनीयमिति ।

---

१. दृष्टिपथ एव इति ख. पु.

धर्मप्रह्लाद त्वयेद कृतमिति वक्तव्ये इतरस्य नाऽस्तीत्युक्तम् । तथा पीतरस्यास्तीत्यर्थाद्गम्यते । इति रुदन् ह व्युवाचेति । हशब्द ऐतिह्य त्वद्योतनार्थः । प्रह्लादशब्दे हकारात्परो रेफश्छान्दसः ॥ २४ ॥

गार्दभं यानमारोहणे विषमारोहणाव-
रोहणानि च वर्जयेत् ॥ २५ ॥

गर्दभयुक्तं यानं गार्दभं शकटादि । आरोहणे वर्जयेत् नाऽऽरोहेत् । तथा विषमेषु निम्नोन्नतेष्वारोहणमवरोहणं च वर्जयेत् । उन्नतेष्वारोहणं नि· म्नेष्ववरोहणम् ॥ २५ ॥

बाहुभ्यां च नदीतरणम् ॥ २६ ॥

तरण तरः । बाहुभ्यां च नद्यास्तरणं वर्जयेत् । 'बाहुभ्यां' मिति व· चनात् प्लवादिना न दोषः ॥ २६ ॥

नावं च सांशयिकीम् ॥ २७ ॥

भिद्यते न वेति संशयमापन्ना सांशयिकी नौः । जीर्णा नावं वर्जयेत् । 'नावा' मिति षष्ठ्यन्तपाठे नावां मध्ये सांशयिकीं नाव वर्जयेत् ॥ २७ ॥

तृणच्छेदनलोष्टविमर्दनष्ठेवनानि चाऽकारणात् ॥ २८ ॥

तृणच्छेदनादि नाऽकारणाद्वर्जयेत् न कुर्यात् । तृणच्छेदनस्याऽग्नि ज्वलनादि कारणम् । ष्ठेवनस्य कारण प्रतिश्यायादि । इतरच्च मृग्यम् ॥

यच्चाऽन्यत्परिचक्षते यच्चाऽन्यत्परिचक्षते ॥ २९ ॥

यच्चाऽन्यदेवं युक्तमाचार्याः परिचक्षते वर्जयन्ति तदप्यक्षक्रीडादि वर्ज· येत् । द्विरुक्तिः प्रश्नपरिसमाप्तिकृता ॥ २९ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने द्वात्रिंशी कण्डिका ॥ ३२ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायामेकादशः पटलः ॥

॥ समाप्तः प्रथमः प्रश्नः ॥

॥ श्रीः ॥

आपस्तम्बधर्मसूत्रे उज्ज्वलोपेते

अथ द्वितीयः प्रश्नः ॥

पाणिग्रहणादधि गृहमेधिनोव्रतम् ॥ १ ॥

पूर्वस्मिन् प्रश्न आद्ययो[1] पटलयोः प्रायेण ब्रह्मचारिणो धर्मा उक्ताः। इतरेष्वष्टसु सर्वाश्रमाणाम्। एकादशे समावृत्तस्य। इदानीं पाणिग्रहणादारभ्य कर्तव्यानि कर्माण्युच्यन्ते। पाणिर्यस्मि(१)न्नहनि गृह्यते तत्पाणिग्रहणम्(२)। अधिशब्द ऊर्ध्वार्थे वर्तते। तस्मादूर्ध्वं गृहमेधिनोगृहस्थाश्रमवतोः यदुक्तं नियत कर्तव्यम्, जातावेकवचनम्, तदुच्यते। 'पाणिग्रहणादधी'ति वचने(३)'भार्यादिरग्निर्दायादिर्वै'ति शास्त्रान्तरोक्तो विकल्पो मा भूदिति। 'गृहमेधिनो'रिति द्विवचनमन्यतरमरणे मा भूदिति(४)। वैश्वदेवं तु विधुरा अपि कुर्वन्ति ॥ १ ॥

कालयोर्भोजनम् ॥ २ ॥

कालयोरुभयोरपि भोजनं कर्तव्यम्—सायं प्रातश्च, नाऽन्तरेति परिसङ्ख्येयम्, भोजनस्य रागप्राप्तत्वात्। मानवे च स्पष्टमुक्तम्—

(५)'सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।
नाऽन्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥' इति।

अन्ये तु नियमं मन्यन्ते(६) शक्तौ सत्यां गृहमेधिनोरुभयोरपि कालयोरवश्य भोक्तव्य प्राणाग्निहोत्रस्याऽलोपायेति।

---

१. यस्मिन् कर्मणि इति. क ङ. पु. २. चतुर्थीकर्म्मान्तो विवाह· इत्यधिकं ङ पु

३. गौ. ध ५ ७

४. अनेकभार्यस्य एकस्यामपि सत्या भवत्येव। अनेकाश्रितस्याऽधिकारस्य विद्यमानत्वाच्छास्त्रान्तरत्वाच्च। इत्यधिकं क पु.

५. वचनमिद मुद्रितमनुस्मृतिकोशेषु नाऽस्ति। पर तु बहुषु निबन्धेषु परं मानत्वेनोपन्यस्तम्।

६. शक्तौ सत्या कालयोर्वर्जने च प्राणाग्निहोत्रलोपः। तस्यालोपाय कालयोरवश्यं भोजनं कर्तव्यमिति ङ पुस्तके पाठः।

तथा च बौधायनः—

(१)'गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन ह्यवकीर्णी भवेत्तु सः ॥' इति ।

(२)अन्यत्र प्रायश्चित्तात् । प्रायश्चित्ते तु तदेव विधानमिति ॥ २ ॥

तृप्तिश्चाऽन्नस्य ॥ ३ ॥

सुहितार्थयोगे करणे षष्ठी भवति । (३)पूरणगुणसुहितार्थे'ति ज्ञापनात् । अन्नेन तृप्तिं न गच्छताम् । यावत्तृप्तिं न भोक्तव्यम् ॥ ३ ॥

पर्वसु चोभयोरुपवासः ॥ ४ ॥

पक्षसन्धिः पर्व । इह तु तदुक्तमहर्गृह्यते । तेषु पर्वसूभयोर्दम्पत्योरुपवासः कर्तव्यः । उपवासो भोजनलोपः ॥ ४ ॥

अविशेषादुभयोरपि कालयोः प्राप्तावाह—

औपवस्तमेव कालान्तरे भोजनम् ॥ ५ ॥

यत्कालान्तरे एकस्मिन् काले भोजनं तदप्यौ(४)पवस्तमेव उपवास एव । (५)'औपवस्तं तूपवासः' इति निघण्टुः । तदपि दिवा, न रात्रौ; श्रौते तथा दर्शनात् (६)'न तस्य सायमश्नीया'दिति । तदिह (७)'एव मत ऊर्ध्व'मित्यादि गृह्ये यदुक्तं तत्रत्य उपवासो व्याख्यातः ॥ ५ ॥

तृप्तिश्चाऽन्नस्य ॥ ६ ॥

पर्वसु सकृद्भुञ्जानौ यावत्तृप्तिं भुञ्जीयाताम् ॥ ६ ॥

यच्चैनयोः प्रियं स्यात्तदेतस्मिन्नहनि भुञ्जीयाताम् ॥७॥

'एतस्मिन्नहनी'ति न वक्तव्यम् । प्रकृतत्वात् । यथा 'तृप्तिश्चान्नस्ये'ति पर्वसु भवति, एवमिदमपि भविष्यति । किं च 'पर्वस्वि'ति बहुवचनान्तस्य प्रकृतस्य 'एतस्मिन्नहनी'त्येकवचनान्तेन प्रत्यवमर्शो नातीव समञ्जसः । तस्माद्यवहितमपि पाणिग्रहणमहः प्रत्यवमृश्यते । एतदर्थं-

---

१. बौ ध २. ७ २४ २. अयं भागो घ. पुस्तके नास्ति ।

३. पा. सू. २. २. ११

४. 'वसु, स्तम्भ' इत्यस्मादौणादिकाद्भावे क्ते स्वार्थेऽणि च सति औपवस्तमिति रूपं, धातूनामनेकार्थत्वादभोजने वृत्तिरिति च वेदितव्यम् ।

५. नामलि. का. २. ब्र व. ३८ ६. आप श्रौ. ३. ७. आप. गृ. ७. १७.

मेव च गृह्ये (१)एतदहर्विजानीयाद्यदहर्भार्यामावहत' इत्युक्तम् । एतस्मिन् पाणिग्रहणेऽहनि यदेनयोर्दम्पत्योः प्रियं तत् भुञ्जीयाताम् । न तु 'नाऽऽत्मार्थमभिरूपमन्नं पाचये'(२-७-४)दिति निषेधस्याऽऽय विषय इति । प्रतिसंवत्सरं चैतत्कर्तव्यम् । यथा चैत्रे मासि स्वातौ कृतविवाहस्याऽपरस्मिन्नपि संवत्सरे तस्मिन्मासे स्वातावेव कार्यम् । एवं हि तदेवाऽहरिति भवति । प्रतिमासं तु नक्षत्रागमेऽपि चैत्रादिभेदान्न तदेवेति प्रतिपत्तिः । तस्मात् प्रतिसंवत्सरमिदं विवाहनक्षत्रे कर्तव्यम् । (२)यथा राज्ञामभिषेकनक्षत्रमेवं हि गृहमेधिनोर्विवाहनक्षत्रमिति ॥ ७ ॥

अधश्च शयीयाताम् ॥ ८ ॥

एतस्मिन्नहनि स्थण्डिलशायिनौ स्याताम् ॥ ८ ॥

मैथुनवर्जनं च ॥ ९ ॥

(३)मैथुनवर्जनं चैतस्मिन्नहनि कर्तव्यम् ॥ ९ ॥

श्वो भूते स्थालीपाकः ॥ १० ॥

स्थालीपाकश्च कर्तव्योऽपरेद्युः ॥ १० ॥

तस्योपचारः पार्वणेन व्याख्यातः ॥ ११ ॥

तस्य स्थालीपाकस्योपचारः प्रयोगप्रकारः पार्वणेन व्याख्यातः । एतदेव ज्ञापयति-न सामयाचारिकेषु पार्वणातिदेश प्रवर्तत इति । केचित्तु सर्वमेवैतत्पर्वविषयं मन्यन्ते । तेषामुक्तो दोषः । 'पार्वणेन व्याख्यात' इति चाऽनुपपन्नम् । न हि स एव तेन व्याख्यातो भवति । 'श्वो भूते स्थालीपाक' इति च व्यर्थम् । (४)'उपोषिताभ्यां पर्वसु कार्यं' इति पूर्वमेवोक्तत्वात् । 'एतदहर्विजानीया'दिति चास्य प्रयोजनं तत्पक्षे चिन्त्यम्(५) ॥ ११ ॥

नित्यं लोक उपदिशन्ति ॥ १२ ॥

लोके शिष्टाचारसिद्धमेतत्कर्म नित्य प्रतिसंवत्सरं कर्तव्यमिति शिष्टा उपादिशन्ति ।

अपर आह—वक्ष्यमाणं कर्म शिष्टाचारसिद्धं नित्यं सार्वत्रिक इति

---

१. आप गृ ८. ७ २. यथा इत्यादिग्रन्थ' घ. ङ पुस्तकयोर्नास्ति ।
३. 'एतस्मिन्नहनि तन्न कर्तव्यम्' इति छ. पु ४ आप. गृ. ७. १७.
५. सूत्रस्वारस्यं तु पर्वविषयत्व एव पश्यामः ।

शिष्टा उपदिशन्ति ॥ १२ ॥

यत्र क्व चाऽग्निमुपसमाधास्यन् स्यात्तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो रेखा लिखित्वाऽद्भिरवोक्ष्याऽग्निमुपसमिन्ध्यात् ॥ १३ ॥

होमप्रसङ्गादिदमुच्यते—यत्र क्व च गार्ह्ये सामयाचारिके वा कर्मणि गृहेऽरण्ये वाऽग्निमुपसमाधास्यन् प्रतिष्ठापयिष्यन् स्यात्तत्र पूर्वं प्राचीः प्रागग्रास्तिस्रो रेखा विलिखेत्। तत उदीचीः उदग्रास्तिस्रः। एव तिस्रो लेखा लिखित्वाऽद्भिरवोक्षेत्। अवोक्ष्याऽग्निं श्रोत्रियागारादाहृत्य प्रतिष्ठाप्योपसमिन्ध्यादुपसमिन्धीत काष्ठैरभिज्वलयेत्। तत्र(१) 'पुरस्तादुदग्वोपक्रमः, तथापवर्गे' इति परिभाषितम्। उपदेशक्रमाच्च प्राच्यः पूर्वं लेखा लेखनीयाः ततश्चोदीच्यः(२)।

(३)प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत्।
अथोदीचीः पुरस्संस्थं पश्चिमारम्भमालिखेत् ॥
(४)अन्ये तु प्राचीरुदगारम्भं दक्षिणान्तमालिखन्ति ॥ १३ ॥

उत्सिच्यैतदुदकमुत्तरेण पूर्वेण वाऽन्यदुपदध्यात् ॥१४॥

एतदवोक्षणशेषोदकमग्नेरुत्तरतः पूर्वतो वा उत्सिञ्चेत्। उत्सिच्याऽन्यदुदकं पात्रस्थमुपदध्यात्तत्रैव ॥ १४ ॥

नित्यमुदधानान्यद्भिरिरिक्तानि स्युर्गृहमेधिनोव्रतम् ॥१५॥

गृहे यावन्त्युदधानान्युदपात्राणि घटकरकादीनि तानि सदाऽद्भिरिरिक्तानि स्युः। एतदपि गृहमेधिनोव्रतम्। पुनः 'गृहमेधिनो'रिति वचनमस्मिन् कर्मणि स्वयं कर्तृत्वमेव यथा स्यात् प्रयोजककर्तृत्वं मा भूदिति।

अन्य आह—पुन 'गृहमेधिनो'रिति वचनात् पूर्वसूत्रं ब्रह्मचारिविषयेऽपि 'सावित्र्या समित्सहस्रमादध्या' (१.२६.१.) दित्यादौ भवति। पाके तु स्त्रिया न भवति। 'उपसमाधास्य'न्निति लिङ्गस्य विवक्षितत्वात्। आर्याः प्रयता' (२.३.१.) इत्यादौ भवतीति ॥ १५ ॥

---

१. आप. गृ. १. ५, ६.
२. 'एकमेवेदं कर्मलेखाकरणं नाम स्थण्डिलसंस्काररूपम्। ततश्च' इत्यधिकं घ.ङ पु.
३. प्राचीः पूर्वं दक्षिणान्तमुदगारभ्यमालिखेत्। इति ख. च. पु.
४. अन्ये तु प्राचीर्दक्षिणारम्भमालिखन्ति इति च. पु.।

अहन्यसंवेशनम् ॥ १६ ॥

संवेशन मैथुनं तदहनि न कर्तव्यम् ॥ १६ ॥

ऋतौ च सन्निपातो दारेणाऽनुव्रतम् ॥ १७ ॥

रजोदर्शनादारभ्य षोडशाऽहोरात्रा ऋतुः । तत्र च सन्निपातः संयागो दारेण सह कर्तव्यः । छान्दसमेकवचनम् । (१) नित्यं बहुवचनान्तो हि दारशब्दः । अनुवृत्त शास्त्रतो नियमो व्रतं, तदनुरोधेन । तत्र मनु—

(२)'ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
चतुर्भिरितरैस्सार्धमहोभिस्सद्विगर्हितैः ॥
तासामाद्याश्चतस्रस्तु निन्द्या एकादशी च या ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः' ॥

(३)'अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ॥
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ।' इति ।

याज्ञवल्क्यस्तु—

(४)एव गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् । इति ।

आचार्यस्तु चतुर्थीप्रभृति गमनमाह—(५)चतुर्थिप्रभृत्याषोडषीमुत्तरामुत्तरां युग्मां प्रजानिश्रेयसमृतुगमनमित्युपदिशन्ति' इति । तदिह षोडशसु रात्रिष्वादितस्तिसृस्सर्वथा वर्ज्याः । चतुर्थ्येकादशी त्रयोदशी चाऽऽचार्येणाऽनुज्ञाताः मनुना निषिद्धाः । इतरासु दशसु युग्मासु पुत्रा जायन्ते, स्त्रियोऽयुग्मासु । तत्र चो'त्तरामुत्तरा'मिति वचनात् षोडश्यां रात्रौ मघादियोगाभावे गच्छतस्सर्वत उत्कृष्टः पुत्रो भवति । चतुर्थ्यामवमा मध्ये कल्प्यम् । एवं पञ्चदश्यामुत्कृष्टा दुहिता । पञ्चम्यामवमा । मध्ये कल्प्यम् । षोडशस्वेव गमनं गर्भहेतुः । तत्रापि प्रथमम् । एवं स्थिते नियमविधिरयं-योग्यत्वे सत्यृताववश्यं सन्निपतेत, असन्निपतन् पुत्रोत्पत्तिं निरुन्धानः प्रत्यवेयादिति । तथा च दोषस्मृतिः—

(६)'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
तस्या रजसि तं मासं पितरस्तस्य शेरते ॥' इति ।

पुत्रगुणार्थितया पूर्वा पूर्वा वर्जयतो न दोषः । अन्ये तु परिसङ्ख्यां

---

१. नित्यं बहुवचनान्तो हि दारशब्दः इति नास्ति क. पु.
२. म. स्मृ ३ ४६, ४७. ३ म स्मृ. ४. १२८.
४. या स्मृ. १ ८०. ५. आ प गृ १. १ ६. बो. व ४. १०, २०.

मन्यन्ते—ऋतावेव सन्निपतेन्नाऽन्यत्रेति । तेषामृतावनियमादगमनेऽपि दोषाभावाद्दोषस्मरणमनुपपन्नं स्यात् । सर्वथा विधिर्न भवति । राग प्राप्तत्वात्सन्निपातस्य ॥ १७ ॥

अन्तरालेऽपि दार एव ॥ १८ ॥

अन्तराल मध्यम् । ऋत्वोरन्तराले मध्येऽपि सन्निपातः स्यात् दार एव सकामे सति । यद्यात्मनो जितेन्द्रियतया न तादृशं पारवश्यम् , तथाऽपि भार्यायामिच्छन्त्यां तद्रक्षणार्थमवश्यं सन्निपतेदिति । वक्ष्यति च (१)'अप्रमत्ता रक्षथ तन्तुमेत' (२.१३.६.) मित्यादि । अनुव्रतमित्यनुवृत्तेः प्रतिषिद्धेषु दिनेषु न भवति ॥ १८ ॥

ब्राह्मणवचनाच्च संवेशनम् ॥ १९ ॥

यदिदमनन्तरोक्तं संवेशन तत्र ब्राह्मणवचनं प्रमाणं (२)'काममाधिजनितोस्सम्भवामे'ति ॥ १९ ॥

स्त्रीवाससैव सन्निपातस्यात् ॥ २० ॥

भो
एवकारो भिन्नक्रमः । स्त्र्युपगार्थं वासः स्त्रीवास. । तेन सन्निपात एव स्यात् । न तेन सुप्रक्षालितेनाऽपि ब्रह्मयज्ञादि कर्त्तव्यमिति यावत् ॥२०॥

यावत्सन्निपातं चैव सह शय्या ॥ २१ ॥

यावत्सन्निपातमेव दम्पत्योस्सह शयनम् ॥ २१ ॥

ततो नाना ॥ २२ ॥

ततः पृथक्शयीयाताम् ॥ २२ ॥

उदकोपस्पर्शनम् ॥ २३ ॥

ततो द्वयोरप्युदकोपस्पर्शन स्नानं कर्तव्यम् । इदमृतुकाले ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायां श्रीहरदत्तविरचितायां द्वितीयप्रश्ने प्रथमा कण्डिका ॥ १॥

---

१. बौ. ध २. २. ३६. द्रष्टव्यम् ।

२. तै सं. २. ५ १. यावत्प्रसूति सभोगं प्राप्नुयामेत्यर्थः । अयं स्त्रीभिरिन्द्रात् प्रार्थितो वर ।

अपि वा लेपान्प्रक्षाल्याऽऽचम्य प्रोक्षणमङ्गानाम् ॥ १ ॥

अपि वा रेतसो रजसश्च ये लेपास्तानद्भिर्मृदा च प्रक्षाल्याऽऽचम्य अङ्गानां प्रोक्षणं शिरःप्रभृतीनां कर्तव्यम्(१)। रुचितो व्यवस्था। यावता प्रयतो मन्यते ॥ १ ॥

सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् ॥ २ ॥

सर्वेषामेव वर्णानां ब्राह्मणादीनां चतुर्णां ये स्वधर्मा वर्णप्रयुक्ता आश्रमप्रयुक्ता उभयप्रयुक्ता वा तेषामवैगुण्येनाऽऽन्तादनुष्ठाने सति परमुत्कृष्टं अपरिमितमक्षयं सुखं स्वर्गाख्यं भवति ॥ २ ॥

न केवलमेतावत्। किं तर्हि ?

ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते ॥ ३ ॥

ततः सुखानुभवानन्तरं परिवृत्तिरिह लोके जन्म भवति। तस्यां च कर्मणां यः फलशेषोऽभुक्तोऽशः, तेन जाति ब्राह्मणादिकां विशिष्टे वा कुले जन्म। रूपं कान्तिम्। वर्णं हेमादितुल्यम्। बलं प्रतिपक्षनिग्रहक्षमम्। मेधां(२) ग्रन्थधारणशक्तिम्। प्रज्ञां अर्थधारणशक्तिं। द्रव्याणि स्वर्णादीनि। धर्मानुष्ठानम् इतिकरणाद्यच्चाऽन्यदेवं युक्तं तत्सर्वं प्रतिपद्यते। सर्वत्र धर्मशेषो हेतुः। कर्माणि भुज्यमानानि सावशेषाणि भुज्यन्ते। ऐहिकस्य शरीरग्रहणादेरपि कर्मफलत्वात्। धर्मानुष्ठानं प्रतिपद्यत इत्युक्तम्। यदा चैवं तदा सर्ववर्णानां स्वधर्मानुष्ठान इत्यादि प्रतिपद्यत इत्यन्तं पुनर्भवतीत्यनुक्तसिद्धम्। तत् तस्माच्चक्रवदुभयोर्लोकयोरिह चाऽमुष्मिंश्च सुख एव वर्तते न जातु चित् दुःखे वर्तते। सुखानुबन्धेनैवाऽऽवृत्तिर्भवतीत्यर्थः ॥ ३ ॥

शरीरोत्पत्तिसंस्कारा(३)अप्यावश्यका इति दर्शयितुं दृष्टान्तमाह--

यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम् ॥ ४ ॥

चलोपोऽत्र द्रष्टव्यः। यथा चौषधीनां ब्रीह्यादीनां वनस्पतीनां चा-

---

१ इदमनृतुकाले इत्यधिकं ख.च पुस्तकयोः 'रुचितः इत्यादिर्ग्रन्थोऽपि नास्ति तत्र।

२ मेधां ग्रन्थग्रहणशक्तिम्, प्रज्ञा अर्थग्रहणशक्तिम् इति क. च. पु ।

३ अप्यवश्यापेक्षया. इति. च पु

ह्यादीनां बीजस्य क्षेत्रविशेषे कर्मविशेषे संस्कारविशेषे च क्षेत्रस्य वा कृष्यादौ कर्मविशेषे फलपरिवृद्धिर्भवति । त एव व्रीह्यादय ऊषर उप्ता न प्ररोहन्ति । कृष्यादिपरिकर्मिते तु क्षेत्रे उप्ताः स्तम्बकरयो भवन्ति । एव पुरुषेऽपि गर्भाधानादिसंस्कारसम्पन्ने द्रष्टव्यम् ॥ ४ ॥

एतेन दोषफलपरिवृद्धिरुक्ता ॥ ५ ॥

एतेनैव न्यायेन दुष्टकर्मफलपरिवृद्धिरप्युक्ता वेदितव्या । (१)तत्रोहेन पठनीयम्–सर्ववर्णानां स्वधर्माननुष्ठाने परमपरिमितं दुःखम् । ततः परिवृत्तौ कर्मफलशेषेण दुष्टां जात्यादिकामद्रव्यान्तामधर्मानुष्ठानमिति प्रतिपद्यते । तच्चकवदुभयोर्दुःख एव वर्तते । यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषाभावे फलहानिरेवमिति ॥ ५ ॥

दोषफलपरिवृद्धावुदाहरणमाह—

स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो वैश्यो वा परस्मिँल्लोकेऽपरिमिते निरये वृत्ते जायते चण्डालो ब्राह्मणः पौल्कसो राजन्यो वैणो वैश्यः ॥ ६ ॥

स्तेनः सुवर्णचोरः । अभिशस्तो ब्रह्महा स्तेनोऽभिशस्तो वा ब्राह्मणादिरमुष्मिल्लोकेऽपरिमिते निरये दोषफलमनुभूय तस्मिन् वृत्ते परिक्षीणे ब्राह्मणश्चण्डालो जायते । शूद्रात् ब्राह्मण्यां जातश्चण्डालः, राजन्यः, पौल्कसः । शूद्रात्क्षत्रियायां जातः पुल्कसः । स एव पौल्कसः । प्रज्ञादित्वादण् । वैश्यो, वैणो जायते(२) वेणुना नर्तको वैणः ॥ ६ ॥

एतेनाऽन्ये दोषफलैः कर्मभिः परिध्वंसा दोषफलासु योनिषु जायन्ते वर्णपरिध्वंसायाम् ॥ ७ ॥

वर्णपरिध्वंसा वर्णेभ्यः प्रच्यवनं तस्यां वर्णपरिध्वंसायाम् । यथा ब्राह्मणादयश्चण्डालाद्या जायन्ते । एतेन प्रकारेण स्तेनाभिशस्ताभ्यां अन्येऽपि दोषफलैः कर्मभिर्दोषफलासु सूकरादिषु, योनिषु जायन्ते । परिध्वंसाः स्वजातिपरिभ्रष्टा इत्यर्थः । ते तथाऽवगन्तव्या इति ॥ ७ ॥

यथा चण्डालोपस्पर्शने सम्भाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् ॥ ८ ॥

---

१. तत्रोक्त व्यत्ययेन पठनीयम् । इति. घ. पु.

२. वेणुर्नर्तकः स एव वैणः । इति. घ पु.

चण्डालोपस्पर्शने दोषो भवति । तथा सम्भाषाया दर्शने च । उपसमस्तमपि चण्डालग्रहणमभिसम्बध्यते । तत्र सर्वत्र प्रायश्चित्तं वक्ष्यते ॥८॥

अवगाहनमपामुपस्पर्शने ॥९॥ सम्भाषायां ब्राह्मणसम्भाषा ॥ १० ॥ दर्शने ज्योतिषां दर्शनम् ॥ ११ ॥

उपस्पर्शने सत्यवगाहनमपां प्रायश्चित्तम्। ऋजुनी उत्तरे द्वे सूत्रे । अस्मिन् कर्मप्रशंसाप्रकरणे प्रायश्चित्ताभिधानं स्वकर्मच्युतानां निन्दार्थम् । एवंनाम निन्दितश्चण्डालः यस्य दर्शनेऽपि प्रायश्चित्तं स एव जायते स्वकर्मच्युतो ब्राह्मण इति ॥ ९–११ ॥

इत्यास्तम्बधर्मसूत्रवृत्तावुज्ज्वलायां द्वितीयप्रश्ने
द्वितीया कण्डिका ॥ २ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां
द्वितीयप्रश्ने प्रथमः पटलः ॥ १ ॥

अथ द्वितीयः पटलः ॥

आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारः स्युः ॥ १ ॥

आर्यास्त्रैवर्णिकाः । 'आर्याधिष्ठिता वा शूद्रा' (२.३,४) इत्युत्तरत्र दर्शनात् । प्रयताः स्नानादिना शुद्धाः । वैश्वदेवे गृहमेधिनोभोजनार्थे पाके । गृहमेधिनो यदश्नीयास्ये'(३-१२)ति दर्शनात् । अन्नसंस्कर्तारः स्युः । अन्नं भक्ष्यभोज्यपेयादिकं तत् संस्कुर्युः । न स्वयं, नाऽपि स्त्रियः ॥ १ ॥

भाषां कासं क्षवधुमित्यभिमुखोऽन्नं वर्जयेत् ॥ २ ॥

भाषा शब्दोच्चारणम् । कासः कण्ठे घुरुघुराशब्दः । क्षवधुः क्षुतम् । एतत्त्रितयमन्नाभिमुखो न कुर्यात् । 'संस्कर्तारः स्यु'रिति बहुवचने प्रकृते 'वर्जये'दित्येकवचन प्रत्येकमुपदेशार्थम् ॥ २ ॥

केशानङ्गं वासश्चाऽऽलभ्याऽप उपस्पृशेत् ॥ ३ ॥

केशादीनात्मीयानन्यदीयान्वा । आलभ्य स्पृष्ट्वा । अप उपस्पृशेत् । नेद स्नानम् । किं तर्हि ? स्पर्शमात्रम् । केशालम्भे पूर्वमप्युपस्पर्शनं विहितम् । इद तु तत्रोक्तं वैकल्पिकं शकृदाद्युपस्पर्शनं मा भूदिति ॥ ३ ॥

आर्याधिष्ठिता वा शूद्रास्संकर्तारः स्युः ॥ ४ ॥

त्रैवर्णिकैरधिष्ठिता वा शूद्रास्संस्कर्तारः स्युः । प्रकरणादन्नस्येति गम्यते॥४॥

तेषां स एवाऽऽचमनकल्पः ॥ ५ ॥

तेषां शूद्राणामन्नसंस्कारेऽधिकृतानां स एवाऽऽचमनकल्पो वेदितव्यः, यस्याऽन्नं पचन्ति । यदि ब्राह्मणस्य, हृदयङ्गमाभिरद्भिः । यदि क्षत्रियस्य, कण्ठगाभिः । यदि वैश्यस्य, तालुगाभिः । इन्द्रियोपस्पर्शनं च भवति ॥ ५ ॥

अधिकमहरहः केशश्मश्रुलोमनखवापनम् ॥ ६ ॥

शूद्राः पचन्तः प्रत्यहं केशादि वापयेयुः । इदमेषामधिकमार्येभ्यः॥६॥

उदकोपस्पर्शनं च सह वाससा ॥ ७ ॥

सहैव वाससा स्नानं कुर्युः । आर्याणां तु परिहितं वासो निधाय कौपीनाच्छादनमात्रेणाऽपि स्नानं भवति । शूद्राणामपि पाकादन्यत्र । त-

था च मनुः—

(१)'न वासोभिस्सहाऽऽजलं नाऽविज्ञाते जलाशये ।' इति ॥ ७ ॥

अपि वाऽष्टमीष्वेव पर्वसु वा वपरेत् ॥ ८ ॥

यदि वाऽष्टमीष्वेव वपरेत् केशादीन् पर्वस्वेव वा । न प्रत्यहम् । 'वपरे'त्रिति अन्तर्भावितण्यर्थः । वापयेरन्नित्यर्थः । तथा च 'लोमनखवापन'मिति पूर्वत्र णिच्प्रयुक्त ॥ ८ ॥

परोक्षमन्नं संस्कृतमग्नावधिश्रित्याऽद्भिः प्रोक्षेत्त-देवपवित्रमित्याचक्षते ॥ ९ ॥

यदि शूद्राः परोक्षमन्नं सस्कुर्युः आर्यैरनधिष्ठिताः । तदा तत्परोक्षमन्न सस्कृत स्वयमग्नावधिश्रयेत । अधिश्रित्याऽद्भि. प्रोक्षेत् । तदेवंभूतमन्नं देवपवित्र-मित्याचक्षते । देवानामपि तत्पवित्र किं पुनर्मनुष्याणामिति ॥ ९ ॥

सिद्धेऽन्ने तिष्ठन् भूतमिति स्वामिने प्रब्रूयात् ॥ १० ॥

सिद्धे पक्केऽन्ने तिष्ठन् पाचकोऽधिष्ठाता वा भूतमिति प्रब्रूयात् । कस्मै ? य-स्य तदन्न तस्मै स्वामिने । भूतं निष्पन्नमित्यर्थः ॥ १० ॥

तत्सुभूतं विराडन्नं तन्मा क्षापीति प्रतिवचनः ॥ ११ ॥

तत्सुभूतमित्यादि प्रतिवचनो मन्त्रः । तदन्नं सुभूत सुनिष्पन्नम् । विराट् विराजः साधनम् । अन्नमशनम् । तच्च मा क्षाथि क्षीणं मा भू-दित्यर्थः ॥ ११ ॥

गृहमेधिनो यदशनीयं तस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः ॥ १२ ॥

गृहमेधिनो यदशनीय पक्वमन्नं वा उपस्थितं तस्यैकदेशेन होमा बलयश्च वक्ष्यमाणाः कर्तव्याः । स्वर्गः पुष्टिश्च तेषां फलमिति ॥ १२ ॥

तेषां मन्त्राणामुपयोगे द्वादशाहमधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च ॥ १३ ॥

तेषां होमानां बलीनां च ये मन्त्रास्तेषामुपयोगे । उपयोगो नियम-पूर्वकं विद्याग्रहणम्(२) । तत्र द्वादशाहमधश्शय्या स्थण्डिलशायित्वम् । ब्रह्म

---

१. म. स्मृ. ४. १२९

२. तथा च बौधायनः—'तेषां ग्रहणे द्वादशरात्र' मित्यादि इत्यधिकं ख. पुस्तके ।

चर्यं मैथुनवर्जनम् । (१)क्षारलवणवर्जनं च भवति । उपयोक्तुरेव व्रतम्, अध्ययनाङ्गत्वात् । अन्ये तु पत्न्या अपीच्छन्ति । उपयोगः प्रथमयोगः तत्र च पत्न्या अपि सहाऽधिकार इति वदन्तः ॥ १३ ॥

उत्तमस्यैकरात्रमुपवासः ॥ १४ ॥

उत्तमस्य 'उत्तमेन वैहायस(२.४.८.) मिति वक्ष्यमाणस्य(२) 'ये भूताः प्रचरन्ती'त्यस्य एकरात्रमुपवासः कर्तव्यः ॥ १४ ॥

बलीनां तस्य तस्य देशे संस्कारो हस्तेन परिमृज्याऽऽवोक्ष्य न्युप्य पश्चात्परिषेचनम् ॥ १५ ॥

बलीना मध्ये तस्यतस्य बलेर्देशे संस्कारः कर्तव्यः । कः पुनरसौ ? हस्तेन परिमार्जनमवोक्षणं च । तं कृत्वा बलिं निवपति । न्युप्य पश्चात् परिषेचनं कर्तव्यम् । उपदेशक्रमादेव सिद्धे पश्चाद्ग्रहणं मध्ये गन्धमाल्यादिदानार्थमित्याहुः । 'तस्यतस्ये'ति वचनं सत्यपि सम्भवे सकृदेव परिमार्जनमवोक्षणं च मा भूत् । एकस्मिन्देशे समवेतानामपि पृथक्पृथग्यथा स्यादिति ॥ १५ ॥

औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन जुहुयात् ॥ १६ ॥

यत्र पच्यते स पचनोऽग्निः । औपासनवतामौपासने, अधिश्रुरस्य पचन इति व्यवस्थितो विकल्पः । अन्ये तु-तुल्यविकल्पं मन्यन्ते । षड्भिराद्यैः (३)'अग्नये स्वाहा, सोमाय स्वाहा, विश्वेभ्यो देवेभ्यस्स्वाहा, ध्रुवाय भौमाय स्वाहा, ध्रुवक्षितये स्वाहा, अच्युतक्षितये स्वाहेत्येतैः । एते हि मन्त्रपाठे पठिताः प्राग्विवाहमन्त्रेभ्यः विशिष्टनियमसापेक्षग्रहणत्वात्तैस्सह न गृह्यन्ते । केचित् सौविष्टकृतमपि समं जुह्वति 'अग्नये स्विष्टकृते स्वाहे'ति औषधहविष्केषु तस्य सर्वत्र प्रवृत्तिरिति वदन्तः । अन्ये तु सोमाय स्वाहेति न पठन्ति । सौविष्टकृतं षष्ठं पठन्ति । हस्तग्रहणं दर्व्यादिनिवृत्त्यर्थम् ॥ १६ ॥

---

१. क्षारपदार्थः आप. ध २. १५. १४ सूत्रे द्रष्टव्य. ।

२. ये भूताः प्रचरन्ति दिवा नक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हराम मयि पुष्टिं पुष्टिपतिर्दधातु ॥ इति मन्त्रः । (तै. आ १०. ६७.)

३. आप मन्त्रप्रश्ने. १. १.

उभयतः परिषेचनं यथा पुरस्तात् ॥ १७ ॥

उभयत. पुरस्तादुपरिष्टाच्च परिषेचनं कर्तव्यम् । कथम्? यथा पुरस्तात् उक्तं गृह्ये(१) 'आदृतेऽनुमन्यस्वे'त्यादि, 'अन्वमंस्थाः प्रासावीरिति मन्त्र-सन्नाम' इति च । सामयाचारिकेषु पार्वणनातिदेशो न प्रवर्तत इति ज्ञापितत्वादप्राप्तविधिरयम् । अन्ये तु परिसङ्ख्यां मन्यन्ते—परिषेचन-मेव वैश्वदेवे, नाऽन्यत्तन्त्रमिति ॥ १८ ॥

एवं बलीनां देशे देशे समवेतानां सकृत्सकृदन्ते परिषेचनम् ॥ १८ ॥

यथा षण्णामाहुतीनां परिषेचनं तन्त्रम् , विभक्तत्वात् । एवं बलयो-ऽपि ये एकस्मिन् देशे समवेता 'उत्तरैर्ब्रह्मसदन'(४.२.४) इत्यादयस्तेषां यदन्ते परिषेचनं प्राप्तं 'पश्चात्परिषेचन' मित्यनेन विहितं तत्सर्वान्ते सकृत्कर्तव्यम्, न प्रत्येकं पृथगिति । असत्यस्मिन्सूत्रे पूर्वत्र 'तस्य तस्ये' ति वचनाद्यथा परिमार्जनमवोक्षणं च प्रत्येक पृथक्पृथग्भवति तथा परिषेचनमपि स्यात् । अत्र चोपदेशादेव य एकदेशस्था बलयस्तेषामेव सकृदन्ते परिषेचनं, न यादृच्छिकसमवेतानाम् । तेन यद्यप्यगारस्योत्त रपूर्वदेशश्शय्यादेशः, तथापि कामलिङ्गस्य पृथक्परिषेचनं भवति ॥१८॥

सति सूपसंसृष्टेन कार्याः ॥ १९ ॥

सति सूपे तत्संसृष्टा बलयः कार्याः । अन्ये त्वन्यैरापे व्यञ्जनैस्संसर्ग-मिच्छन्ति । तथा च बौधायन.—(२) 'काममितरेष्वायतने'ष्विति । एष एव व्यञ्जनानां संस्कार. । (३)सूत्रस्थापि—व्यञ्जनैस्सुष्ठूपसंसृष्टेनाऽन्नेन बलयः कार्यास्सति सम्भव इत्यर्थः इति ॥ १९ ॥

अपरेणाऽग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् ॥ २० ॥

अपरेणाऽग्निमग्नेः पश्चात् । सप्तमाष्टमाभ्यां 'धर्माय स्वाहा, अधर्माय स्वाहे' त्येताभ्यां बलिहरणं कर्तव्यम् । उदगपवर्गम् । न प्रागपवर्गम् ॥ २० ॥

उदधानसन्निधौ नवमेन ॥ २१ ॥

उदकं यत्र धीयते तदुदधानं(४) मणिकाख्यम् । तस्य सन्निधौ नवमेन

---

१. आप गृ. २. ३. २. बौ. गृ. १. ८. १.

३. सूपस्यापि । व्यञ्जनैरपूपेन च ससृष्टेन बलय इति. क. छ. पु.

४. अस्य विधिर्गृह्ये वास्तुनिर्माणविधौ (आप गृ १०. ९) द्रष्टव्यः ।

'अङ्ग्यः स्वाहे'त्यनेन ॥ २१ ॥

मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् ॥ २२ ॥

दशमैकादशाभ्यां 'ओषधिवनस्पतिभ्यः स्वाहा, रक्षोदेवजनेभ्यः स्वाहे'त्येताभ्यां अगारस्य मध्ये प्रागपवर्गं कर्तव्यम् ॥ २२ ॥

उत्तरपूर्वे देशेऽगारस्योत्तरैश्चतुर्भिः ॥ २३ ॥

अगारस्य य उत्तरपूर्वो देशस्तत्रोत्तरैश्चतुर्भिः 'गृह्याभ्यः स्वाहा, अवसानेभ्यः स्वाहा, अवसानपतिभ्यः स्वाहा, सर्वभूतेभ्यः स्वाहे'त्येतैः प्रागपवर्गमित्येव ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने तृतीया कण्डिका ॥३॥

शय्यादेशे कामलिङ्गेन ॥ १ ॥

शय्यादेशे 'कामाय स्वाहे'त्यनेन ॥ १ ॥

(१)देहल्यामन्तरिक्षलिङ्गेन ॥ २ ॥

देहली द्वारस्याऽधस्ताद्दारु । तस्याऽधोवेदिकेत्यन्ये । अन्तर्द्वारस्य च ग्रहणम् । तत्राऽन्तरिक्षलिङ्गेन 'अन्तरिक्षाय स्वाहे'त्यनेन ॥ २ ॥

उत्तरेणाऽपिधान्याम् ॥ ३॥

येनाऽपिधीयते द्वारं साऽपिधानी कवाटम् । तदर्गलमित्यन्ये । तत्रोत्तरेण मन्त्रेण 'यदेजति जगति यच्च चेष्टति नाम्नो भागो यज्ञाग्ने स्वाहे'त्यनेन ॥ ३ ॥

उत्तरैर्ब्रह्मसदने ॥ ४ ॥

अगारस्येत्यनुवृत्तेः तत्र यो ब्रह्मसदनाख्यो देशः वास्तुविद्याप्रसिद्धो (२)मध्येऽगारस्य । तत्रोत्तरैर्दशभिः 'पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा, दिवे स्वाहा, सूर्याय स्वाहा, चन्द्रमसे स्वाहा, नक्षत्रेभ्यः स्वाहा, इन्द्राय स्वाहा, बृहस्पतये स्वाहा, प्रजापतये स्वाहा, ब्रह्मणे स्वाहे'त्येतैः प्रागपवर्गमित्येव ।

---

१. देहिन्यामिति पाठः क. पुस्तके ।

२. मध्येऽगारस्येत्यतः तस्य देशस्योपयुक्तत्वात् इत्यधिकः पाठः ख. पुस्तके ।

अपर आह—ब्रह्मा यत्र सीदति गार्हेषु कर्मसु अग्नेर्दक्षिणतो ब्रह्मसदन तन्त्रेति ॥ ४ ॥

दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीन-पाणिः कुर्यात् ॥ ५ ॥

अनन्तराणां बलीनां दक्षिणत पितृलिङ्गेन 'स्वधा पितृभ्य' इत्यनेन बलिं कुर्यात्, प्राचीनावीत्यवाचीनपाणिश्च भूत्वा दक्षिणं पाणिमुत्तानं कृत्वा अङ्गुष्ठतर्जन्योरन्तरालेन ॥ ५ ॥

रौद्र उत्तरो यथा देवताभ्यः ॥ ६ ॥

पितृबलेरुत्तरतो रौद्रबलिः कर्तव्यः । यथा देवताभ्य तथा, प्राचीनावीत्यवाचीनपाणिरिति नाऽनुवर्तत इत्यर्थः । 'नमो रुद्राय पशुपतये स्वाहे'ति मन्त्रः । अत्र यद्यपि पशुपतिलिङ्गमप्यस्ति, तथापि तद्रुद्रस्यैव विशेषणमिति रौद्र इति व्यपदेशो नाऽनुपपन्नः । देवतास्मरणमपि रुद्रायेत्येव कुर्वन्ति । रुद्राय पशुपतय इत्यन्ये । केचित्तु-उत्तरो मन्त्रो रौद्रः न पशुपतिदैवत्य इत्याचक्षते । तेषां देशः प्राग्वोदग्वा पित्र्यात् ॥ ६ ॥

तयोर्नाना परिषेचनं धर्मभेदात् ॥ ७ ॥

तयोरनन्तरोक्तयोर्बल्योरेकस्मिन् देशे समवेतयोरपि नाना पृथक् परिषेचनं कर्त्तव्यम् । कुतः ? धर्मभेदात् । पित्र्यस्याऽप्रदक्षिणं परिषेचनं कर्तव्यम् । इतरस्य दैवत्वात्प्रदक्षिणमिति ॥ ७ ॥

नक्तमेवोत्तमेन वैहायसम् ॥ ८ ॥

उत्तमेन 'ये भूताः प्रचरन्ति नक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिदधातु स्वाहे'(१) त्यनेन वैहायस बलिं दद्यात् । तच्च नक्तमेव । 'वैहायसमि'ति वचनादाकाश एव बलिरुत्क्षेप्यः, न छदिष्कृते देशे । तथाच बौधायनः-(२)'अथाऽऽकाश उत्क्षिपति ये भूताः प्रचरन्ती'ति ।

अपर आह—एवकारो भिन्नक्रमः । नक्तमुत्तमेनैव बलिरिति तत्र बल्यन्तराणां रात्रौ निवृत्तिः । अन्ये तु-ऊहेन दिवा बलिं हरन्ति 'दिवा

---

१ अत्र "अग्नये स्वाहा" इत्यादिका. 'ये भूताः प्रचरन्ति' इत्यन्ता. मन्त्राः एकाग्निकाण्डाख्यतैत्तिरीयमन्त्रपाठस्याऽऽदौ महानारायणोपनिषदि च पठिताः । (महाना.६७)

२. बौ. गृ. १. ८.

लमिच्छन्त'इति । आश्वलायनके तथा दर्शनात् (१)'दिवाचारिभ्य ो दिवा । नक्तंचारिभ्य इति (बलिमाकाशे उत्क्षिपे)न्नक्त'मिति । तथा मनुः—

(२)'दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ।' इति ॥ ८ ॥

एतानग्नय्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ॥९॥

य एतानन्तरोक्तान् होमान् बलींश्च । अग्न्य्र समाहितमना भूत्वा ोपदेशमुपदेशानतिक्रमेण कुरुते । य इति वचनात्तस्येति पूर्व ाच्यते । तस्य नित्यः स्वर्गः पुष्टिश्च 'स्वर्गपुष्टिसयुक्ता' इति यत् पूर्वमुक स्याऽर्थवादताशङ्का मा भूदिति पुनर्वचनम् । पुष्टिस्वर्गौ नित्यावेव भ तः, न प्रबलैरपि कर्मान्तरैर्बाधनमित ॥ ९ ॥

अग्रं च देयम् ॥ १० ॥

बलिहरणानन्तरं अग्रं च देयं भिक्षवे ॥ १० ॥

अतिथीनेवाऽग्रे भोजयेत् ॥ ११ ॥

अतिथीन्वक्ष्यति । तानेवाग्रे भोजयेत् न स्वय सह भुञ्जीत पूर्वं वा । एव· मतिथिव्यतिरिक्तानन्यानपि भोजयितव्यान् पश्चादेव भोजयेत् ॥ ११ ॥

बालान्वृद्धान्रोगसम्बन्धान्स्त्रीश्चान्तर्वत्नीः ॥ १२ ॥

ये च गृहवर्तिनो बालादयः तानप्यग्र एव भोजयेत् । अन्तर्वत्नीरित्येव सिद्धे स्त्रीग्रहणं स्वस्रादीनामपि ग्रहणार्थम् । अन्तर्वत्नीग्रहण (३)सर्वत्र पूजार्थम् ॥ १२ ॥

काले स्वामिनावभ्यार्थिनं न प्रत्याचक्षीयाताम् ॥१३॥

काले वैश्वदेवान्ते अभ्यर्थमुपस्थितं स्वामिनौ गृहपती न प्रत्याचक्षीयाताम् अवश्यं तस्मै किञ्चिद्देयमिति ॥१३॥

अभावे किं कर्तव्यम् ? तत्राह—

(४)अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति ॥ १४ ॥

---

१. आश्व. गृ. १. २. २. २. म. स्मृ. ३. ९०

३ सर्वपूर्वार्थ इति घ. च. पु. ४. तृणानि भूमिरुदक वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ इति मनुः ॥

भूमिरुपवेशनयोग्या । उदकं पादप्रक्षालनादियोग्यम् । तृणानि शयनासनयोग्यानि । कल्याणी वाक् स्वागतमायुष्मते, इहाऽऽस्यतामित्यादिका । एतानि भूम्यादीनि । सतोऽगारे सतस्सत्पुरुषस्य निर्धनस्याऽपि गृहे कदाचिदपि न क्षीयन्ते । वैशब्दः प्रसिद्धौ । अत एव तैरुपचारः कर्तव्यः । इतिशब्दप्रयोगादेवं धर्मज्ञा उपदिशन्तीति ॥ १४ ॥

एवंवृत्तावनन्तलोकौ भवतः ॥ १५ ॥

यौ गृहमेधिनौ विवाहादारभ्य आन्तादेवंवृत्तौ भवतः तयोरनन्ता लोका भवन्ति । ज्योतिष्टोमादिभ्योऽपि कतिपयदिनसाध्येभ्यो दुष्करमेतदाऽऽन्ताद्भुतम् ॥ १५ ॥

ब्राह्मणायाऽनधीयानायाऽऽसनमुदकमन्नमिति देयं न प्रत्युत्तिष्ठेत् ॥ १६ ॥

यद्यनधीयानो ब्राह्मणोऽतिथिधर्मेणाऽऽगच्छेत् तदा तस्मै आसनादिकं देयम् । प्रत्युत्थानं तु न कर्तव्यम् । अस्मादेव ज्ञायते-अधीयाने प्रत्युत्थेयमिति ॥ १६ ॥

अभिवादनायैवोत्तिष्ठेदभिवाद्यश्चेत् ॥ १७ ॥

यदि पुनरसौ अनधीयानोऽपि 'दशवर्षं पौरस्त्य' (१. १४. १२.) मित्यादिना ऽभिवाद्यो भवति तदा अभिवादनायैवोत्तिष्ठेत्॥ १७ ॥

राजन्यवैश्यौ च ॥ १८ ॥

अधीयानावपि राजन्यवैश्यौ न प्रत्युत्तिष्ठेत् ब्राह्मणः । आसनादिकं तु देयमिति ॥ १८ ॥

(१)शूद्रमभ्यागतं कर्मणि नियुञ्ज्यात् ॥ १९ ॥

यदि शूद्रो द्विजातिं प्रत्यतिथिरागच्छति तदा तमुदकाहरणादौ कर्मणि नियुञ्ज्यात् नियुञ्जीत ॥ १९ ॥

अथाऽस्मै दद्यात् ॥ २० ॥

अथ तस्मिन् कृते भोजनं दद्यात् ॥ २० ॥

दासा वा राजकुलादाहृत्याऽतिथिवच्छूद्रं पूजयेयुः ॥ २१ ॥

अथवा येऽस्य गृहमेधिनो दासाः ते राजकुलादाहृत्य तं शूद्रमतिथिवत्पूज-

---

१ इदमग्रिम च सूत्रमेकीकृतं घ. पुस्तके ।

येयुः । अत एव श्रूयते-शूद्राणामतिथीनां पूजार्थं व्रीह्यादिकं राज्ञा ग्रामे ग्रामे स्थापयितव्यमिति ॥ २१ ॥

नित्यमुत्तरं वासः कार्यम् ॥ २२ ॥

उपासने गुरूणा' (१.१५.१) मित्यादिना केषुचित्कालेषु यज्ञोपवीतं विहितम् । इह तु प्रकरणात् गृहस्थस्य नित्यमुत्तरं वासो धार्यमित्युच्यते ॥

अपि वा सूत्रमेवोपवीतार्थं ॥ २३ ॥

अपि वा सूत्रमेव सर्वेषामुपवीतकृत्ये भवति, न वास एवेति नियमः । तथा च मनुः—

(१) कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृ'दिति(२) ॥ २३ ॥

यत्र भुज्यते तत्समूह्य निर्हृत्याऽवोक्ष्य तं देशममत्रेभ्यो लेपान् सङ्कृष्याऽद्भिः संमृज्योत्तरतः शुचौ देशे रुद्राय निनयेदेवं वास्तु शिवं भवति ॥ २४ ॥

यत्र स्थाने भुज्यते तत् समूह्य समूहन्या तत्रत्यमुच्छिष्टादिकं राशीकृत्य निर्हरेदन्यतः । निर्हृत्य त देशमवोक्षत् । अवोक्ष्य ततोऽमत्रेभ्यः येषु पाकः कृतः तान्य मत्राणि तेभ्योऽमत्रलेपान् व्यञ्जनलेपांश्च संकृष्य काष्ठादिनाऽवकृष्य अद्भिस्संसृजेत् । संसृज्य गृहस्योत्तरतः शुचौ देशे रुद्रायेदमस्विव'ति निनयेत् । एव कृते वास्तु शिव समृद्धं भवतीति ॥ २४ ॥

ब्राह्मण आचार्यः स्मर्यते तु ॥ २५ ॥

तुशब्दोऽवधारणार्थो भिन्नक्रमश्च । ब्राह्मण एव सर्वेषामाचार्यः स्मर्यते धर्मशास्त्रेषु । इहाऽपि वक्ष्यति 'स्वकर्म ब्राह्मणस्ये'(२.१०.४.)त्यादि । अनुवादोऽयमापदि कल्पान्तरं वक्तुम् ॥ २५ ॥

तदाह—

आपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनम् ॥ २६ ॥

कर्तव्यमित्यध्याहार्यम् । ब्राह्मणस्याऽध्यापयितुरलाभ आपत् । तत्राऽऽपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनं कर्तव्यम् । न स्वनधीयानेन स्थातव्यम् । 'ब्राह्मणेने'ति वचनाद्राजन्यवैश्ययोर्नाऽयमनुकल्पः ॥ २६ ॥

---

१. म. स्मृ. २. ४४.

२. एतदनन्तर बौधायनस्तु—कौशं सूत्रं वा त्रिवृत्त्रयज्ञोपवीतम् इति, (१. ८. ५) इत्यधिकः पाठः च. पु. ।

अनुगमनं च पश्चात् ॥ १७ ॥

अनुगमनं च पृष्ठतः कर्तव्यं यावदध्ययनम् । पश्चाद्ग्रहणं लज्जादिना कियत्यपि पार्श्वे गतिर्मा भूदिति । सर्वशुश्रूषाप्रसङ्गे नियमः—ब्राह्मणस्याऽनुगमनमेव शुश्रूषेति । तथा च गौतमः—(१)'अनुगमनं शुश्रूषे'ति ॥ २७ ॥

तत ऊर्ध्वं ब्राह्मण एवाऽग्रे गतौ स्यात् ॥ १८ ॥

ततोऽध्ययनादूर्ध्वं समाप्तेऽध्ययने ब्राह्मण एवाग्रतो गच्छेत् ॥ २८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायां द्वितीयप्रश्ने चतुर्थी कण्डिका ॥४॥

सर्वविद्यानामप्युपनिषदामुपाकृत्याऽनध्ययनं तदहः ॥१॥

कर्मणि षष्ठी । सर्वविद्या अङ्गविद्या अप्युपनिषद उपाकृत्याध्येतुमारभ्य तदहरनध्ययनं तस्मिन्नहन्यध्ययनं न कर्तव्यम् । उपनिषद्ग्रहणं प्राधान्यख्यापनार्थम् । ब्राह्मणा आयाता, वसिष्ठोऽप्यायात इतिवत् ॥ १ ॥

अधीत्य चाऽविप्रक्रमणं सद्यः ॥ २ ॥

अधीत्य(२) 'वेदमधीत्य स्नास्य' इत्यवसरे आचार्यसकाशात् सद्यो विप्रक्रमणं न कर्तव्यं नाऽपगन्तव्यम् । प्रायेण मकारात्परामिकारमधीयते । तत्राप्येष एवार्थः । इकारस्तु छान्दसोऽपपाठो वा(३) ॥ २ ॥

यदि त्वरेत गुरोः समीक्षायां स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवति ॥ ३ ॥

यदि कार्यवशात् गन्तुं त्वरेत तदा गुरोराचार्यस्य समीक्षायां सन्दर्शने संश्रये स्वाध्यायं प्रश्नावरमधीत्य यथाकामं गच्छेत् । एव कृते उभयोः शिष्याचार्ययोः शिवं भवतीति ॥ ३ ॥

समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखोऽभ्यागम्य तस्योपसङ्गृह्य न बीभत्समान उदकमुपस्पृशेत् पुरस्कृत्योपस्थाप्य यथोपदेशं पूजयेत् ॥ ४ ॥

---

१. गौ. ध. ७. २. २. आप. गृ. १२. १.

३. एतदनन्तरं 'उपाकरणात् परमित्यन्ये' इति ब. पुस्तकेऽधिकः पाठः ।

समावृत्तं चेत् शिष्यं कृतदारमाचार्योऽभ्यागच्छेत् अतिथिधर्मेण । तमभिमुखोऽभ्यागम्य । तस्योपसंगृह्य । कर्माणि षष्ठी । तमुपसंगृह्य । यद्यपि तस्य चण्डालादिस्पर्शः सम्भाव्यते, तथापि न बीभत्समान उदकमुपस्पृशेत् न स्नायात् । उपसंग्रहणे वा धूलिधूसरौ पादौ स्पृष्ट्वा न बीभत्समान उदकमुपस्पृशेत् । ततस्त पुरस्कृत्य गृहप्रवेशे अग्रे कृत्वा । पूजासाधनान्युपस्थाप्य यथोपदेशं गृह्योक्तेन मार्गेण मधुपर्केण पूजयेत् । पूजाविधानं गृह्योक्तस्याऽयमनुवाद आसनादिषु विशेष वक्तुम् ॥ ४ ॥

तमाह—

आसने शयने भक्ष्ये भोज्ये वाससि वा सन्निहिते निहीनतरवृत्तिः स्यात् ॥ ५ ॥

सन्निहित आचार्ये तस्मिन्नेव गृहे अपवरकादिकं प्रविष्टे आसनादिषु निहीनतरवृत्तिः स्यात् । तरप्निर्देशात् नीच आसने गुणतोऽपि निकृष्ट आसीत । एवं शयनादिष्वपि द्रष्टव्यम् ॥ ५ ॥

तिष्ठन् सव्येन पाणिनाऽनुगृह्याऽऽचार्य(१)माचमयेत् ॥६॥

तिष्ठन्निति प्रकृत उच्यते, स्थानयोगात् । न हि साक्षात्तिष्ठन्नाचमयितुं प्रभवति । सव्येन पाणिना करकादिकमनुगृह्याऽधस्तादगृहीत्वा इतरेण द्वारमवमृश्येत्यर्थसिद्धत्वादनुक्तम् । एवं कृत्वाऽऽचार्यमाचमयेत् स्वयमेव शिष्यः । एवं हि स(२) सम्मतो भवति । आचार्ये प्रकृते पुनराचार्यग्रहणमातिथ्यादन्यत्राप्याचार्यमाचमयन्नेवमेवाऽऽचमयेदिति ॥ ६ ॥

अन्यं वा समुदेतम् ॥ ७ ॥

वाशब्दः समुच्चये । अन्यमप्येवमेवाचमयेत् । स चेत् समुदेतः कुलशीलवृत्तविद्यावयोभिरुपेतो भवति ॥ ७ ॥

स्थानासनचंक्रमणास्मितेष्वनुचिकीर्षन् ॥ ८ ॥

व्यवहितमपि स्यादित्यपेक्ष्यते । चिकीर्षया करणं लक्ष्यते । स्थानादिष्वाचार्यस्य पश्चाद्भावी स्यात् । न पूर्वभावी । न युगपद्भावी ॥ ८ ॥

सन्निहिते मूत्रपुरीषवातकर्मोच्चैर्भाषाहास(३)ष्ठीवनदन्तस्कवननिःश्वृङ्घणश्लेष्मणतालननिष्ठ्यानीति ॥ ९ ॥

---

१. आचामयेत इति क. पु. २ धर्मयुत इति. घ पु. धर्मतो भवति. इति.ङ.पु.

३ ष्ठेवन. इति. क. पु.

वातकर्म अपानवायोरुत्सर्गः । उच्चैर्भाषा महता स्वनेन सम्भाषणं केनाऽपि । हासो हसनम् । क्ष्वेलनं श्लेष्मादिनिरसनम् । दन्तस्खलनं दन्तमलापकर्षणम् । परस्परघट्टनमित्यन्ये । नि.मृज्जन नासिकामलनिस्सारणम् । भ्रुक्षेपणं भ्रूविक्षेप. । छान्दसो ह्रस्व. । तालन हस्तयोरास्फालनम् । निष्ठ्यमङ्गुलिस्फोटनम् । इतिशब्दादन्यदपि स्वैरासनादिकम् । वर्जयेदित्यपेक्ष्यते । एतानि मूत्रकर्मादीन्याचार्यस्य सन्निधौ न कुर्यादिति ॥ ९ ॥

दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत् ॥ १० ॥

उपस्पर्शनमालिङ्गनाघ्राणादि । भाषाः सम्भाषाश्चाटुप्रभृतयः । एता अप्याचार्ये सन्निहिते(१) दारप्रजाविषये विस्रब्धं न कुर्यात् । ज्वरादिपरीक्षायां न दोषः ॥ १० ॥

वाक्येन वाक्यस्य प्रतिघातमाचार्यस्य वर्जयेच्छ्रेयसां च ॥ ११ ॥

आचार्यवाक्यस्य समीचीनस्येतरस्य वा आत्मीयेन वाक्येन तादृशेन प्रतिघातं न कुर्यात् । श्रेयसा च अन्येषामपि प्रशस्ततराणां वाक्यं वाक्येन न प्रतिहन्यात् ॥ ११ ॥

सर्वभूतपरीवादाक्रोशांश्च ॥ १२ ॥

सर्वेषां भूतानां तिरश्चामपि । परीवादान् दोषवादान् । आक्रोशान् अश्लीलवादांश्च वर्जयेत् । परीवादस्य पुनःपुनर्वचनमतिशयेन वर्जनार्थम् ॥ १२ ॥

विद्यया च विद्यानाम् ॥ १३ ॥

विद्यया च विद्याना परीवादाक्रोशान् वर्जयेत् । ऋग्वेद एव श्रोत्रसुखः, अन्ये श्रवणकटुका इति परीवादाः । तैत्तिरीयकमुच्छिष्टशाखा, (२)याज्ञवल्क्यादीनि ब्राह्मणानीदानीतनानि इत्याद्याक्रोश ॥ १३ ॥

यया विद्यया न विरोचेत पुनराचार्यमुपेत्य नियमेन साधयेत् ॥ १४ ॥

---

१. 'दारे प्रजाविषयेऽपि' इति क. ख पु.

२. याज्ञवल्क्यादि ब्राह्मणा दानीतनम् इति. क. ख. पु.

यया विद्ययाऽधीतया श्रुतया वा न विरोचेत न यशस्वी स्यात्, तामित्यर्थाद्गम्यते। तां विद्यां पुनस्साधयेत्। यथा सम्यक् सिद्धा भवति तथा कुर्यात्। कथम्? आचार्यं तमेवा(१)न्य वा उपेत्य उपसद्य। नियमेनाऽपूर्वाधिगमे विद्यार्थस्य यो नियम उक्तः तेन शुश्रूषादिना ॥ १४ ॥

अस्मिन्विषयेऽध्यापयितुर्नियमः—

उपाकरणाद्योत्सर्जनादध्यापयितुर्नियमो लोमसंहरणं मांसं श्राद्धं मैथुनमिति वर्जयेत् ॥ १५ ॥

लोमसंहरणं लोमवापनम्। इदमनाहिताग्निविषयम्। आहिताग्नेस्तु "(२)अप्यदपशो लोमानि वापयत इति वाजसनेयकम्" इति ॥ १५ ॥

ऋत्वे वा जायाम् ॥ १६ ॥

ऋतुकाले वा जायामुपेयात्। स्त्रीणामृतुदिनानि षोडश। तत्र भवः काल ऋत्व्यः। (३)भवे छन्दसीति यत्प्रत्यये(४) 'ऋत्व्यवास्त्व्ये'ति सूत्रेण यणादेशो निपातितः। ऋत्व्य इति रूपसिद्धिः। अत्र यलोपश्छान्दसः। चातुर्मास्येषु प्रयुक्तम्-(५)'ऋत्वे वा जायाम्, नोपर्यास्ते' इति यथा॥१६॥

यथागमं शिष्येभ्यो विद्यासम्प्रदाने नियमेषु च युक्तः स्यादेवं वर्तमानः पूर्वापरान् सम्बन्धानात्मानं च क्षेमे युनक्ति ॥ १७ ॥

येन प्रकारेणाऽऽगमः पाठार्थयोः तथैव शिष्येभ्यो निर्मत्सरेण विद्या सम्प्रदेया। एवंभूते विद्यासम्प्रदाने युक्तो (६)विहितः स्यात्। ये च गृहस्थस्य नियमोऽध्यापने ऽन्यत्र च, तेष्वपि युक्तः स्यात्। एव युक्तो वर्तमानः पूर्वान् पितृपितामहप्रपितामहान्। अपरांश्च पुत्रपौत्रनप्तॄन्। सम्बन्धान्। कर्मणि घञ्। सम्बन्धिनः पुरुषान्। आत्मान च क्षेमे अभये स्थाने नाकस्य पृष्ठे। युनक्ति स्थापयति ॥ १७ ॥

मनसा वाचा प्राणेन चक्षुषा श्रोत्रेण त्वचि छन्नोदरारम्भणानास्रावान् परीवृक्षानोऽमृतत्वाय कल्पते ॥ १८ ॥

---

१. अन्य वा इति नास्ति च. पु.
२. आप. श्रौ. ४. १. ५.
३. पा. सू. ४. ४. ११०.
४. पा. सू. ६. १. १७५.
५. आप श्रौ. ८. ४. ६, ७.
६. विहितः इति क. ङ. पु.।

यैः पुरुष आक्रान्यते बहिराकृष्यते। ते आक्रावाः शब्दादयो विषयाः। ते विशेष्यन्ते त्वक्छ्रोत्रोदरारम्भणान् आरभ्यन्ते(१) आलम्ब्यन्त इत्यारम्भणाः। तत्र त्वगालम्बनाः स्रक्चन्दनादयः। शिश्नालम्बनाः स्त्र्युपसोगादयः। उदरालम्बना (२)भक्ष्यभोज्यादयः। उपलक्षणं त्वगादिग्रहणम्। एवंभूतानाक्रावान् मनआदिभिः पञ्चभिरिन्द्रियैः परिवृज्जानस्सर्वतो वर्जयन् अमृतत्वाय मोक्षाय कल्पते। तत्र वागिति रसनेन्द्रियमाह। प्राण इति घ्राणम् ॥ १८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने पञ्चमी कण्डिका ॥ ५ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां
द्वितीयप्रश्ने द्वितीयः पटलः ॥ २ ॥

१. आलभ्यन्ते इति च. पु. २. अभक्ष्या अभोज्यादयः इति. क. च. पु.

अथ तृतीयः पटलः ॥

जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् ॥ १ ॥

अविज्ञातपूर्वो यो धर्मार्थमध्ययनार्थमागच्छेत् उपसीदेत् 'उपसन्नोऽस्मि भगवन्, मैत्रेण चक्षुषा पश्य, शिवेन मनसाऽनुगृहाण, प्रसीद मामध्यापयेति । तस्य जात्याचारसंशये सति । अग्निमुपसमाधाय 'यत्र क्वचाग्निमित्याद्यन्यदुपदध्या(२.२.१३,१४.)दित्यन्तं कृत्वा । तत्सन्निधौ जातिमाचारं च पृच्छेत्—'किंगोत्रोऽसि सौम्य, किमाचारश्चासीति ॥ १ ॥

साधुतां चेत्प्रतिजानीतेऽग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता साधुतां चेत्प्रतिजानीते साध्वस्मा अस्तु वितथ एष एनस इत्युक्त्वा शास्तुं प्रतिपद्यते ॥ २ ॥

स चेत्साधुतां प्रतिजानीते—साधुजन्माऽस्मि, अमुष्य पुत्रोऽमुष्य पौत्रोऽमुष्य नप्ता, साध्वाचारश्चास्मि, पित्रैवो(१)पानेषि, शिक्षिताचारश्चास्मि, सम्यक्चावर्तिषि, विधिबलेन तु बाल्य एव(२)स दिष्टां गतिं गतः, एतस्मात्केवलमनधीतवेद इति, ततोऽग्निरुपद्रष्टेत्यादिकं मन्त्रमुक्त्वा शास्तुं शासितुमध्यापयितुं धर्मांश्चोपदेष्टुं प्रतिपद्येत उपक्रमेत ॥ २ ॥

पञ्चयज्ञान्ते 'अतिथीनेवाग्रे भोजये'दित्युक्तम् । तत्प्रकारं वक्तुं तस्याऽवश्यकर्तव्यतामनेनाऽऽह—

अग्निरिव ज्वलन्नतिथिरभ्यागच्छति ॥ ३ ॥

अतिथिर्गृहानभ्यागच्छन्नग्निरिव ज्वलन्नभ्यागच्छति । तस्मादसौ भोजनादिभिरवश्यं तर्पयितव्यः । निराशस्तु गतो गृहान् दहेदिति ॥ ३ ॥

इदानीमतिथिलक्षणं वक्तुं तदुपयोगिश्रोत्रियलक्षणमाह—

धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ॥ ४ ॥

विद्यार्थस्य यो नियमः स धर्मः । तेन वेदानां यां काञ्चन शाखाम-

---

१. उपन्वग्निषि. इति. घ. ङ. पु. २. सर्वे···गता· इति क. च. पु.

धीत्य श्रोत्रियो भवति। पुरुषस्य हि प्रतिवेदमेकैका शाखा भवति। या पूर्वैः परिगृहीताऽध्ययनानुष्ठानाभ्यां सा प्रतिवेदं स्वशाखा। तामधीत्य श्रोत्रियो भवति, न तु प्रतिवेदमेकैकामधीत्य श्रोत्रियो भवतीति। लोकविरोधात्। लोके हि यां कांचनैकां शाखामधीयानः श्रोत्रिय इति प्रसिद्धः।

अतिथिलक्षणमाह—

(१)स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो (२)नाऽन्यप्रयोजनः सोऽतिथिर्भवति ॥ ५ ॥

आदितो यच्छब्दो द्रष्टव्यः। अन्ते स इति दर्शनात्। मध्ये च श्रोत्रियलक्षणोपदेशात्। तदुपजीवनेन सूत्रं योज्यम्। यः श्रोत्रियः स्वधर्मयुक्तं स्वधर्मनिरतं कुटुम्बिनं भार्यया सह वसन्तं गृहस्थम्। आश्रमान्तरनिरासार्थमिदमुक्तम्। न हि ते पचमाना भवन्ति। भिक्षवो हि ते। अभ्यागच्छति उद्दिश्याऽऽगच्छति। धर्मपुरस्कारः(३)आचार्यार्थं भिक्षणं धर्मः त पुरस्करोतीति धर्मपुरस्कारः। कर्मण्यण्। धर्मप्रयोजनः नान्यप्रयोजनः। य एवभूत एवभूतमुद्दिश्याऽऽगच्छति नान्येच्छया सोऽतिथिरिति। (४)बौधायनस्तु श्रान्तोऽदृष्टपूर्वः केवलमन्नार्थी नाऽन्यप्रयोजनस्सोतिथिर्भवति। अथ वा सर्ववर्णानामन्यतमः काले यथोपपन्नः सर्वेषामतिथीनां श्रेष्ठोऽतिथिर्भवती"ति ॥ ५ ॥

तस्य पूजायां शान्तिः स्वर्गश्च ॥ ६ ॥

तस्यातिथेः पूजायां कृतायां शान्तिरुपद्रवाणामिह भवति। प्रेत्य च स्वर्गलाभः ॥ ६ ॥

तमभिमुखोऽभ्यागम्य यथावयस्समेत्य तस्यासनमाहारयेत् ॥ ७ ॥

तमतिथिमभिमुखोऽभ्यागच्छेत्। अभ्यागम्य यथावयः वयसोऽनुरूपं प्रत्युत्थानाभिवादनादिना समेयात् सङ्गच्छेत। समेत्य च तस्यासनमाहारयेत् शिष्यादिभिः। अभावे स्वयमाहरेत ॥ ७ ॥

शक्तिविषये नाऽबहुपादमासनं भवतीत्येके ॥ ८ ॥

---

१. एतदादि ११ सूत्रार्धं यावदेकीकृतम् छ. पु २. नात्रप्रयोजनः इति क पु.
३ आचार्यस्यार्थे इति. घ. ङ. पु. ४. एतदादि ११ सूत्रे निवेशितं छ. पु.

शक्तौ सत्यां अबहुपादमासन न देयम्। किं तु बहुपादमेव पीठादिकमित्येके मन्यन्ते। (१)स्वमतं त्वबहुपादमपीति ॥ ८ ॥

तस्य पादौ प्रक्षालयेच्छूद्रमिश्रुनाविति्येके ॥ ९ ॥

द्वौ शूद्रौ तस्य पादौ प्रक्षालयेतामित्येकै मन्यन्ते। दासवत इदम्॥९॥ अत्र विशेषः—

अन्यतरोऽभिषेचने स्यात् ॥ १० ॥

अभिषेचन करकादिना जलावसेकः। तमेकः कुर्यात्। इतरः प्रक्षालनम् ॥ १० ॥

तस्योदकमाहारयेन्मृण्मयेनेत्येके ॥ ११ ॥

मृण्मयेन पात्रेण तस्योदकमाहर्तव्यमित्येके मन्यन्ते। (२)स्वमतं तु तैजसेन ॥ ११ ॥

नोदकमाहारयेदसमावृत्तः ॥ १२ ॥

यदा असमावृत्तो ब्रह्मचारी आचार्यप्रेषितः स्वयमेव वाऽतिथिरभ्यागच्छति तदा नासावुदकमाहारयेत् नासावुदकाहरणस्य प्रयोजकः। नास्मा उदकमाहर्तव्यमिति ॥ १२ ॥

अध्ययनसंवृत्तिश्चात्राऽधिका ॥ १३ ॥

अत्र असमावृत्तेऽतिथौ अध्ययनसंवृत्तिश्चाधिका इतरस्मादतिथेः। अध्ययनस्य सह निष्पादनमध्ययनसंवृत्तिः। यः प्रदेशस्तस्याऽऽगच्छति स तेन सह कियन्तञ्चित्कालं वक्तव्य इति। प्रसिद्धे तु पाठे पूर्वपदान्तस्य समोऽकारस्य छान्दसो दीर्घः ॥ १३ ॥

सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवराध्यैनेति ॥१४॥

ततः पादप्रक्षालनस्य समध्ययनस्य वाऽनन्तरमतिथिं प्रियवचनेन सान्त्वयेत्। सान्त्वयित्वा गव्यादिभीरसैः फलादिभिश्च भक्ष्यैरन्ततोऽद्भिरपि तावत्तर्पयेत् तृप्तिं कुर्यात्। 'अवराध्यैने'ति जघन्यकल्पतां सूचयति। अप्यन्तत इत्यर्थः। इतिशब्दादेवमादिभिरन्यैरपि ॥ १४ ॥

आवसथं दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनं चेति ॥ १५ ॥

---

१. स्वय त्वबहुपादमप्यनुमन्यते इति च. पु. २ स्वय तु ड. च. पु.

आवसथो विश्रामस्थानम् । उपरिशय्या खट्वा । उपस्तरणं तूलिका । उपधानमुपबर्हणम् । अवस्तरणमुपरिपटः । तत्सहितमुपधानमुपस्तरणं च । अभ्यञ्जन पादयोः तैलं घृत वा । एतत्सर्वं दद्यात् । भोजनात्प्रागूर्ध्वं वा अपेक्षिते काले । इतिशब्दादन्यदप्यपेक्षितम् ॥ १५ ॥

अन्नसंस्कर्तारमाहूय व्रीहीन् यवान्वा तदर्थान्निर्वपेत् ॥ १६ ॥

यः पचति तमन्नसंस्कर्तारमाहूय तदर्थानतिथ्यर्थान् व्रीहीन्यवान्वा निर्वपेत् पृथक्कृत्य दद्यात्-अमुष्मै पचेति । व्रीहियवग्रहणमुपलक्षणम् । इदं भुक्तवत्सु सर्वेष्वतिथावुपस्थिते द्रष्टव्यम् ॥ १६ ॥

भोजनकाले त्वाह—

उद्धृतान्यन्नान्यवेक्षेतेदं भूया३इद३मिति ॥ १७ ॥

यावन्तो भोक्तारस्तावद्भ्य अन्नान्युद्धृत्य पृथक्पात्रेषु कृत्वा स्वयं संविभागं कृत्वा तान्यन्नान्यवेक्षेत-किमिद भूयः प्रभूतमिदं वेति । विचारे प्लुतः । (१)'पूर्वं तु भाषाया'मित्येतदुपेक्षितं छान्दसोऽयं (२)प्रयोग इति ॥ १७ ॥

भूय उद्धरेत्येव ब्रूयात् ॥ १८ ॥

एवमवेक्ष्याऽतिथ्यर्थं भूय उद्धरेत्येव ब्रूयात् ॥ १८ ॥

द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण वा मीमांसमानस्य मीमांसितस्य वा ॥ १९ ॥

यं स्वयमतिथिं द्विषन्भवति यो वाऽऽत्मानं द्वेष्टि यो वाऽऽत्मानं दोषेण मीमांसते आत्मनि स्तेयादिदोषं सम्भावयति ।यो वा दोषेण मीमांसितः यत्र लौकिका दोषं सम्भावयन्ति, तस्याऽस्य सर्वस्यान्नं नाश्नीयात्॥१९॥

तत्र हेतुः—

पाप्मानं हि स तस्य भक्षयतीति विज्ञायते ॥ २० ॥

यः एवविधस्याऽन्नमश्नाति, स तस्य पाप्मानमेव भक्षयतीति विज्ञायते ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने षष्ठी कण्डिका ॥ ६ ॥

---

१ पा सू. ८ २ ९७. २. प्लुतप्रयोगः इति च. पु.

स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः ॥ १ ॥

स एषोऽभिहितो मनुष्ययज्ञः प्राजापत्यः प्रजापतिना दृष्टः, तद्दैवत्यो वा । कुटुम्बिनो नित्यप्रततो, यज्ञः नाऽग्निष्टोमादिवत् कादाचित्कः ॥ १ ॥

तस्याऽग्नीन् सम्पादयति—

योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः ॥ २ ॥

योऽतिथीनां जाठरोऽग्निः स आवाहनीयः, तत्र हि हूयते । यः कुटुम्बे गृहे अग्निरौपासनः स गार्हपत्यः, नित्यधार्यत्वात् । यस्मिन् पच्यते(१) लौकिकाग्नौ सोऽन्वाहार्यपचनः दक्षिणाग्निः, तत्र (२)ह्यन्वाहार्यं पच्यते ॥२॥

ऊर्जं पुष्टिं प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥ ३ ॥

योऽतिथेः पूर्वमश्नाति स गृहाणां कुलस्य सम्बन्धि ऊर्गादिकमश्नाति भक्षयति विनाशयति । ऊर्गन्नम् । इष्टमग्निहोत्रादि । पूर्तं स्मार्तं कर्म(३) कूपखातादि । अन्ये प्रसिद्धाः ॥ ३ ॥

पय उपसेचनमन्नमग्निष्टोमसम्मितं सर्पिषोक्थ्यसम्मितं, मधुनाऽतिरात्रसम्मितं, मांसेन द्वादशाहसम्मित, मुदकेन प्रजावृद्धिरायुषश्च ॥ ४ ॥

पय उपसेचनं यस्य तदन्नम(४)ग्निष्टोमतुल्यम् । सर्पिषा, उपसिक्तमिति प्रकरणाद्गम्यते तदुक्थ्यतुल्यम् । मधुनोपसिक्तमन्नमतिरात्रतुल्यम् । मांसेन सह दत्तमन्नं द्वादशाहतुल्यम् । उदकेन सह दत्तेन प्रजावृद्धिर्भवति । आयुषश्च । उपसमस्तमपि वृद्धिरिति सम्बध्यते ॥ ४ ॥

---

१. आष्ट्यग्नौ इति क. च. पु.

२. दर्शपूर्णमासेष्ट्याहुतिर्जो दक्षिणात्वेन यद्देयमत्र तदन्वाहार्यपचनम् ।

३ तडागादि इति ङ. पु. तडागखननादि इति घ. पु.

अग्निहोत्रं तपस्सत्यं वेदानां चानुपालनम् ।
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥
वापीकूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥

४. अग्निष्टोमोक्थ्यातिरात्राः ज्योतिष्टोमस्य संस्थाविशेषाः ।

प्रिया अप्रियाश्चाऽतिथिथः स्वर्गं लोकं गमय-न्तीति विज्ञायते ॥ ५ ॥

प्रियाः प्रसिद्धा अप्रिया उदासीनाः, द्विषतो निषेद्धृत्वात् ॥ ५ ॥

स यत्प्रातर्मध्यन्दिने सायमिति ददाति सवना-न्येव तानि भवन्ति ॥ ६ ॥

त्रिषु कालेषु दीयमानान्यन्नानि अस्य यज्ञस्य (१)प्रातस्सवनादीनि त्रीणि भवन्ति । तस्मात्सर्वेषु कालेषु दातव्यमिति ॥ ६ ॥

यदनुतिष्ठत्युदवस्यत्येव तत् ॥ ७ ॥

यत् गन्तुमुत्तिष्ठन्तमतिथिमनूत्तिष्ठति तदुदवस्यत्येव(२) उदवसानीया स्ताऽस्य यज्ञस्येति । प्रायेणोच्छब्दं न पठन्ति । केवलमनुशब्दमेव पठन्ति । तत्राप्यर्थः स एव ॥ ७ ॥

यत्सान्त्वयति सा दक्षिणा प्रशंसा ॥ ८ ॥

यत् सान्त्वयति प्रशंसति सा प्रशसा दक्षिणा ॥ ८ ॥

यत्संसाधयति ते (३)विष्णुक्रमाः ॥ ९ ॥

ससाधनमनुव्रजनम् ॥ ९ ॥

यदुपावर्तते (४)सोऽवभृथः ॥ १० ॥

उपावर्तन अनुव्रज्य प्रत्यावर्तनम् ॥ १० ॥

इति ब्राह्मणम् ॥ ११ ॥

इति ब्राह्मणमित्यस्य सर्वेण सम्बन्धः ॥ ११ ॥

राजानं चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामा-त्मनः कारयेत् ॥ १२ ॥

---

१. सवनपदार्थः १. २५ १४ (पृ. १४७) सूत्रे टिप्पण्या विवृत ।

२. उदवसानीया नाम यज्ञसमाप्तौ क्रियमाणेष्टिः । उदवसाय क्रियते इत्युदवसानीया ।

३ दर्शपूर्णमासयोर्यजमानकर्तव्यतया विहिताः (आप.श्रौ. ४.१४.६.) पदप्रक्षेपाः ।

४. 'वारुणैकैकपालेनावभृथमवयन्ति' इति विहितस्सोमयागस्यान्ते क्रियमाणस्त-दङ्गभूत इष्टिविशेषोऽवभृथः ।

(१)राजा अभिषिक्तः क्षत्रियः । सोऽतिथयेऽभ्यागताय आत्मनोऽपि सकाशात् श्रेयसीं पूजां कारयेत् पुरोहितेन ॥ १२ ॥

आहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयादु-व्रात्य क्वाऽवात्सीरिति, व्रूत्योदकमिति, व्रात्य तर्पयंस्त्विति ॥ १३ ॥

यद्याहिताग्निमुद्दिश्यातिथिरागच्छेत्, तत एनमतिथिं स्वयमेवाभिमुख उपसर्पेत् । अत्र स्वयमिति वचनादनाहिताग्निरन्येन शिष्यादिना कारयन्नपि न दुष्यति । तमभ्युदेत्य ब्रूयात्-व्रात्य क्वावात्सीरिति कुशलप्रश्नः । व्रते साधुर्वत्यः स एव व्रात्य इति पूजनाभिधानम् । क्व पूर्वस्यां रात्र्यामुषितवानसीति । 'व्रात्योदक'मित्युदकदानम् । 'व्रात्य तर्पयस्त्विति गोरसादिभिस्तर्पणम् । अनुस्वारसकारौ छान्दसौ । क्रियाभेदात्प्रतिमन्त्रमितिशब्दः । एतत्सर्वेषु कालेषु कर्तव्यम् ॥ १३ ॥

पुराऽग्निहोत्रस्य होमादुपांशु जपेत्-व्रूत्य यथा ते मनस्तथाऽस्त्विति, व्रात्य यथा ते वशस्तथाऽस्त्विति, व्रूत्य यथा ते प्रियं तथाऽस्त्विति, व्रात्य यथा ते निकामस्तथाऽस्त्विति ॥ १४ ॥

स यदि होमकालेऽप्यासीत, तदा पुरा होमादपरेणाग्निं दर्भेषु सादयित्वा 'व्रूत्य यथा ते मन' इत्यादिमन्त्रानुपांशु जपेत् ब्रूयात् । तत्र प्रतिमन्त्रमितिशब्दप्रयोगादर्थभेदाच्चतुर्णां विकल्पः । समुच्चय इत्यन्ये । अत्र चाऽध्वर्युर्यजमानो वा यो(२)होता स जपेत् । ततो जुहुयात् ॥ १४ ॥

यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्-व्रूत्याऽतिसृज होष्यामीत्यतिसृष्टेन होतव्यमनतिसृष्टश्चेज्जुहुयादोषं ब्राह्मणमाह ॥ १५ ॥

उद्धृतेष्वित्ति बहुवचनं सभ्यावसथ्यापेक्षम्। यस्य तु त्रयोऽग्नयः, तस्या

---

१. राजेत्येतानभिषिक्तानाचक्षते इत्यैतरेयब्राह्मणम् । ऐ. ब्रा. ८. १४ ६

२. अग्निहोत्रहवनकर्ता होता ।

पि । अहुतेष्वित्यनेन सामानाधिकरण्यात् होमोऽपि त्रिष्वपि भवति। तेनाऽऽहवनीयहोमानन्तरमतिथावागतेऽपि त्रिषु होमो न कृत इति वक्ष्यमाणो विधिर्भवत्येव । कः पुनरसौ ? स्वयमेनमभ्युदेत्य ब्रूयात् । ब्रूत्वा ऽतिसृज, अनुजानीहि होष्यामीति । ततो जुहुधीत्यातिसृजेत् । अतिसृष्टेन होतव्यम् । यदि पुनरनतिसृष्टोऽननुज्ञातो जुहुयात्, तस्य दोषमाथवर्णिकानां ब्राह्मणवाक्यमाह । (१)तदत्र न पठितं तत्र प्रत्येतव्यम् । अत्र पक्षे स्वयं होमो नियतः ॥ १५ ॥

एकरात्रं चेदतिथीन्वासयेत्पार्थिवाँल्लोकानभिजयति द्वितीययाऽऽन्तरिक्ष्यांस्तृतीयया दिव्यांश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमिताँल्लोकानभिजयतीति विज्ञायते ॥ १६ ॥

य(२)एकां रात्रिमतिथीन् गृहे वासयति, स पृथिव्यां भवान् लोकानभिजयति । द्वितीयया रात्र्या आन्तरिक्ष्यान् । तृतीयया दिव्यान् । चतुर्थ्या परावतः सुखस्य परा मात्रा येषु लोकेषु तानभिजयति । अपरिमिताभीरात्रिभिरपरिमितान् लोकानिति विज्ञायते ब्राह्मणं भवति ॥ १६ ॥

असमुदेतश्चेदतिथिर्ब्रवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति १७

विद्यादिभीरहितोऽसमुदेत । स चेदतिथिरिति ब्रुवाण आगच्छेत्तदा तस्मै आसनादिक श्रोतियायैव ददामीत्येवं मनसि कृत्वा दद्यात् । एवं ददतोऽस्य तद्दान समृद्धं भवति श्रोत्रियायैव दत्तं भवति ॥ १७ ॥

इति द्वितीयप्रश्ने सप्तमी कण्डिका ॥ ७ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने तृतीयः पटलः ॥ ३ ॥

---

१ नास्तीदं वाक्यं घ० पुस्तके । २. एकरात्र इति घ. मु.

अथ चतुर्थः पटलः ॥

येन कृतावसथः स्यादतिथिर्न तं प्रत्युत्तिष्ठेत्प्रत्यवरोहेद्वा पुरस्ताच्चेदभिवादितः ॥ १ ॥

येन गृहस्थेनाऽतिथिः कृतावसथःस्यात् (१)कृतावासः दत्तावासः स्यात । द्वितीययान्तरिक्ष्यानित्यादिवचनात् द्वितीयादिष्वहस्सु तं प्रति न प्रत्युत्तिष्ठेत् । नाऽप्यासनात् प्रत्यवरोहेत् । स चेत्तस्मिन्नहनि पूर्वमेवाभिवादित । अनभिवादिते तु अभिवादनार्थं प्रत्युत्तिष्ठेत्, प्रत्यवरोहेच्च ॥ १ ॥

शेषभोज्यतिथीनां स्यात् ॥ २ ॥

'अतिथीनेवाग्रे भोजये'(२.४.११.)दित्येव सिद्धे वचनमिदं प्रमादाद्यन्न दत्तमतिथये, तन्न भुञ्जीतत्येवमर्थम् ॥ २ ॥

न रसान् गृहे भुञ्जीताऽनवशेषमतिथिभ्यः ॥ ३ ॥

आगामिभ्योऽतिथिभ्यो यथा न किञ्चित् गृहेऽवशिष्यते, तथा गव्यादयो रसा न भोज्याः । सद्यस्सम्पादयितुमशक्यत्वाद्रसानाम्॥३॥

नाऽऽत्मार्थमभिरूपमन्नं पाचयेत् ॥ ४ ॥

आत्मानमुद्दिश्याऽभिरूपमन्नं स्वाद्वपूपादि न पाचयेत् ॥ ४ ॥

गोमधुपकार्हो वेदाध्यायः ॥ ५ ॥

साङ्गस्य वेदस्याऽध्येता वेदाध्यायः । सोऽतिथिर्मधुपर्कमर्हति, गां च दक्षिणाम् ॥ ५ ॥

आचार्य ऋत्विक्स्नातको राजा वा धर्मयुक्तः ॥ ६ ॥

अवेदाध्याया अप्याचार्यादयो गोमधुपर्कार्हाः । अत एव श्रूयते—एकदेशाध्यायिनावप्यृत्विगाचार्यौ भवत इति । धर्मयुक्त इति राज्ञो विशेषणम् । वाशब्दः समुच्चये ॥ ६ ॥

आचार्यार्त्विजे श्वशुराय राज्ञ इति पारिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ॥ ७ ॥

एतत् (२)गृह्ये व्याख्यातम् । गौरत्र दक्षिणाऽधिका विधीयते ॥७॥

---

१. कृतवास दत्तवासः इति क० पु० २. आप. गृ १३ १९

कोऽसौ मधुपर्क इत्यत आह—

दधि मधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् ॥ ८ ॥

(१)गृह्योक्तस्याऽनुवादोऽयमुत्तरविवक्षया ॥ ८ ॥

अभाव उदकम् ॥ ९ ॥

दधिपयसोरलाभ उदकमपि देयम् । मधुसंसृष्टमित्येके । नेत्यन्ये, पूर्वत्र पुनर्मधुसंसृष्टग्रहणादिति ॥ ९ ॥

वेदाध्याय इत्यत्र विवक्षितं वेदमाह—

षडङ्गो वेदः ॥ १० ॥

षड्भिरङ्गैर्युक्तोऽत्र वेदो गृह्यत इति ॥ १० ॥

कानि तान्यङ्गानीत्यत आह—

छन्दःकल्पो व्याकरणं ज्योतिषं निरुक्तं शिक्षा च्छन्दोविचितिरिति ॥ ११ ॥

छन्दो वेदः । तत्कल्पयति प्रतिशाखं शाखान्तराधीतेन न्यायप्राप्तेन चाऽङ्गकलापेनोपेतस्य कर्मणः प्रयोगकल्पनयोपस्कुरुत इति छन्दःकल्पः कल्पसूत्राणि । व्याकरण अर्थविशेषमाश्रित्य पदमन्वाचक्षाणं पदपदार्थप्रतिपादनेन वेदस्योपकारकं विद्यास्थानम् । सूर्यादीनि ज्योतींष्यधिकृत्य प्रवृत्तं शास्त्रं ज्योतिषम् । आदिवृद्धभावे यज्ञः कार्यः । तदप्यध्ययनोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयदुपकारकम् । निरुक्तमपि व्याकरणस्यैव कात्स्न्यम् । शीक्षा वर्णानां स्थानप्रयत्नादिकमध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्रकारं शिक्षयतीति । पृषोदरादित्वाद्दीर्घः । गायत्र्यादीनि छन्दांसि यया विचीयन्ते विविच्य ज्ञायन्ते, सा छन्दोविचितिः । एतान्यङ्गानि अङ्गसंस्तवादङ्गत्वम् ।

'मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते ॥ इति ॥

उपकारकत्वाच्च ॥ ११ ॥

---

१. "दधि मौध्वति संसृज्य—त्रिवृतमेके घृतं च । पाक्तमेके धानास्वक्तूंश्च" इति गृह्ये उक्तम् ।

उक्त उपकारः, अत्र चोदयति—

शब्दार्थारम्भणानां तु कर्मणां समाम्नायसमाप्तौ वेदशब्दस्तत्र सङ्ख्या विप्रतिषिद्धा॥ १२ ॥

शब्दार्थतया यान्यारभ्यन्ते न प्रत्यक्षादिप्रमाणगोचरतया, तानि शब्दार्थारम्भणानि कर्माणि वैदिकान्यग्निहोत्रादीनि। तेषां समाम्नाय उपदेशः। तस्य समाप्तौ स यावता ग्रन्थजातेन समाप्तेऽनुष्ठानपर्यन्तो भवति, तत्र वेदशब्दो वर्तते। वेदयति धर्मं विदत्यनेनेति वा धर्मार्थमिति। न च मन्त्रब्राह्मणमात्रेणाऽनुष्ठानपर्यन्त उपदेशो भवति। किं तु कल्पसूत्रैरपि सह। ततश्च तेषामपि वेदस्वरूपत्वानुप्रवेशात् पञ्चैवाऽङ्गानि। तत्र षट्सङ्ख्या विप्रतिषिद्धेति ॥ १२ ॥

परिहरति—

अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः॥१३॥

अङ्गान्येव कल्पसूत्राणि न वेदस्वरूपाणि। पौरुषेयतया स्मरणात्। कतिपयान्येव हि तेषु ब्राह्मणवाक्यानि, भूयिष्ठानि स्ववाक्यानि। अङ्गानां च तेषां प्रधानवाचिभिश्शब्दैः छन्दो वेदो ब्राह्मणमित्यादिभिर्व्यपदेशो न न्याय्य इति न्यायविदां सिद्धान्तः। ताविमौ पूर्वपक्षसिद्धान्तौ (१)कल्पसूत्राधिकरणे स्पष्टं द्रष्टव्यौ। यत्तूक्तं न मन्त्रब्राह्मणमात्रेण पूर्ण उपदेश इति। नैष स्थाणोरपराधो यदेनमन्धो न पश्यतीति, पुरुषापराधस्स भवति। इदं तु भवानाचष्टाम्-कल्पसूत्रकाराणामियं अयोगकल्पना कुतस्त्येति। न्यायोपबृंहिताभ्यां मन्त्रब्राह्मणाभ्यामिति वक्तव्यम्। नाऽन्या गतिः। एवं सति भवानपि यततां तादृशस्स्यामिति। ततो मन्त्रब्राह्मणाभ्यामेव पूर्णमवभोत्स्यत इति ॥ १३ ॥

अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य ॥ १४ ॥

अतिथिमागतं केनचित्प्रकारेण निराकृत्य भोजने प्रवृत्तो यत्र गते यदवस्थाप्राप्ते भोजने स्मरेत्-धिङ्मया स निराकृत इति, तत्रैव भोजनाद्विरम्य तस्मिन्नहन्युपोष्य ॥ १४ ॥

इत्यापस्तम्बधर्मसूत्रे उज्ज्वलोपेते द्वितीयप्रश्नेऽष्टमी कण्डिका ॥ ८ ॥

---

१. पू. मी १. ३. ९. कल्पसूत्राणां बौधायनापस्तम्बादिप्रणीतानां यत्र साक्षाद्वेदत्वनिराकरणं क्रियते किन्तु वेदमूलत्वेनैव प्रामाण्यं स्थाप्यते। तत् कल्पसूत्राधिकरणम् ॥

श्वो भूते यथामानसं तर्पयित्वा संसाधयेत् ॥ १ ॥

अपरेद्युस्तमन्विष्य यथामानसं यथेच्छं तर्पयित्वा संसाधयेत् गच्छन्तमनुव्रजेत् ॥ १ ॥

आ कुत इत्यत आह—

यानवन्तमा यानात् ॥ २ ॥

स चेदतिथिर्यानवान् भवति, तमा तस्याऽऽरोहणादनुव्रजेत ॥

यावन्नाऽनुजानीयादितरः ॥ ३ ॥

इतरो यानरहितो यावन्नाऽनुजानीयात् गच्छेति, तं तावदनुव्रजेत्॥३॥

अप्रतीभायां सीम्नो निवर्तेत ॥ ४ ॥

यदि तस्याऽन्यपरतयाऽनुज्ञायां प्रतीभा बुद्धिर्न जायते, ततस्सीम्नि प्राप्तायां ततो निवर्तेत । प्रतेर्दीर्घश्छान्दसः । 'संसाधये' दित्यादि सर्वातिथिसाधारणम् । न निराकृतमात्रविषयम् ॥ ४ ॥

सर्वान्वैश्वदेवे भागिनः कुर्वीता श्वचण्डालेभ्यः ॥५॥

वैश्वदेवान्ते भोजनार्थमुपस्थितान् सर्वानेव भागिनः कुर्वीताऽऽश्वचण्डालेभ्यः । अभिविधावाकारः । तेभ्योऽपि किञ्चिद्देयम् । तथा च मनुः—

(१)'शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वयसां च क्रिमीणां च शनकैर्निर्वपेद्भुवि ॥ इति ॥ ५ ॥

नाऽनर्हद्भ्यो दद्यादित्येके ॥ ६ ॥

अनर्हद्भ्यश्चण्डालादिभ्यो न दद्यादित्येके मन्यन्ते । तत्र दानेऽभ्युदयः । अदाने न प्रत्यवायः ॥ ६ ॥

उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ॥ ७ ॥

उपेतः कृतोपनयनोऽसमावृत्तः । स स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत न भुञ्जीत । एवं सति समावृत्तस्योच्छिष्टं भुञ्जानस्य न दोषः स्यात् । एवं तर्हि उपेत आन्तात् कृतदारोऽकृतदारश्च स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् । एवमप्युपेतस्य यस्य कस्यचिदपि यदुच्छिष्टं तद्भोजने न दोषः स्यात् । पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्-(१. ४ ११) इत्येतन्नियमार्थं भविष्यति-पितुरेव भ्रातुरेवेति। यद्येवं सूत्रमेवेदमनर्थकम्,तस्मादेव

---

१. म. स्मृ. ३. ९२.

नियमादन्यत्राऽप्रसङ्गात् । इदं तर्हि प्रयोजनम्—यदा पिताऽनुपेतः पुत्रस्तु प्रायश्चित्तं कृत्वा कृतोपनयनः तदा तं प्रति पितुरनुपेतस्योच्छिष्टं प्रतिषिध्यते । एवं ज्येष्ठेऽपि द्रष्टव्यम् । एतदपि नास्ति प्रयोजनम् । उक्तं हि 'धर्मविप्रतिपत्तावभोज्य (१.४.१२) मिति । 'तेषामभ्यागमनं भोजनं विवाहमिति च वर्जये'(१.१.३३) दिति च । तथा स्त्रीणामित्येतत् किमर्थम् ? मातुरुच्छिष्टप्रतिषेधार्थम् । कथं प्रसङ्गः ? 'भ्रातरि पितर्याचार्यवच्छुश्रूषे' (१.१४.५.)ति वचनात्, 'यदुच्छिष्टं प्राश्नाति हविरुच्छिष्टमेव त'(१.४.१,२) दित्याचार्योच्छिष्टस्य हविष्ट्वेन संस्तवाच्च । (१) एवमपि 'पितुर्ज्येष्ठस्ये'त्यत्र पितुर्ग्रहणादेव सिद्धम् । तस्मात् केषु चिज्जनपदेषु भार्ययाऽनुपेतेन च सह भोजनमाचरन्ति । तथा च बौधायनः—(२)'यानि दक्षिणतस्तानि व्याख्यास्यामः । यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजन'मिति । तस्य दुराचारत्वमनेन प्रतिपाद्यते ॥

सर्वाण्युदकपूर्वाणि दानानि ॥ ८ ॥

'सर्वाणी'ति वचनात् भिक्षाप्युदकपूर्वमेव देया ॥ ८ ॥

यथाश्रुति विहारे ॥ ९ ॥

विहारे यज्ञकर्मणि यानि दानानि दक्षिणादीनि , तानि यथाश्रुत्येव । नोदकपूर्वाणि ॥ ९ ॥

ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः ॥

ये नित्या भाक्तिका भक्तार्हाः कर्मकरादयः तेषामुपरोधो यथा न भवति तथा वैश्वदेवान्ते अभ्यागतेभ्यः संविभागः कर्तव्यः ॥ १० ॥

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् ॥ ११ ॥

दासो भूत्वा यः कर्म करोति स दासकर्मकरः तं आत्मानमुपरोधे नापि नोपरुन्ध्यात् । किं पुनरागतार्थं तं नोपरुन्ध्यादिति(३) ॥ ११ ॥

तथा चाऽऽत्मनोऽनुपरोधं कुर्याद्यथा कर्मसु समर्थस्स्यात् ॥

---

१. नैतदपि सारम् । 'पितुर्ज्येष्ठस्य च'इत्यत्रपितुर्ग्रहणादेव तस्या अप्रसक्तेः,इति.च.पु

२. बौ. ध. १. १. १८, १९.

३. 'अतस्त केवलं कर्मकर नोपरुन्ध्यात् इत्यधिकः पाठः क. पुस्तके ।

कर्मसु अग्निहोत्रादिषु आर्जनेषु च यथा स्वयं समर्थो भवति तथाऽऽत्मान नोपरुन्ध्यात् कुटुम्बी ॥ १२ ॥

अथाऽप्युदाहरन्ति—

(१)'अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशाऽरण्यवासिनः ।
द्वात्रिंशतं गृहस्थस्याऽपरिमितं ब्रह्मचारिणः ॥
आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नता'मिति॥

अथैतस्मिन्नात्मानं नोपरुन्ध्यादिति विषये (२)श्लोकावुदाहरन्ति । मुनेः सन्न्यासिनः । भक्ष्या अष्टौ ग्रासाः आत्मविकारेण । अरण्यवासी वानप्रस्थ । तस्य षोडश । द्वात्रिंशत् ग्रासाः गृहस्थस्य । प्रथमार्थे द्वितीया । ब्रह्मचारिणस्तु विद्यार्थस्य नैष्ठिकस्य च ग्रासनियमो नास्ति । द्वितीयेन श्लोकेनाहिताग्निविषये 'कालयोर्भोजन' (२. १. २.) मित्ययमपि नियमो नास्तीति(३) प्रतिपाद्यते । अनड्वद्ग्रहणं दृष्टान्तार्थम् । ब्रह्मचारिग्रहणं दृढार्थम् । सिध्यन्ति स्वकार्यक्षमा भवन्ति ॥ १३ ॥

इत्यापस्तम्बधर्ममूत्रे नवमी कण्डिका ॥

इत्यापस्तम्बधर्ममूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलाया द्वितीयप्रश्ने चतुर्थः पटलः ॥ ४ ॥

---

१. एतच्छ्लोकद्वयानन्तर गृहस्थो ब्रह्मचारी वा षोडशन्नन् सुतपश्चरेत् । प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः । इत्यधिकस्सूत्रभागो घ. पुस्तके ॥

२. श्लोकान् इति घ. पु. ३. प्रतिपादयितुम् इति पु क.

अथ पञ्चमः पटलः ॥

भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो माता-
पित्रोर्बुभूषाऽर्हतश्च नियमविलोपः ॥१॥

भिक्षण याचनम् । तत्राऽऽचार्यादयो निमित्तम् । बुभूषा भर्तुमिच्छा । अर्हतो विद्यादिमतोऽग्निहोत्रादिनियमे योग्यस्याऽर्थस्याऽभावेन लोपः ॥ १ ॥

तत्र गुणान् समीक्ष्य यथाशक्ति देयम् ॥ २ ॥

तत्रैवंभूते भिक्षणे याचतः श्रुतवृत्तादिकान् गुणान् समीक्ष्य शक्त्यनुरूपमवश्यं देयम् । अदाने (१)प्रत्यवेयात् । गौतमस्तु निमित्तान्तरमप्याह- (२)'गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनध्वंसयोगवैश्वजितेषु द्रव्यसविभागो बहिर्वेदि । भिक्षमाणेषु कृतान्नमितरेष्वि'ति । (३)वैश्वजितो विश्वजिद्यागस्य कर्ता सर्वस्वदक्षिणः ॥ २ ॥

(४)इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम् ॥ ३ ॥

इन्द्रियद्वारा आत्मनः प्रीतिरिन्द्रियप्रीतिः । तामर्थयमानो यो भिक्षते स्रक्चन्दनादि तन्मूल्यं वा । तद्भिक्षणं नियमेन दानस्य निमित्त न भवति ॥ ३ ॥

न तदादियेत ॥ ४ ॥

तस्मात् न तदादियेत । अदानेऽपि न प्रत्यवायः। विवाहोऽपि द्वितीयो न निमित्तं सत्यां प्रथमायां धर्मप्रजासम्पन्नायाम् । तदर्थमिदं वचनम् । अन्यत्र प्राप्त्यभावात् ॥

स्वकर्म ब्राह्मणस्याऽध्ययनमध्यापनं यज्ञो याजनं
दानं प्रतिग्रहणं दायाद्यं सिलोञ्छः ॥ ५ ॥

'सर्ववर्णानां स्वधर्मानुष्ठान (२.२.२) इत्युक्तम् । तेऽमी स्वधर्मा

---

१. प्रत्यवायात् इति. क. घ. पु २. गौ. ५. २१, २२

३. विश्वजिताऽतिरात्रेण सर्वपृष्ठेन सर्वस्वदक्षिणेन यजेत' इत्यनेन विहितेन यागेनेष्ट्वा तत्र दत्तसर्वस्वदक्षिण इत्यर्थः ।

४. इदमुत्तरं च सूत्रमेकीकृतं च. पु.। इन्द्रियमनिमित्तम् ॥ ४ ॥ तस्मान्न तदाद्रियेत ॥ ५ ॥ इति तच्छब्दघटितं भिन्नसूत्रतया च पठित क० पुस्तके ।

उच्यन्ते-पुत्राय दीयत इति दायः । तमादत्त इति दायादः । तस्य भावो दायाद्यम्, दायस्वीकारः । क्षेत्रादिषु पतितानि मञ्जरीभूतानि ततश्च्युतानि वा धान्यानि सिलशब्दस्याऽर्थः । तेषामुञ्छनमंगुलीभिर्नखैर्वाऽऽदानं सिलोञ्छः । एतान्यध्ययनादीन्यष्टौ ब्राह्मणस्य स्वकर्म । तेष्वध्ययनयजनदानानि द्विजातिसामान्येन कर्तव्यतया नियम्यन्ते । इतराण्यर्थितया द्रव्यार्जने प्रवृत्तस्योपायान्तरनिवृत्यर्थान्युपदिश्यन्ते-अध्यापनादिभिरेव द्रव्यमार्जयेन्न चौर्यादिभिरिति(१) ॥ ५ ॥

अन्यच्चाऽपरिगृहीतम् ॥ ६ ॥

यच्चाऽन्यत् केनाप्यपरिगृहीतमारण्यमूलफलादि तेनापि । जीवेदिति प्रकरणात् गम्यते । एतेन निधिर्व्याख्यातः ॥ ६ ॥

एतान्येव क्षत्रियस्याऽध्यापनयाजनप्रतिग्रहणानीनि परिहाप्य दण्डयुद्धाधिकानि ॥ ७ ॥

एतान्येव क्षत्रियस्याऽपि स्वकर्म । अध्यापनादीनि त्रीणि वर्जयित्वा । दण्डलब्धं युद्धलब्धं चाऽधिकम् ॥ ७ ॥

क्षत्रियवद्वैश्यस्य दण्डयुद्धवर्जं कृषिगोरक्ष्यवणिज्याऽधिकम् ॥ ८ ॥

गोरक्ष्यं गवां रक्षणम् । भावे ष्यत्प्रत्ययः । वणिजो भावो वणिज्या क्रयविक्रयव्यवहारः, कुसीदं च । (१)'दूतवणिग्भ्यां चे'ति यत्प्रत्ययः ॥ ८ ॥

नाऽननूचानमृत्विजं वृणीते न पणमाणम् ॥ ९ ॥

साङ्गस्य वेदस्याऽध्येता प्रवक्ता चाऽनूचानः । अतादृशमृत्विजं न वृणीते नाऽप्येतावद्देयमिति परिभाषमाणम् ॥ ९ ॥

अयाज्योऽनधीयानः ॥ १० ॥

अनधीतवेदं न याजयेत् तदानीमपेक्षितं मन्त्रं यथाशक्ति वाचयन्१०॥

क्षत्रियस्य युद्धं स्वकर्मेत्युक्तम् । तत्कथं कर्तव्यमित्यत आह—

युद्धे तद्योगा यथोपायमुपदिशन्ति तथा प्रतिपत्तव्यम्११

युद्धविषये तथा प्रतिपत्तव्यं यथा तद्योगा उपायमुपदिशन्ति तस्मिन्युद्ध-

---

१. एतदादिसूत्रचतुष्टयोक्ता विषया मानवेषु (१. ८७–९१) श्लोकेषु द्रष्टव्याः ।

२. कात्या. वा. ४३४.

कर्मणि युद्धशास्त्रे वा येषामभियोगः ते तद्योगाः ॥ ११ ॥

न्यस्तायुधप्रकीर्णकेशप्राञ्जलिपराङ्मावृत्ता-
नामार्या वधं परिचक्षते ॥ १२ ॥

न्यस्तायुधः त्यक्तायुधः । प्रकीर्णकेशः केशानपि नियन्तुमक्षमः । प्राञ्जलिः कृताञ्जलिः । पराङ्मावृत्तः पराङ्मुखः । सर्व एते भीताः । एतेषां युद्धे वधमार्याऽसन्तो गर्हन्ते । परिगणनादन्येषां वधे न दोषः । तथा च गौतमः—(१)'न दोषो हिंसायामाहव' इति । न्यस्तायुधः प्रकीर्णकेशः इति विसर्जनीयं केचित्पठन्ति । सोऽपपाठः । पराङ्मावृत्त इति ङकारश्छान्दसः ॥ १२ ॥

शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शा-
स्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् ॥ १३ ॥

यथाशास्त्रं गर्भाधानादिभिः संस्कारैः संस्कृताः शास्त्रैरधिगताः तेषामिन्द्रियदौर्बल्यात् अजितेन्द्रियतया विप्रतिपन्नानां स्वकर्मतश्च्युतानां निषिद्धेषु च प्रवृत्तानाम् । शास्ता शासिता आचार्यादिः । निर्वेषं प्रायश्चित्तमुपदिशेत् । यथाकर्म कर्मानुरूपम् । यथोक्त धर्मशास्त्रेषु ॥ १३ ॥

तस्य चेच्छास्त्रमतिप्रवर्तेरन् राजानं गमयेत् ॥ १४ ॥

तस्य चेच्छासितुः शास्त्रं शासन अतिप्रवर्तेरन् न तत्र तिष्ठेयुः राजानं गमयेत्—एवमसौ करोतीति ॥ १४ ॥

राजा पुरोहितं धर्मार्थकुशलम् ॥ १५ ॥

स राजा धर्मशास्त्रेष्वर्थशास्त्रेषु कुशलं च पुरोहितं गमयेत्-विनीतामसाविति ॥ १५ ॥

स ब्राह्मणान्नियुञ्ज्यात् ॥ १६ ॥

स पुरोहितः ब्राह्मणाश्चेदतिक्रमणकारिणः प्रापिताः तान्नियुञ्ज्यात् अनुरूपेषु प्रायश्चित्तेषु नियुञ्जीत ॥ १६ ॥

अथ यदि ते तत्रापि न तिष्ठेयुः, तदा किं कर्तव्यमित्यत आह—

बलविशेषेण(२) वधदास्यवर्जं नियमैरुपशोषयेत् ॥ १७ ॥

ततस्ताञ्नियमैरुपवासादिभिरुपशोषयेत् । बलविशेषेण बलानुरूपम् ।

---

१. गौ. ध. १०. १९. २. अत्र विषये मानवौ ८. ३८०, ३८१. श्लोकौ द्रष्टव्यौ ।

वधदास्यवर्जं वधस्ताडनादि, वध दास्यं च वर्जयित्वा सर्वमन्यत् बन्धनादिकं बलानुरूप कारयेत् यावत्ते मन्येरन् चरेम प्रायश्चित्तमिति ॥१८॥

इत्यापस्तम्बधर्मसूत्र उज्वलोपेते द्वितीयप्रश्ने दशमी कण्डिका ॥१०॥

एवं ब्राह्मणविषये उक्तम् । इतरेषामाह —

इतरेषां वर्णानामा प्राणविप्रयोगात्समवेक्ष्य तेषां कर्माणि राजा दण्डं प्रणयेत् ॥ १ ॥

इतरेषां ब्राह्मणव्यतिरिक्तानां वर्णानां राजा पुरोहितोक्त दण्ड स्वयमेव प्रणयेत् तेषा कर्माणि समवेक्ष्य तदनुरूपमा प्राणविप्रयोगात् । अभिविधावाकारः ॥ १ ॥

न च सन्देहे दण्डं कुर्यात् ॥ २ ॥

अपराधसन्देहे राजा दण्डं न कुर्यात् ॥ २ ॥

किन्तु—

सुविचितं विचित्या दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत ॥ ३ ॥

आ दैवप्रश्नेभ्यः साक्षिप्रश्नादिभि. शपथान्तैः सुविचित यथा भवति तथा विचित्य निरूप्य । राजा दण्डाय प्रतिपद्येत उपक्रमेत ॥ ३ ॥

एवं कुर्वतः फलमाह—

एवंवृत्तो राजोभौ लोकावभिजयति ॥ ४ ॥

एवंभूतं वृत्तं यस्य स एवंवृत्तः । अत्र मनु —

(१) 'अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति(२) प्रेत्य स्वर्गाच्च हीयते ॥' इति ॥४॥

गच्छतां प्रतिगच्छतां च पथि समवाये केन कस्मै पन्था देय इत्यत आह—

राज्ञः पन्था ब्राह्मणेनाऽसमेत्य ॥ ५ ॥

राजा अभिषिक्तः । स यदि ब्राह्मणेन समेतो न भवति, तदा तस्य

---

१. म. स्मृ ८, १२८. २. नरकं चैव गच्छति इति मुद्रितपुस्तकेषु पाठः ।

पन्था दातव्यः । क्षत्रियैरप्यनभिषिक्तैः । एतदर्थमेव चेदं वचनम् । अन्यत्र 'वर्णज्यायसां चे' (२.११.८) ति वक्ष्यमाणेनैव सिद्धम् ॥ ५ ॥

समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ ६ ॥

आपदि शिष्यभूतब्राह्मणविषयमिदम् । शिष्यभूतेनाऽपि ब्राह्मणेन समेत्य तस्यैव राज्ञा पन्था देय इति ॥ ६ ॥

(१)यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः(२) ॥ ७ ॥

यान शकटादि । भाराभिनिहितो भाराक्रान्तः । आतुरो व्याधितः । स्त्रियाः यस्याः कस्याश्चिदपि । एतेभ्यस्सर्वैरेव वर्णैः पन्था दातव्यः । इतिशब्दात् स्थविरबालकृशादिभ्यश्च ॥ ७ ॥

वर्णज्यायसां चेतरैर्वर्णैः ॥ ८ ॥

वर्णेनोत्कृष्टा वर्णज्यायांसः । तेषां चेतरैरपकृष्टैर्वर्णैर्ब्राह्मणैश्च दातव्यः ॥८॥

अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः ॥ ९ ॥

अशिष्टो मूर्खः । अन्ये प्रसिद्धाः । एतेषां सर्वैरेवंजातीयैरुत्कृष्टैरपकृष्टैर्वर्णैर्ब्राह्मणैश्च । आत्मस्वस्त्ययनार्थेन स्वस्त्ययनमात्मत्राणम् । तेन प्रयोजनेन तदर्थम्, न त्वदृष्टार्थमिति । अत्र कौटिल्येन देयस्य पथः प्रमाणमुक्तम्—(३)'पञ्चारत्नी रथपथश्चत्वारो हस्तिपथो द्वौ क्षुद्रपशुमनुष्याणा' मिति ॥ ९ ॥

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ ॥ १० ॥

धर्मचर्यया स्वधर्मानुष्ठानेन जघन्यो वर्णः शूद्रादिः पूर्वं पूर्वं वर्णमापद्यते वैश्यादिकं प्राप्नोति । जातिपरिवृत्तौ जन्मनः परिवर्तने । शूद्रो वैश्यो जायते ।

---

१. रुद्धस्य भारा इति घ. पु.

२. अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था भारवहस्य पन्थाः । राज्ञः पन्था ब्राह्मणेनाऽसमेत्य समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ इति महाभारते **वनपर्वणि** ।

३. कौ. अ. २.४-२२. 'पञ्चारत्नयः' इति अर्थशास्त्रपुस्तकेषु मुद्रितेषु । परन्तु पञ्चारत्निः इत्येवाऽनुवादो मन्वन्तरेष्वपि ।

तत्रापि स्वधर्मनिष्ठः क्षत्रियो जायते । तत्रापि स्वधर्मपरो ब्राह्मण इति । एवं क्षत्रियवैश्ययोरपि द्रष्टव्यम् ॥ १० ॥

अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ॥ ११ ॥

पूर्वेण गम् । महापातकव्यतिरिक्ताधर्मानुष्ठानविषयमेतत् । महापातकेषु 'स्तेनोऽभिशस्त' (२.२.६) इत्यादिना नीचजातिप्राप्तेरुक्तत्वात् ॥ ११ ॥

धर्मप्रजासम्पन्ने दारे नाऽन्यां कुर्वीत ॥ १२ ॥

श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु श्रद्धा शक्तिश्च धर्मसम्पत्तिः । प्रजासम्पत्तिः पुत्रवत्त्वम् । एवंभूते दारे सति नान्याम् । 'दारे' इति प्रकृते अन्यामिति स्त्रीलिङ्गनिर्देशादर्थाद्भार्यामिति गम्यते । नान्यां भार्यां कुर्वीत नोऽद्वहेत् ॥ १२ ॥

अन्यतराभावे कार्या प्रागग्न्याधेयात् ॥ १३ ॥

धर्मप्रजयोरन्यतरस्याऽभावे कार्या उद्वाह्या । तत्रापि प्रागग्न्याधेयात् नोर्ध्वमाधानात् । एतदर्थमेवेदं वचनम् । उभयसम्पत्तौ न कार्येत्युक्ते अन्यतराभावे कार्येत्यस्यांशस्य प्राप्तत्वात् । यदा चाऽन्यतराभावे कार्या तदा का शङ्का उभयाभावे कार्येति ॥ १३ ॥

प्रागग्न्याधेयादित्यत्र हेतुः—

आधाने हि सती कर्मभिस्संबध्यते येषामेतदङ्गम् ॥१४॥

हि यस्मात् आधाने सती विद्यमाना सहान्विता कर्मभिस्सम्बध्यते अधिक्रियते । कैः ? येषामग्निहोत्रादीनामेत(१)दाधानमङ्गमुपकारकम् । तैः । अत्र 'दारे सती'ति वचनात् मृते तस्मिन्प्रागूर्ध्वं वाऽऽधानात् सत्यामपि पुत्रसम्पत्तौ धर्मसम्पत्त्यर्थं दारग्रहणं भवत्येव । तथा च मनुः—

(२)"भार्यायै पूर्वमारिण्यै दत्त्वाऽग्नीनन्त्यकर्मणि ।
पुनर्दाराक्रियां कुर्यात्पुनराधानमेव च ॥" इति ।

---

१. आधानस्याऽनारभ्याधीतत्वात् क्रत्वङ्गत्वाभावस्यस्य पूर्वतन्त्रे तृतीयाध्याये स्थापितत्वात् अत्राङ्गपदमुपकारकपरतया विवृणोति । सम्भवति हि स्वनिष्पाद्यादृष्टनीयाग्निसमर्पणद्वाराऽऽधानमग्निहोत्रादिकतूनामुपकारकम् ॥

२. म. स्मृ. ५.१६८

याज्ञवल्क्योऽपि—

(१)'आहरेद्विधिवद्दारानग्नींश्चैवाऽविलम्बयन्।' इति ।

न हि वाचनिकेऽर्थे युक्तयः क्रमन्ते । तेनैतत्र चोदनीयम्-यजमानः पूर्वमन्वारम्भणीयया संस्कृतो न तस्यायं संस्कारः पुनरापादयितुं शक्यः । या च भार्या आधानात्परमूढा सा च पूर्वमसंस्कृता, न तस्या दर्शपूर्णमासादिष्वधिकारः । स कथं तया तैर्यष्टुमर्हतीति । अन्वारम्भणीयाजन्यश्च संस्कारो यदि संयोगवदुभयनिष्ठः तदा भार्यानाशे नश्यतीति तस्य पुनस्संस्कारोऽपि नाऽनुपपन्नः । यानि च नाऽन्वारम्भणीयामपेक्ष्यन्ते स्मार्तानि गार्ह्याणि च तैरधिकारस्तस्याऽप्यविरुद्धः ।

ननु च प्रागग्न्याधानात् कर्मभिस्सम्बध्यते गार्ह्यैस्स्मार्तैश्च, तत्किमुच्यते आधाने हि सती कर्मभिस्सम्बध्यत इति ? सत्यम्, अस्मादेव च हेतुनिर्देशादवगम्यते-प्रागाधानात् सत्यामपि धर्मसम्पत्तौ प्रजासम्पत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नाऽतीव दोष इति। अथ यस्या हिताग्नेर्भार्या सत्येव कर्मण्यश्रद्दधाना अशक्ता वा भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम्? । यद्येषा युक्तिः 'धर्मप्रजासम्पन्न'इति कर्मभिस्सम्बध्यत इति च, तदा कर्तव्यो विवाहः । (न च 'प्रागग्न्याधेया' दित्यस्य विरोधः । अन्यतराभावे कार्यैत्यस्यैव स शेषः । न पुनरुभयाभावे कार्यैत्यस्य । भारद्वाजसूत्रे तु यद्यप्यविशेषेणाऽहिताग्नेर्दारानुज्ञा प्रतीयते-"अथ यद्याहिताग्निः पुनर्दारक्रियां कुर्वीत यद्यग्नीन्नोत्सृजेत् लौकिकास्सम्पद्येरन् तस्य पुनरग्न्याधेयं कुर्वीतेत्याइमरथ्यः, पुनराधानमित्यालेखनः, पुनरग्न्याधेयमित्यौडुलोमिः,रिति । तथापि तस्याप्ययमेव विषयः) ॥ १४ ॥

सगोत्राय दुहितरं न प्रयच्छेत् ॥ १५ ॥

कन्यागोत्रमेव गोत्रं यस्य तस्मै कन्या न देया । यथा-हारीताय हारीतीं, वात्स्याय वात्सीमित्यादि ॥ १५ ॥

मातुश्च योनिसम्बन्धेभ्यः ॥ १६ ॥

मातुर्योनिसम्बन्धाः कन्याया मातुलादयः । चकारात् पितुरप्येवम् । तेभ्यः असगोत्रेभ्योऽपि न देया कन्यका । अत्र मनुः—

(२) 'असपिण्डा च या मातुरसगोत्रा च या पितुः ।

---

१. या. स्मृ. १. ८९. ( ) एतत्कुण्डलान्तर्गतो भागो नास्ति घ. ङ. पुस्तकयोः

२. म. स्मृ. ३. ५.

सा प्रशस्ता द्विजातीनां (१)दारकर्मण्यमैथुनी ॥

व्यासः—

(२)'स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् ।
यवीयसीं भ्रातृमतीमसगोत्रां प्रयत्नतः ॥
मातुस्सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञाने नोद्वहेदविशङ्कितः॥
मातुस्सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥ इति ।'

गौतमः—

(३)'असमानप्रवरैर्विवाहः । ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च । मातृबन्धुभ्यः पञ्चमात्, इति । कात्यायनः—'प्रवर एषामविवाह इत्येतेषु प्रत्यध्यायमाहृत्य वचनं येषामेव प्रवरः तेषामेवाऽविवाह' इति । कारिका च भवति—

रातीयानामविवाह एषामिति येषां सूत्रकृदब्रवीत् ।
तेषामेव विवाहः स्यात् नान्येषामिति धारणे'ति ॥

शङ्खः(४)—

'दारानाहरेत्सदृशानसमानार्षेयानसम्बन्धानासप्तमपञ्चमात्पितृमातृबन्धुभ्यः, इति ।

वसिष्ठः—

(५)'गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षेयमस्पृष्टमैथुनामवरवयसीं भ्रातृमतीं सदृशीं भार्यां विन्देत । पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः' इति ।

हारीतः(६)—

'श्वित्री कुष्ठ्यपस्मारी यक्ष्मामयाव्यपेतायुरनार्षेयम ब्रह्म समानार्षेयमित्येतान्यपतितान्यपि कुलानि वर्जनीयानि भवन्ति । कुलानुरूपाः प्रजा भवन्तीति । आदितष्षडयक्षियत्वादनार्षेयम् । अवेदत्वाद्ब्रह्म । एककुलत्वात् समानार्षेयमिति । तस्मात् सप्त पितृतः परीक्ष्य पञ्च मातृतो ऽनग्निकां श्रेष्ठां भ्रातृमतीं भार्यां विन्देत ।'

पैठीनसिः—असमानार्षेयां कन्यां वरयेत् । पञ्च मातृतः परिहरेत्सप्त पितृतः श्रीन्मातृतः पञ्च पितृतो वा'

---

१. दारकर्मण्यमैथुनी इत्येव मेधातिथ्यादिभि·पाठोऽङ्गीकृत· । कुल्लूकभट्टस्तु 'कर्मणि मैथुने' इति ।

२. ४. ६. एतदङ्कितानि वचनानि तेषु तेषु मुद्रितपुस्तकेषु नैवोपलभ्यन्ते ।

३. गौ.ध.४.२—५. ५. व.ध ८.१.२.

याज्ञवल्क्यः—

(१)'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात्सप्तमाकूर्ध्वं मातृतः पितृतस्तथा ॥'

विष्णुः—

(२)'असगोत्रामसमानप्रवरां भार्यां विन्देत मातृतः पञ्चमात् पितृतस्सप्तमात् ।

नारदः—

(३)आसप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्यास्सगोत्रास्स्युस्समानप्रवरास्तथा ।'

शातातपः—

(४)'परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्यास्समुत्सर्गमतिकृच्छ्रे विशोधनम् ॥
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजश्चान्द्रायणं चरेत् ॥'

मनुः—

(५)पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ।
ज्ञातित्वेनाऽनुपेयास्ताः पतति ह्युपयन्नधः ॥'

बौधायनः—

(६)'सगोत्रां चेदमत्योपयच्छेत मातृवदेनां बिभृयात्' । (७)'सगोत्रां गत्वा चान्द्रायणमुपदिशेत् ॥ व्रते परिनिष्ठिते ब्राह्मणीं न त्यजेत् मातृवद्भगिनीवद्वर्तो न दुष्यतीति काश्यप इति विज्ञायते । अथ सान्निपात अविवाहः तदाध्यायं वर्जयेत् । बोधायनस्य

---

१. या. स्मृ. १.५२,५३.

२. मुद्रितश्लोकात्मकविष्णुस्मृतौ नेदं वचनमुपलभ्यते परन्तु प्रत्यान्तरेष्वस्या विष्णुस्मृतित्वमुक्तम् । ३. नार. स्मृ. व्यवहा. १२. श्लो. ७.

४. मुद्रितशातातपस्मृतौ लघुशातातपस्मृतौ वृद्धशातातपस्मृतौ वा नेदं वचनमुपलभ्यते ।

५. म. स्मृ. ११. १७१, १७२. ६. बौ ध. २.१.३८.

७. महाप्रवरे समाप्तिसूत्रकाण्डे । बौ. सू. (प्रवर) १३. ५५.

तत्प्रमाणं कर्तव्यम् । मानव्यो हि प्रजा इति विज्ञायते इति ।

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥
एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्वद्भृग्वङ्गिरोगणात् ॥' इति ।

सुमन्तुः—

(१)पितृपत्न्यस्सर्वा मातरस्तद्भ्रातरो मातुलाः तत्सुता मातुलसुतास्तस्मात्ता नोपयन्तव्या' इति ॥ १६ ॥

ब्राह्मे विवाहे बन्धुशीललक्षणसम्पन्नश्रुतारोग्याणि वृत्वा प्रजां सहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणाऽलंकृत्य ॥ १७ ॥

ब्रह्मणा दृष्टो ब्राह्मः । तस्मिन् विवाहे वरस्य बन्धादीन् वृत्वा परीक्ष्य प्रजां दुहितरं सहत्वकर्मभ्यः सहकर्तव्यानि यानि कर्माणि तेभ्यः, तानि कर्तुम्, प्रतिपादयेत् दद्यात् । शक्तिविषयेण विभक्तिप्रतिरूपोऽयं निपातो यथाशक्तीत्यस्यार्थे द्रष्टव्यः । यथाशक्त्यलंकृत्य दद्यादित्येष ब्राह्मो विवाहः। प्रजासहत्वकर्मभ्य' इति पाठे प्रजार्थं सहत्वकर्मार्थं चेति ॥ १७ ॥

आर्षे दुहितृमते मिथुनौ गावौ देयौ ॥ १८ ॥

ऋषिभिर्दृष्टे विवाहे मिथुनौ गावौ स्त्रीगवी पुंगवश्च दुहितृमते देयौ । एष आर्षः ॥ १८ ॥

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् ॥ १९ ॥

देवैर्दृष्टे विवाहे यज्ञतन्त्रे वितते ऋत्विजे कर्म कुर्वते कन्यां दद्यात् । एष दैवो विवाहः ॥ १९ ॥

मिथः कामात्संवर्तेते स गान्धर्वः ॥ २० ॥

यत्र कन्यावरौ रहसि कामात् मिथः परस्परं रागात् संवर्तेते मिथुनीभवतः स गान्धर्वो विवाहः । समो दीर्घः पूर्ववत् । अत्र संयोगोत्तरकालं विवाहसंस्कारः कर्तव्यः ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकादशी कण्डिका ॥ ११ ॥

---

१. सु. स्मृ.

शक्तिविषयेण द्रव्याणि दत्वाऽऽवहेरन् स आसुरः॥१॥

यत्र विवाहे कन्यावते यथाशक्ति द्रव्याणि दत्वाऽऽवहेरन् कन्यां स आसुरः। (१)'वित्तेनाऽऽनतिस्रीमतामासुर' इति गौतमः। तेन कन्यायै गृहक्षेत्राभरणादिदानेन विवाहो नाऽऽसुरः॥ १॥

दुहितृमतः प्रोथयित्वाऽऽवहेरन् स राक्षसः॥ २॥

दुहितृमतः कन्यावतः पित्रादीन् प्रोथयित्वा प्रमथ्य यत्राऽऽवहेरन् स राक्षसो विवाहः।

(२)'हत्वा भित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत स राक्षस' इत्याश्वलायनः। अत्रापि विवाहसंस्कारः कर्तव्यः। द्वौ चाऽपरौ विवाहौ शास्त्रान्तरेषूक्तौ। तत्राऽऽश्वलायनः-(३)'सह धर्मं चरतमिति प्राजापत्यः। सुप्तां प्रमत्तां वाऽपहरेत्स पैशाच' इति। ताविह पृथङ्नोक्तौ ब्राह्मराक्षसयोरन्तर्भावादिति॥ २॥

तेषां त्रय आद्याः प्रशस्ताः पूर्वः पूर्वः श्रेयान्॥ ३॥

तेषां विवाहानां मध्ये आद्यास्त्रयो ब्राह्मार्षदैवा प्रशस्ताः। तत्रापि पूर्वः पूर्वोऽतिशयेन प्रशस्त इति॥ ३॥

यथायुक्तो विवाहस्तथा युक्ता प्रजा भवति॥ ४॥

प्रशस्ते विवाहे जाता प्रजाऽपि प्रशस्ता भवति। निन्दिते निन्दिता तत्र मनुः—

(४)ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः॥
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः॥
उत्तरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मसमुज्झिताः॥

प्राजापत्येन सह ब्राह्माद्याश्चत्वारो ब्राह्मणस्य। गान्धर्वराक्षसौ क्षत्रियस्य। आसुरं तु वैश्यशूद्रयोः। पैशाचो न कस्यचिदपि॥ ४॥

पाणिसमूढं ब्राह्मणस्य नाऽप्रोक्षितमभिलिष्टेत्॥ ५॥

---

१. गौ. ध. ४ ११. २ आश्व. गृ. १.४.३२.
३. आश्व. गृ. ४.२५. ४. म. स्मृ. ३.३९-४१.

ब्राह्मणस्य पाणिना समूढमुपलिप्तं सम्मृष्टं वा भूप्रदेशमप्रोक्षितं ऽनाभितिष्ठेत् नाधितिष्ठेत् । प्रोक्ष्यैवाऽधितिष्ठेदिति ॥ ५ ॥

अग्निं ब्राह्मणं चाऽन्तरेण नाऽतिक्रामेत् ॥ ६ ॥

अग्नेर्ब्राह्मणस्य च मध्ये न गच्छेत् ॥ ६ ॥

ब्राह्मणांश्च ॥ ७ ॥

अन्तरेण नाऽतिक्रामेदित्येव । ब्राह्मणानां च मध्ये न गच्छेत् ॥ ७ ॥

अनुज्ञाप्य वाऽतिक्रामेत् ॥ ८ ॥

स्पष्टम् ॥ ८ ॥

अग्निमपश्च न युगपद्धारयीत ॥ ९ ॥

अग्निमुदकञ्च न युगपद्धारयेत् ॥ ९ ॥

नानाग्नीनां च सन्निपातं वर्जयेत् ॥ १० ॥

पृथगवस्थितानामग्नीनामेकत्र समावपनं वर्जयेत् न कुर्यात् । अग्नावग्निं न प्रक्षिपेदित्यन्ये(२) ॥ १० ॥

प्रतिमुखमग्निमाह्रियमाणं नाऽप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् ॥ ११ ॥

यदाऽस्य गच्छतः प्रतिमुखमग्निराह्रियते तदा न तं प्रदक्षिणीकुर्यात् स चेद्भूमौ प्रतिष्ठितो न भवति । प्रतिष्ठिते त्वग्नौ दृष्टे प्रदक्षिणीकुर्यादिति ॥ ११ ॥

पृष्ठतश्चाऽऽत्मनः पाणी न संश्लेषयेत् ॥ १२ ॥

स्वस्य पृष्ठभागे स्वपाणिद्वयं न संश्लेषयेन्न बध्नीयात् ॥ १२ ॥

स्वपन्नभिनिष्क्रुक्तो नाश्नन् वाग्यतो रात्रिमासीत शुचौभूत उदकमुपस्पृश्य वाचं विसृजेत् ॥ १३ ॥

(२)'सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिष्क्रुक्ताभ्युदितौ तौ यथाक्रमम् ॥'

स्वपन्नभिनिष्क्रुक्तो नाश्नन्भुञ्जानस्तूष्णीं भूतो रात्रिं सर्वामासीत न शयीत । अथाऽपरेद्युः उदकमुपस्पृश्य प्रातः स्नात्वा वाचं विसृजेत् । अयमस्य निर्वेषः ॥

---

१. एतदनन्तरं–विनावचनम् । आवापवचने सति कुर्यात् । इत्यधिकः पाठः घ. पु.

२. अमरको. ब्र. सूर्योदयकाले यः स्वपिति सोऽभ्युदितः । सूर्यास्तकाले यः स्वपिति सोऽभिनिष्क्रुक्तः ।

स्वपञ्चभ्युदितो नाश्नन्वाग्यतोऽहस्तिष्ठेत् ॥१४॥

पूर्वेण गतम् । 'उदकमुपस्पृश्य वाचं विसृजेदिति चात्राऽपेक्ष्यते । तत्राऽस्तमिते स्नानप्रतिषेधात् सायमेव स्नात्वा वाचं विसृज्य सन्ध्यामुपासीत ॥ १४ ॥

आतमितोः प्राणमायच्छेदित्येके ॥ १५ ॥

यावदङ्गानां ग्लानिर्भवति तावत्प्राणमायच्छेत् प्राणवायुमाकृष्य धारयेत् । प्राणायाम कुर्यादित्येके मन्यते । शक्त्यपेक्षो विकल्पः ।

तत्र मनुः—

(१)सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामस्स उच्यते ॥' इति ।

एवमावर्तेयद्यावद्ग्लानिः ॥ १५ ॥

स्वप्नं वा पापकं दृष्ट्वा ॥ १६ ॥

पापकस्वप्नो दुस्स्वप्नः मर्कटास्कन्दनादिः । तं च दृष्ट्वा ॥ १६ ॥

अर्थं वा (२)सिसाधयिषन् ॥ १७ ॥

अर्थः प्रयोजनम् । तच्च दृष्टमदृष्टं वा साधयितुमिच्छन् ॥ १७ ॥

नियमातिक्रमे चाऽन्यास्मिन् ॥ १८ ॥

नियमानां 'उदङ्मुखो मूत्रं कुर्यादि' (१.३१.१.) त्येवमादीनामातिक्रमे च आतमितो' प्राणमायच्छेदिति सर्वत्र शेषः ॥ १८ ॥

दोषफलसंशये न तत् कर्तव्यम् ॥ १९ ॥

यस्मिन् कर्मणि कृते पक्षे दोषः फलं सम्भाव्यते न तत् कुर्यात्, यथा सभये देशे एकाकिनो गमनमिति ॥ १९ ॥

एवमध्यायानध्याये ॥ २० ॥

संशय इत्युपसमस्तमप्यपेक्ष्यते । अध्यायोऽनध्याय इति संशयेऽप्येवं न तत् कर्तव्यमिति । 'सन्धावनुस्तानित' (१.९.२०.) इत्युदाहरणम् । पूर्वस्यैवाऽयं प्रपञ्चः ॥ २० ॥

न संशये प्रत्यक्षवद्ब्रूयात् ॥ २१ ॥

संशयितमर्थमात्मनोऽज्ञानपरिहाराय प्रत्यक्षवत् निश्चितवन्न ब्रूयात् ॥

---

१. सर्वेष्वादर्शपुस्तकेषु मनुवचनत्वेनैवोपन्यस्तामिदम् । न कुत्राऽपि तु मुद्रिते मनुस्मृतिपुस्तकेषूपलभ्यते । बौधायनधर्मसूत्रे ४. १. २८. तूपलभ्यते ।

२. सिसाधीयषु', इति. घ. पु.

**अभिनिम्रुक्ताभ्युदितकुनखिश्यावदाग्रदिधिषूदिधिषू-
पतिपर्याहितपरीष्टपरिवित्तपरिविन्नपरिवि-
विदानेषु चोत्तरोत्तरस्मिन्नशुचिकरनिर्वे-
षो गरीयान् गरीयान् ॥ २२ ॥**

आद्यौ द्वौ गतौ। कुनखी कृष्णनखः। श्यावा दन्ता यस्य स श्यावदन् विवर्णदन्तः। '(१)विभाषा श्यावारोकाभ्यामि' ति दन्नादेशः। तस्य न लोपश्छान्दसः। ज्येष्ठायामनूढायां पूर्वं कनीयस्या वोढा अग्रदिधिषुः। पश्चादितरस्या वोढा दिधिषूपतिः। ज्येष्ठे अकृताधाने कृताधानः कनिष्ठः पर्याधाता। ज्येष्ठः पर्याहितः। ज्येष्ठे अकृतसोमयागे कृतसोमयागः कनिष्ठः परिष्टा। ज्येष्ठः परीष्टः। अकृतविवाहे ज्येष्ठे कृतविवाहः कनिष्ठः (२)परिवेत्तेति प्रसिद्धः। ज्येष्ठः (३)परिवित्तः।(४)ज्येष्ठस्य भार्यामुपयच्छमानः परिविन्नः। यस्मिन्नगृहीतभागे वा कनिष्ठो भागं गृह्णाति स ज्येष्ठः परिविन्नः। कनिष्ठः परिविविदानः। चकारः पर्याधातृप्रभृतीनां समुच्चयार्थः। एतेष्वभिनिम्रुक्तादिषु यो य उत्तरस्तस्मिंस्तस्मिन्द्वादशमासादिरशुचिकरनिर्वेषो यः पूर्वमुक्तः तत्र तत्र गरीयान् भवति। पूर्वत्र पूर्वत्र लघीयान्। अभिनिम्रुक्ताभ्युदितयोरनन्तरोक्तं प्रायश्चित्तद्वयमपि विकल्पेन भवति ॥ २२ ॥

तच्च लिङ्गं चरित्वोढार्थमित्येके ॥ २३ ॥

यस्मिन् कौनख्यादिके लिङ्गे यत् प्रायश्चित्तमुक्तं तच्चरित्वा तत् कौनख्यादिकं लिङ्गमुद्धरेदित्येके मन्यन्ते। अन्यत्राऽहिताग्निभ्य इति स्मृत्यन्तरम् ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने द्वादशी कण्डिका ॥१२॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां
द्वितीयप्रश्ने पञ्चमः पटलः ॥ ५ ॥

---

१. पा.सू.५.४ ११४. २. परिवित्त इति प्रसिद्धः इति.ख.ङ.च पुस्तकेष्वपपाठः।
३. परिवित्ति इति ख च. पुस्तकयो. पाठः। अत्र बोधायनधर्मसूत्रव्याख्या २. १. ३. द्रष्टव्या।
४. ज्येष्ठे चागृहीतभागे कनिष्ठो भाग गृह्णाति स परिविविदानः। परिविन्न इतरः। इत्येव पाठो घ. पुस्तके।

अथ षष्ठः पटलः ॥

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिस्सम्बन्धः ॥ १ ॥

सवर्णा चाऽसावपूर्वा च शास्त्रविहिता चेति कर्मधारयः । सवर्णा सजातीया, ब्राह्मणस्य ब्राह्मणीत्यादि । अपूर्वा । अनन्यपूर्वा अन्यस्मा अदत्ता, न विद्यते पूर्वः पतिरस्या इति । शास्त्रविहिता शास्त्रोक्तेन विवाहसंस्कारेण संस्कृता 'सगोत्राय दुहितरं न प्रयच्छे (२. ११. १५) दित्यादिशास्त्रानुगुणा वा । एवम्भूतायां भार्यायां यथर्तु गृह्योक्तेन ऋतुगमनकल्पेन गच्छतो ये पुत्रा जायन्ते तेषा 'स्वकर्म ब्राह्मणस्ये' (२. १०. ४) त्यादिना पूर्वमुक्तैः कर्मभिस्सम्बन्धो भवति । (गच्छथ इति थकारोऽपपाठः) ॥ १ ॥

दायेन चाऽव्यतिक्रमश्चोभयोः ॥ २ ॥

उभयोर्मातापित्रोर्दायेन च तेषां सम्बन्धो भवति अव्यतिक्रमश्च । च इति चेदर्थे अव्यतिक्रमश्चेत्, यदि ते मातरं पितरं च न व्यतिक्रमेयुः । व्यतिक्रमे तु दायहानिरिति ।

अपर आह—'उभयोरपि दायेन तेषां व्यतिक्रमो न कर्तव्यः । अवश्यं देयो दायस्तेभ्य इति ॥ २ ॥

पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषः ॥३॥

अन्येन पाणिग्रहणेन तद्वती पूर्ववती । असंस्कृता विवाहसंस्काररहिता । वर्णान्तरं ब्राह्मणादेः क्षत्रियादिः । तेषु पूर्ववत्यादिषु मैथुने सति दोषो भवति । कस्य ? तयोरेव मिथुनीभवतोः ॥ ३ ॥

तत्राऽपि दोषवान् पुत्र एव ॥ ४ ॥

तत्रेति सप्तम्यास्त्रल्(१) 'इतराभ्योऽपि दृश्यन्त' इति । ताभ्यामुमाभ्यामपि पुत्र एवाऽतिशयेन दोषवान् । तत्र पूर्ववत्यामुत्पन्नौ कुण्डगोलकौ (२)'पत्यौ जीवति कुण्डस्स्यान्मृते भर्तरि गोलक' इति ।

असंस्कृतायामुत्पन्नस्य नामान्तरं नास्ति । किं तु दुष्टत्वमेव ।

( ) कुण्डलान्तर्गतो भागो नास्ति घ. ङ. पुस्तकयोः ।

१. पा. सू. ५. ३. १४. २. म. स्मृ. ३. १७४.

वर्णान्तरे तु जात्यन्तरम् । तत्र गौतमः—

(१)'अनुलोमा. पुनरनन्तरैकान्तरद्व्यन्तरासु जातास्सवर्णाम्बष्ठोग्र निषाददौष्यन्तपारशवाः । प्रातिलोमास्तु सूतमागधायोगवक्षत्तृवैदेहक· चण्डाला' इति । एवकारो दुहितृनिवृत्त्यर्थः । तथा च वसिष्ठः—

(२) 'पतितेनोत्पादितः पतितो भवत्यन्यत्र स्त्रियास्सा हि परगामिनी तामरिक्थामुपेयादिति । (३)'स्त्रीरत्नं दुष्कुलादपी'ति मनुः ॥ ४ ॥

पुत्रेभ्यो दायभागं वक्ष्यन् अन्यस्य भार्यायामन्येनोत्पादितः किमुत्पादयितुः ? अहोस्वित् क्षेत्रिण इति विचारे निर्णयमाह—

उत्पादयितुः पुत्र इति हि ब्राह्मणम् ॥ ५ ॥

न केवल ब्राह्मणमेव । वैदिकगाथा अप्यत्रोदाहरन्तीत्याह—

अथाप्युदाहरन्ति—

इदानीमेवाहं (४)जनकः स्त्रीणामीर्ष्यामि नो पुरा ।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ।
रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ।
अप्रमत्ता रक्षथ तन्तुमेतं
मा वः क्षेत्रे परबीजानि वाप्सुः ।
जनयितुः पुत्रो भवति साम्पराये
मोघं वेत्ता कुरुते तन्तुमेतमिति ॥ ६ ॥

जनयितुः पुत्रः क्षेत्रिणो वेति विवादे पराजितस्य क्षेत्रिणो वचनम् एतावन्त कालमहं जनको मन्यमानः इदानीमेव स्त्रीणामीर्ष्यामि परपुरुषससर्गं न सहे । कदा इदानीम् ? यदा यमस्य सादने पितृलोके जनयितुः पुत्रो भवति पुत्रकृत्यं परलोकगतस्य जनयितुरेव न क्षेत्रिण इत्यब्रुवन् धर्मज्ञाः । उक्त एवार्थः किञ्चिद्विशेषेणोच्यते-रेतोधा बीजप्रदःपुत्र नयति पुत्रदत्तं पिण्डोदकमात्मानं नयति प्रापयति । परेत्य मृत्वा । यमसादने यमलोके । तस्मात्कारणात् भार्यां रक्षन्ति पररेतसो बिभ्यन्तः । बिभ्यतः छान्दसो नुम् । अतो यूयमप्यप्रमत्ता अवहिता भूत्वा एत तन्तुं प्रजासन्तान रक्षथ । लोडर्थे

१. गौ. ध.४ १६-१७ २. व ध.१३. ६. मुद्रितव.ध. कोशेषु पाठभेदो दृश्यते।
३. म स्मृ. २. २३८
४ 'जनक' इति सम्बुध्यन्ततया पठित बौ. ध २. २. ३४-३६

लट्। रक्षतेत्यर्थः। किमर्थम्? वः युष्माकम् क्षेत्रे परबीजानि पररेतांसि मा वाप्सुः। व्यत्ययेनाऽयं कर्मणि कर्तृप्रत्ययः। मा वाप्सत उप्तानि मा भूवन्। मोप्येरन्। कथमिति? (अपर आह–परशब्दाज्जसो लुक्। परे पुरुषाः वः क्षेत्रे बीजानि मा वाप्सुरिति।) यस्मात् साम्पराये परलोके जनयितुरेव पुत्रफलं भवति वेत्ता (१)परिणेता क्षेत्री तु एतत्तन्तुं मोघं निष्प्रयोजनं कुरुते आत्मसात्करोति। इतिशब्दो गाथासमाप्तौ। एतच्च क्षेत्रिणोऽनुज्ञामन्तरेण पुत्रोत्पादनविषयम्। यदा तु क्षेत्री बन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति, यदा वा सन्तानक्षये विधवां नियुञ्जते यथा विचित्रवीर्यस्य क्षेत्रे सत्यवतीं व्यासेन। तदुत्पन्नः पुत्र उभयोरपि पुत्रो भवति–बीजिनः क्षेत्रिणश्च। द्व्यामुष्यायणश्च स भवति। तथाचाचार्य एवाह—

(२) 'यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षये'दिति। याज्ञवल्क्योऽप्याह—

(३)'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति।

नारदोऽपि—

(४)द्व्यामुष्यायणको दद्याद्वाभ्यां पिण्डोदके पृथक्।
रिक्थादर्धं समादद्याद्बीजक्षेत्रवतोस्तथा॥' इति॥ ६॥

यदि पूर्ववत्यादिषु मैथुने दोषः, कथ तर्हि(५) उचथ्यभारद्वाजौ व्यत्यस्य भार्ये जग्मतुः(६) वसिष्ठश्चण्डालीमक्षमालाम्। (७)प्रजापतिश्च स्वां दुहितरम्। तत्राऽऽह—

दृष्टो धर्मव्यतिक्रमस्साहसं च पूर्वेषाम्॥ ७॥

सत्यं दृष्टोऽयमाचारः पूर्वेषाम्। स तु धर्मव्यतिक्रमः, न धर्मः, गृह्यमाणकारणत्वात्। न चैतावदेव, साहसं च पूर्वेषां दृष्टम्। यथा(८) जामदग्न्येन रामेण पितृवचनादविचारेण मातुश्शिरश्छिन्नम्॥ ७॥

( ) एतत्कुण्डान्तर्गतोभागः ख च पुस्तकयोरेवास्ति। तत्र 'कथमिति' इति नास्ति।

१. 'भार्यायां लब्ध्वा' इति ख. च. पु. २. आप श्रौ १. ९. ७.

३. या. स्मृ. २. १३०. ४. नार स्मृ १३. ४३. ५. महाभारते द्रष्टव्यम्।

६. म. स्मृ. ९. २३. महाभा. व. १३२. च द्रष्टव्यम्। अरुन्धत्या एवाक्षमालेति नामान्तरम्।

७. ता. ब्रा. ८. २. १०. द्रष्टव्यम्। ८. कथेयं महाभा. वन ११६ अ. द्रष्टव्या.।

किमिदानीं तेषामपि दोषः ? नेत्याह—

(१)तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ॥ ८ ॥

तादृश हि तेषां तेजः यदेवंविधैरपि पाप्मभिर्न प्रत्यवयन्ति । (२) 'तद्यथैषीकातूलमग्नौ प्रोत प्रदूयेत एवं हाऽस्य पाप्मानः प्रदूयन्ते इति (३)श्रुते· ॥ ८ ॥

न चैतावता ऽर्वाचीनानामपि तथा प्रसङ्ग इत्याह—

तदन्वीक्ष्य प्रयुञ्जानस्सीदत्यवरः ॥ ९ ॥

तदिति(४) नपुंसकमनपुंसकेने'त्येकशेष एकवद्भावश्च । तं व्यति·क्रमं तच्च साहसमन्वीक्ष्य दृष्ट्वा स्वयमपि तथा प्रयुञ्जानोऽवर इदानी·न्तनः सीदति प्रत्यवैति । न ह्यग्निः सर्वं दहतीत्यस्माकमपि तथा श·क्तिरिति ॥ ९ ॥

पुत्रप्रसङ्गेनाऽऽह—

दानं क्रयधर्मश्चाऽपत्यस्य न विद्यते ॥ १० ॥

दानग्रहणेन विक्रयोऽपि गृह्यते, त्यागसामान्यात् । क्रयधर्म इति च प्रतिग्रहस्याऽपि ग्रहणम् । धर्मग्रहणात् स्वीकारसामान्याच्च । अप त्यस्य दानप्रतिग्रहक्रयविक्रया न कर्तव्याः । द्वादशविधेषु पुत्रेषु दत्त क्रीतयोरपि पुत्रयोर्मन्वादिभिः पठितत्वान्नाऽयं समान्येन प्रतिषेधः । किं तर्हि ? ज्येष्ठपुत्रविषयः, एकपुत्रविषयः, स्त्रीविषयो वा । तथा च वसिष्ठः—

(५)न ज्येष्ठ पुत्रं दद्यात्प्रतिगृह्णीयाद्वा । न त्वेकं पुत्रं दद्यात् प्रतिगृह्णी·याद्वा स हि सन्तानाय पूर्वेषाम् । न स्त्री पुत्रं दद्यात् प्रातगृह्णीयाद्वा अन्यत्राऽनुज्ञानाद्भर्तुः । पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवे शनस्य मध्ये अग्निमुपसमाधाय सम्परिस्तीर्य व्याहृतीभिर्हुत्वाऽदूर बान्धवं सन्निकृष्टमेव प्रतिगृह्णीया' दिति । विश्वजिति च सर्वस्वदाने गवादिवदपत्यं न देयमिति । विक्रयस्तु सर्वत्र निषिद्ध । तत्र उपपात

---

१. इदमग्रिमं सूत्रं पश्चात्मना निबद्ध तन्त्रवार्तिके ।

२. छान्दो. ५. २४. ३. 'छान्दोग्ये श्रयते' इत्यधिक ख. च. पु

४. पा. सू १. २. ६९. ५. व. ध. १५. ३-६.

केषु याज्ञवल्क्य आह—

(१)'नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः ।' इति ।

बह्वृचब्राह्मणेऽपि शुनश्शेपाख्याने दृश्यते-(२) स ज्येष्ठ पुत्रं नि गृह्यान उवाचे' त्यादि । पुत्रप्रकरणे अपत्यशब्दोपादानमपि ज्येष्ठपुत्र-विषयत्वस्य लिङ्गम् । न पतन्त्यनेनेत्यपत्यमिति ।

(३)ऋणमस्मिन् सञ्नयत्यमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥' इति ॥१०॥

विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽतिरथं शतं देयं तन्मिथुयाकुर्यादिति तस्यां क्रयशब्दस्संस्तुतिमात्रं धर्माद्धि सम्बन्धः ॥११॥

आर्षे विवाहे दुहितृमते दान क्वचिद्वेद श्रूयते । तस्माद्दुहितृमते रथेनाधिकं-गवां शत देयम् । तच्च दुहितृमान् मिथुया कुर्यात् । मिथ्या कुर्यात् । (४)मा देवानां मिथुयाऽकर्भागधेय" मिति दृश्यते । मिथुया कुर्यादिति कोऽर्थः वरायैव पुनर्दद्यादिति । तद्दानं काम्यं कामनिमित्तम । 'यथा युक्तो विवा हस्तथायुक्ता प्रजा भवतीति (२.१०.४) ऋषितुल्याः पुत्रा यथा स्युरिति ततश्च धर्मार्थं न प्रजार्थम्, विक्रयार्थम् । यस्तु तस्यां विवाहक्रियायां क्रयशब्दः क्वचित् स्मृतौ दृश्यते, स स्तुतिमात्रम् द्रव्यप्रसादसाम्यात् । न मुख्यक्रयत्वप्रतिपादनार्थम् । कुतः ? हि यस्मात् धर्मादेव हेतोः सम्बन्धो दम्पत्योरिति । आर्षे दुहितृमते मिथुनौ गावौ देयावित्यत्रापयेष एव न्यायः ।

अत्र मनुः—

(५)'यासां नाऽऽददत्ते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥' इति ।

एतच्च सर्वं 'दानं क्रयधर्मश्चाऽपत्यस्य न विद्यत' इत्यस्य व्यभिचार-निवृत्यर्थं कर्तव्यमित्युक्तम् ॥ ११ ॥

अथ दायविभागः —

एकधनेन ज्येष्ठं तोषयित्वा ॥ १२ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने त्रयोदशी कण्डिका ॥ १३ ॥

---

१. या. स्मृ. प्रा. २३६. २. ऐ. ब्रा. ७. ३.१५.
३. ऐ. ब्रा. पं. ७. ४. तै. सं. १. ३. ९. ५. म स्मृ. ३. ५४.

अथ दायविभागः—

जीवन् पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्तं पतितं च परिहाप्य ॥ १ ॥

एकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठं पुत्रं तोषयित्वा तृप्तं कृत्वा जीवन्नेव पुत्रेभ्यो दायं विभजेत् । सममात्मना परस्परं च तेषाम् । सामान्याभिधानात् क्रमागतं स्वयमार्जितं च क्लीबादीन् वर्जयित्वा । क्लीबादिग्रहणं जात्यन्धादीनामप्युपलक्षणम् । यथाह मनुः—

(१)'अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥' इति ।

अन्धादीनां पुत्रसद्भावे तेऽप्यंशहराः । एवमुन्मत्तपतितौ(२) निवृत्ते निमित्ते क्लीबादयस्तु न भर्तव्याः । अत्र विभागकालः स्मृत्यन्तरवशादवगन्तव्यः । तत्र नारदः—

(३)'मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ।
निवृत्ते चापि मरणात्पितर्युपरतस्पृहे ॥' इति ।

यदा पुत्राणां पृथक्पृथक् धर्मानुष्ठाने शक्तिश्रद्धे भवतः सोऽपि काल । 'तस्माद्धर्म्या पृथक्क्रिये'ति(४) दर्शनादिति । 'जीवन्नि'त्यवचनं जीवन्नेवाऽवश्यं पुत्रान् विभजेत् एष धर्म इति प्रतिपादनाय । अन्यथा तदनर्थकम् । अजीवतोऽप्रसङ्गात् । स्मृत्यन्तरेषु स्वयमार्जिते पितुरिच्छया विषमविभागो दर्शितः । न स धर्म्य इत्याचार्यस्य पक्षः । भार्याया अप्यंशो न दर्शितः । आत्मन एवांशस्तस्या अपीति मन्यते । वक्ष्यति च 'जायापत्योर्न विभागो विद्यते' (२. १४. १६) इति ।

केचित्तु पितुर्द्वावंशावित्याहुः । 'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिते'ति दर्शनात् । अयमप्याचार्यस्य पक्षो न भवति । यथा पुत्राणामेकैक एवांशस्तथा भार्याणां तथा पितुरपीति । यद्वा पुत्राणामेवांशसाम्यं आत्मनस्त्वाधिक्येऽपि न दोषः ।

तत्र हारीतः—

'पिता ह्याग्रयणः पुत्रा इतरे ग्रहाः यद्याग्रयणः स्कन्देदुपदध्येद्वा

---

१. 'अनर्हौ' इति ङ पु म. स्मृ. ९ २०१.

२. वृत्तिनिमित्ते क्लीबादयस्तु न भर्तव्याः, इति ङ. पु उन्मत्तपतित्तौ निवृत्तनिमित्तौ इति च. पु.

३. नार. स्मृ १३. ३. ४. म.स्मृ.९.१११. वचनात् इति. क.घ. पुस्तकयोः ।

इतरेभ्यो गृह्णीयादि'ति

विभागादूर्ध्वं पित्रोर्जीवनाभावे पुत्रभागेभ्यो ग्राह्यमित्युक्तं भवति। इति जीवद्विभागः ॥ १ ॥

अथ मृते कुटुम्बिनि तद्धनस्य गतिमाह—

पुत्राभावे यः प्रत्यासन्नः सपिण्डः ॥ २ ॥

'पुत्राभावे' इति वचनात् सत्सु पुत्रेषु त एव गृह्णीयुरविशेषात्समम्। तत्र नारदीये विशेषः—

(१)'यच्छिष्टं प्रीतिदायेभ्यो दत्वार्णं पैतृकं च यत्।
भ्रातृभिस्तद्विभक्तव्यमृणी स्यादन्यथा पिता ॥' इति ॥

कात्यायनस्तु—

(२)'भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम्।
विभागकाले देयं तद्विकिथभिस्सर्वमेव तु ॥ इति ॥

अत्र याज्ञवल्क्यः—

(३)'पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरे'दिति।

तदत्र नोक्तं पुत्रैरेव सह वृत्तिरस्या इति।

तथा च मनुः—

(४)'पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥' इति।

एवं मातुरप्यभावे तद्धनं भर्तृकुलदत्तं स्वयमार्जितं च तत्पुत्रा अप्रत्ताश्च दुहितरस्समं गृह्णीयुः।

(५)स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी।
अप्रत्ता चेत्समूढा तु लभते (६)मानमात्रकम् ॥इति बृहस्पतिः।

पितृकुलदत्तं चाऽप्रत्ता एव दुहितरः।

(७)मातुस्तु यौतकं यत्स्यात् कुमारीभाग एव सः।' इति मनुः।

अथाऽप्रत्ता दुहितरः पुत्राश्च जननी तदा।
(८)जनन्यां संस्थितायां तु समं सर्वे सहोदराः ॥
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः। इति मानवमेव।

---

१ ना. स्मृ. १३ ३२. २ कात्यायनीयस्मृतौ नास्ति.
३. या स्मृ २.१२३. ४. म.स्मृ ९. ३. बौ. ध. २. २. ४६.
५. मुद्रितबृहस्पतिस्मृतौ नेदं वचनमुपलभ्यते। परन्तु 'जनन्यां संस्थितायां' (९ १९२.) इतिश्लोकव्याख्यानावसरे कुल्लूकभट्टेनेदं वचनं बृहस्पतिवचनत्वेनोदाहृतम्।
६. सा न मातृकम्, इति ड. पु ७. म. स्मृ. ९. १३१ ८. म. स्मृ. ९. १९२.

अत्र व्यासः—

(१)'असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात्।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि॥' इति।

अत्र क्रमविवाहे बृहस्पतिः—

(२)'ब्रह्मक्षत्रियविट्शूद्रा विप्रोत्पन्नास्त्वनुक्रमात्।
चतुस्त्र्येकभागेन भजेयुस्ते यथाक्रमम्॥
क्षत्रजास्त्र्येकभागा विड्जौ तु द्व्येकभागिनौ।' इति।

मानवे च स्पष्टमुक्तम्—

(३)'सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्॥
चतुरोऽशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः।
वैश्यापुत्रो हरेदूद्व्यशमंशं शूद्रासुतो हरेत्॥ इति।

यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र क्षत्रियादिसुतास्त्र्येकभागाः। यस्य त्वेकस्यामेव पुत्रस्सा सर्वं हरेत् शूद्रापुत्रवर्जम्।

यथाह देवलः—

(४)आनुलोम्येकपुत्रस्तु पितुस्सर्वस्वमाप्नुयात्।
निषाद एकपुत्रस्तु विप्रत्वस्य तृतीयभाक्॥
द्वौ सपिण्डस्सकुल्यो वा स्वधादाता तु त हरेत्' इति।

निषादः पारशवः। क्षेत्रविषये बृहस्पतिः—

(५)न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्यस्य पिता दद्यान्मृते विप्रासुतो हरेत्॥
शूद्रां द्विजातिभिर्जातो न भूमेर्भागमर्हति।
सजातावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः॥' इति॥

याज्ञवल्क्यः—

(६)जातो हि दास्यां शूद्रेण कामतोऽशहरो भवेत्।
मृते पितरि कुर्युस्त भ्रातरस्त्वंशभागिनम्॥' इति।

भार्याविषये विष्णुः—

(७)मातरः पुत्रभागानुसारतो भागहारिण्य' इति। अत्र,
औरस. पुत्रिकाबीजक्षेत्रजौ पुत्रिकासुतः।

---

१. २. ४. ५. ७. इमानि वचनानि मुद्रित तत्तद्ग्रन्थेषु नोपलभ्यन्ते।
३. म स्मृ. ७. १५२. १५३. ६. या. स्मृ. २. १३३.

पुनर्भवश्च कानीनस्सहोढो गूढसम्भवः ।
दत्तः क्रीतस्स्वयंदत्त. कृत्रिमश्चाऽपविद्धकः ।
यत्र क्वचोत्पादितश्च पुत्राख्या दश पञ्च च ।
अनेनैव क्रमेणैषां पूर्वाभावे परः परः ।
पिण्डदोऽशहरश्चेति प्रायेण स्मृतिषु स्थिताः ।

औरसो धर्मपत्नीजः । 'सवर्णापूर्वशास्त्रविहिताया'मिति पूर्व मुक्तः । गौतमः(१)-'पितोत्सृजेत्पुत्रिकामनपत्योऽग्नि प्रजापतिं चेष्ट्वास्मदर्थमपत्यमिति संवादे'ति ।

बृहस्पतिः—

'एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः ।
तत्तुल्या पुत्रिका प्रोक्ता भर्तव्यास्त्वपरे स्मृताः ॥' इति ।

मनुः—

(२)पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ।
समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः ॥ इति ।

याज्ञवल्क्यः—

(३)अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ इति ।

अयमेक एवोत्पादयितुर्बीजजः, क्षेत्रजस्तु क्षेत्रिणः ।

बृहस्पतिः—

'पुत्रोऽथ पुत्रिकापुत्रस्स्वर्गप्राप्तिकरावुभौ ।
रिक्थे पिण्डाम्बुदाने च समौ सम्परिकीर्तितौ ॥' इति ।

काश्यपः—

'सप्त पौनर्भवाः कन्या वर्जनीया कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकं स्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या ' ॥

कात्यायनः—

क्लीबं विहाय पतितं या पुनर्लभते पतिम् ।
तस्यां पौनर्भवो जातः व्यक्तमुत्पादकस्य स. ॥ इति ।

मनुः—

(४)पितृवेश्यनि कन्या तु यं पुत्रं जनयेद्रहः ।

---

१. गौ. ध २८. १८ २. म. स्मृ. ९. १३४.
३. या. स्मृ. २. १२७. ४. म. स्मृ. ९. १७२.

तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवः ॥' इति ।

नारदः--

(१)कानीनश्च सहोढश्च गूढायां यश्च जायते ।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः पितुः ।' इति ॥

वसिष्ठः--

(२)'अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।
पौत्री मातामहस्तेन दद्यात्पिण्ड हरेद्धनम् ॥' इति ।

अनूढायामेव मृतायां मातरि मातामहस्य पुत्रः । अन्यथा वोढुः ।

मनुः--

(३)'या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुस्स गर्भो भवति सहोढ इति चोच्यते ।

(४)उत्पद्यते गृहे यस्य न च ज्ञायेत कस्यचित् ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥

दत्तः पूर्वमेवोक्तः । पैठीनसिः--अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण द्यार्षेयेण जाताः ते असंगतकुलीना द्यामुष्यायणा भवन्तीति ।

मनुः--

(५)भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

(६)क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकस्सुतस्तस्य सदृशोऽसदृशोऽपि वा ।

(७)मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्य स्वयं दत्तस्तु स स्मृतः ॥ इति ।

(८)सदृशं तु प्रकुर्यातां गुणदोषविवर्जितम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥

(९)मातापितृभ्यामुत्सृष्ट तयोरन्यतरेण वा ।
यं पुत्र प्रतिगृह्णीयादपविद्धः स उच्यते ॥ इति ।

सर्वे एते समानजातीयाः,

(१०)सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥

इति याज्ञवल्क्यवचनात् ।

---

१. ना. स्मृ १३. ४. २. व स्मृ १७. २५ ३. म. स्मृ. ९. १७३
४. म स्मृ ९. १७० ५. म. स्मृ ९ १८२. ६. म. स्मृ. ९. १७४.
७. म. स्मृ. ९. १७७ ८. म. स्मृ. ९. १६९ ९. म. स्मृ. ९. १७१.
१०. या. स्मृ. २. १३२.

विष्णुः—'यत्र क्वचनोत्पादितस्तु द्वादशः, इति ।

याज्ञवल्क्यः—

(१)'पिण्डदोऽशहरश्चैषां पूर्वाभावे परः परः ।' इति

मनुः—

(२)'श्रेयसः श्रेयसोऽभावे पापीयान् रिक्थमर्हति ।' इति ।

'क्रमादेते प्रवर्तेरन् मृते पितरि तद्धने ।

नारदः—

(३)ज्यायसो ज्यायसोऽभावे जघन्यस्तदवाप्नुयात् ॥' इति ।

देवलः—

'सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न तिष्ठति ।
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
शेषास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥' इति ।

मनुः—

(४)'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ॥' इति ।

बृहस्पतिः—

'क्षेत्रजाद्यास्सुतास्त्वन्ये पञ्चषट्सप्तभागिनः' इति ।

हारीतः—

'विभजिष्यमाण एकविंशं कानीनाय दद्याद्विंशं पौनर्भवायैकोनविंशं द्यामुष्यायणायाऽष्टादशं क्षेत्रजाय सप्तदशं पुत्रिकापुत्रायेतरानौरसाये'ति ।

वसिष्ठः—

(५)"पुत्रं प्रतिग्रहीष्य'न्निति प्रक्रम्य 'तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्यते चतुर्थभागभागि'ति ।

एवमेतेषु शास्त्रेषु विद्यमानेषु यदाचार्येण पूर्वमुक्तं 'तेषां कर्मभिस्सम्बन्धो दायेनाऽव्यतिक्रमश्चोभयो'रिति तद्धर्मपत्नीजे पुत्रे सति क्षेत्रजादीनां समांशहरत्वप्रतिषेधपरं वेदितव्यम् ।

अथाऽविभाज्यम् ।

अत्र मनुः—

(६)'अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् ।

---

१. या. स्मृ. २. १३२. २. म स्मृ. ९. १८४. ३. ना. स्मृ. १३. ४९.
४ म. स्मृ ९. १३४. ५. व. ध. १५. ६. ९. ६. म. स्मृ. ९. २०८.

स्वयमर्हति लब्धं तच्चाऽकामो दातुमर्हती'ति ।

कात्यायनः—

'नाऽविद्यानां तु वैद्येन देयं विद्याधनान् क्वचित् ।
समं विद्याधनानां तु देयं वैद्येन तद्धनम् ॥
परभक्तप्रदानेन प्राप्तयिद्यो यदाऽन्यतः ।
तया प्राप्तं तु विधिना विद्याप्राप्तं तदुच्यते ॥' इति ।

व्यासः—

'पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।
तस्य तच्चाऽपहर्तव्यं(१) शौर्यहार्यं तथैव च ॥' इति ।

याज्ञवल्क्यः—

(२)"क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥
पत्यौ जीवति यत्स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥'

व्यासः—

'साधारणं समाश्रित्य यत्किञ्चिद्बाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥'

इति पुत्रदायविभागः । तदभावे तु मृतस्य य. प्रत्यासन्नः सपिण्ड', स किम् ? 'दाय हरेते'ति (१४. ५.) वक्ष्यमाणेन सम्बन्धः ।

(३)'लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
सप्तमः पिण्डदातैषां सापिण्ड्यं सप्तपूरुषम् ॥'

इति सपिण्डलक्षणम् । तेषु यो य. प्रत्यासन्नस्स स गृह्णीयादिति। भार्या तु रिक्थग्राहिणस्सपिण्डाद्या रक्षेयुः, न तु दायग्रहणमित्याचार्यस्य पक्षः । श्रूयते हि-(४)'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति।

मनुरपि—

(५)'अनिन्द्रिया अदायादाः स्त्रियो नित्यमिति श्रुति'रिति ।

अत्र सपिण्डाद्यभावे बृहस्पतिः—

'अन्यत्र ब्राह्मणात्तिं तु राजा धर्मपरायणः ।

---

१. शौर्यं विद्याधनं तथा इति. घ. पु. शौर्यं भार्याधनं तथा इति. ड. पु.

२. या. स्मृ. २-१३९. ३ मत्स्यपु. अ. १८ श्लो. २९. ४. तै.सं. ६. ५. ८.

५. म. स्मृ ९. १८. निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति श्रुतिः, इति मुद्रित-पुस्तकपाठः । बोधायनसूत्रे तु प्रायस्संवदति (३. २. ४७.) पाठः ।

तत्स्त्रीणां जीवनं दद्यादेष दायविधिस्स्मृतः ॥
अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम् ।
वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः ॥
एतावदेव साध्वीनां चोदितं विधवाधनम् ।
वसनस्याऽशनस्यैव तथैव रजकस्य च ॥
धनं व्यपोह्य तच्छिष्टं दायादानां प्रकल्पयेत् ।
(१)धूमावसानिकं ग्राह्यं सभायां स्नानतः पुरा ।
वसनाशनवासांसि विगणय्य वधे मृते ॥' इति ।

व्यासः--

'द्विषाहस्रः परो दायः स्त्रियै देयो धनस्य तु ।
यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात् ॥' इति ।

पणानां द्वे सहस्रे परिमाणमस्य द्विषाहस्रः । एष परो दायः स्त्रिया नाधिक इति । एतत् प्रभूते धने, ज्ञातयश्च न रक्षेयुरिति शङ्कायाम् । एवं (२)'पत्नी दुहितरश्चे'त्यादीनि यानि पत्न्या दायप्राप्तिपराणि तान्येवमेव द्रष्टव्यानि । गौतमस्तु पुत्राभावे पत्न्यास्सपिण्डादिभिस्समांशमाह-(३)'पिण्डगोत्रर्षिसम्बन्धा रिक्थं भजेरन् । स्त्री चाऽनपत्यस्ये'ति । अस्यार्थः-अनपत्यस्य रिक्थं पिण्डसम्बन्धात्सपिण्डाः प्रत्यासत्तिक्रमेण भजेरन् । तदभावे गोत्रसम्बन्धात्सगोत्राः । तदभावे ऋषिसम्बन्धात्समानप्रवराः स्त्री च पत्नी च । (अत्र स्त्रियाः पृथङ्निर्देशात् च शब्दाच्च यदा सपिण्डाः भजेरन् तदा स्त्री सह तैरेकमंशं गृह्णीयात् । ततश्च 'पितुरूर्ध्वं विभजतां माताप्यंश समं हरे'दिति सपिण्डादिभिस्सहग्रहणमुक्तमिति । वयमप्येतमेव पक्षं रोचयामहे)। अत्र पितरि भ्रातरि सोदर्ये च जीवति सोदर्यो भ्राता गृह्णीयादित्येके मन्यन्ते ।

तथा च शङ्ख--

'अपुत्रस्य स्वर्यातस्य द्रव्यं भ्रातृगामि, तदभावे मातापितरौ लभेयातां, पत्नी वा ज्येष्ठे'ति ।

देवलः--

'ततो दायमपुत्रस्य विभजरेन् सहोदराः ।
कुल्या दुहितरो वापि म्रियमाणः पिताऽपि च ॥
सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् ॥' इति ।

---

१. धूमावसानिकं श्राद्धं सन्ध्यायां स्नानतत्परा । इति ट धूमावसनिकं इति. घ. पु.
२. या. स्मृ. २. १३८. ३. गौ. ध. २८, २१, २२.
( ) कुण्डलान्तर्गतो भागः च पुस्तकेऽधिकपाठतया परिगणितः ।

याज्ञवल्क्यः—

(१)संसृष्टिनस्तु ससृष्टी सोदर्यस्य तु सोदरः ।
दद्याच्चाऽपहरेच्चांश जातस्य च मृतस्य च ॥
अन्योदर्यस्तु ससृष्टी नाऽन्योदर्यधनं हरेत् ।
असंसृष्ट्यपि चाऽऽदद्यात्सोदर्यो नान्यमातृजः ॥' इति ।

अत्र सोदर्य इति विशेषवचनात् 'पत्नी दुहितरश्चे'त्यत्र भ्रातृग्रहणं भिन्नोदरविषयमिति । प्रत्यासत्त्यतिशयात्(२) पितैवेत्याचार्यस्य पक्षः । तदभावे सोदर्यः, तदभावे तत्पुत्रः, तदभावे भिन्नोदराः, तदभावे पितृव्य इत्यादि द्रष्टव्यम् । मात्रादयोऽपि स्त्रियो जीवनमात्र लभेरन्निति ॥ २ ॥

तदभाव आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ॥ ३ ॥

सपिण्डाभावे आचार्यो दायं हरेत् । तस्याऽप्यभावे अन्तेवासी हरेत् । हृत्वा तदर्थेषु धर्मकृत्येषु तडाकखननादिषूपयोजयेत् । वाशब्दात् स्वयं वा उपयुञ्जीत ॥ ३ ॥

दुहिता वा ॥ ४ ॥

दुहिता वा दायं हरेत् । पुत्राभाव इत्येके । अनन्तरोक्ते विषय इत्यन्ये ॥४॥

सर्वाभावे राजा दायं हरेत् ॥ ५ ॥

सर्वग्रहणात् बन्धूनां सगोत्राणां चाऽप्यभावे ॥ ५ ॥

ज्येष्ठो दायाद इत्येके ॥ ६ ॥

एके मन्यन्ते ज्येष्ठ एव पुत्रो दायहरः । इतरे तु तमुपजीवेयुः । सोऽपि तान् पितेव परिपालयेदिति । तथा च गौतमः(३) 'सर्वे वा पूर्वजस्येतरान् बिभृयात्पितृव'दिति ॥ ६ ॥

देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ॥७॥

क्वचिद्देशे सुवर्णादि ज्येष्ठस्य भाग इत्याहुः । भूमौ जात भौम धान्यं कृष्णं माषादि कृष्णायसमित्यन्ये ॥ ७ ॥

रथः पितुः परिधाण्डं च गृहे ॥ ८ ॥

---

१ या. स्म. २. १३८, १३९. २. पितैवेति वयम् इति च. पु. ३. गौ. ध.२८.३.

रथः पितुरंशः (१) गृहे च यत् परिभाण्डमुपकरणं पीठादि तदपि ॥ ८ ॥

अलङ्कारो भार्यायाः ज्ञातिधनं चेत्येके ॥ ९ ॥

भार्यायास्तु धृतोऽलङ्कारोऽशः, ज्ञातिभ्यः पित्रादिभ्यश्च यल्लब्धं धनं तच्चेत्येवमेके मन्यते ॥ ९ ॥ *

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ १० ॥

ज्येष्ठो दायद इति यदुक्तं तच्छास्त्रैर्विरुद्धम् ॥ १० ॥
येन विरुद्ध तद्दर्शयति—

(२)"मनुः पुत्रेभ्यो दायं व्यभज"दित्यविशेषेण श्रूयते ॥११॥

पुत्रेभ्य इति बहुवचननिर्देशादविशेषेण श्रवणम् ॥ ११ ॥
अत्र चोद्यम्—

अथापि(३) "तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ती"त्येकवच्छ्रूयते ॥ १२ ॥

अथापि ननु चेत्यर्थः । ज्यष्ठ पुत्रं धनेन निरवसाययन्ति पृथक्कुर्वन्तीत्येकवदपि श्रूयते । यथा एक एव ज्येष्ठो दायादः तदनुरूपमपि श्रूयते इति ॥१२॥
परिहरति—

अथापि नित्यानुवादमविधिमाहुर्न्यायविदो यथा तस्मादजावयः पशूनां सहचरन्तीति । तस्मात् स्नातकस्य मुख रेफायतीव । तस्मात् वस्तश्च श्रोत्रियश्च स्त्रीकामतमावीति ॥ १३ ॥

---

१. एतदनन्तरं 'उपलक्षणमेतत् वाहनस्य' इत्यधिक घ.पु.

* एतच्चिह्नानन्तरं यतोऽपि नानुवादः ॥ ११ ॥ स्पष्टम् ॥ इत्यधिकपाठो दृश्यते छ. पुस्तके ।

२. मनुः पुत्रेभ्यो दायं व्यभजत् स नाभानेदिष्ठ ब्रह्मचर्यं वसन्तं निरभजत इति (तै. स. ३. १.९.) तैत्तिरीयश्रुतौ श्रूयते । तत्र पुत्रेभ्य इत्यविशेषेणैव विभागः श्रुतः । न तु ज्येष्ठस्य विशेषोऽभिहित इत्यर्थः । 'नाभानेदिष्ठः' इति मनुपुत्रस्य कस्यचिन्नाम । अस्यैव नाभाग इति संज्ञा । अस्य कथा भागवते (९ ४.) अनुसन्धेया ।

३. तत्रैव तैत्तिरीयश्रुतौ (तै. सं. २. ५. २.)

अथापीति परिहारोपक्रमे । पशूनां मध्ये अजाश्वाऽवयश्च जातिभेदेऽपि सह चरन्ति । रेफा शोभा । इह तु तद्वत्यभेदोपचारः । ततः क्यष् । स्नातकस्य मुखं कुण्डलादिना शोभते । इवशब्दो वाक्यालङ्कारे । श्रोत्रियस्य स्त्रीकामतमत्वमाचार्यकुले चिरकाल ब्रह्मचारिवासात् । यथैतानि वाक्यानि दृष्टान्तमात्रमनुवदन्ति न किञ्चिद्विदधति तस्मात् 'ज्येष्ठ पुत्र'मित्यादिकमप्यविधिरिति न्यायविद आहुः । न केवलमयमेवानुवादः, किं तर्हि 'मनुः पुत्रेभ्य' इत्ययमप्यनुवाद एव ॥ १३ ॥

सर्वे हि धर्मयुक्ता भागिनः ॥ १४ ॥

हिशब्दो हेतौ । यस्मादेवाऽनुवादौ न कस्यचिद्विधायकौ तस्माद्ये धर्मयुक्ताः पुत्रास्सर्वे एते भागिनः ॥ १४ ॥

यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीत ॥ १५ ॥

यस्तु ज्येष्ठोऽप्यधर्मेण द्रव्याणि प्रतिपादयति विनियुङ्क्ते तमभाग कुर्वीत जीविद्विभागे पिता भाग न दद्यात् । ऊर्ध्वं विभागे(१) पितुर्भ्रातरः । अपिशब्दात् किमुतान्यमिति ज्येष्ठस्य प्राधान्य ख्याप्यते ॥ १५ ॥

जीवन् पुत्रेभ्य(२)इत्यनेन दम्पत्योस्सहभावो दर्शितः । तत्र कारणमाह—

जायापत्योर्न विभागो विद्यते ॥ १६ ॥

स्पष्टम् ॥ १६ ॥

कस्मात् ?

पाणिग्रहणाद्धि सहत्वं कर्मसु ॥ १७ ॥

कर्मार्थं द्रव्यम् । जायायाश्च न पृथक्कर्मस्वधिकारः । किं तर्हि ? सहभावेन—'यस्त्वया धर्मश्च कर्तव्यस्सोऽनया सह'ति वचनात् । तत्र किं पृथक् द्रव्यमेति ॥ १७ ॥

(३)तथा पुण्यफलेषु ॥ १८ ॥

पुण्यफलेषु स्वर्गादिष्वपि तथा सहत्वमेव । (४)'दिवि ज्योतिरजरमारभेता' मित्यादिभ्यो मन्त्रलिङ्गेभ्यः ॥ १८ ॥

---

१. विभागेऽपि भ्रातर इति. च. पु. २. इत्यत्र भार्याया भागो न दर्शितः। इति घ.ङ.पु.
३. इदमग्रिम च सूत्रमेकतया लिखितं क. पु. । ४. तै ब्रा. ३ ७.५. ११.

द्रव्यपरिग्रहेषु च ॥ १९ ॥

द्रव्यपरिग्रहेषु च द्रव्यार्जनेष्वपि तथा सहत्वमेव । तत्र पतिरा-जेयति, जाया गृहे निर्वहतीति योगक्षेमावुभयायत्तावितिद्रव्यपरिग्रहे-ऽपि सहत्वम् ॥ १९ ॥

एतदेवोपपादयति—

न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति॥२०॥

हि यस्मात् भर्तुर्विप्रवासे सति नैमित्तिके 'छिन्दत्पाणि दद्यादि'त्यादिके दाने कृते भार्यायाः न स्तेयमुपदिशन्ति धर्मज्ञाः । यदि भर्तुरेव द्रव्यं स्यात् स्यादेव स्तेयम् ।, नैमित्तिके दान इति वचनात् व्ययान्तरे स्तेयं भव-त्येव । एतदेव द्रव्यसाधारण्येऽपि दम्पत्योर्वैषम्यं—यत् पतिर्यंथेष्टं वि-नियुङ्क्ते जाया त्वेनावदेवेति । न च पत्युस्स्वयमार्जितस्य विनियोगे जायाया अनुमत्यपेक्षा, स्वतन्त्रत्वात् । स्वतन्त्रो ह्यसौ गृहे, यथा राजा राष्ट्रे । अत एव भार्यायास्तेयशङ्का, न भर्तुः ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने चतुर्दशी कण्डिका ॥ १४ ॥

एतेन देशकुलधर्मा व्याख्याताः ॥ १ ॥

'ज्येष्ठो दायाद' (२. १४. १६.) इत्यादिकं शास्त्रविप्रतिषेधादप्रमाण-मित्युक्तम् । एतेन देशधर्माः कुलधर्माश्च व्याख्याताः । शास्त्रविप्रतिषिद्धा मातु-लसुतापरिणयनादयोऽप्रमाणं विपरीताः प्रमाणमिति ।

गौतमोऽप्याह—

(१)'देशकुलधर्माश्चाऽऽम्नायैरविरुद्धाः प्रमाण'मिति ॥ १ ॥

मातुश्च योनिसम्बन्धेभ्यः पितुश्चाऽऽसप्तमाद्यावता वा सम्बन्धो ज्ञायते तेषां प्रेतेषूदकोपस्पर्शनं गर्भान् परिहाप्याऽऽपरिसंवत्सरान् ॥ २ ॥

मातुर्योनिसम्बन्धा मातुलादयः । पितुश्चासप्तमात् पुरुषात् सम्बन्धास्सपि-ण्डाद्ययः पैतृष्वस्रेयादयश्च तेभ्य आरभ्याऽऽसप्तमादित्यन्वयः । यावता वा-न्तरेण सम्बन्धो ज्ञायते स्मर्यते जन्मना नाम्ना वाऽमुष्याऽयमस्मत्कूटस्थस्य

१. गौ. ध. ११. २०.

वंश्य एवंनामेति । तथा च मनुः—

(१)'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥' इति ।

य एवंभूताः पुरुषास्तेषां प्रेतेषु मृतेषु उदकोपस्पर्शन मरणनिमित्तं स्नानं कर्तव्यम् । गर्भान् बालान् अपरिसंवत्सरानपरिपूर्णसंवत्सरान् परिहाप्य वर्जयित्वा । बालेषु मृतेषु स्नानं न कर्तव्यमिति ॥ २ ॥

मातापितरावेव तेषु ॥ ३ ॥

बालेषु मृतेषु मातापितरावेवोदकस्पर्शन कुर्याताम् ॥ ३ ॥

हर्तारश्च ॥ ४ ॥

ये च तान् बालान् मृतान् हरन्ति तेऽप्युदकोपस्पर्शन कुर्युरिति । एवमाचार्यस्य पक्षः ॥ ४ ॥

भार्यायां परमगुरुसंस्थायां चाकालभोजनम् ॥ ५ ॥

भार्या पत्नी । परमगुरव आचार्यमातापितरः । संस्था मरणम् । भार्यायां संस्थितायां परमगुरूणां च संस्थायां सत्यां न केवलमुदकोपस्पर्शन, किं तर्हि ? अपरेद्युः आ तस्मात्कालात् अभोजन च ॥ ५ ॥

किं च—

आतुरव्यञ्जनानि कुर्वीरन् ॥ ६ ॥

आतुरत्व व्यज्यते यैस्तानि च कुर्वीरन् भार्यादिमरणे ॥ ६ ॥

कानि पुनस्तानि ?

केशान्प्रकीर्य पांसूनोप्यैकवाससो दक्षिणामुखास्सकृदुपमज्ज्योत्तीर्योपविशन्त्येवं त्रिः ॥ ७ ॥

प्रकीर्य केशान् पांसूनावपन्ति । ओप्य एकवासस अनुत्तरीयाः । दक्षिणामुखाः दक्षिणां दिशं निरीक्षमाणाः सकृदुपमज्ज्य उदकादुत्तीर्य तीर उपविशन्ति दक्षिणामुखा एव ॥ ७ ॥

एवं त्रिः ॥ ८ ॥

एवमुक्तप्रकारेण त्रिरुपमज्ज्योपविशेयुः ॥ ८ ॥

---

१. म. ५. ६०.

तत्प्रत्ययमुदकमुत्सिच्याऽप्रतीक्षा ग्राममेत्य यत्स्त्रिय आहुस्तत्कुर्वन्ति ॥ ९ ॥

ततः तत्प्रत्ययं तेषां मृतानां भार्यादीनां यथा प्रत्ययो भवति—मह्यमुदकं दत्तमिति, तथोदकमुत्सिञ्चन्ति। त्रिरित्यनुवृत्तेरिह्नः। आचाराच्चैकवस्त्रत्वाच्च वाससा तिलमिश्रं हस्ताभ्यां। भारद्वाजाय यज्ञशर्मणे एतत्तिलोदकं ददामीति प्रयोगः। उत्सिच्या प्रतीक्षाः पृष्ठतोऽनिरीक्षमाणा ग्राममेत्य गृहं प्रविश्य। अनेन बहिरिदं कर्मेति गम्यते। यत्तत्र मृतविषये स्त्रियः कर्तव्यमित्याहुः तत्कुर्वन्ति अग्न्युपस्पर्शनगवालम्भनादीनि। एतत्प्रथमेऽहनि। द्वितीयादि(१)ष्वहरहरञ्जलिनैकोत्तरवृद्धिरेकादशाहरिति पितृमेध उक्तं द्रष्टव्यम् ॥ ९ ॥

इतरेषु चैतदेवैक उपदिशन्ति ॥ १० ॥

'आकालमभोजन' (२. १५, १) मित्यादि यदुक्तं तदितरेषु भार्यादिभ्योऽन्येष्वपि सपिण्डेषु मृतेषु कर्तव्यमित्येके आचार्या उपदिशन्ति ॥१०*॥

शुचीन्मन्त्रवत्सर्वकृत्येषु भोजयेत् ॥ ११ ॥

एकान्तेऽपि विधिप्रतिषेधानुसारिणः शुचयः, तान्। मन्त्रवत्(२)अधीतवेदान् सर्वकृत्येषु श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु दैवेषु पित्र्येषु मानुषेषु च भोजयेत्। (३)अन्ते 'ततो ब्राह्मणभोजन'मिति स्मृत्यन्तरे दर्शनात् ॥ ११ ॥

देशतः कालतः शौचतः सम्यक्प्रतिग्रहीतृत इति दानानि प्रतिपादयति ॥ १२ ॥

---

* एतदन्तर—

ब्राह्मणश्चैतस्मिन् कालेऽमात्यान् केशश्मश्रूणि वा वापयते ॥ ११ ॥

अमात्या. प्रधाना.। स्पष्टमन्यत् ॥ ११ ॥

समावृत्ता न वा वपेरन् ॥ १२ ॥

पूर्वापवादोऽयम्। अमात्येष्वपि गुरुकुलात् समावृत्ताः स्नातका. न केशादि वापयेरन् ॥ १२ ॥

न विहारिण इत्यन्ये ॥ १३ ॥

विहारिणो बालाः। तेऽपि न ॥ १३ ॥ इत्यधिकं. घ. पुस्तके.

१. आप. पि. सू. २. 'अधीताविस्मृतवेदान्' इति. ङ. पु ३. 'अन्ततः' इति. च' पु.

सप्तम्यर्थे तसिल् । देशः प्रयागादिः । कालः सूर्यग्रहणादिः । (१)शौचं कृच्छ्रादिपरिसमाप्तिः । सम्यक् समीचीनः प्रतिग्रहीता 'तुल्यगुणेषु वयोवृद्धश्रेया'नित्यादि । एतेषु दानानि देयान्यवश्यं प्रतिपादयति दद्यादिति १२

यस्याऽग्नौ न क्रियते यस्य चाऽग्रं न दीयते

न तद्भोक्तव्यम् ॥ १३ ॥

यस्याऽन्नस्यैकदेशः अग्नौ न क्रियते न हूयते (२)यस्माद्धोदधृत्याऽग्रं न दीयते न तद्भोक्तव्यम ॥ १३ ॥

न क्षारलवणहोमो विद्यते ॥ १४ ॥

यत् भक्ष्यमाणं पश्यतो लालोत्पद्यते तत् क्षार गुड(३)मरीचिलिकुचादि । (४)क्षारलवणससृष्ट न होतव्यम् ॥ १४ ॥

तथाऽवरान्नसंसृष्टस्य च ॥ १५ ॥

अवरान्नं कुलुत्थादि । तत्संसृष्टस्याप्यन्नस्य होमो न विद्यते ॥ १५ ॥

अथ यस्यैवंविधमेव भोज्यमुपस्थितं (५)तस्य कथं होमः ? तत्राह —

अहविष्यस्य होम उदीचीनमुष्णं भस्माऽपोह्य तस्मि

ञ्जुहुयात्तद्धुतमहुतं चाग्नौ भवति ॥ १६ ॥

औपासनात् पचनाद्वा ऽग्नेरुदीचीनमुष्ण भस्माऽपोह्य तस्मिन् भस्मनि जुहुयात् वैश्वदेवमन्त्रैः । एषोऽहविष्यस्य होमः । तदेवं क्रियमाणं हुतं च भवति हवनार्थनिर्वृत्तेः । अहुत चाऽग्नौ भवति । भस्ममात्रत्वादिति । अत्र बोधायनः—

(६)अथ यद्येतदेवान्नं स्यादुत्तरतो भस्ममिश्रानङ्गारान्निरुह्य तेषु जुहुया'दिति ।

(७)अपर आह—यान्यहविष्याणि व्यञ्जनान्यहरहर्भोज्यानि तेषामेष संस्कारस्सकृच्च होमोऽमन्त्रक इति ॥ १६ ॥

उत्तरे द्वे सूत्रे स्पष्टे—

न स्त्री जुहुयात् ॥ १७ ॥

---

१. शौच कृच्छ्रादि इति ङ. च. पु.

२. 'यस्य ब्राह्मणस्यान्न न दीयत' इति क.च. पुस्तकयोरधिकम् ।

३. 'गुडसुधालिकुचादि' इति ङ. पु.

४. क्षारलवणं, कृत्रिमलवणमिति कुल्लूकः । तिलमुद्गादते शैव्यं सस्ये गोधूमकोद्रवौ । धान्यक देवधान्यं च शमीधान्यं तथैक्षवम् । स्वित्रधान्यं तथा पण्यमूलं क्षारगणस्मृतः ॥ इति निर्णयसिन्धौ । ५. तस्य कथ भोजनम् ? इति घ.पु.

६. बौधा. सू. ७. अपरे मन्यन्ते 'इति. घ. पु.

नाऽनुपेतः ॥ १८ ॥

आन्नप्राशनाद्गर्भा नाऽप्रयता भवन्ति ॥ १९ ॥

अन्नप्राशनात्प्राक् गर्भा बाला नाऽप्रयता भवन्ति रजस्वलादिस्पर्शनेऽपि। गौतमस्तु अपां मार्जनादिकमिच्छति। यथाह (१)'अन्यत्राऽपां मार्जनप्रधावनावोक्षणेभ्यः' ॥ १९ ॥

आ परिसंवत्सरादित्येके ॥ २० ॥

यावत् संवत्सरो न परिपूर्यते तावन्नाप्रयता गर्भा इत्येके मन्यते॥२३॥

यावता वा दिशो न प्रजानीयुः ॥ २१ ॥

यावद्दिग्विभागज्ञानं नाऽस्ति तावच्चाऽप्रयता भवन्ति ॥ २१ ॥

(२)ओपनयनादित्यपरम् ॥ २२ ॥

उपयनादर्वाक् नाऽप्रयता गर्भा (३)इत्यपरदर्शनम् ॥ २२ ॥

अत्रोपपत्तिः—

अत्र ह्यधिकारशास्त्रैर्भवति ॥ २३ ॥

हि यस्मादत्रोपनयने सति विधिनिषेधशास्त्रैरधिकारो भवति ॥२३॥

सा निष्ठा ॥ २४ ॥

उपनयनमपि परामृशतस्तच्छब्दस्य निष्ठाशब्दसमानाधिकरण्यात् स्त्रीलिङ्गता। सा निष्ठा तदुपनयनमवसानमधिकारस्येति ॥ २४ ॥

स्मृतिश्च ॥ २५ ॥

अस्मिन्नर्थे स्मृतिरपि भवति—(४)उताऽब्रह्मचारी यथोपपादसूत्रपुरीषो भवति नाऽस्याऽचमकल्पो विद्यते इति (५)'प्रागुपनयनात्कामचारवादभक्ष' इति गौतमः ॥ २५ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने पञ्चदशी कण्डिका ॥१५॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने षष्ठः पटलः ॥ ६ ॥

---

१. गौ, २.६. 'अपमार्जन' इति मैसूरपुस्तकपाठः २. ओपनयनादित्येके इति घ.

३ घ. पुस्तके 'भवतीति'इतीतिकरणान्तं सूत्र पठित्वा'इति करणो हेतौ' इति व्याख्यातम्।

४. 'उते'त्यादि 'विद्यत'इत्यन्तं घ. पुस्तक एवास्ति। ५. गौ:ध. २. १.

अथ सप्तमः पटलः ॥

सह देवमनुष्या अस्मिँल्लोके पुरा बभूवुः । अथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्याः । तेषां ये तथा कर्माण्यारभन्ते सह देवैर्ब्रह्मणा चाऽमुष्मिन् लोके भवन्ति । अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच । (१)प्रजानिःश्रेयसाय च ॥ १ ॥

(२)श्राद्धविधित्सया तस्य प्ररोचनार्थोऽयमर्थवादः । पुरा किल देवाश्च मनुष्याश्चाऽस्मिन्नेव लोके सहैव बभूवुः । अथ त सहभावमसहमाना देवाः कर्मभिः श्रौतैस्स्मार्तैर्गार्ह्यैश्च यथावदनुष्ठितैर्दिवं जग्मुः मनुष्यास्तु तथा कर्तुमसमर्था अहीयन्त हीना अभवन् इहैव लोके स्थिताः । यत एवं कर्मणां सामर्थ्यम् अत इदानीमपि तेषां मनुष्याणां मध्ये ये तथा कर्माण्यारभन्ते कुर्वन्ति यथारभन्त देवाः, ते देवै ब्रह्मणा च सहामुष्मिन् लोके भवन्ति त्रिविष्टपे मोदन्ते(३) । अथैवहीनान्मनुष्यान् दृष्ट्वा मनुर्वैवस्वतः श्राद्धशब्द श्राद्धमिति शब्द्यमानमेतत्कर्म प्रोवाच । किमर्थम् ? प्रजानिःश्रेयसाय, तादर्थ्ये चतुर्थी । प्रजानां निःश्रेयसार्थम् । निश्श्रेयसाचेति पाठे छान्दसो यकारस्य चकारः ।

अपर आह—छान्दसो लिङ्गव्यत्ययः । प्रजानिश्श्रेयसं चाऽस्य कर्मणः फलमिति ॥ १ ॥

तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे ॥ २ ॥

तत्र श्राद्धकर्मणि पितर पितृपितामहप्रपितामहाः देवताः । ब्राह्मणास्तु भुञ्जाना आहवनीयार्थे आहवनीयकृत्ये वेदितव्याः । त्रीणि श्राद्धे करणानि—होमो, ब्राह्मणभोजन, पिण्डदानं चेति । अत्र भोजनस्य(४)प्रधानत्वख्यापनार्थोऽयमर्थवादः ॥ २ ॥

मासि मासि कार्यम् ॥ ३ ॥

तदिदं कर्म मासे मासे कर्तव्यम् । दीप्सावचनाद्यावज्जीविकोऽभ्यासः ।

---

१. प्रजानिश्श्रेयसाय च इति पृथक्सूत्रं च . पु. २. मासि श्राद्धविधित्सया इति ड. पु.

३. एवंविधान् इति ख. पुस्तके टिप्पणीपाठः । एव हीयमानान् इति च. पु.

४. 'प्रधानतमत्व' इति च पु.

अपरपक्षस्याऽपराह्णः श्रेयान् ॥ ४ ॥

अपरपक्षस्य यान्यहानि तेष्वपराह्णः प्रशस्ततरः ॥ ४ ॥

तथाऽपरपक्षस्य जघन्यान्यहानि ॥ ५ ॥

यस्यैव पक्षस्य यान्यहानि पञ्चदश(१) तेषामुत्तरमुत्तरं प्रशस्ततरम् ॥ ५ ॥

सर्वेष्वेवाऽपरपक्षस्याऽहस्सु क्रियमाणे पितॄन् प्रीणाति । कर्तुस्तु कालाभिनियमात्फलविशेषः ॥ ६ ॥

सर्वेष्वेवाहस्सु पितृणां तृप्तिरविशिष्टा । यस्तु कर्ता प्रतिपदादिके काले नियमेन श्राद्धं करोति सर्वेषु मासेषु प्रतिपद्येव द्वितीयायामेवेत्यादि तस्य कर्तुस्तस्मात्कालाभिनियमात् फलविशेषो भवति ॥ ६ ॥

कोऽसावित्याह—

प्रथमेऽहनि क्रियमाणे स्त्रीप्रायमपत्ये जायते ॥ ७ ॥

यः प्रतिपदि नियमेन श्राद्धं करोति तस्यापत्ये प्रजासन्ताने स्त्रीप्राय जायते । प्रायेण स्त्रियो जायन्ते ॥ ७ ॥

द्वितीये स्तेनाः ॥ ८ ॥

जायन्ते चोराः पुत्राः ॥ ८ ॥

(२)तृतीये ब्रह्मवर्चसिनः ॥ ९ ॥

(३)व्रताध्ययनसम्पत्तिर्ब्रह्मवर्चसम् ॥ ९ ॥

चतुर्थे क्षुद्रपशुमान् ॥ १० ॥

क्षुद्राः पशवोऽजाद्यादयः तद्वान् कर्ता भवति । उत्तरत्राप्येकवचने(४) कर्तुर्वादो द्रष्टव्यः ॥ १० ॥

पञ्चमे पुमांसो बह्वपत्यो न चाऽनपत्यः प्रमीयते ॥११॥

---

१. तेषां यथोत्तरं श्रेयस्त्वम्' इति ङ, च, पु.

२. तृतीये क्षुद्रपशुमान् कर्ता भवति ॥ चतुर्थे ब्रह्मवर्चसिनः ।

३. व्रताध्ययनसम्पत्तिर्ब्रह्मवर्चसम् । आपस्तम्बस्तु तृतीयचतुर्थयोर्विपरीतफलमाह— तृतीये ब्रह्मवर्चसिनः । चतुर्थे क्षुद्रपशुमान् ॥ इति पाठो घ पुस्तके ।

४ कर्तुरनुवादः, इति घ, पु ।

पुमांस एव भवन्ति,(१) बहवश्च भवन्ति, न चाऽनपत्यः प्रमीयते जीवत्स्वेव पुत्रेषु सन्निहितेषु च स्वय म्रियते। न तेषु मृतेषु, न देशान्तर गतेषु, नाऽपि स्वयं देशान्तरं गत इति ॥ ११ ॥

षष्ठेऽध्वशीलोऽक्षशीलश्च ॥ १२ ॥

अध्वशील. पान्थः। अक्षशीलः कितवः ॥ १२ ॥

सप्तमे कर्षे राद्धिः ॥ १३ ॥

कर्षः कृषिः। राद्धि. सिद्धिः ॥ १३ ॥

अष्टमे पुष्टिः ॥ १४ ॥

स्पष्टम् ॥ १४ ॥

नवम एकखुराः ॥ १५ ॥

अश्वादयः ॥ १५ ॥

दशमे व्यवहारे राद्धिः ॥ १६ ॥

व्यवहारो वाणिज्यम्, शास्त्रपरिज्ञान वा ॥ १६ ॥

एकादशे कृष्णायसं त्रपुसीसम् ॥ १७ ॥

कृष्णमयः कृष्णायसम्। त्रपुसीसे लोहविशेषौ ॥ १७ ॥

द्वादशे पशुमान् ॥ १८ ॥

द्वादश्या बहवः पशवो भवन्ति ॥ १८ ॥

त्रयोदशे बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवन्ति ॥ १९ ॥

त्रयोदश्यां बहवः पुत्रा मित्राणि च भवन्ति। अपत्यानि च दर्शनीयानि भवन्ति। किं तु ते पुत्रा युवमारिण युवान एव म्रियन्ते(२) ॥ १९ ॥

चतुर्दशे आयुषे राद्धिः ॥ २० ॥

संग्रामे जय. ॥ २० ॥

पञ्चदशे पुष्टिः ॥ २१ ॥

---

१. बहवश्च भवन्ति, भव्याः रूपविद्यादिभिश्शोभमाना भवन्ति, इति घ. ङ. पु।

२. 'अयुवमारिण' इत्यन्ये इत्याधिक ख. ङ पु.।

स्पष्टम् ॥ २१ ॥

तत्र द्रव्याणि तिलमाषा व्रीहियवा आपो मूलफलानि च ॥ २२ ॥

तत्र श्राद्धे तिलादीनि द्रव्याणि यथायथमवश्यमुपयोज्यानि ॥ २२ ॥

स्नेहवति त्वेवाऽन्ने तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालम् ॥ २३ ॥

यद्वा तद्वा अन्नं भवतु स्नेहवति तु तस्मिन्नाज्यादिभिरुपसिक्ते पितॄणां तीव्रतरा प्रकृष्टतरा प्रीतिर्भवति । सा च द्राघीयांस च कालमनुवर्तते ॥

तथा धर्माहृतेन द्रव्येण तीर्थे प्रतिपन्नेन ॥ २४ ॥

धर्मार्जितं यद्द्रव्यं पात्रे च प्रतिपादितं तेनाऽपि तथा तीव्रतरा पितॄणां प्रीतिर्दाघीयांस च कालमिति ॥ २४ ॥

संवत्सरं गव्येन प्रीतिः ॥ २५ ॥

उत्तरत्र मांसग्रहणादिहापि मांसस्य ग्रहणम् । गव्येन मांसेन संवत्सरं पितॄणां प्रीतिर्भवति ॥ २५ ॥

भूयांसमतो माहिषेण ॥ २६ ॥

माहिषेण मांसेन, अतः सम्वत्सरात् भूयांस बहुतरं कालं पितॄणां प्रीतिर्भवति ॥ २६ ॥

एतेन ग्राम्यारण्यानां पशूनां मांसं मेध्यं व्याख्यातम् ॥२७॥

एतेन माहिषेण मांसेनाऽन्येषामपि ग्राम्याणाप्रजादीनामारण्यानां च शशादीनां मांसं मेध्य व्याख्यातम्—पितॄणां प्रीतिकरमिति । मेध्यग्रहणं प्रतिषिद्धानां मा भूदिति ॥ २७ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने षोडशी कण्डिका ॥ १६ ॥

खड्गोपस्तरणे खड्गमांसेनाऽऽनन्त्यं कालम् ॥ १ ॥

खड्गचर्मोपस्तरणेष्वासनेषूपविष्टेभ्यो ब्राह्मणेभ्यो दत्तेन खड्गमांसेनाऽनन्तं कालं प्रीतिर्भवति । आनन्त्यमिति पाठे स्वार्थे ष्यञ् ॥ १ ॥

तथा शतबलेर्मत्स्यस्य मांसेन ॥ २ ॥

शतबलिर्बहुशल्यको रोहिताख्यः ॥ २ ॥

वार्ध्राणसस्य च ॥ ३ ॥

व्याख्यातो वार्ध्राणसः । तस्य मांसेनाऽऽनन्त्यं कालं प्रीतिर्भवति॥ ३ ॥

प्रयतः प्रसन्नमनास्तुष्टो भोजयेद्ब्राह्मणान् ब्रह्मविदो योनिगोत्रमन्त्रान्तेवास्यसम्बन्धान् ॥ ४ ॥

प्रयतः स्नानाचमनादिना शुद्धः । प्रसन्नमनाः अव्याकुलमनाः । तुष्टः उत्साहवान् । (१)'तुष्टश्चेद्ब्राह्मणवधे हत्वाऽपी'तिदर्शनात् । (२)'वृत्तिसर्गतायनेषु क्रमः' इत्यत्र च सर्ग उत्साहः । एवभूतो ब्राह्मणान् भोजयेत् । कीदृशान्? ब्रह्मविद आत्मविदः । यान्यादिभिरसम्बन्धान् योनिसम्बन्धा मातुलादयः । गोत्रसम्बन्धा सगोत्राः । मन्त्रसम्बन्धा ऋत्विजो याज्याश्च । अन्तेवासिसम्बन्धाश्शिष्या आचार्याश्च ॥ ४ ॥

गुणहान्यां तु परेषां समुदेतः सोदर्योऽपि भोजयितव्यः ॥

यदि परे योनिगोत्रादिभिरसम्बन्धा वृत्तादिगुणहीना एव लभ्यन्ते, तदा समुदेतो विद्यावृत्तादिभिर्युक्तः सोदर्योऽपि भोजयितव्यः किमुत मातुलादय इत्यपिशब्दस्याऽर्थः ॥ ५ ॥

एतेनाऽन्तेवासिनो व्याख्याताः ॥ ६ ॥

एतेन सोदर्येण अन्तेवासिनः बहुवचननिर्देशात् पूर्वत्र निर्दिष्टा योन्यादिभिस्सम्बन्धास्सर्व एव व्याख्याता.—अन्येषामभावे समुदेता भोजयितव्या इति ।

अत्र मनुः—

(३)'एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्तु विज्ञेयः सदा सद्भिरनुष्ठितः ॥

---

१. गौ ध. २२. ११. २. पा. सू. १ ३. ३८. ३. म. स्मृ. ३. १४७.

(१)मातामह मातुलं च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं(२) विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥'इति॥६॥

अथाप्युदाहरन्ति ॥ ७ ॥

सम्बन्धिनो न भोज्या इत्यस्मिन्नर्थे धर्मज्ञा वचनमुदाहरन्ति ॥ ७ ॥

सम्भोजनी नाम पिशाचभिक्षा नैषा पितॄन् गच्छति नोऽथ देवान् । इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्सा ॥ ८ ॥

परस्परं भुञ्जतेऽस्यामिति सम्भोजनी । अधिकरणे ल्युट् । नामेदमस्याः पिशाचभिक्षायाः । नैषा पितॄन् गच्छति नाऽपि देवान् । किं तु क्षीणपुण्या परलोकप्रयोजनरहिता सती इहैव चरति लोके यथा गौर्मृतवत्सा गृहाभ्यन्तर एव चरति न बहिर्गच्छति तद्वदेतत् ॥ ८ ॥

तद्व्याचष्टे—

इहैव सम्भुञ्जतीति दक्षिणा कुलात्कुलं विनश्यतीति ॥९॥

सम्भुञ्जती परस्परभोजनस्य निमित्तभूता दक्षिणा श्राद्धे दानक्रिया गृहात् गृहं गत्वा इहैव लोके नश्यतीत्यर्थः ॥ ९ ॥

अथ बहुषु तुल्यगुणेषूपस्थितेषु कः पारेग्राह्यः ?

तुल्यगुणेषु वयोवृद्धः श्रेयान्द्रव्यकृशश्चेप्सन् ॥ १० ॥

यो वयसा वृद्धस्स तावद्ग्राह्यः । तत्रापि यो द्रव्येण कृशः ईप्सन् लिप्समानश्च भवति स ग्राह्यः(३) । अद्रव्यकृशोऽपि अवृद्धोऽपि, द्वयोस्तु समवाये यथारुचीति ॥ १० ॥

पूर्वेद्युर्निवेदनम् ॥ ११ ॥

श्राद्धदिनात्पूर्वेद्युरेव ब्राह्मणेभ्यो निवेदयितव्यम्—श्वः श्राद्धं भविता तत्र भवताऽऽहवनीयार्थं प्रसादः कर्तव्य इति ॥ ११ ॥

अपरेद्युर्द्वितीयम् ॥ १२ ॥

अपरेद्युः श्राद्धदिने द्वितीयं निवेदनं कर्तव्यमद्य श्राद्धमिति ॥ १२ ॥

---

१. म स्मृ. ३. १४८. २. विट्पतिर्जामाता ।
३. यद्वा वयो वृद्धो ग्राह्योऽद्रव्यकृशोऽपि । द्रव्यकृशोऽवयवृद्धोऽपीति । इति पाठः च. पु. ।

तृतीयमामन्त्रणम् ॥ १३ ॥

आमन्त्रणमाह्वानं भोजनकाले सिद्धमागम्यतामिति तत्तृतीय भवति॥१३॥

त्रिःप्रायमेके श्राद्धमुपदिशन्ति ॥ १४ ॥

न केवलं निवेदनमेव त्रिर्भवति । किं तर्हि यच्च यावच्च श्राद्धे तत्सर्वं त्रिरावर्त्यमित्येके मन्यन्ते । अत्र पक्षे होमभोजनपिण्डानामप्यावृत्तिस्तस्मिन्नेवाऽपराह्णे ॥ १४ ॥

यथाप्रथममेवं द्वितीयं तृतीयं च ॥ १५ ॥

येन प्रकारेण प्रथमश्राद्धं तथैव द्वितीय तृतीय च कर्तव्यम् ॥ १५ ॥

सर्वेषु वृत्तेषु सर्वतस्समवदाय शेषस्य ग्रास वरार्ध्यं प्राश्नीयाद्यथोक्तम् ॥ १६ ॥

सर्वेषु श्राद्धेषु त्रिष्वपि वृत्तेषु समाप्तेषु सर्वतस्त्रयाणां श्राद्धानां य ओदनशेषस्ततस्समवदाय ग्रासवरार्ध्यं प्राश्नीयात् यथोक्तं गृह्ये(१) 'उत्तरेण यजुषा शेषस्य ग्रासवरार्ध्यं प्राश्नीया'दिति। तत्र प्रयोगः(२)पूर्वेद्युर्निवेदनम् । तद्वत् परेद्युः प्रातर्भोजनकाले आमन्त्रणं-सिद्धमागम्यतामिति । ततो होमादिपिण्डनिधानान्तमेकैकमपवृज्य ततः सर्वतस्समवदाय ग्रासावराध्यस्य(३)'प्राणे निविष्टे'ति प्राशनमिति ॥ १६ ॥

उदीच्यवृत्तिस्त्वासनगतानां हस्तेषूदपात्रानयनम् ॥१७॥

प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥'

इति वैयाकरणाः । तस्याः शरावत्या उदक्कीरवर्तिन उदीच्याः । तेषां वृत्तिराचार आसनेषूपविष्टानां ब्राह्मणानां हस्तेषूदपात्रादर्घ्यं पात्रादादायाऽर्घ्यदानमिति । (४)पितरिदं तेऽर्घ्यम् , पितामहेदं तेऽर्घ्यं, प्रपितामहेदं तेऽर्घ्यमिति मन्त्रा आश्वलायनके(५) । यद्यप्युदी

---

१. आ. प. गृ २१. ९. २. पूर्वेद्युर्नवावरेभ्यो निवेदन, इति च. पु. ।
३. 'प्राणे निविष्टोऽमृतं जुहोमि ब्रह्मणि म आत्माऽमृतत्वाय' इति मन्त्रः ।
४. 'अमुष्मै स्वधा नम इति गृह्योक्तेन प्रकारेणार्घ्यं दद्यात्' ततस्तिलान् श्राद्धभूमौ विकिरेत् , इति अधिक पाठो घ. ङ पुस्तकयो. ।
५. आश्व. गृ. ४ ८ ३. ।

व्यवृत्तिरित्युक्तं, तथापि प्रकरणसामर्थ्यात् सर्वेषामपि भवति ॥ १७ ॥

'उद्दिध्रयतामग्नौ च क्रियता' मित्यामन्त्रयते ॥ १८ ॥

होमकाल 'उद्दिध्रयतामग्नौ च क्रियतामि'त्यनेन मन्त्रेण ब्राह्मणानामन्त्रयते। मन्त्रे(१)'अधीष्टे च'ति लोट्प्रत्ययः ॥ १८ ॥

'काममुद्दिध्रयतां काममग्नौ च क्रियता'मित्यतिसृष्ट उद्धरेज्जुहुयाच्च ॥ १९ ॥

अथ ब्राह्मणाः काममुद्दिध्रयता काममग्नौ च क्रियतामित्यतिसृजेयुः अनुजानीयु. । तश्चातिसृष्ट उद्धरेज्जुहुयाच्च । उद्धरणं नाम ब्राह्मणार्थं पकादन्नादन्यस्मिन् पात्रे पृथक्करणम् । तत्सूत्रकारेण ज्ञापितमष्टकाश्राद्धे ॥१९॥

इवभिरपपात्रैश्च श्राद्धस्य दर्शनं परिचक्षते ॥ २० ॥

(इवभिरिति बहुवचनात् ग्रामसूकरादीनां तादृशानां ग्रहणम् ।) अपपात्राः पतितादयः, प्रतिलोमादयश्च । तै. श्राद्धस्य दर्शनं परिचक्षते गर्हन्ते शिष्टाः । अतो यथा ते न पश्येयुस्तथा(२)परिश्रिते कर्तव्यमिति ॥२०॥

श्वित्रश्शिपिविष्टः परतल्पगाम्यायुधीयपुत्रक्षत्रोत्पन्नो ब्राह्मण्यामित्येते श्राद्धे भुञ्जानाः पङ्क्तिदूषणा भवन्ति ॥ २१ ॥

(३)श्वित्रश्वित्री श्वेतकुष्ठी । शिपिविष्टः खलतिः । विवृतशेफ इत्यन्ये । परतल्पगामी यः परतल्पं गत्वा अकृतप्रायश्चित्तः तस्य ग्रहणम् । आयुधीयपुत्रक्षत्रियवृत्तिमाश्रितो य आयुधेन जीवति ब्राह्मणः, तस्य पुत्रः । शूद्रेण ब्राह्मण्यामुत्पन्नश्चण्डालः । न तस्य प्रसङ्गः । 'ब्राह्मणान् ब्रह्मविद' इत्युक्तत्वात् । तस्मादेवं व्याख्येयम्-क्रमविवाहे यः शूद्रायां पूर्वमुत्पाद्य पश्चात् ब्राह्मण्यामुत्पादयति तस्य पुत्रः शूद्रोत्पन्नो ब्राह्मण्यामिति । स हि पिता शूद्रः सम्पन्न· । श्रूयते हि(४)'तज्जाया जाया भवति यदस्यां जायते पुनरि'ति । स्मर्यते च—

(५)'यदुच्यते द्विजातीनां शूद्राद्दारपरिग्रहः ।
न तन्मम मतं यस्मात्तत्राऽयं जायते स्वयम् ॥' इति ।

---

१. पा सू. ३. ३. ११६. ( ) कुण्डलान्तर्गतो भागः प. पुस्तक एवास्ति ।
२. 'परिश्रितेन' इति. क. च. पु. ।
३. श्वित्री. म श्वित्री कुष्ठी. इति घ. पु. । ४. ऐ. बा. ७, ३. १३.
५. या. स्मृ. १. ५७. ।

(१)एते श्विवऱ्यादयः श्राद्धे भुञ्जानाः पङ्क्तिं दूषयन्ति । अतस्ते न भोज्या इति ॥ २१ ॥

त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेतश्चतुर्मेधः पञ्चाग्निर्ज्ये-
ष्ठसामिको वेदाध्याय्यनूचानपुत्रः श्रोत्रिय
इत्येते श्राद्धे भुञ्जानाः पङ्क्तिपावना भवन्ति ॥२२॥

'मधुवाता ऋतायत' इत्येष तृचः(२)त्रिमधुः । तत्र हि प्रत्यृचं त्रयो मधुशब्दाः । इह तु तदध्यायी पुरुषस्त्रिमधुः । त्रिसुपर्णं (३)'चतुष्कपर्दा युवति सुपेशा'इत्यादिकस्तृचो बाह्वृचः । अन्ये तु तैत्तिरीयके(४)'ब्रह्म मेतु मा'मित्यादयः त्रयोऽनुवाका इत्याहुः । तत्र हि 'य इमे त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यादि'ति श्रूयते 'आसहस्रात् पङ्क्तिं पुनन्ती'ति च । पूर्ववत्पुरुषे वृत्तिः । त्रिणाचिकेतः नाचिकेताऽग्निर्बह्वीषु शाखासु विधीयते (५)तैत्तिरीयके, कठवल्लीषु, शतपथे च । तं यो वेद मन्त्रब्राह्मणेन सह स त्रिनाचिकेतः (६)नाचिकेताग्नेस्त्रिश्चेतेत्यन्ये । विरजानुवाकाध्यायीत्यन्ये,(७) प्राणापानेत्यादिः । चतुर्मेधः अश्वमेधः, सर्वमेधः, पुरुषमेधः, पितृमेधः, इति चत्वारो मेधाः । तदध्यायी चतुर्मेधः । चतुर्णां यज्ञानामाहर्तेत्यन्ये । पञ्चाग्निः

---

१. इतः पूर्वं वृषलीपतिः वृषली शूद्रकन्या अदत्ता रजस्वला च वृषली तस्याः पतिः निषिद्धद्वयविक्रेता तिलकम्बलरसविक्रेता । राजभृत्यः राज्ञस्सकाशात् भृतिं वेतनं गृह्णाति स राजभृत्यः ॥ ब्राह्मण्यामेवोत्पन्नस्सन् यस्योत्पादयिता सन्दिग्धः स तदुत्पन्न एवेति । शिपिविष्टादयः श्राद्धे भुञ्जाना ,... इति पाठो घ. पुस्तके ।

२. मधु वाता ऋतायते, मधु नक्तमुतोषसि, मधुमान्नो वनस्पतिः(ते. सं. ४. २. ९.) इति तिस्र ऋचः त्रिमधुः ।

३ चतुष्कपर्दा युवतिः, एकस्सुपर्णस्समुद्रम्, सुपर्णो विप्राः, इति तिस्रः ऋचः (ऋ. सं. ८. ६. १६.)

४ ब्रह्ममेतु माम्, ब्रह्ममेधया, ब्रह्ममेधवा, तै. आ. (महानारायणोपनिषदि.) (३८, ३९, ४०.) इति त्रयोऽनुवाकाः त्रिसुपर्णः ।

५. तैत्तिरीयके. ब्राह्मणे तृतीयाष्टके एकादशे प्रपाठक आम्नातः । कठोपनिषदि प्रथमादित्रिषु वल्लीषु, शतपथे ।

६. नाचिकेताग्नेस्त्रिश्चेतेत्यन्ये, इति. च. पु.

७. प्राणापानव्योनादानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा. (तै. आ. (महाना.) ९५) इत्यादिः विरजानुवाकः ।

सभ्यावसथ्याभ्यां सह ।(१)पञ्चानां काठकाग्नीनामध्येता वा । ज्येष्ठसाम तलवकारिणां प्रसिद्धं उदु त्य, चित्रमित्येतयोर्गीतम् । तद्वायतीति ज्येष्ठसमागः । ज्येष्ठसामिक इति पाठे ब्रीह्यादित्वात् ठन् । वेदाध्यायी स्वाध्यायपरः । अनूचानपुत्र· त्रैविद्यपुत्र । श्रोत्रिय इत्यपि पठन्ति । तदादरार्थं द्रष्टव्यम् । एते श्राद्धे भुञ्जानाः पङ्क्तिं शोधयन्ति । वेदाध्यायीत्यस्याऽनन्तरमितिशब्दं पठन्ति । सोऽपपाठः । एतेन पञ्चाग्नीत्यविभक्तिकपाठो व्याख्यातः ॥ २२ ॥

न च नक्तं श्राद्धं कुर्वीत ॥ २३ ॥

श्राद्धकर्मण्यारब्धे कारणाद्विलम्बे मध्ये यदादित्योऽस्तमियात् तदा श्राद्धशेषं न कुर्वीत, अपरेद्युर्दिवैव कुर्वीतेति ॥ २३ ॥

आरब्धे चाऽभोजनमासमापनात् (अन्यत्र राहुदर्शनात) ॥ २४ ॥

पूर्वेद्युर्निवेदनप्रभृत्यापिण्डनिधानान्मध्ये कर्तुर्भोजनप्रतिषेधः । अनन्तरमन्यत्र राहुदर्शनादिति पठन्ति । 'न च नक्त'मित्यस्यापवादः राहुदर्शने नक्तमपि कुर्वीतेति । उदीच्यास्त्वेतत्प्रायेण न पठन्ति । तथा च पूर्वैर्न व्याख्यातम् । प्रत्युत 'न च नक्त'मित्येतत् सोमग्रहणविषयमिति व्याख्यातम् । पठ्यमानं तु न च नक्तमित्यस्यानन्तरं पठितुं युक्तम् ॥२४॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने सप्तदशी कण्डिका ॥ १७ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने सप्तमः पटलः ॥७॥

---

१. सावित्र, नाचिकेत, चातुर्होत्र, वैश्वसृजा, सुपर्णकेतुकाख्या· पञ्च चयनविशेषाः तैत्तिरीयब्राह्मणे ३ अष्टके दशमादिषु त्रिषु (काठके. १. २. ३) प्रपाठकेषु समन्त्रका आम्नाता· पञ्चाग्नयः । छान्दोग्योपनिषदाम्नातपञ्चाग्निविद्याध्यायी पञ्चाग्निरिति मनौ (३. १८५) मेधातिथिः ।

अथाऽष्टमः पटलः ॥

विलयनं मथितं पिण्याकं मधु मांसं च वर्जयेत् ॥ १ ॥

विलयनं नवनीतमलम्। यस्य दध्नो हस्तादिना मन्थनमात्रं न जलेन मिश्रणं तन्मथितम्। तथा च नैघण्टुकाः—

(१)'तक्रं ह्युदश्विन्मथितं पादाम्बुर्धाम्बु निर्जलमि'ति।

यन्त्रपीडितानां तिलानां कल्कः पिण्याकम्। मधुमांसे प्रसिद्धे। मांसमप्रतिषिद्धमपि। एतद्विलयनादिकं वर्जयेत् ॥ १ ॥

कृष्णधान्यं शूद्रान्नं ये चान्येऽनाद्यसम्मताः ॥ २ ॥

कृष्णधान्यं(२)माषादि। न कृष्णा व्रीहयः। शूद्रान्नं पक्वमपक्वं च। ये चान्येऽनाद्यत्वेनाभोज्यत्वेन सम्मताः तांश्च वर्जयेत् ॥ २ ॥

(३)अहविष्यमनृतं क्रोधं येन च क्रोधयेत् ॥ ३ ॥

अहविष्यं कोद्रवादि। अनृतं मिथ्यावचनम्। क्रोधः कोपः येन च कृते नोक्तेन वा परं क्रोधयेत्, तच्च वर्जयेत् ॥ ३ ॥

स्मृतिमिच्छन् यशो मेधां स्वर्गं पुष्टिं द्वादशै-
तानि वर्जयेत् ॥ ४ ॥

स्मृतिरधिगतस्य स्मरणम्। यशः ख्याति[1]। मेधा प्रज्ञा। द्वादशैतानि विलयनादीनि वर्जयेत् स्मृत्यादिकमिच्छन्। पुनर्वर्जयेदिति गुणार्थोऽनुवादः स्मृत्यादिकं फलं विधातुम्। द्वादशैतानीति वचनं विलयनादेरपि परिग्रहार्थम्, अहविष्यादिकमेवानन्तरोक्तं मा ग्राहीदिति ॥ ४ ॥

अधोनाभ्युपरि जान्वाच्छाद्य त्रिषवणमुदकमुपस्पृश-
न्नग्निपक्ववृत्तिरच्छायोपगतस्थानासनिकस्सं-
वत्सरमेतद्व्रतं चरेदेतदष्टाचत्वारिंशत्स-
म्मितमित्याचक्षते ॥ ५ ॥

---

१. अमरको. २. का. वै. ५३.

२. कुलुत्थादि इति घ. च. पुस्तकयो, कृष्णकुलुत्थादि. इति ङ. पु.

३. 'अहविष्य'मित्यादि 'वर्जये' दित्यन्तमेकसूत्रं क. पुस्तके परम्।

अधोनाभ्युपरि जान्वाच्छाद्येति व्याख्यातम् (१.२४.११) त्रिषवण त्रिषु सवनेषु प्रातर्मध्यन्दिने सायमिति उदकमुपस्पृशन् स्नान कुर्वन् । अनग्नि-पक्ववृत्ति., वृत्तिः शरीरयात्रा, सा अग्निपक्वेन न कार्या । अग्निग्रहणात् कालपक्वस्याऽऽम्रादेरदोषः । अच्छायोपगतः छायामनुपगच्छन् । स्थानास निकः स्थानासनवान् । दिवास्थानं रात्रावासनं न कदा चिच्छयनम् । एतत् 'विलयनं मथित'मित्यारभ्याऽनन्तरमुक्त सवत्सरं व्रत चरेत् । एत द्धृतमष्टाचत्वारिंशद्वर्षसाध्येन ब्रह्मचारिव्रतेन सम्मित सदृशं यावत्तस्य फलं तावदस्यापीत्याचक्षते धर्मज्ञाः । न केवल स्मृत्यादिकमेव प्रयो जनमिति ।

अपर आह—'विलयनं मथित'मित्यादिकं व्रतान्तरं स्मृत्यादिकाम-स्य । 'अधोनाभी'त्यादिकं तु सम्मितं व्रतमिति । एतच्च ब्रह्मचारि णो गृहस्थस्य च भवति ।

तथा च बौधायनः—

(१)'अष्टाचत्वारिंशत्सम्मितमित्याचक्षते तस्य सङ्क्षेपः संवत्सरः । तं संवत्सरमनुव्याख्यास्यामः—स यदि ब्रह्मचारी स्यान्नियमेव प्रति-पद्येत । अथ यद्यपि ब्रह्मचारी स्यात् केशश्मश्रुलोमनखानि वापयि त्वा तीर्थं गत्वा स्नात्वे'त्यादि ॥ ५ ॥

नित्यश्राद्धम् ॥ ६ ॥

अथाऽहरहः कर्तव्यं श्राद्धमुच्यते । तस्य नित्यश्राद्धमिति नाम ॥ ६ ॥

बहिर्ग्रामाच्छुचयः शुचौ देशे संस्कुर्वन्ति ॥ ७ ॥

तन्नित्यश्राद्धं बहिर्ग्रामात्कर्तव्यं तस्याऽन्नसंस्कारः शुचौ देशे अन्नं संस्कुर्वन्ति । शुचय इति वचनमाधिक्यार्थम् । आर्याः प्रयता इति पूर्व-मेव प्रायत्यस्य विहितत्वात् ॥ ७ ॥

तत्र नवानि द्रव्याणि ॥ ८ ॥

तत्र नित्यश्राद्धे द्रव्याणि नवान्येव ग्राह्याणि ॥ ८ ॥

कानि पुनस्तानि ?

यैरन्नं संस्क्रियते येषु च भुज्यते ॥ ९ ॥

यैर्भाण्डैरन्नं संस्क्रियते येषु च कांस्यादिषु भुज्यते तानि नवानीति ॥ ९ ॥

---

१. नेदमद्योपलभ्यमानबौधायनीये धर्मसूत्र उपलभ्यते ।

तानि च भुक्तवद्भ्यो दद्यात् ॥ १० ॥

तानि भाण्डानि कांस्यादीनि च भुक्तवद्भ्यो ब्राह्मणेभ्यो दद्यात् । एवं प्रत्यहम् ॥ १० ॥

समुदेतांश्च भोजयेत् ॥ ११ ॥

समुदेतवचनं गुणाधिक्यार्थम् ॥ ११ ॥

न चाऽतद्गुणायोच्छिष्टं प्रयच्छेत् ॥ १२ ॥

भाण्डेषु यत् भुक्तशिष्टं तदिहोच्छिष्टम् । तदप्यतद्गुणाय भुक्तवतां ये गुणास्तद्रहिताय न दद्यात् तद्गुणायैव दद्यादिति(१) ॥ १२ ॥

एवं संवत्सरम् ॥ १३ ॥

एवमेतन्नित्यश्राद्धं सवत्सरं कर्तव्यमहरहः ॥ १३ ॥

तेषामुत्तमं लोहेनाजेन कार्यम् ॥ १४ ॥

तेषां संवत्सरस्याऽह्नां उत्तममहस्समासिदिनम् । लोहेन लोहितवर्णेन अजेन श्राद्धं कर्तव्यम् । दृश्यते चाप्यन्यत्राऽस्मिन्नर्थे लोहशब्दः-(२) 'लोहस्तूपरो भवत्यप्यतूपरः कृष्णसारङ्गो लोहितसारङ्गो वे'ति । चमकेषु च भवति (३)'श्यामं च मे लोहं च म' इति ॥ १४ ॥

मानं च कारयेत्प्रतिच्छन्नम् ॥ १५ ॥

मान धिष्ण्यं वेदिका । दृश्यते हि मिनोतेरस्मिन्नर्थे प्रयोगः अग्रेणाऽऽग्नीध्रं चतुर उपस्तावं विमितं विमिन्वन्ति पुरस्तादुन्नतं पश्चान्नितमि'ति। स एवायमुपसर्गरहितस्य प्रयोग । तं मानं कारयेत् कर्मकरैः, प्रतिच्छन्नं च तद्भवति तिरस्करिण्यादिना । इदमपि ग्रामाद्बहिरेव ॥

तस्योत्तरार्धे ब्राह्मणान् भोजयेत् ॥ १६ ॥

तस्य मानस्योत्तरस्मिन्नर्धे ब्राह्मणा भोजयितव्याः ॥ १६ ॥

उभयान्पश्यति ब्राह्मणांश्च भुञ्जानान्माने च पितॄनित्युपदिशन्ति ॥ १७ ॥

---

१. तदलाभे एतानि भुक्तवद्भ्यो ददाति उच्छिष्टानि श्राद्धे भुक्तवद्भ्य एव दद्यात् ॥ इत्यधिक घ. पुस्तके । २. लौहेन इति घ. पु.

३ तै स. ४. ७. ५. "अग्नाविष्णू सजोषसा" इत्याद्या एकादशानुवाकाः चमका इत्युच्यन्ते 'चमे' शब्दघटित्वात् ।

तस्यैवं कृतस्य कर्मणो महिम्ना उभयान् पश्यति, कांश्च कांश्च ब्राह्मणभुञ्जानान् तस्मिन्नेव च माने पितॄन् यथा ब्राह्मणान् भुञ्जानान् प्रत्यक्षेण पश्यति तथा माने समागतान् पितॄनपि प्रत्यक्षेण पश्यतीत्युपदिशन्ति धर्मज्ञाः ॥ १७ ॥

कृताकृतमत ऊर्ध्वम् ॥ १८ ॥

अत ऊर्ध्वं मासिश्राद्धं क्रियताम्, मा वा कार्षि । अकरणेऽपि न प्रत्यवाय इति ॥ १८ ॥

श्राद्धेन तृप्तिं निवेदयन्ते पितरः ॥ १९ ॥

हि यस्मादन्त्येऽहनि यद्दर्शनमुपगच्छन्ति, तच्छ्राद्धेन तृप्तिं हि वेदयन्ते ज्ञापयन्ति कर्तारम् । तस्मात् तत् कृताकृतमिति ॥ १९ ॥

अथ पुष्टिकामस्य प्रयोगस्तिष्येणेत्यादिरुच्छिष्टं दद्युरित्यन्त एकः ।

तिष्येण पुष्टिकामः ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्नेऽष्टादशी कण्डिका ॥ १८ ॥

गौरसर्षपाणां चूर्णानि कारयित्वा तैः पाणिपादं प्रक्षाल्य मुखं कर्णौ प्राश्य च यद्वातो नाऽतिवाति तदासनोऽजिनं वस्तस्य प्रथमः कल्पो वाग्यतो दक्षिणामुखो भुञ्जीत ॥ १ ॥

पुष्टिकामः पुरुषो वक्ष्यमाणं प्रयोगं कुर्यात् । तिष्येण(१) 'नक्षत्रे च लुपि''त्यधिकरणे तृतीया । तिष्ये नक्षत्रे गौराणां सर्षपाणां चूर्णानि कर्मकरैः कारयेत् । कारयित्वा तच्चूर्णैः पाणी पादौ प्रक्षाल्य मुखं कर्णौ च प्रक्षाल्य चूर्णशेषं प्राश्नीयात् । प्राश्येदिति पाठे प्राश्येत् विकिरेत् । एतावत् प्रतितिष्यं विशेषकृत्यम् । परं तु प्रत्यहं कर्तव्यम् । प्राश्य च यदासनं वातो नातिवाति अधो नातीत्य वाति तदासनस्तादृशासनः भुञ्जीतेति वक्ष्यमाणेन सम्बन्धः । तत्र वस्ताजिनमासनं स्यादिति मुख्य कल्पः । वाग्यतो दक्षिणां दिशमभिमुखो भुञ्जीत ॥ १ ॥

अनायुष्यं त्वेवंमुखस्य भोजनं मातुरित्युपदिशन्ति ॥२॥

---

१. पा. सू. २. ३.४५.

यदेवंमुखस्य दक्षिणामुखस्य भोजनं तत् भोक्तुर्या माता तस्या अनायुष्यमनायुष्यकरमिति धर्मज्ञा उपदिशन्ति। तस्मान्मातृमता नैवं कृतं कार्यमिति ॥ २ ॥

औदुम्बरश्चमसः सुवर्णनाभः प्रशास्तः ॥ ३ ॥

चमु भक्षणे। यत्र चम्यते स चमसो भोजनपात्रम्। औदुम्बरस्ताम्रमयः सुवर्णेन मध्येऽलंकृतस्स प्रशास्तः प्रशस्तो भोजने ॥ ३ ॥

नचाऽन्येनाऽपि भोक्तव्यम् ॥ ४ ॥

नचान्यनोपि कर्तुः पित्रापि तत्र पात्रे भोक्तव्यम्। अपिर्ह्यर्थवाची नुवादी। भोक्तव्य इति पुंलिङ्गपाठेऽप्येष एवार्थः ॥ ४ ॥

यावद्ग्रासं सन्नयन्नस्कन्दयन्नाऽपजिहीताऽपजिहीत वा कृत्स्नं ग्रासं ग्रसति सहाङ्गुष्ठम् ॥ ५ ॥

यावदेव सकृत् ग्रसितुं शक्यं तावदेव सन्नयन् पिण्डीकुर्वन्। अस्कन्दयन् भूमावन्नलेपानपातयन् कृत्स्न ग्रासं ग्रसीतेत्यन्वयः। सहाङ्गुष्ठम् आस्येऽपि ग्रासप्रवेशे यथाङ्गुष्ठोऽप्यनुप्रविशति तथा सर्वानेव ग्रासानुक्तेन प्रकारेण ग्रसति ग्रसतो मध्ये क्रियान्तरविधिः—नाऽपजिहीत भोजन पात्रं सव्येन पाणिना न विमुञ्चेत्। अपजिहीत वा विमुञ्चेद्वा। किमर्थमिदम् यावता न प्रकारान्तरं सम्भवति, सत्यं, 'प्रकमान्तु नियम्यत' इति न्यायेन य एव प्रकारः प्रथमे भोजने स एवाऽन्तादनुष्ठातव्य इत्येवमर्थमिदम् ॥ ५ ॥

न च मुखशब्दं कुर्यात् ॥ ६ ॥

भोजनदशायामिदम्। एवमुत्तरम् ॥ ६ ॥

पाणिं च नाऽवधूनुयात् ॥ ७ ॥

पाणिरत्र दक्षिणः ॥ ७ ॥

आचम्य चोर्ध्वौ पाणी धारयेदाप्रोदकीभावात् ॥ ८ ॥

भुक्ताऽऽचम्य पाणी ऊर्ध्वौ धारयेत् यावत् प्रगतोदकौ शुष्कोदकौ भवतः ॥ ८ ॥

ततोऽग्निमुपस्पृशेत् ॥ ९ ॥

भुक्ता नियमेनाग्निरुपस्प्रष्टव्यः ॥ ९ ॥

दिवाच न भुञ्जीताऽन्यन्मूलफलेभ्यः ॥ १० ॥

मूलानि कन्दाः । फलान्याम्रादीनि । तेभ्योऽन्यद्दिवा न भुञ्जीत । तद्भक्षणे न दोषः ॥ १० ॥

स्थालीपाकानुदेश्यानि च वर्जयेत् ॥ ११ ॥

(१)तेन सर्पिष्मता ब्राह्मणं भोजये' दित्यादौ ब्राह्मणो भूत्वा न भुञ्जीत अनुदेश्यानि च पितृभ्यो देवताभ्यश्च सङ्कल्पितानि च न भुञ्जीत ।११।

सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत ॥ १२ ॥

उत्तराच्छादनमुपरिवासः । तेन यज्ञोपवीतेन यज्ञोपवीतं कृत्वा भुञ्जीत । नाऽस्य भोजने "अपि वा सूत्रमेवोपवीतार्थं" इत्ययं कल्पो भवतीत्येके । समुच्चय इत्यन्ये ॥ १२ ॥

नैयमिकं तु श्राद्धं स्नेहवदेव दद्यात् ॥ १३ ॥

यन्नियमेन कर्तव्यं मासि श्राद्धं, तत् स्नेहद्रव्ययुक्तमेव दद्यात् । न शुष्कम् ॥ १३ ॥

तत्र विशेषः—

सर्पिर्मांसमिति प्रथमः कल्पः ॥ १४ ॥

स्पष्टम् ॥ १४ ॥

अभावे तैलं शाकमिति ॥ १५ ॥

सर्पिषोऽभावे तैल मांसस्याऽभावे शाकम् । इतिशब्दाद्यच्चान्यदेवं युक्तम् ॥ १५ ॥

मघासु चाधिकं श्राद्धकल्पेन सर्पिर्ब्राह्मणान् भोजयेत् ॥१६॥

मघासु पूर्वपक्षेऽपि श्राद्धविधानेन सर्पिर्मिश्रमन्नं ब्राह्मणान् भोजयेत् ॥१६॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकोनविंशी कण्डिका ॥ १९ ॥

---

१. आप गृ. ७. १५.

मासि श्राद्धे तिलानां द्रोणंद्रोणं येनोपायेन शक्नुयात् तेनोपयोजयेत् ॥ १ ॥

येनोपायेनोपयोजयितुं शक्नुयात् अभ्यङ्गे, उद्वर्तने, भक्ष्ये, भोज्ये चेति तेनोपायेन मासिश्राद्धे तिलानां द्रोणं द्रोणमुपयोजयेत्। तत्रैकैकस्य ब्राह्मणस्य तिलानां द्रोणं द्रोणमुपयोजयितुमशक्यत्वात् समुदितानुपयोजयेत्। द्रौणंद्रोणमिति वीप्सावचनं तु प्रतिमासिश्राद्धमुपयोजनार्थमिति केचित्। अन्ये तु एवंभूताः प्रबलाः प्रयत्नेनाऽन्विष्य भोजयितव्या इति ॥ १ ॥

समुदेतांश्च भोजयेन्न चाऽतद्गुणायोच्छिष्टं दद्युः ॥२॥

व्याख्यातमिदम्। दद्युरिति बहुवचनं तथाविधकर्तृबहुत्वापेक्षम्। वचनव्यत्ययो वा ॥ २ ॥

अथ पुष्टिकामस्यैवाऽपरः प्रयोग आ पटलसमाप्तेः—

उदगयन आपूर्यमाणपक्षस्यैकरात्रमवरार्ध्यमुपोष्य तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा महाराजमिष्ट्वा तेन सर्पिष्मता ब्राह्मणं भोजयित्वा पुष्ट्यर्थेन सिद्धिं वाचयीत ॥ ३ ॥

पुष्टिकामः पुरुष एकरात्रावरमुपवासं कृत्वा उदगयन आपूर्यमाणपक्षस्य पूर्वपक्षस्य सम्बन्धिना तिष्येण तस्मिन्नक्षत्रे स्थालीपाकं श्रपयित्वा (१)महाराज वैश्रवणं यजेत। आज्यभागान्ते महाराजाय स्वाहेति प्रधान होम। स्विष्टकृदादिजयादयः। परिषेचनान्ते तेन सर्पिष्मता स्थालीपाकेन ब्राह्मणं भोजयेत्। उत्तरविवक्षयेद वचनम्। भोजयित्वा सिद्धिं वाचयीत पुष्टिरस्त्विति ॥ ३ ॥

एवमहरहरापरस्मात्तिष्यात् ॥ ४ ॥

एवमिदं स्थालीपाकश्रपणादिसिद्धिवाचनान्तमहरहः कर्तव्यमापरस्मात्तिष्यात् यावदपरस्तिष्य आगच्छति ॥ ४ ॥

द्वौ द्वितीये ॥ ५ ॥

---

१ कुबेराय वैश्रवणाय। महाराजाय नमः। (तै आर. १. ३१.) इति मन्त्रे वैश्रवणस्य महाराजपदेन सामानाधिकरण्यात् ॥

द्वितीये तिष्ये प्राप्ते द्वौ भोजयेत् । अन्यत्समानम् । एवमातृतीयात् ॥५॥

त्रींस्तृतीये ॥ ६ ॥

तृतीये तिष्ये त्रीन् भोजयेदाचतुर्थात् ॥ ६ ॥

एवं संवत्सरमभ्युच्चयेन ॥ ७ ॥

एवमेतत्कर्म यावत्संवत्सरः पूर्यते तावत् कर्तव्यम् । ब्राह्मणभोजन चाऽभ्युच्चयेन भवति । चतुर्थीप्रभृति चत्वारः, पञ्चमप्रभृति पञ्चेत्यादि॥७॥ एवं कृते फलमाह—

महान्तं पोषं पुष्यति ॥ ८ ॥

महत्या पुष्ट्या युक्तो भवति ॥ ८ ॥

आदित एवोपवासः ॥ ९ ॥

उपवासस्त्वादित एव पुष्ये भवति । न प्रतिपुष्यम् ॥ ९ ॥

आस्तेजसां भोजनं वर्जयेत् ॥ १० ॥

आस्तेजांसि तक्रवाजिनादीनि । तानि नोपभुञ्जीत ॥ १० ॥

भस्मतुषाधिष्ठानम् ॥ ११ ॥

वर्जयेदित्येव । भस्मतुषांश्च नाऽधितिष्ठेत् नाऽऽक्रामेत् ॥ ११ ॥

पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेत् ॥ १२ ॥

एकेन पादेन पादान्तरस्य प्रक्षालनं अधिष्ठानं च वर्जयेत् न कुर्यात् ॥१२॥

प्रेङ्खोलनं च पादयोः ॥ १३ ॥

प्रेङ्खोलन दोलनमितस्ततश्चालनम् ॥ १३ ॥

जानुनि चाऽत्याधानं जङ्घायाः ॥ १४ ॥

एकस्मिन् जानुनि इतरस्या जङ्घाया अत्याधानमवस्थापनं च वर्जयेत्१४

नखैश्च नखवादनः ॥ १५ ॥

स्पष्टम् ॥ १५ ॥

स्फोटनानि चाऽकारणात् ॥ १६ ॥

पर्वसन्धीनां स्फोटनानि वर्जयेत् अकारणात्, कारणं श्रमवातादि । वादनस्फोटनानीति समासपाठेऽप्येष एवार्थः ॥ १६ ॥

यच्चान्यत्परिचक्षते ॥ १७ ॥

यच्चान्यदेवं उक्तव्यतिरिक्तं तृणच्छेदनादि शिष्टा परिचक्षते गर्हन्ते तदपि वर्जयेत् ॥ १७ ॥

योक्ता च धर्मयुक्तेषु द्रव्यपरिग्रहेषु च ॥ १८ ॥

एकश्चशब्दोऽनर्थकः । केचिन्नैव पठन्ति । धर्माविरुद्धा ये द्रव्यपरिग्रहास्तेषु च योक्ता उत्पादयिता स्यान्निरीहस्स्यात् ॥ १८ ॥

प्रतिपादयिता च तीर्थे ॥ १९ ॥

तीर्थं गुणवत् पात्रं, यज्ञो वा । तत्र द्रव्यस्याऽर्जितस्य प्रतिपादयिता स्यात् ॥ १९ ॥

यन्ता चाऽतीर्थे यतो न भयं स्यात् ॥ २० ॥

यन्ता नियन्ता अप्रदाता अतीर्थे अप्रदाता च स्यात् । यतः पुरुषादप्रदानेऽपि न भयं स्यात् । भयसम्भवे तु पिशुनादिभ्यो देयम् ॥ २० ॥

सङ्ग्रहीता च मनुष्यान् ॥ २१ ॥

अर्थप्रदानप्रियवचनानुसरणादिभिर्मनुष्याणां सङ्ग्रहणशीलस्स्यात् २१

भोक्ता च धर्माविप्रतिषिद्धान् भोगान् ॥ २२ ॥

धर्माविरुद्धा ये भोगाः स्वकचन्दनस्वभार्यासेवनादयः, तेषां च भोगशीलस्स्यात् ॥ २२ ॥

एवमुभौ लोकावभिजयति ॥ २३ ॥

एवं महत्या पुष्ट्या युक्त उक्तप्रकारमनुतिष्ठन्नुभौ लोकावभिजयति भोगेनेमं लोकं, तीर्थे प्रतिपादनेन चाऽमुं लोकमिति ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने विंशी कण्डिका ॥ २० ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्नेऽष्टमः पटलः ॥ ८ ॥

नवमः पटलः ॥

'सर्वाश्रमाणां समयपदानी' त्युक्तं पुरस्तात् । के पुनस्ते आश्रमाः ? इत्यत आह—

चत्वार आश्रमा गार्हस्थ्य, माचार्यकुलं, मौनं, वानप्रस्थ्यमिति ॥ १ ॥

आश्राम्यन्त्येषु श्रेयोऽर्थिनः पुरुषा इत्याश्रमाः । एषा सामान्यसंज्ञा । गृहे तिष्ठति कुटुम्बरक्षणपर इति गृहस्थः । तस्य भावो गार्हस्थ्यम् । स एक आश्रमः । आचार्यकुल तत्र वासो लक्षणया सोऽप्येकः । 'मनु अवबोधन' मनुत इति मुनिर्ज्ञानपरः । तस्य भावो मौनम् । सोऽपरः । वनं प्रतिष्ठत इति वनप्रस्थः । स एव वानप्रस्थः । प्रज्ञादित्वादण् । तस्य भावो वानप्रस्थ्यम् । इतिशब्दः परिसमाप्त्यर्थः । एतावन्त एवाऽऽश्रमा इति । चतुर्णा मेवोपदेशेऽपि चत्वार इति वचनं "(१)नैकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्ये"ति स्मृत्यन्तरोक्तं मा ग्राहीदिति ॥ १ ॥

तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति ॥

तेष्वाश्रमेषु चतुर्ष्वपि यथाशास्त्रमव्यग्रस्समाहितमना भूत्वा यो वर्तते, स क्षेममभयं पदं गच्छति । अनेनाऽऽश्रमविकल्प उक्तो वेदितव्यः निश्रेयसार्थिनाऽन्यतमस्मिन्नाश्रमे यथाशास्त्रमवाहितेन वर्तितव्यमिति । तथा च गौतमः—(२)'तस्याऽऽश्रमविकल्पमेके ब्रुवत' इति ॥ २ ॥

सर्वेषामुपनयनप्रभृति समान आचार्यकुले वासः ॥ ३ ॥

उपनयनप्रभृति य आचार्यकुले वासोऽष्टाचत्वारिंशद्वर्षादिनामन्यतमस्स सर्वेषामाश्रमाणां समानः ॥ ३ ॥

सर्वेषामनुत्सर्गो विद्यायाः ॥ ४ ॥

अनुत्सर्गः छान्दसो दीर्घः । विद्याया अनुत्सर्गोऽपि सर्वेषामाश्रमाणां समानः । तस्मादाचार्यकुले वासस्समान इति ॥ ४ ॥

बुध्वा कर्माणि यत्कामयते तदारभेत ॥ ५ ॥

प्रत्याश्रमं यानि कर्माणि विहितानि, तानि बुध्वा गृहस्थस्यैतानि

---

१. गौ. ध. ३. ३६. २. गौ. ध. ३. १.

कर्तव्यानि । एषामननुष्ठाने प्रत्यवायः । फलं चेदमेषाम्, एतानि शक्यान्यनुष्ठातुं, नैतानीत्याचार्यादुपश्रुत्य यत्कर्म फलं वा कामयेत तदारभेत तमाश्रमं प्रतिपद्येतेति ॥ ५ ॥

तत्र गार्हस्थ्यस्य पूर्वमेव प्रपञ्चितत्वादध्ययनानन्तरं प्रतिपित्सितस्याऽऽचार्यकुलस्य स्वरूपमाह—

यथा विद्यार्थस्य नियम एतेनैवान्तमनुपसीदत आचार्यकुले शरीरन्यासो ब्रह्मचारिणः ॥६॥

यथा विद्यार्थस्य उपकुर्वाणस्य ब्रह्मचारिणः 'अथ ब्रह्मचर्यविधिं'रित्यारभ्याऽग्नीन्धनादिनियम उक्तः, अतस्तेनैव नियमेनाऽऽन्तमाशरीरपातादनुपसीदतः उपसदनमेवानुपसदनं तत्कुर्वतः आचार्यकुले शरीरन्यासः परित्यागो भवति ब्रह्मचारिणो नैष्ठिकस्य । तत्रैवाऽऽमरणात्तिष्ठेत्, नाऽऽश्रमान्तरं गच्छेत् । यदि तमेवाश्रममात्मनः क्षेमं मन्येतेति मनुः—

(१)'आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एषु त्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ।
स गच्छत्युत्तमं स्थानं न चेहाऽऽजायते पुनः ॥'

इति ॥ ६ ॥

अथ परिव्राजः ॥ ७ ॥

अथाऽनन्तरं परिव्राजो धर्म उच्यते । दृष्टादृष्टार्थान् सर्वानेवाऽऽरम्भान् परित्यज्याऽऽत्मलाभाय सन्यासाश्रमं परिव्रजतीति परिव्राट् सन्यासी॥७॥

अत एव ब्रह्मचर्यवान् प्रव्रजति ॥ ८ ॥

अत एव ब्रह्मचर्याश्रमादेव ब्रह्मचर्यवानविप्लुतब्रह्मचर्यः प्रव्रजति परिव्रज्यां कुर्याद्यदि तथैव पक्वकषायो भवति । श्रूयते च(२) 'ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वे'ति, 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति च । अत्र केचिदाहुः—'अत एवे'ति वचनात् गृहाश्रमं प्रविष्टस्य तत्परित्यागेनाश्रमान्तरप्राप्तिराचार्यस्याऽनभिमतैवेति लक्ष्यते । तत्रायमभिप्रायः—दारपरिग्रहे सति 'यावज्जीवमग्निहोत्रं जुहुयादि'ति श्रुत्या विरुध्यते । स

१. म. स्मृ. २४७—२४९. २. जाबालो. ४.

कथं प्रव्रजेदिति । तस्मात्सत्यपि वैराग्ये काम्यस्य कर्मणः परित्यागेन नित्यानि नैमित्तिकानि च कर्माणि कुर्वन् प्रतिषिद्धानि वर्जयन् गृहस्थ एव मुच्यत इति । तथाऽऽह याज्ञवल्क्यः—

(१)'न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥' इति ।

अथ योऽनाहिताग्निस्तस्य विरक्तस्य मुन्याश्रमप्रवेशे को विरोधः ? ऋणश्रुतिविरोधः—'(२)जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य' इति । मनुरपि—

(३)'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥' इति ।

मोक्षो मोक्षाश्रमः । नन्वेवं ब्रह्मचर्यादपि प्रव्रज्या नोपपद्यते । अथ तत्र(४) 'यदहरेव विरजेदि'ति श्रुत्या युक्तं प्रव्रजितुं तदा विरक्तस्य, (५)गार्हस्थ्यादपि भविष्यति । स्मर्यते च—

(६)'प्राजापत्या निरुप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहादि'ति ॥

तथा यो गृहस्थो वृद्धो मृतभार्यः पुनर्दारक्रियायामसमर्थः, तस्यापि युज्यते प्रव्रज्या । तस्मा'यदहरेव विरजे'दि(७)त्येष एव कालः प्रव्रज्यायाः, सर्वमन्यदविरक्तस्येति युक्तम् । एवकारस्तु सूत्रे श्रुत्यनुसारेण प्रयुक्तः । यथा 'गृहाद्वा वनाद्वे'ति ब्रुवाणैव श्रुतिर्ब्रह्मचर्यादेव प्रव्रजेदित्याह, तथेति ॥ ८ ॥

तस्योपदिशन्ति ॥ ९ ॥

तस्य परिव्राजः कर्तव्यमुपदिशन्ति धर्मज्ञाः ॥ ९ ॥

अनग्निरनिकेतस्यादशर्माऽशरणो मुनिःस्वाध्याय एवोत्सृजमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्याऽनिहोऽनमुत्रश्चरेत् ॥ १० ॥

ब्रह्मचारिणस्समिदाधानाद्यग्निकार्यं गृहस्थस्यौपासनाद्यग्निहोत्रादि वानप्रस्थस्य(८) 'श्रामणकेनाग्निमाधाये'ति विहितेऽग्नौ होमादि । तस्य

---

१. या. स्मृ. ३. २०२. २. तै. सं. ६. ३. १०
३. म. स्मृ. ६. ३५. ४. जाबालो. ४. ५. गृहस्थस्यापि इति च. पु.
६. म. स्मृ. ६. ३८. ७. 'एक एवांश' इति ड. पु. ८. गौ. ध. ३. १७.

तु नैवंविधं किञ्चिदग्निकार्यमस्तीत्यनग्निः । निकेतो निवासस्थानं स्वभूतं तदभावादनिकेतः । शर्म सुखं वैषयिकं तदस्य नास्तीत्यशर्मा । किञ्चिदपि शरणं न प्रतिपन्नः न वा कस्यचिच्छरणभूत इत्यशरणः । स्वाध्यायः प्रणवादिपवित्राणां जपः । अत्र बौधायनः--

'वृक्षमूलिको वेद सन्न्यासी वेदो वृक्षस्तस्य मूलं प्रणवः प्रणवात्मको वेदः प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्रजापति'रिति । तत्रैव वाचं विसृजेत् । अन्यत्र मौनव्रतः स्यात् । यावता प्राणा ध्रियन्ते सा प्राणवृत्तिः । तावतीं भिक्षां ग्रामे प्रतिलभ्य । एतावानस्य ग्रामे प्रवेशः । अन्यदा बहिर्वासः । इहार्थाः कृष्यादयः परलोकार्थाश्च जपहोमादयो यस्य न सन्ति सोऽनिहोऽनमुत्र इत्युक्तः । एवंभूतश्चरेत् । नैकस्मिन् ग्रामे ह्यहमपि वसेत् । अत्र गौतमः—(१)'न द्वितीयामपतुं रात्रिं ग्रामे वसेदि'ति (२)वर्षासु ध्रुवशील'इति च ॥ १० ॥

तस्य मुक्तमाच्छादनं विहितम् ॥ ११ ॥

यत् परैर्मुक्तं परित्यक्तमयोग्यतया, तत् तस्य विहितमाच्छादनं, तद्वासे आच्छादयेत । निर्णिज्येति गौतमः ॥ ११ ॥

सर्वतः परिमोक्षमेके ॥ १२ ॥

सर्वैरेव वासोभिः परिमोक्षमेक उपदिशन्ति । न किञ्चिदपि वासो बिभृयात् । नग्न एव चरेदिति । अपर आह—

सर्वतो विधितो निषेधतश्चाऽस्य परिमोक्षमेके ब्रुवते । न किञ्चिदस्य कृत्यं न किञ्चिदस्य वर्ज्यमिति ॥ १२ ॥

एतदेवोदाहरणैः प्रपञ्चयति--

सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्याऽऽत्मानमन्विच्छेत् ॥ १३ ॥

सत्यं वक्तव्यमिति योऽयं नियमस्तं परित्यज्य तथा नत्र वक्तव्यमनृतं (३)"तद्धि सत्याद्विशिष्यत" इत्यादिके विषये अनृतं वक्तव्यमिति योऽयं नियमस्तं च परित्यज्य । सुख मृष्टभोजनादिजन्यम् । दुःखं शीतवातादिजन्यम् । वेदान् स्वाध्यायाध्ययनम् । इमं लोकं पैहलौकिकं काम्यं कर्म । अमुं च लोकं पारलौकिकं काम्यं कर्म । सर्वमेतत् परित्यज्य आत्मान-

१. गौ. ध. ३. २१. २. गौ. ३. १३.
३ म. स्मृ. ८. १०४.

मध्यात्मपटलो(१-२२. २३)क्तमन्विच्छेत् उपासीतेति। तदेवं ज्ञानबलावलम्बनेन हतविधिनिषेधा ये स्वैरं प्रवर्तन्ते सिद्धाः तेषां मतमुपन्यस्तम् ॥ १३ ॥

अथैतेषामेव स्वैरचारिणां(१) किं तत्र प्रमाणम् ? तत्राह—

बुद्धे क्षेमप्रापणम् ॥ १४ ॥

आत्मनि बुद्धेऽवगते सति तदेव ज्ञानं सर्वमशुभं प्रक्षाल्य क्षेमं प्रापयति। श्रूयते हि—

(२)'न कर्मणा वर्धते नो कनीयान्। तस्यैवात्मा पदवित्तं विदित्वा। न कर्मणा लिप्यते पापकेने'ति(३) 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति च ॥ स्मर्यते च—

'(४)यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ इति ॥ १४ ॥

तदिदं निराकरोति—

तच्छास्त्रैर्विप्रतिषिद्धम् ॥१५॥

यानि यतेरेव कर्तव्यप्रतिपादनपराणि शास्त्राणि, तैरेव तद्विप्रतिषिद्धम्। तत्र मनुः—

(५)क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ इति

अतो यतिमेव प्रकृत्य यानि विहितानि कर्माणि तानि कर्तव्यानि। यानि च निषिद्धानि तानि च वर्जनीयानि ॥ १५ ॥

'बुद्धे क्षेमप्रापण'मित्येतत् प्रत्यक्षविरुद्धमित्याह—

बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत ॥ १६ ॥

आत्मबोधमात्रेण चेत् क्षेमं प्राप्यते, तदा इहैव शरीरे दुःखं नोपलभेत ज्ञानी। न चैतदस्ति। न हि ज्ञानिनां मूर्धाभिषिक्तमन्योऽपि क्षुधादुःखमेव तावत् क्षणमात्रमपि सोढुं प्रभवति ॥ १६ ॥

---

१. किंत्राणम् इति. च. मु २. बृ उ ७ ४ २३. तै. ब्रा २ १२. १४
३. छान्दो ५ २४. ३. ४. श्रीमद्भ. गी. ४. ३७ ५. म. स्मृ. ६. ४८, ५०

एतेन परं व्याख्यातम् ॥ १७ ॥

परलोके भवमपि दुःखमेतेन व्याख्यातं-न स्वैरचारिणां निवर्तत इति । तस्मात् कर्मभिः परिपक्वकषाय एव श्रवणमननिदिध्यासनैः साक्षात्कृतात्मस्वरूपः प्रतिषिद्धेषु कटाक्षमप्यनिक्षिपन्नष्टाङ्गयोगनिरतो मुच्यत इति* । अत्र बोधायनः(१)—'एकदण्डी त्रिदण्डी वे'ति । गौतमः(२)—'मुण्डशिखी वे'ति ॥ १७ ॥

अथ वानप्रस्थः ॥ १८ ॥

अनन्तरं वानप्रस्थाश्रम उच्यते ॥ १८ ॥

अत एव ब्रह्मचर्यवान् प्रव्रजति ॥ १९ ॥

प्रव्रजति प्रकर्षेण व्रजति अपुनःप्रवेशाय वनं प्रतिष्ठित इति । तथा च गौतमः(३)— 'ग्राम च न प्रविशेदि' ति । गतमन्यत् , उत्तरं च ॥१९॥

तस्योपदिशन्त्येकाग्निरनिकेतस्स्यादशर्माऽशरणो मुनिःस्वाध्याय एवोत्सृजमानो वाचम् ॥ २० ॥

कः पुनरेकोऽग्निः ? न तावदौपासन',ब्रह्मचारित्वात् । तस्माल्लौकिकेऽग्नौ यथापूर्वं सायंप्रातस्समिध आदध्यादित्यर्थो विवक्षितः ।

अपर आह—'श्रामणकेनाग्निमाधाये' ति गौतमः । अस्यार्थः—श्रामणकं नाम वैखानससूत्रम् । तदुक्तेन प्रकारेण एकोऽग्निराधेयः । तस्मिन् सायंप्रातरग्निकार्यमिति । (४)तथा च बौधायनः—'वानप्रस्थो वैखानसशास्त्रसमुदाचारो, वैखानसो वने मूलफलाशी तपस्शीलस्सवनेपूदकमुपस्पृशन् श्रामणकेनाऽग्निमुपसमाधाये'त्यादि । अन्यद्धृतम् ॥२०॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकविंशी कण्डिका ॥ २१ ॥

---

* एतद्विज्ञानन्तरं अत्र यदुदाहृतं 'ज्ञानेन सर्वं दह्यत' इति तत्र ज्ञानदशायाः प्रागार्जितानि कर्माणि प्रायश्चित्तेन ज्ञानेन वा दह्यन्त इत्युच्यते, न पुनर्ज्ञानदशायां स्वैरचारोऽनुज्ञायते । यस्य हि स्वशरीरेऽपि बीभत्सा स कथं परशवादिभिरविशेषपक्षीसङ्गमादौ प्रवर्तत'इति भागः क. पुस्तक एवास्ति अधिकपाठतया परिगणितः च. पुस्तके टिप्पण्याम्

१. बौ. ध. २. २. १०. ४०. २. गौ. ध ३. २२. ३ गौ. ध. ३. ३३

४. तथा च बौधायनः इत्यादिग्रन्थो नास्ति ड च. पुस्तकयोः । बौ.ध.२.६.१६.१७. आप० ध० २५

तस्याऽऽरण्यमाच्छादनं विहितम् ॥ १ ॥

अरण्ये भवमारण्यमजिनवल्कलादि ॥ १ ॥

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेत् ॥ २ ॥

ततो मूलादिभिर्वर्तयन् वृत्तिः प्राणयात्रा तां कुर्वंश्चरेच्चरणशीलः स्यात् ॥ २ ॥

अन्ततः प्रवृत्तानि ॥ ३ ॥

मूलादिभिः स्वयंगृहीतैः कञ्चित्कालं वर्तयित्वा अन्ततः अन्ते प्रवृत्तानि स्वयमेव पतितानि अभिनिश्रयेदिति वक्ष्यमाणेन सम्बन्धः । तान्यभिनिश्रित्य तैर्वर्तयेदिति ॥ ३ ॥

ततोऽपो वायुमाकाशमित्यभिनिश्रयेत् ॥ ४ ॥

ततः कियन्तञ्चित्कालमब्भक्षः ततो वायुभक्षः तत आकाशमभिनिश्रयेत् न किञ्चित् भक्षयेदिति । अभिनिश्रयण सेवनम् ॥ ४ ॥

तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः ॥ ५ ॥

संयुज्यते संश्रयत इति संयोगः । तेषां मूलादीनां मध्ये उत्तरमुत्तरं समाश्रयणं फलतो विशिष्टमिति द्रष्टव्यम् ॥ ५ ॥

अथ वानप्रस्थस्यैवाऽऽनुपूर्व्यमेक उपदिशन्ति ॥ ६ ॥

अथेति पक्षान्तरोपन्यासे । पूर्वं ब्रह्मचर्यादेव वनप्रवेश उक्तः । एके त्वाचार्यास्तस्यैव वानप्रस्थस्याऽऽनुपूर्व्य कर्मोपदिशन्ति ॥ ६ ॥

कथम् ?—

विद्यां समाप्य दारं कृत्वाऽग्नीनाधाय कर्माण्यरभते सोमावराध्यानि यानि श्रूयन्ते ॥ ७ ॥

ब्रह्मचर्ये स्थितो विद्यां समाप्य गृहस्थश्च भूत्वाऽग्नीनाधाय कर्माणि कुर्यात् । कानि ? सोमावराध्यानि अवरार्धे पश्चार्धे तत्र भवोऽवराध्यः सोमः अवराध्यो येषां तानि सोमावराध्यानि सोमान्तानि हविर्यज्ञाख्यानि चातुर्मास्यादीन् हविर्यज्ञान् सोमं चेत्यर्थः । यानि श्रूयन्ते श्रुतौ विहितानि ॥ ७ ॥

गृहान् कृत्वा सदारस्सप्रजस्सहाग्निभिर्बहिर्ग्रामाद्वसेत् ॥ ८ ॥

अथ ग्रामाद्बहिररण्ये गृहान् कृत्वा सकुटुम्बस्सहैव चाग्निभिर्ग्रामाद्बहिर्वसेत् । अस्मिन्पक्षे प्रागुक्तमेकाग्नेरित्येतन्नाऽस्ति ॥ ८ ॥

एको वा ॥ ९ ॥

अथवा पुत्रेषु भार्यां निक्षिप्य स्वयमेक एव वसेत् । अस्मिन् पक्षे 'प्राजापत्यां निरुप्येष्टि'मिति परिव्राज उक्तेन न्यायेन श्रौतानग्नीनात्मनि समारोप्य ग्रामणकेनाऽग्निमाधाय एकाग्निर्भवेत् ॥ ९ ॥

सिलोञ्छेन वर्तयेत् ॥ १० ॥

व्याख्यातः सिलोञ्छ । तेन वर्तयेत् प्राणयात्रां कुर्यात् । इदं सकुटुम्बस्य एकाकिनश्च साधारणम् । एकाकिन एवेत्यन्ये ॥ १० ॥

न चाऽत ऊर्ध्वं प्रतिगृह्णीयात् ॥ ११ ॥

यदा सिलोञ्छेन वृत्तिर्जाता अत ऊर्ध्वं न कुतश्चिदपि प्रतिगृह्णीयात् ॥११॥

अभिषिक्तश्च जुहुयात् ॥ १२ ॥

यदा जुहुयात्तदा अभिषिक्तः स्नातः । अनुवादोऽयं स्नाने विशेष विधातुम् ॥ १२ ॥

शनैरपोऽभ्युपेयादभिघ्नन्नभिमुख आदित्यमुदकमुपस्पृशेत् ॥ १३ ॥

शनैरवेगेन जलाशयं प्रविशेत् । प्रविश्य चाऽभिघ्नन् हस्तेनोदकं ताडयन् उदकमुपस्पृशेत् स्नायात् आदित्याभिमुखः ॥ १३ ॥

(१)इति सर्वत्रोदकोपस्पर्शनविधिः ॥ १४ ॥

सर्ववर्णाश्रमसाधारणमेतत् । तथाचोत्तरत्र तस्य ग्रहणम् ॥ १४ ॥

तस्य द्वन्द्वद्रव्याणामेक उपादिशन्ति पाकार्थं भोजनार्थं वासिपरशुदात्रकाजानाम् ॥ १५ ॥

यानि पाकार्थानि ताम्रभाण्डादीनि । यानि च भोजनार्थानि कांस्यादीनि । वासिर्दर्व्यादि । तेषां सर्वेषां वास्यादीनां चतुर्णा(२)मेकैकस्य द्वे द्वे द्रव्ये उत्पाद्ये इत्येक उपादिशन्ति । काजमपि वास्यादिवदुपकरणविशेषो दारुमयः ॥ १५ ॥

द्वन्द्वानामेकैकमादायेतराणि दत्त्वाऽरण्यमवातिष्ठेत ॥१६॥

---

१. 'इति विधिः' इत्येव सूत्रम् च्छ. पु. २. एकैकस्यां विधायां इति च पु.

तेषां पाकादिसाधनानां द्रव्याणामेकैकं द्रव्यं स्वयमादायेतराणि भार्यायै दत्त्वा अरण्यमवतिष्ठेत उपतिष्ठेत् आश्रयेदिति ॥ १६ ॥

तस्याऽऽरण्येनैवाऽत ऊर्ध्वं होमो वृत्तिः प्रतीक्षाच्छादनं च ॥

तस्य वानप्रस्थस्याऽतोऽरण्यप्रवेशादूर्ध्वं आरण्येनैव नीवारादिना होमः वृत्तिः प्राणयात्रा प्रतीक्षा अतिथिपूजा च आच्छादनं वल्कलादिना ॥ १७ ॥

येषु कर्मसु पुरोडाशाश्चरवस्तेषु कार्याः ॥१८॥

येषु दर्शपूर्णमासादिषु पुरोडाशा विहिताः गृहस्थस्य, तेष्वस्य तत्स्थाने (१)चरव. कार्याः ॥ १८ ॥

सर्वं चोपांशु सह स्वाध्यायेन ॥ १९ ॥

सर्वं च कर्मकाण्डं साङ्गं प्रधानमुपांशु भवति पारायणब्रह्मयज्ञाध्ययनेन सह । तदप्युपांशु कर्तव्यमिति ॥ १९ ॥

नाऽऽरण्यमभ्याश्रावयेत् ॥ २० ॥

उपांशुवचनादेव सिद्धे वचनमाभिमुख्यप्रतिषेधार्थम् । तेनाऽरण्यस्था यथा नाऽऽभिमुख्येन शृणुयुः तावदुपांशविति ॥ २० ॥

अग्न्यर्थं शरणम् ॥ २१ ॥

शरणं गृहं तदग्न्यर्थमेव ॥ २१ ॥

आकाशे स्वयम् ॥ २२ ॥

स्वयं चाऽऽकाश एव वसेत् ॥ २२ ॥

अनुपस्तीर्णे शय्यासने ॥ २३ ॥

शयनं चाऽऽसन चाऽनुपस्तीर्णे देशे कुर्यात् न तु किञ्चिदुपस्तीर्य ॥२३॥

नवे सस्ये प्राप्ते पुराणमनुजानीयात् ॥ २४ ॥

नवे धान्ये श्यामाकनीवारादौ प्राप्ते जाते पुराणं पूर्वसञ्चितं सस्यमनुजानीयात् परित्यजेत् । तत्र मनुः—

(२)'त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसञ्चितम् ।
जीर्णानि चैव वासांसि पुष्पमूलफलानि च ॥' इति ॥ २४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने द्वाविंशी कण्डिका ॥ २२ ॥

---

१. अनवक्लाविताग्रन्थिरूर्ध्वशकुनपुच्छलप्रकृतिकश्चरुः । २. म. स्मृ. ६. २५.

भूयांसं वा नियममिच्छन्नन्वहमेव पात्रेण
सायंप्रातरर्थमाहरेत् ॥ १ ॥

इदमेकाकिनो वानप्रस्थस्य । भूयांसं नियममिच्छन्न सस्यं सञ्चिनुयात् । किं तर्हि ? अन्वहमेव पात्रेण येनकेनचित् सायंप्रातश्चार्थमशनीयमात्रमाहरेत् वानप्रस्थेभ्य एव ॥ १ ॥

एवं कियन्तचित्कालं वर्तयित्वा—

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेदन्ततः
प्रवृत्तानि ततोऽपो वायुमाकाशमित्यभिनि-
श्चयेत् । तेषामुत्तर उत्तरस्संयोगः
फलतो विशिष्टः ॥ २ ॥

सर्वं गतम् ॥ २ ॥

निरूपिता आश्रमाः । अथेदानीं पक्षप्रतिपक्षरूपेण तेषामेव प्राधान्यमप्राधान्यं च निरूप्यते—

अथ पुराणे श्लोकावुदाहरन्ति—
अष्टाशीतिसहस्राणि ये प्रजामीषिर ऋषयः ।
दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे ॥ ३ ॥

अष्टाशीतिसहस्राणि ये गृहस्था ऋषयः प्रजामीषिरे प्रजातिमभ्यनन्दन् ते अर्यम्णो यो दक्षिणेन पन्थाः दक्षिणायनमार्गः तं प्राप्य छान्दोग्योक्तेन (१)धूमादिमार्गेण गत्वा पुनरपि सम्भूय श्मशानानि भेजिरे मरणं प्रतिपेदिरे । जायस्व म्रियस्वेत्याजीवं जीवभावमापेदिर इति गृहस्थानां निन्दा ॥३॥

अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषयः । उत्तरे-
णार्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते ॥ ४ ॥

ये(२)तु प्रजातिं नाभ्यनन्दन् ते उत्तरायणमार्गेण(३) अर्चिरादिमार्गेण गत्वा अमृतत्वं विभक्तिव्यत्ययः, अमृतत्वाय कल्पते वचनव्यत्ययः कल्पन्ते समर्थास्सम्पद्यन्ते ॥ ४ ॥

इत्यूर्ध्वरेतसां प्रशंसा ॥ ५ ॥

---

१. छा. उ ५ १०. ३–६ २. प्रजा. इति च. पु ३ छा. उ. ५. १०. १,२

गृहस्थादन्ये त्रयोऽपि ऊर्ध्वरेतसः। तेषामेषा प्रशंसेति ॥ ५ ॥

पुनरपि तेषामेव प्रकारान्तरेण प्रशंसा—

अथाऽपि सङ्कल्पसिद्धयो भवन्ति ॥ ६ ॥

अथाऽपि अपि च सङ्कल्पादेव सिद्धयो भवन्ति तेषामूर्ध्वरेतसाम् ॥६॥

तत्रोदाहरणम्—

यथा वर्षे प्रजा दानं दूरेदर्शनं मनोजवता यच्चाऽन्यदेवंयुक्तम् ॥ ७ ॥

यदि महत्यामनावृष्टौ(१) सत्यां 'वर्षतु देव' इति ते कामयेरन् तदा कामवर्षी पर्जन्यो भवति। यदि वा कञ्चिदपुत्रमनुगृह्णीयुः—पुत्रोऽस्य जायतामिति स पुत्रवानेव भवति। यदि वा (२)चोलेष्वक्षस्थितास्तदैव हिमवन्तं दिदृक्षेरन् तथैव तद्भवति। मनस इव जवो येषां ते मनोजवाः तेषां भावो मनोजवता। यदि कामयेरन् अमुं देशमियत्यामेव कालकलायां प्राप्नुयामिति, ततो यावता कालेन मनस्तं देशं प्राप्नोति तावता तं देशं प्राप्नुयुरिति। यच्चान्यदेवंयुक्तम् रोगिणामारोग्यादि तदपि सङ्कल्पादेव तथा भवति ॥ ७ ॥

यस्मादेवम्—

तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानाश्रमानेतानेके ब्रुवते ॥ ८ ॥

तस्माच्छ्रुतितः 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'त्यादिश्रुत्यनुगतत्वादुक्तेन प्रकारेण प्रत्यक्षफलत्वाच्च एतानूर्ध्वरेतसामाश्रमान् विशिष्टान् गार्हस्थ्यादुत्कृष्टानेके ब्रुवत इति ॥ ८ ॥

तदिदं गार्हस्थ्योत्कर्षप्रतिपादनेन निराकरोति—

त्रैवृद्यविद्वांसो वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसम्बन्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यन्ते ॥ ९ ॥

---

१. सत्यां इति नास्ति च. पु. २ 'दूरेषु' इति. छ. पु.

त्रयवयवा विद्या त्रिविद्या त्रयो वेदाः । तां ये पाठतश्चाऽर्थतश्च विदन्ति ते त्रैविद्याः । तेषु पक्वज्ञानास्त्रविद्यवृद्धाः । तेषां (१)वेदशास्त्रविदां वेदा एव प्रमाणम् अतीन्द्रियेऽर्थे इति, निष्ठा निर्णयः । यथाह भगवान् जैमिनिः—(२)'चोदनालक्षणोऽर्थो धर्मः, इति(३) प्रत्यक्षमनिमित्तमि'ति च । ततश्च तत्र वेदे यानि कर्माणि श्रूयन्ते, किंलक्षणानि ? व्रीहियवादिभिस्सम्बद्धानि "उच्चैः ऋचा क्रियते, उपांशु यजुषे'त्येवंप्रकाराणि तैर्विरुद्ध आचारः प्रमाणं न भवतीति मन्यन्ते । एतदुक्तं भवति—सर्वेषु वेदेषु सर्वासु च शाखासु अग्निहोत्रादीनि(४) विश्वसृजामयनपर्यन्तानि कर्माण्येव तात्पर्यतया विधीयन्ते । अतो गार्हस्थ्यमेव श्रेष्ठम् । ऊर्ध्वरेतसां त्वाश्रमास्तद्विरुद्धा नैवाऽऽश्रयणीयाः यदि वेदाः प्रमाणमिति । तथा च गौतमः—'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्ये'ति । एवं गार्हस्थ्यं प्रशस्यते ॥ ९ ॥

श्मशानानि भेजिर इति निन्दां परिहरति—

यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते ॥ १० ॥

यत्तु गृहस्थानां श्मशानं श्रूयते स एष नानाकर्मणामग्निहोत्रादीनामन्ते पितृमेधाख्यः पुरुषसंस्कारो विधीयते । न तु पिशाचा भूत्वा श्मशानमेव सेवन्त इति ॥ १० ॥

कुत इत्याह—

ततः परमनन्त्यं फलं स्वर्ग्यशब्दं श्रूयते ॥१२॥

ततः परं श्मशानकर्मणोऽनन्तरम्, अनन्त्यमपरिमितं स्वर्गशब्दवाच्यं फलं श्रूयते—'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकमेती'ति । अनन्त्य स्वर्ग्यमिति(४) यकारश्छान्दसः उपजनः अपपाठो वा ॥१२॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने त्रयोविंशी कण्डिका ॥२३॥

---

१. वेदशास्त्रार्थविदा इति छ. पु. २ जै. सू १. १. २. ३. जै सू १. १. ४.

४. सहस्रवत्सरसाध्य सत्र विश्वसृजामयनम् । अत्र संवत्सरशब्दो दिनपर इति मीमांसका । षू. मी. ६. ७. १३

५. यकारोपजनच्छान्दसः इति भवितुं युक्तम् ।

पुनरपि गार्हस्थ्यमेव प्रकारान्तरेण स्तौति—

अथाप्यस्य प्रजातिममृतमाम्नाय आह—प्रजामनु प्रजायसे तदु ते मर्त्याऽमृतामिति ॥ १ ॥

अथाऽपि अपि च अस्य गृहस्थस्य प्रजाप्तिं **प्रजासन्तानम्** अमृतम् अमरणम् आम्नायो वेद आह हे मर्त्य **मरणधर्मन्** ! प्रजां **जायमानामनु** त्व प्रजायसे त्वमेव प्रजारूपेण जायसे । तदेव ते **मरणधर्मिणः अमृतममरणमिति** । न त्व म्रियसे, यतस्त्वं प्रजारूपेण तिष्ठसीति ॥ १ ॥

उपपन्न चैतदित्याह—

अथाऽपि स एवाऽयं विरूढः पृथक्प्रत्यक्षेणोपलभ्यते दृश्यते चाऽपि सारूप्यं देहत्वमेवाऽन्यत् ॥ २ ॥

अपि च स एवाऽय पृथग्विरूढः प्रत्यक्षेणोपलभ्यते । **स एव द्विधाभूत इव लक्ष्यते** । दृश्यते हि सारूप्य द्वयोः । देहमात्रं तु भिन्नम् । देहत्वमिति स्वार्थिकस्त्वः ॥ २ ॥

यदि पुत्ररूपेणाऽवस्थान, किमेतावतेत्याह—

ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां साम्परायेण कीर्तिं स्वर्गं च वर्धयन्ति ॥ ३ ॥

ते पुत्राश्शिष्टेषु चोदितेषु कर्मसु वर्तमाना अवस्थिता· पूर्वेषा पितृपितामहादीनां साम्परायेण **परलोकेन सम्बद्धानां** कीर्तिं स्वर्गं च वर्धयन्ति—अस्याऽयं पुत्र एवं कर्मा, अस्याऽय पौत्र इति । स्वर्गं च वर्धयन्ति । कीर्तिमतां हि स्वर्गवासश्श्रूयते ॥ ३ ॥

एवमवरोऽवरः परेषाम् ॥ ४ ॥

एवमनेन प्रकारेण अवरोऽवर परेषां कीर्तिं स्वर्गं च वर्धयति ॥ ४ ॥

आभूतसम्प्लवात्ते स्वर्गजितः ॥ ५ ॥

भूतसम्प्लवो महाप्रलयः । आ तस्मात्ते पुत्रिणस्स्वर्गजितो भवन्ति ते च ५

पुनस्सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ॥६॥

प्रलयानन्तरं सर्गः, तत्र संसारस्य बीजार्थाः प्रजार्थाः प्रजापतयो भवन्तीति भविष्यत्पुराणे श्रूयते ॥ ६ ॥

अथाऽपि प्रजापतेर्वचनम् ॥ ७ ॥

अपि च प्रजापतेरपि वाक्यमस्मिन्नर्थे भवति। गार्हस्थ्यमेव वरिष्ठमिति ॥ ७ ॥

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम्। य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन्निति ॥ ८ ॥

त्रयीं विद्यां त्रयाणां वेदानामध्ययनम्। ब्रह्मचर्यमष्टाचत्वारिंशदादिकम्। प्रजातिं प्रजोत्पादनम्। श्रद्धामास्तिक्यम्। तप उपवासादि। यज्ञमग्निहोत्रादिक सोमयागान्तम्। अनुप्रदानं अन्तर्वेदि बहिर्वेदि च दानम्। य एतानि कर्माणि कुर्वते, तैरित् तैरेव सह वयं स्मः त एवाऽस्माकं सहायाः। अन्यत्तु ऊर्ध्वरेतसामाश्रमादिक प्रशंसन् पुरुषो रजः पांसुर्भूत्वा ध्वंसते नश्यति। इतिशब्दो वचनसमाप्त्यर्थः। यथैवं तर्हि शिष्टेषु वर्तमानाः पुत्राः पूर्वेषां कीर्तिं स्वर्गं च वर्धयन्ति, तथा प्रतिषिद्धेषु वर्तमाना अकीर्तिं नरकं च वर्धयेयुः ॥ ८ ॥

तत्राऽऽह--

तत्र ये पापकृतस्त एव ध्वंसन्ति यथा पर्णं वनस्पतेर्न परान् हिंसन्ति ॥ ९ ॥

तत्र प्रजासन्ताने ये पापस्य कर्तारः, त एव ध्वंसन्ते न परान् पित्रादीन् हिंसन्ति। यथा यदेव पर्णं वनस्पतेः कीटादिभिर्दूषितं तदेव पतति, न वनस्पतिं शाखान्तरं वा पातयति तद्वत् ॥ ९ ॥

एतदेवोपपादयति--

नाऽस्याऽस्मिँल्लोके कर्मभिस्सम्बन्धो विद्यते तथा परस्मिन् कर्मफलैः ॥ १० ॥

अस्येति सामान्यापेक्षमेकवचनम्। अस्य पित्रादेः पूर्वपुरुषस्य अस्मिन् लोके पुत्रकृतैः कर्मभिः सम्बन्धो न विद्यते। दृष्टान्तोऽयम्। यथा पुत्रकृतेषु कर्मसु पित्रादेः कर्तृत्वं नाऽस्ति, तथा परस्मिन्नपि लोके कर्मफलैरपि सम्बन्धो नाऽस्तीत्यर्थः ॥ १० ॥

तदेतेन वेदितव्यम् ॥ ११ ॥

यदुक्तं ये पापकृतस्त एव ध्वंसन्ति न परान् हिंसन्तीति तदर्थकर्मणेतेन वक्ष्यमाणेन हेतुना वेदितव्यम् ॥ ११ ॥

प्रजापतेर्ऋषीणामिति सर्गोऽयम् ॥ १२ ॥

प्रजापतेर्हिरण्यगर्भस्य ऋषीणां च मरीच्यादीनामयं सर्गो देवादिस्तिर्यगन्तः। ते चाऽध्वस्ता एव स्वे स्वे पदे वर्तन्ते। यदि च पुत्राः पापकृतः स्वयं ध्वंसमानाः परानपि ध्वंसयेयुः, तदैतन्नोपपद्यते—पुण्यकृतः सुखेनाऽद्यापि वर्तन्ते इति ॥ १२ ॥

अत्रोदाहरणमाह—

तत्र ये पुण्यकृतस्तेषां प्रकृतयःपरा ज्वलन्त्य उपलभ्यन्ते ॥ १३ ॥

तत्र स्वर्गे ये पुण्यकृतो वसिष्ठादयस्तेषां प्रकृतयश्शरीराणि परा उत्कृष्टाः ज्वलन्त्यः दीप्यमाना उपलभ्यन्ते, दिवि यथा सप्तर्षिमण्डलम्। श्रूयते च(१) 'सुकृतां वा एतानि ज्योतींषि, यन्नक्षत्राणी'ति। इदमपि प्रमाणं न पुत्राणां ध्वंसे पूर्वेषां प्रध्वंस इति ॥ १३ ॥

स्यात्तु कर्मावयवेन तपसा वा कश्चित्सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसिद्धिश्च स्यान्न तु तज्ज्यैष्ठ्यमाश्रमाणाम् ॥ १४ ॥

कर्मावयवेन पूर्वार्जितानां कर्मणामेकदेशेन भुक्तशेषेण तपसा वा तीव्रेण कश्चिदूर्ध्वरेतास्सहशरीरेणाऽन्तवन्तं लोकं जयतीति यत्तत् स्यात् सम्भवेदपि। यच्च सङ्कल्पादेव सिद्धिरस्यादिति, तदपि स्यात् न तु तदाश्रमाणां ज्यैष्ठ्यकारणमिति। तदेव 'मैकाश्रम्यं त्वाचार्या' इत्ययमेव पक्षः स्थापितः। अन्ये मन्यन्ते—सर्वे आश्रमा दूषिता भूषिताश्च। ततस्तेषु सर्वेषु यथोपदेशमन्यत्रो वर्तमानः क्षेमं गच्छतीत्येतदेव स्थितमिति ॥ १४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने चतुर्विंशी कण्डिका ॥ १७ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायां
उज्ज्वलायां द्वितीयप्रश्ने नवमः पटलः ॥९॥

१. तै. स. ५, ५ १.

अथ दशमः पटलः ॥

व्याख्याताःसर्ववर्णानां साधारणवैशेषिका धर्मा राज्ञस्तु विशेषाद्वक्ष्यामः ॥ १ ॥

उक्तवक्ष्यमाणसङ्कीर्तनं श्रोतृबुद्धिसमाधानार्थम् । अहिंसासत्यास्तेयादयः सर्ववर्णानां साधारणधर्माः । अध्ययनादयस्त्रयाणाम् । अध्यापनादयो ब्राह्मणस्य । युद्धादयः क्षत्रियस्य । कृष्यादयो वैश्यस्य । शुश्रूषा शूद्रस्य । राजाऽत्राभिषिक्तो विविक्षितः । तस्यैव हि वक्ष्यमाणं धर्मजातं सम्भवति । तस्य विशेषाद्विशेषतो यद्वक्तव्यं तद्वक्ष्यामः । विशेषानिति द्वितीयान्तपाठस्तु युक्तः ॥ १ ॥

दक्षिणाद्वारं वेश्म पुरं च मापयेत् ॥ २ ॥

वेश्म गृहं पुर नगरं तदुभयमपि दक्षिणाद्वारं मापयेत् कारयेत् स्थपत्यादिभिः । दक्षिणपार्श्वे द्वारं यस्य तत्तथोक्तम् ॥ २ ॥

अन्तरस्यां पुरि वेश्म ॥ ३ ॥

सर्वेषामेव प्राकाराणां मध्ये या पूस्तस्यामन्तरस्थां पुरि वेश्म मापयेदात्मनः ॥ ३ ॥

तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ॥ ४ ॥

तस्य वेश्मनः पुरस्तादावसथः कारयितव्यः । एत्य वसन्त्यस्मिन्नित्यावसथः आस्थानमण्डपः । तस्यामन्त्रणमिति संज्ञा(१) ॥ ४ ॥

दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं सन्दृश्येत बहिरन्तरं चेति ॥ ५ ॥

दक्षिणेनेत्येनबन्तम् । पुरमिति(२)'एनपा द्वितीये'ति द्वितीयान्तम् । पुरस्य दक्षिणतः अदूरे सभा कारयितव्या । दक्षिणोदग्द्वारा दक्षिणस्यामुत्तरस्यां च दिशि द्वारं यस्यास्सा तथोक्ता । किमर्थमुभयत्र द्वारमिति चेत् । यद्बहिर्वृत्तं यच्चाऽभ्यन्तरं तदुभयमपि यथा सन्दृश्येतेत्येवमर्थमिति । सैषा द्यूतसभा । तस्यां द्यूतार्थिनः प्रविशन्तीति तदायस्थानं राज्ञः ॥ ५ ॥

---

१. तत्र द्यूतिथय आमन्त्र्यन्ते इत्यधिकः पाठः च. पु. २. पा. सू. १. ३. ३१.

सर्वेष्वेवाऽजस्रा अग्नयस्स्युः ॥ ६ ॥

वेश्मन्यावसथे सभायामित्येतेषु सर्वेष्वेव स्थानेषु लौकिका अग्नयोऽजस्राः स्युः । अविच्छेदेन धार्याः ॥ ६ ॥

अग्निपूजा च नित्या यथा गृहमेधे ॥ ७ ॥

तेषु चाग्निषु नित्यमग्निपूजा कार्या । यथा गृहमेधे औपासने सायंप्रातर्होम इत्यर्थः । मन्त्राश्चापि तावेव, द्रव्यमपि तदेव ॥ ७ ॥

आवसथे श्रोत्रियावराध्यानतिथीन् वासयेत् ॥ ८ ॥

आवसथाख्ये स्थाने अतिथीन् वासयेत् । ते विशेष्यन्ते श्रोत्रियावराध्यानिति । अवरपर्यायोऽवराध्यशब्दः । यदि सर्वान्वासयितुं न शक्नोति श्रोत्रियानपि तावद्वासयेदिति ॥ ८ ॥

तेषां यथागुणमावसथाः शय्याऽन्नपानं च विदेयम् ॥ ९ ॥

तेषामतिथीनां यथागुणं विद्यावृत्तानुगुणमावसथादि विदेयं विशेषेण देयम् । आवसथा अपवरकादयः । शय्या खट्वादयः । अन्नमोदनादि । पान(१) तक्रादि ॥ ९ ॥

गुरूनमात्यांश्च नातिजीवेत् ॥ १० ॥

गुरवः पित्रादयः । अमात्या मन्त्रिणः । तान्नाऽतिजीवेत् भक्ष्यभोज्याच्छादनादिषु तान्नाऽतिशयीत ॥ १० ॥

न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वाऽवसीदेदभावाद्बुद्धिपूर्वं वा कश्चित् ॥ ११ ॥

अस्य राज्ञो विषये राष्ट्रे क्षुधा आहाराभावेन बुभुक्षया रोगेण व्याधिना हिमेन नीहारेण वर्षादीनामप्युपलक्षणमेतत् । आतपः आदित्यरश्मितापः । एतैः प्रकारैरभावात् बुद्धिपूर्वं वा न कश्चिद्ब्राह्मणोऽप्यवसीदेत् अवसन्नो न स्यात् । राज्ञो ह्ययमपराधो यदाहाराद्यभावेन कश्चिदवसन्नः स्यात् । बुद्धिपूर्वे चेत्यत्रोदाहरणम्—यदा कश्चित् करमृणं वा दाप्यो भवति, तदा नाऽसौ हिमातपयोरुपनिवेशयितव्यः भोजनाद्वा निरोद्धव्यः । तथा कुर्वाणं राजा दण्डयेदिति ॥ ११ ॥

---

१. तक्रसूपादि इति च. पु. तक्रादिसूपादि इति क. पु.

सभाया मध्येऽधिदेवनमुद्धृत्याऽवोक्ष्याऽक्षान्निवपेद्युग्मान् वैभीतकान् यथार्थान् ॥ १२ ॥

पूर्वोक्तायाः सभाया मध्ये अधिदेवन यस्योपरि कितवा अक्षैर्दीव्यन्ति तत्स्थानमधिदेवनम् । तत् पूर्वं काष्ठादिना उद्धन्ति उद्धृत्याऽवोक्षति । अवोक्ष्य तत्राऽक्षान् युग्मसङ्ख्याकान्वैभीतकान् विभीतकवृक्षस्य विकारभूतान् यथार्थान् यावद्भिर्द्यूतं निर्वर्तते, तावतो निवपति । कः ? यस्तत्र राज्ञा नियुक्तः सभिको नाम ॥ १२ ॥

आर्याः शुचयस्सत्यशीला दीवितारस्स्युः ॥ १३ ॥

आर्याः द्विजातयः । (१)शुचयोऽर्थशुद्धाः । सत्यशीलास्सत्यवादिनः । एवंभूता एव पुरुषास्तत्र दीवितारः देवितारः स्युः । त एव तत्र दीव्येयुरित्यर्थः । तेच तत्र देवित्वा यथाभाषितं पणं सभिकाय दत्वा गच्छेयुः । स च राज्ञे तमायमहरहः प्रतिमासं प्रतिसंवत्सरं वा दद्यात् । स एव च स्थानान्तरे दीव्यतो दण्डयेत्, सभास्थाने च कलहकारान् । तत्र याज्ञवल्क्यः—

(२)'फलहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्द्यूतकितवादितराद्दशकं शतम् ॥
स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्राहयेज्जैत्रं दद्यात्सत्यं वचः क्षमी ॥' इति ॥ १३ ॥

आयुधग्रहणं नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र न विशेरन् ॥ १४ ॥

आयुधग्रहणादीनि राजाधीनेभ्यो राजाश्रया ये पुरुषास्तेभ्योऽन्यत्र न विशेरन् न भवेयुः । उत्सवादिष्वन्यत्रापि भवतीत्याचारः ॥ १४ ॥

क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते ॥ १५ ॥

यस्य राज्ञो विषये ग्रामेऽरण्ये च चोरभयं नास्ति स एव राजा क्षेमकृत् क्षेमङ्करः । न त्वन्यः शत तुभ्यं शतं तुभ्यमिति ददानोऽपि ॥ १५ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने पञ्चविंशी कण्डिका ॥ २५ ॥

---

१. शुचयो धर्मशुद्धाः इति च. पु. २. या. स्मृ. २. १९९; २००

भृत्यानामनुपरोधेन क्षेत्रं वित्तं च ददद्ब्राह्मणेभ्यो यथार्हमनन्ताँल्लोकानाभिजयति ॥ १ ॥

भृत्यानामनुपरोधेन **भृत्यवर्गस्य यथोपरोधो न भवति तथा ब्राह्मणेभ्यो** यथार्हं **विद्याकृत्याद्यनुरूप क्षेत्रं वित्त च दद्यात्** । **एवं** दददनन्तॉल्लोकानाभिजयति॥१॥

ब्राह्मणस्वान्यपजिगीषमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति ॥ २ ॥

ब्राह्मणस्वानि **चोरादिभिरपहृतानि** अपजिगीषमाणः ब्राह्मणेभ्यो **दानाया**पजित्य **ग्रहीतुमिच्छन्** यो राजा युद्धे **चोरैर्हन्यते** तमात्मयूपोऽनन्तदक्षिणो यज्ञ इत्याहुर्धर्मज्ञाः । सङ्ग्रामो यज्ञः । तस्य आत्मा **यूपस्थानीयः** । आत्मेति शरीरमाह । अन्तरात्मा तु पशुस्थानीयः । प्रत्यानिनीषितं तु द्रव्यं दक्षिणा । सूत्रे तु 'तं यज्ञ इत्याहु'रिति गौणो वादः ॥ २ ॥

एतेनाऽन्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ॥ ३ ॥

प्रयोजनं चोरादिभिरपहृतानां ब्राह्मणस्वानां प्रत्यानयनादि, **तदर्थं** युध्यमाना ये शूरास्तनुत्यजो **भवन्ति** तेऽप्येतेन राज्ञा व्याख्याता **आत्मयूपा यज्ञा अनन्तदक्षिणा इति** ॥ ३ ॥

ग्रामेषु नगरेषु चाऽऽर्याञ्छुचीन् सत्यशीलान् प्रजागुप्तये निदध्यात् ॥ ४ ॥

आर्याञ्छुचीन् सत्यशीलानिति व्याख्यातम् । **एवंभूतान् पुरुषान्** ग्रामेषु नगरेषु च **प्रजानां रक्षणार्थं** निदध्यात् **नियुञ्जीत** ॥ ४ ॥

तेषां पुरुषास्तथागुणा एव स्युः ॥ ५ ॥

तेषां **नियुक्तानां** ये पुरुषा **नियोज्याः** तेऽपि तथागुणा आर्यादिगुणा एव **स्युः** ॥ ५ ॥

सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ॥ ६ ॥

सर्वतः **सर्वासु दिक्षु** योजनमात्रं **नगरं** तस्करेभ्यो **रक्षणीयम्** । रक्ष्यग्नि**त्यपपाठः** ॥ ६ ॥

क्रोशो ग्रामेभ्यः ॥ ७ ॥

ग्रामेभ्यस्तु सर्वासु दिक्षु क्रोशो रहयः । ग्रामेभ्यः इति(१) यतश्चाऽऽवकालपरिमाणं तत्र पञ्चमी वक्तव्ये'ति पञ्चमी ॥ ७ ॥

तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम् ॥ ८ ॥

तत्र योजनमात्रे क्रोशमात्रे वा यन्मुष्यते चोर्यते ते नियुक्ताः स्वामिभ्यस्तत्प्रतिदद्यू राज्ञा तैस्तत् प्रतिदाप्यम् राजा तैः प्रतिदापयेदिति प्रायेण दन्त्योष्ठ्य वकारं पठन्ति ॥ ८ ॥

धार्म्यं शुल्कमवहारयेत् ॥ ९ ॥

तत्र गौतमः—

(२)'विंशतिभागश्शुल्कः पण्ये' इति । यद्वणिग्भिर्विक्रीयते हिङ्ग्वादि, तस्य विंशतितमं भागं राजा गृह्णीयात् । तस्य शुल्क इति संज्ञा । एष धार्म्यः धर्म्यश्शुल्कः । तमधिकृतैरेवाऽवहारयेत् ग्राहयेदिति । मूलादिषु विशेषस्तैनैवोक्तः—(३)'मूलफलपुष्पौषधिमधुमांसतृणेन्धनानां षाष्टिकप'मिति ॥ ९ ॥

अकरः श्रोत्रियः ॥ १० ॥

श्रोत्रियः करं न दाप्यः । अन्ये दाप्याः ॥ १० ॥

सर्ववर्णानां च स्त्रियः ॥ ११ ॥

अकराः । वर्णग्रहणात् प्रतिलोमादिस्त्रियो दाप्याः ॥ ११ ॥

कुमाराश्च प्राक् व्यञ्जनेभ्यः ॥ १२ ॥

व्यञ्जनानि श्मश्र्वादीनि । यावत्तानि नोत्पद्यन्ते तावदकराः ॥ १२ ॥

ये च विद्यार्था वसन्ति ॥ १३ ॥

विद्यामुद्दिश्य ये गुरुषु वसन्ति ते जातव्यञ्जना अप्यसमाप्तवेदा अकराः ॥ १३ ॥

तपस्विनश्च ये धर्मपराः ॥ १४ ॥

तपस्विनः कृच्छ्रचान्द्रायणादिप्रवृत्ताः । धर्मपरा, अफलाकाङ्क्षिणः नित्यनैमित्तिकधर्मनिरताः । धर्मपरा इति किम्? ये अभिचारकामा मन्त्रसिद्धये तपस्तप्यन्ते ते अकरा मा भूवन्निति ॥ १४ ॥

---

१. पा. सू. (वा) १. ४. ३१. २. गौ. ध १०. २६. ३. गौ. ध. १०. २७.

शूद्रश्च पादावनेक्ता ॥ १५ ॥

यस्त्रैवर्णिकानां पादावनेक्ता स शूद्रोऽप्यकरः ॥ १५ ॥

अन्धमूकबधिररोगाविष्टाश्च ॥ १६ ॥

एतेऽप्यकराः यावदान्ध्यादि ॥ १६ ॥

ये व्यर्था द्रव्यपरिग्रहैः ॥ १७ ॥

ये च परिव्राजकादयः द्रव्यपरिग्रहैर्व्यर्था निष्प्रयोजनाः शास्त्रतो येषां द्रव्यपरिग्रहः प्रतिषिद्धः तेऽप्यकराः ।

तथा च वसिष्ठः—

(१)"अकरः श्रोत्रियो राजा पुमाननाथः प्रव्रजितो बालवृद्धतरुणप्रशान्ता" इति ॥ १७ ॥

अबुद्धिपूर्वमलङ्कृतो युवा परदारमनुप्रविशन्
कुमारीं वा वाचा बाध्यः ॥ १८ ॥

यत्र परदारा आसते कुमारी वा पतिंवरा, तत्र युवा अलङ्कृतः अबुद्धिपूर्वमज्ञानादनुप्रविशन् वाचा बाध्यः-अत्रेयमास्ते, माऽत्र प्रविशेति ॥१८॥

बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः ॥ १९ ॥

यस्तु जानन्नेव दुष्टभावः प्रलोभनार्थी प्रविशति स दण्ड्यो द्रव्यानुरूपमपराधानुरूपं च । दुष्टभावग्रहणमाचार्यादिप्रेषितस्य प्रवेशे दण्डो मा भूदिति ॥ १९ ॥

सन्निपाते वृत्ते शिश्नच्छेदनं सवृषणस्य ॥ २० ॥

सन्निपातो मैथुनं, तस्मिन् वृत्ते शिश्नच्छेदन दण्डः । सवृषणस्येत्युपसर्जनस्यापि शिश्नस्य विशेषणम् । सवृषणस्य शिश्नस्य च्छेदनमिति ॥२०॥

कुमार्यां तु स्वान्यादाय नाड्यः ॥ २१ ॥

कुमार्यां तु सन्निपाते वृत्ते सर्वस्वहरणं कृत्वा देशान्निर्वास्य[1], न शिश्नच्छेदः ॥ २१ ॥

अथ भृत्ये राज्ञा ॥ २२ ॥

अथ सन्निपातात्प्रभृति ते परदारकुमार्यौ राज्ञा भृत्ये ग्रासाच्छादनप्रदानेन भर्तव्ये ॥ २२ ॥

---

१. व. ध. १९. २३.

रक्ष्ये चाऽत ऊर्ध्वं मैथुनात् ॥ २३ ॥

अतः प्रथमात् सन्निपातात् ऊर्ध्वं मैथुनाच्च रक्ष्ये यथा पुनः मैथुनं नाचरतस्तथा कार्यं ॥ २३ ॥

निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत् ॥ २४ ॥

यदि ते एवं नरुद्धे निर्वेषणमभ्युपेतः अभ्युपगच्छतः तदा निर्वेषाभ्युपाये तु स्वामिहस्ते अवसृजेत् दद्यात् । परदार भर्त्रे श्वशुराय वा, कुमारीं पित्रे भ्रात्रे वा । अनभ्युपगमे तु प्रायश्चित्तस्य यावज्जीवं निरोधः ॥ २१ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने षड्विंशी कण्डिका ॥ २६ ॥

चरिते यथापुरं धर्माद्धि सम्बन्धः ॥ १ ॥

चरिते तु निर्वेषे यथापुरं यथापूर्वं धर्मात् , तृतीयार्थे पञ्चमी । धर्मेण सम्बन्धो भवति । हिशब्दो हेतौ । यस्मादेवं तस्मात् अवश्य प्रायश्चित्तं कारयितव्ये । ततो यज्ञविवाहादौ न कश्चिद्दोष इति ॥ १ ॥

परदारप्रसङ्गादुच्यते —

सगोत्रस्थानीयां न परेभ्यस्समाचक्षीत ॥ २ ॥

योऽनपत्यः आत्मनश्शक्त्यभावं निश्चित्य क्षेत्रजं पुत्रमिच्छन् भार्यां(१)परत्र नियुङ्क्ते, मृते वा तस्मिन् तत्पित्रादयस्सन्तानकाङ्क्षिणः, तद्विषयमेतत् । कुलान्तरप्रविष्टा सगोत्रस्थानीया । सा हि पूर्वं पितृगोत्रा सती(२) भर्तृगोत्रधर्मैरधिक्रियेत । अतः भर्तृपक्ष्याणां सगोत्रस्थानीया भवति । भर्ता तु साक्षात्सगोत्रः । तां सगोत्रस्थानीयां न परेभ्योऽसगोत्रेभ्यस्समाचक्षीत—इयमनपत्या, अस्यामपत्यमुत्पाद्यतामिति । सगोत्रायैव तु समाचक्षीत, तत्रापि देवराय, तदभावे(३) सपिण्डेभ्यः ॥

कः पुनस्सगोत्रस्य विशेषः ? तमाह—

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ॥ ३ ॥

हि यस्मात् स्त्री कन्या प्रदीयमाना कुलायैव प्रदीयत इत्युपदिशन्ति धर्म

---

१. परस्मै. इति. क. पु. २. भर्तृगोत्रधर्मेऽधिक्रियते ।

३. सपिण्डाय. इति. च पु.

ज्ञाः। तस्मात् सगोत्रायैव समाचक्षीतेति(१) ॥ ३ ॥

तमिमं नियोगं दूषयति--

तदिन्द्रियदौर्बल्याद्विप्रतिपन्नम् ॥ ४ ॥

यद्यप्येव पूर्वे कृतवन्तः, तथाऽपि तदद्यत्वे विप्रतिपन्नं विप्रतिषिद्धम्। कुतः? इन्द्रियदौर्बल्यात्। दुर्बलेन्द्रिया ह्यद्यत्वे मनुष्याः। ततश्च शास्त्रव्याजेनापि भर्तृव्यतिक्रमेऽतिप्रसङ्गस्स्यादिति ॥ ४ ॥

सगोत्रविषयेऽपि यो विशेषस्सोऽपि नास्तीत्याह--

अविशिष्टं हि परत्वं पाणेः ॥ ५ ॥

येन पाणिना पूर्वमग्निसाक्षिकं पाणिगृहीतः कन्यायाः, तस्मात् पाणेरन्यो भवति सगोत्रस्याऽपि पाणिः। यस्मादेवं पाणे. परत्वमविशिष्ट समानम्? तस्मादविशेष इति। अविशिष्टमित्यपपाठः ॥ ५ ॥

पाणिरन्यो भवतु, को दोषः?

तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ॥ ६ ॥

तस्य पाणेर्व्यतिक्रमे उभयोर्दम्पत्योः नरको भवति। खलुपुनरिति प्रसिद्धिद्योतकौ निपातौ। अतः पत्याऽपि न स पाणिस्त्याज्यः यः पूर्वं गृहीतः। भार्ययाऽपि न स पाणिस्त्याज्यो येन पूर्वमात्मानः पाणिर्गृहीतः ॥ ६ ॥

नियमारम्भणो हि वर्षीयानभ्युदय एवमारम्भणादपत्यात् ॥ ७ ॥

आरभ्यतऽनेनेत्यारम्भणः योऽयं दम्पत्योः परस्परनियमः, स आरम्भणो यस्य स नियमारम्भण.। एवंभूतो योऽभ्युदयस्स एवं वर्षीयान्। वृद्धतरः। कस्मात् वर्षीयान्? एवमुक्तप्रकारेण नियोगलक्षणेन यदपत्यमारभ्यते तस्मादेवमारम्भणादपत्याद्वर्षीयानिति। अपत्यादिति पाठः। आपत्यादिति प्रायेण पठन्ति ॥ ७ ॥

नाऽस्य आर्यश्शूद्रायाम् ॥ ८ ॥

आर्यस्त्रैवर्णिकः, शूद्रायां परभार्यायां प्रसक्तो राज्ञा राष्ट्रान्नाऽस्यः निर्वास्यः ॥ ८ ॥

---

१. "कुलाय कन्या क्वचिदेवेषु दीयते। गोत्रजे न केनचिदप्यनुभूयते। उक्तं च बृहस्पतिना—अभर्तृका भ्रातृभार्या ग्रहणं चातिदूषितम्। कुले कन्या प्रदानं च दशस्वन्येषु दृश्यते इति" इत्यधिकः पाठ. घ. पु.

वध्यश्शूद्र आर्यायाम् ॥ ९ ॥

